अर्हम्

श्रीनगर्षिगणिविरचितदीपिकावृत्तिविभूषितं

पञ्चमगणधरश्रीसुधर्मस्वामिसन्दृब्धं

श्रीस्थानाङ्गसूत्रम् ।

प्रथमो विभागः

संशोधन-सम्पादनप्रेरकाः

प.पू.प्राचीनश्रुतोद्धारक-वैराग्यदेशनादक्ष-आचार्यदेव-

श्रीमद्विजय-हेमचन्द्रसूरीश्वराः

प्रकाशकः

श्रीजिनशासन आराधना ट्रस्ट

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्रीनगर्षिगणिविरचितदीपिकावृत्तिविभूषितं
पञ्चमगणधरश्री**सुधर्मस्वामि**सन्दृब्धं

श्रीस्थानाङ्गसूत्रम् ।

प्रथमो विभागः

संशोधन-सम्पादनप्रेरकाः
प.पू.प्राचीनश्रुतोद्धारक-वैराग्यदेशनादक्ष-आचार्यदेव-
श्रीमद्विजय-**हेमचन्द्रसूरीश्वराः**

समतासागरपंन्यासश्रीपद्मविजयपुण्यस्मृतौ

प्रकाशकः
श्रीजिनशासन आराधना ट्रस्ट
मुम्बई

वि.सं.२०७० वीर सं.२५४०

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

बी.सी.जरीवाला, दु-६, बद्रिकेश्वर सोसायटी, मरीनड्राईव ई रोड, मुम्बई-२

❁ अहो सुकृतम् ❁

श्री मर्चन्ट सोसायटी जैन संघ

प्रेरणा :- प.पू.पंन्यास**श्रीभद्रेश्वरविजयजी** म.सा. तथा

पू.मुनि**श्रीयोगीरत्नविजयजी** म.सा.

मर्चन्ट सोसायटी जैन संघनी आराधक श्राविकाओ

प्रेरणा :- पू.आ.श्री**कलापूर्णसूरीश्वरा**ज्ञानुवर्तिनी

सा.श्री**देवयशाश्री**जी म.सा.

जैन मर्चन्ट सौसायटी, पालडी, अमदावाद.

श्रुतसहयात्री :- मुनिश्री**हर्षप्रेमविजय**जी म.सा. की प्रेरणा से

चंचलबेन पदमशीभाई जागाणी

हस्ते - माया मनिष जागाणी

आरती अतुल जागाणी

राजेश पदमशी जागाणी

मापर (कच्छ), हाल - खार, मुम्बई

एतद्ग्रन्थस्वामित्वं श्रीजैनश्वेताम्बरमूर्तिपूजकसङ्घस्यैव।

卐 ... कृपावर्षा ... 卐

सिद्धान्तमहोदधि-सच्चारित्रचूडामणि-सुविशालगच्छसर्जक-आचार्यदेवश्रीमद्विजय-**प्रेमसूरीश्वराः**

न्यायविशारद-वर्धमानतपोनिधि-गच्छाधिपति-आचार्यदेवश्रीमद्विजय-**भुवनभानुसूरीश्वराः**

समतासागर-संयमसमर्पणादिगुणगणार्णव-प.पू.पंन्यासप्रवरश्री-**पद्मविजयगणिवराः**

卐 ... आज्ञाप्रसादः ... 卐

सिद्धान्तदिवाकर-गीतार्थगच्छाधिपति-आचार्यदेवश्रीमद्विजय-**जयघोषसूरीश्वराः**

卐 ... प्रेरणापीयूषम् ... 卐

वैराग्यदेशनादक्ष-प्राचीनश्रुतोद्धारक-आचार्यदेवश्रीमद्विजय-**हेमचन्द्रसूरीश्वराः**

वर्धमानतपोनिधि-आचार्यदेवश्रीमद्विजय-**कल्याणबोधिसूरीश्वराः**

।। से किं ठाणं ? ।।

अतिशयिज्ञानवतामभावे दुर्लभदेवदर्शनेऽपि च सम्प्रतकाले सिद्धान्तोऽयमद्यापि ह्यस्तित्वं बिभर्ति, यदध्ययनेन मध्यस्थानां मनीषिणां स्वयमेवाविर्भवति भगवद्वचन-श्रद्धानम्। न हि करामलकवद्विश्वविश्वावलोकनमन्तरेणेदृगेकादिदशसङ्ख्यापर्यन्तवस्तूनां स्पष्टतरं वर्णनं कर्तुं शक्यते केनचिदर्वाग्दर्शिणेति प्राज्ञाः स्वयमेव प्रतीतिं करिष्यन्ति। अहोऽस्माकं सौभाग्यं यदीदृग्विधं ग्रन्थरत्नमद्याप्यवाप्यत इत्ययं कोऽपि निरव-ध्यानन्दहेतुः।

अतिगभीरस्यास्य ग्रन्थस्यार्थः सुगमो भवत्विति पुण्याभिलाषेण शासन-देवताविज्ञप्त्या च चान्द्रकुलीनाचार्यवर्यश्रीअभयदेवसूरिवरैरेतद्वृत्तिर्विरचिता। तामेवालम्ब्य संङ्क्षिप्तरुचिसत्त्वानुग्रहार्थं पूजनीयगणिप्रवरश्रीनगर्षिणा दीपिकाभिधाना वृत्तिर्ग्रथिता। या मत्प्रेरणया मत्प्रशिष्यस्य प्रशिष्येण तपस्विमुनिप्रवरश्रीधर्मप्रेमविजयाभिधानेन श्रमपुरस्सरं संशोधिता सम्पादिता च। भवत्वेतदध्ययनेन तत्परिश्रमस्य शतधा साफल्यमित्याकाङ्क्षापुरस्सरं विरमत्येष

- श्रीप्रेम-भुवनभानु-पद्मविनेयः
आ. हेमचन्द्रसूरिः

કર્મ સાહિત્ય વિશારદ સિદ્ધાંત મહોદધિ

પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મહારાજ

મોક્ષ માર્ગના સાચા સારથી

સૂરિપ્રેમના આજ્ઞાંકિત પટ્ટાલંકાર

પ.પૂ. આચાર્યદેવ શ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજા

प्रकाशकीयम्

अंधयारे दुरुत्तारे घोरे संसार सागरे ।
एसो चेव महादीवो लोयालोयावलोयणो ॥

जिनागमो नाम महाद्वीपः, यो व्यसनशतसहस्रपरिपूरितसंसारसागर आश्वासहेतुः। एष एव च महाप्रदीपोऽपि, यो मोहान्धकारगहने भवारण्ये भ्राम्यतां तत्तदुपद्रव-सन्दोहविषयीभवतां जन्तूनां रक्षार्थं प्रकाशहेतुः। ऐदंयुगीनेऽपि समये भगवद्वचन-विसरात्मकमागमसमूहमवाप्य कृतार्थप्रायाः खलु सिद्धान्ताध्येतारः। अपि चैतद् रूपेण साक्षाद् भगवतैव कृतोऽत्रावतार इत्युक्तौ न कोऽपि दोषः, यद् हारिभद्रं वचः अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति। हृदयस्थिते च तस्मिन् नियमात् सर्वार्थसंसिद्धिः - इति (षोडशके)।

न ह्यतोऽपि परः कोऽपि सिद्धिहेतुरिति सीमातीत एतत्प्रकाशनेऽस्माकं संहृलादः। पुण्यावरेऽस्मिन् प्रस्तुतग्रन्थमूलकार-पञ्चमगणधर-श्रुतकेवलि-सर्वलब्धि-निधान-श्रीसुधर्मस्वामिनां मूलटीकाकार-चान्द्रकुलीनाचार्यवर्यश्रीअभयदेवसूरिवराणाम्, प्रस्तुतटीकाकार-परमपूजनीयगणिप्रवरश्रीनगर्षिपादानां, संशोधक-सकलवाचक-शिरोमणिमहोपाध्यायश्रीविमलहर्षगणिवराणां, प्रस्तुतप्रकाशनसंशोधक-सम्पादकानां च पूजनीयमुनिप्रवरश्रीधर्मप्रेमवजियानां कृतज्ञतया विदधामः संस्मृतिम्। प्रस्तुतसम्पादने परमपूजनीयमुनिप्रवरश्रीमित्रानन्दविजयपादैः (पाश्चात्यपर्याये सूरिवरैः) सम्पादिता दीपिकावृत्तिः, बहुश्रुतमुनिप्रवरश्रीजम्बूविजयपादैः सम्पादिता श्रीमदभयदेव-सूरीयवृत्तिश्चोपयुक्ताः, अतस्तत्तत्पूज्यानामपि भावसारं संस्मृतिं विदधामः।

- श्रीजिनशासनआराधनाट्रस्ट

અંતરની વાત.... ઋણ સ્વીકાર...

અનંત કરૂણાના સાગર, આપણા નિકટના ઉપકારી, ચરમતીર્થાધિપતિ પ્રભુ મહાવીરે ગણધરોને સમસ્તશ્રુતની અનુજ્ઞારૂપ અને અચિંત્યશક્તિપાતસ્વરૂપ ત્રિપદીનું દાન કર્યું. તે કૃપા પ્રાપ્ત થતા જ સર્વે ગણધરોએ દ્વાદશાંગીની રચના કરી. તેમાંથી પંચમ ગણધર શ્રીસુધર્માસ્વામીએ રચેલી દ્વાદશાંગી હાલ પ્રાપ્ત થાય છે. તેમાંનું ત્રીજું અંગસૂત્ર છે - શ્રીસ્થાનાંગસૂત્ર. દસ અધ્યયન અને એકવીસ ઉદ્દેશકોમાં એક, બે, ત્રણ.... એમ દશ સુધીની સંખ્યાના માધ્યમે પ્રભુએ પ્રરૂપેલા અનેક, અદ્‌ભૂત, અલૌકિક, અશંકનીય (સચોટ) પદાર્થોનો સંગ્રહ છે.

મૂળસૂત્રગ્રંથનું સ્પષ્ટ તેમજ સત્ય જ્ઞાન પ્રાપ્ત કરવામાં ટીકાઓ ખૂબ સહાયક તેમજ જરૂરી બને છે. શ્રીસ્થાનાંગસૂત્રની બે ટીકાઓ પ્રસિદ્ધ છે. (૧) વિ.સં.૧૧૨૦માં રચાયેલી પૂ.આ.શ્રીઅભયદેવસૂરિજીની (૨) વિ.સં.૧૬૫૭માં રચાયેલી પૂ.નગર્ષિગણિજીની.

આપણને પ્રાપ્ત થયેલો આ સેંકડો વર્ષો જૂનો જ્ઞાન વારસો નષ્ટ ન થાય અને હજી સેંકડો વર્ષો સુધી આવનારી પેઢીઓને પ્રાપ્ત થાય, એની ચિંતા પૂજ્ય ગુરૂદેવ આચાર્યદેવ શ્રીમદ્‌વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજને સતાવી રહી હતી. વર્ષોના અથાગ પ્રયત્નો બાદ સેંકડો વર્ષો સુધી ટકે એવા કાગળો પ્રાપ્ત થતા શ્રુતસમુદ્ધારનું કાર્ય ચાલુ થયું. ટીકા સહિત અનેક આગમો અને બીજા પણ અનેક ગ્રંથો આવા કાગળ પર છપાઈ ગયા છે. પૂ.આ. શ્રીઅભયદેવસૂરિજીની ટીકા છપાઈ ગયા બાદ પૂ.નગર્ષિગણિજીની દીપિકા ટીકા પણ છપાવવાનો ગુરૂદેવશ્રીને વિચાર આવ્યો.

માત્ર ૧ થી ૪ અધ્યયનની એક સંપાદિત પ્રત પ્રાપ્ત થઈ. પરમોપકારી ગુરૂદેવ આચાર્ય શ્રીહેમચન્દ્રસૂરીશ્વરજી મ.એ સંપૂર્ણ દીપિકાનું સંશોધન-સંપાદનનું કાર્ય મને સોપ્યું અને તેઓશ્રીની પુણ્યકૃપાથી શ્રી જિનશાસન આરાધના ટ્રસ્ટના હસ્તલિખિત જ્ઞાનનિધિના સંગ્રહમાંથી લીંબડી, પાટણ, અમદાવાદની કુલ ૪ હસ્તપ્રતો પ્રાપ્ત થઈ. પણ પ્રાચીન લીપી તેમજ સંશોધનક્ષેત્રે હું સાવ અજાણ, અજ્ઞ હતો. પૂજ્ય ગુરૂદેવ આ.શ્રીકલ્યાણબોધિસૂરીશ્વરજી મ.એ સંપૂર્ણ જ્ઞાન, પ્રેરણા અને હિંમત આપતા કાર્ય હાથમાં લીધું. વચ્ચે ઘણી વાતો સાંભળી ઉત્સાહ મંદ થઈ ગયો. જેમકે... કોણ વાંચશે ? આગમ વાંચનારા કેટલા ? તેમાં પણ ૧ આગમની પ્રસિદ્ધ મુખ્ય ટીકા જ બધા વાંચે - દીપિકા કોણ વાંચશે ? આમાં સમયનો વ્યય કરવા કરતા એવું જ્ઞાન મેળવો કે લખો જે આજના કાળને ઉપયોગી થાય વગેરે... પૂ.ગુરૂદેવશ્રીને વાત કરી. ''આ તો શ્રુતરક્ષાનું કાર્ય છે. આનાથી જ્ઞાનાવરણીય અને મોહનીય કર્મોના ક્ષયોપશમો થશે. કર્મમુક્તિ - એ જ આપણું લક્ષ્ય અને લાભ છે'' આવા અનેક સુંદર સમાધાનો પ્રાપ્ત થતા ફરી ઉત્સાહ વધ્યો. ગુરૂદેવોની પ્રેરણા અને કૃપાથી જ આ

કાર્ય થયું છે. આ જીવનમાં તો એમણે કરેલા ઉપકારોનો પ્રત્યુપકાર કરી શકાય એમ નથી. આ જ ગ્રંથમાં પણ વાત કરી છે - ''अशक्यप्रत्युपकाराश्च भगवन्तो धर्म्मचार्याः ।''

જેમના મૂળવૃત્તિના સંપાદનને કારણે આ સંપાદન કાર્ય સરળ થયું છે એવા અનેક ભાષાઓના જાણકાર વિદ્વદ્વર્ય પૂજ્ય મુનિશ્રી જંબૂવિજયજી મ.સા.ને અને પ્રસ્તુત દીપિકાના ૧ થી ૪ અધ્યનના પૂર્વસંપાદક પૂ.આ.શ્રી મિત્રાનંદસૂરીશ્વરજી મ.ને કૃતજ્ઞતાપૂર્વક વંદન કરૂં છું.

પાઠભેદોની નોંધ આપવાની પૂર્વ પરંપરાને બદલે આ સંપાદનમાં જે શુદ્ધતમ પાઠો મને લાગ્યા છે અને જ્યાં શંકા થઈ ત્યાં પ્રજ્ઞાની પૂ.વિદ્યાદાતા મુનિશ્રીજિનપ્રેમ વિ.મ.ના માર્ગદર્શન મુજબના પાઠો લીધા છે. અત્યંત વ્યસ્તતા વચ્ચે પણ મારી શંકાઓનું સમાધાન કરી આપવાનો એમનો ઉપકાર વિસરી શકાય એમ નથી. '[ ]' આ નિશાની અંતર્ગત લીધેલા વાક્યો, ઉપયોગી લાગતા પૂ.આ.શ્રીઅભયદેવસૂરિજી મ.ની ટીકામાંથી લીધા છે.

આ ગ્રંથમાં કહ્યું છે - 'तिण्हं दुप्पडियारं समणाउसो, तं जहा अम्मापिउणो, भट्टिस्स धम्मायरियस्स [सू.१४३]' ઘરે અવતરેલા બાળકને સામગ્રી, શીક્ષણ અને સંપત્તિનો વારસો તો ઘણા માતા-પિતા આપે છે પણ સુસંસ્કારોનો વારસો આપી સંયમ જીવનના લોકોત્તર પદ પ્રાપ્તિના પાયારૂપ બનેલા પૂ.ગુરૂદેવ મુનિશ્રીહર્ષપ્રેમ વિ.મ.(બાપુજી મ.), સા.શ્રીહર્ષશીલાશ્રીજી મ.(બા મ.) તથા સા.શ્રીચન્દ્રશીલાશ્રીજી મ.(બેન મ.)ના ઉપકારો આ ક્ષણે સ્મૃતિ પટ પર લાવી કૃતજ્ઞતા સહ ધન્યતા અનુભવું છું.

દિક્ષાની પ્રેરણાના આદ્ય શ્રોતરૂપ પૂ.દાદાગુરૂદેવ મુનિશ્રી ભક્તિવર્ધન વિ.મ., સા.શ્રી હંસાવલીશ્રીજી મ., સા.શ્રીજયશીલાશ્રીજી મ. આદિ અનેક સાધુ-સાધ્વીજી ભગવંતોના ઉપકારો કદી ભૂલાશે નહીં.

ભીમભવોદધિતારક ગુરૂદેવશ્રી, માતા-પિતા પછી ત્રીજા ઉપકારી 'भट्टिस्स'નો અર્થ ટીકાકારે કર્યો છે भर्त्तुः, पोषकः. તો મારા આ સંયમજીવનના પોષક એવા તમામ સહવર્તીઓ તેમજ કલ્યાણમિત્રો આ પ્રસંગે ભૂલાય તેમ નથી. શ્રીપાર્શ્વ કોમ્પ્યુટર્સના વિમલભાઈ અને સ્ટાફની શ્રુતભક્તિ પણ ધન્યવાદને પાત્ર છે.

છદ્મસ્થતા ને કારણે થયેલી ભૂલોને સુધારી વિજ્ઞ વાચકવર્ગ આ ગ્રંથના વાંચન મનન, નિદિધ્યાસન દ્વારા કર્મમુક્તિ અને પરંપરાએ ભવમુક્તિને શીઘ્ર પ્રાપ્ત કરે એ જ અભિલાષા સહ.

- ગુરૂકૃપાકાંક્ષી
મુનિ ધર્મપ્રેમ વિજય
(હર્ષશીશુ)

स्थानाङ्गसूत्रस्य विषयानुक्रमः

सूत्राङ्काः	विषयः	पृष्ठाङ्काः
१-४८	**प्रथममध्ययनम् 'एकस्थानम्'**	**१-३०**
१-३७	भगवदाख्यातानाम् आत्मादीनां सिद्धयन्तानां पदार्थानां कीर्तनम्	१-१५
३८	शब्द-रूप-संस्थान-गन्ध-रस-स्पर्शानां सप्रभेदानां वर्णनम्	१५-१६
३९	अष्टादशानां पापस्थानानां तत्त्यागस्य च वर्णनम्	१७-१८
४०	कालभेदाः	१९
४१-४३	संसारिजीवानां सिद्धानां पुद्गलानां वर्गणाः	१९-२८
४४	जम्बूद्वीपप्रमाणम्	२८
४५	भगवतो महावीरस्य एकाकिनो निर्वाणगमनम्	२८
४६	अनुत्तरौपपातिकदेवानामुच्चत्वम्	२९
४७	एकतारकाणि नक्षत्राणि	२९
४८	एकप्रदेशावगाढादिपुद्गलवर्णनम्	२९-३०
४९-१२६	**द्वितीयमध्ययनं 'द्विस्थानम्' (चत्वार उद्देशकाः)**	**३१-१२२**
४९-६६	**प्रथम उद्देशकः**	**३१-५९**
४९	द्विप्रत्यवतारा: पदार्थाः	३१-३२
५०	विविधरूपेण द्विविधानां क्रियाणां वर्णनम्	३२-३९
५१-५२	गर्हायाः प्रत्याख्यानस्य च द्वैविध्यम्	३९-४१
५३	संसारकान्तारोल्लङ्घनाय द्विविध उपायः	४१
५४-५५	धर्मश्रवणालाभत आरभ्य केवलज्ञानप्राप्तिं यावद्धेतवः	४१-४३
५६-५८	समाभेदा उन्मादभेदा दण्डभेदाश्च	४४-४५
५९	दर्शनस्य विविधरूपेण द्वैविध्यम्	४५-४६
६०	विस्तरेण ज्ञानस्य द्वैविध्यम्	४७-५०
६१-६२	धर्मस्य संयमस्य च विस्तरेण द्वैविध्यम्	५०-५३
६३-६५	पृथ्वीकायिकादीनां जीवानां द्रव्याणां कालस्य आकाशस्य शरीराणां च द्वैविध्यम्	५३-५७
६६	प्रव्राजनादिमङ्गलकार्योपयोगिदिशो द्वैविध्यम्	५७-५९
६७-७२	**द्वितीय उद्देशकः**	**५९-६७**
६७-६९	वेदनावेदनस्य गत्यागत्योर्जीवानां च द्वैविध्यम्	५९-६५

सूत्राङ्काः	विषयः	पृष्ठाङ्काः
७०-७१	द्विधा लोकदर्शनं शब्दश्रवणमवभासनादि च	६५-६७
७२	मरुदादिदेवानां द्वैविध्यम्	६७
७३-१०५	**तृतीय उद्देशकः**	**६८-९९**
७३-७५	शब्द-शब्दोत्पाद-पुद्गलसंघातादिद्वैविध्यम्	६८-७१
७६-७८	आचार-प्रतिमा-सामायिकानामनेकधा द्वैविध्यम्	७१-७३
७९	द्वयोर्द्वयोरुपपातोद्वर्तना-च्यवन-गर्भव्युत्क्रान्त्यादि	७३-७६
८०-९५	जम्बूद्वीपे विद्यमाना वर्ष-वर्षधरादयो नक्षत्र-ग्रहपर्यन्ताः अनेके द्विविधाः पदार्थाः	७६-९३
९६-९८	जम्बूद्वीपवेदिका-लवणसमुद्र-लवणसमुद्रवेदिकाप्रमाणम्	९३
९९-१००	धातकीखण्डे विद्यमाना द्विविधाः पदार्थाः	९३-९७
१०१-१०२	धातकीखण्ड-कालोदधिवेदिकाप्रमाणम्	
१०३	पुष्करवरद्वीपार्धे विद्यमाना द्विविधाः पदार्थाः	
१०४	पुष्करवरादिद्वीप-समुद्रवेदिकाप्रमाणम्	
१०५	इन्द्राणां द्विविधत्वं विमानानां वर्णद्वयं देवानां रत्निद्वयोच्चत्वं च	९७-९९
१०६-१२६	**चतुर्थ उद्देशकः**	**१००-१२२**
१०६-१०८	समयादीनां जीवाजीवत्वं बन्धादेरात्मनिर्गमस्य च द्वैविध्यम्	१००-१०७
१०९	धर्मश्रवणादौ हेतुद्वयम्	१०७-१०८
११०-११२	अद्धौपमिकस्य कालस्य क्रोधादेर्जीवानां च द्वैविध्यम्	१०८-११२
११३-११७	प्रशस्ताप्रशस्तमरणादेर्लोकस्य बोधेः कर्मणो मूर्च्छायाश्च द्वैविध्यम्	११२-११७
११८-१२०	आराधनायास्तीर्थकृतां वर्णस्य सत्यप्रवादवस्तुनश्च द्विविधत्वम्	११७-११८
१२१-१२२	द्वितारणि नक्षत्राणि, मनुष्यक्षेत्रान्तर्गतौ समुद्रौ च	११९
१२३-१२४	नरकं गतौ चक्रवर्तिनौ, देवानां स्थितिः कल्पस्त्रियो लेश्याः परिचारणा च	११९-१२१
१२५-१२६	पापकर्मचयादौ कारणद्वयम्, स्कन्धानां चानेकधा द्वैविध्यम्	१२१-१२२
१२७-२३४	**तृतीयमध्ययनं 'त्रिस्थानम्' (चत्वार उद्देशकाः)**	**१२३-२३८**
१२७-१६०	**प्रथम उद्देशकः**	**१२३-१५८**
१२७-१३१	इन्द्र-विकुर्वणा-जीव-परिचारणा-मैथुनत्रैविध्यम्	१२३-१२८
१३२	योग-प्रयोग-करणत्रैविध्यम्	१२८-१२९
१३३	अल्पायुष्ट्व-दीर्घायुष्ट्व-शुभाशुभदीर्घायुष्ट्वकारणत्रैविध्यम्	१३०-१३५

विषयानुक्रमः

सूत्राङ्काः	विषयः	पृष्ठाङ्काः
१३४-१३७	गुप्त्यगुप्ति-दण्ड-गर्हा-प्रत्याख्यान-वृक्ष-पुरुषत्रैविध्यम्	१३५-१३८
१३८-१३९	मत्स्य-पक्ष्यादि-स्त्री-पुरुष-नपुंसक-तिरश्चां त्रैविध्यम्	१३८-१४०
१४०-१४१	लेश्यानां तारारूपचलन-विद्युत्कारकारणानां त्रैविध्यम्	१४०-१४२
१४२	लोकान्धकार-लोकोद्द्योतादौ देवेन्द्रादीनां लोकागमनादौ च त्रीणि कारणानि	१४२-१४४
१४३	त्रयाणां मातापितृ-भर्तृ-धर्माचार्याणां दुष्प्रतीकरत्वम्	१४४-१४८
१४४-१४५	संसारकान्तारोल्लङ्घनाय त्रीणि स्थानानि, त्रिविधः कालः	१४८-१४९
१४६-१४९	पुद्गलचलनकारणानि, उपधि-परिग्रह-प्रणिधान-योनि-तृणवनस्पतित्रैविध्यम्	१४९-१५२
१५०-१५३	तीर्थत्रयम्, कालसम्बद्धाग्निपरिमिताः पदार्थाः, तेजो-वायूनां स्थितिः	१५२-१५४
१५४-१५७	शाल्यादिधान्यानां योनिस्थितिः, त्रिपरिमिता विविधाः पदार्थाः	१५४-१५६
१५८	त्रयः सप्तमनरकगामिनः, त्रयः सर्वार्थसिद्धोत्पत्तारः	१५७
१५९	त्रिवर्णानि विमानानि, त्रिहस्तोच्छ्रितानि शरीराणि	१५७-१५८
१६०	कालेन अध्येतव्यास्तिस्रः प्रज्ञप्तयः	१५८
१६१-१७५	**द्वितीय उद्देशकः**	**१५८-१७६**
१६१-१६३	लोकादयो विविधास्त्रयः पदार्थाः	१५८-१६१
१६४-१६६	बोधि-प्रव्रज्या-निर्ग्रन्थानां त्रैविध्यम्	१६१-१६३
१६७	तिस्रः शैक्षभूमयः स्थविरभूमयश्च	१६३-१६४
१६८-१६९	त्रयः पुरुषजाताः, प्रशस्ताप्रशस्तानि त्रीणि स्थानानि	१६५-१६७
१७०-१७३	जीव-लोकस्थिति-दिगादि-त्रस-स्थावरा-ऽच्छेद्यादीनां त्रैविध्यम्	१६८-१७१
१७४-१७५	भगवतो महावीरस्य गौतमादिश्रमणानामन्त्र्य कथनम्	१७२-१७५
१७६-१९५	**तृतीय उद्देशकः**	**१७६-२०५**
१७६-१७७	आलोचनादेः करणाकरणयोर्हेतवः, त्रयः पुरुषजाताः	१७६-१७७
१७८-१७९	वस्त्र-पात्रत्रैविध्यम्, त्रीणि वस्त्रधारणकारणानि	१७७-१७८
१८०-१८१	आत्मरक्ष-ग्राह्यविकटदत्ति-विसम्भोगिककारणा-ऽनुज्ञादि-वचन-मनस्त्रैविध्यम्	१७८-१८२
१८२-१८३	अल्पवृष्टेः, महावृष्टेः, अधुनोत्पन्नदेवस्य इहागमना-ऽनागमनयोश्च कारणानि	१८२-१८७
१८४-१८५	देवस्य स्पृहा-सन्तापयोश्च्यवनज्ञानोद्वेगयोश्च त्रीणि कारणानि	१८७-१८९
१८६	त्रिसंस्थित-त्रिप्रतिष्ठित-त्रिविधविमानवर्णनम्	१८९-१९०
१८७-१८८	*जीव-दुर्गति-सुगति-प्रतिग्राह्यपानकादि-अवमौदर्य-हिताहितस्थान-* शल्य-तेजोलेश्या-दत्ति-एकरात्रिकीप्रतिमाहिताहितस्थानत्रैविध्यम्	१९०-१९५

सूत्राङ्काः	विषयः	पृष्ठाङ्काः
१८९-१९१	कर्मभूमि-दर्शन-रुचि-प्रयोग-व्यवसाया-ऽर्थयोनित्रैविध्यम्	१९५-१९८
१९२-१९३	पुद्गलत्रैविध्यम्, त्रिप्रतिष्ठिता नरकाः, मिथ्यात्वस्य तद्भेदानां च त्रैविध्यम्	१९८-२०१
१९४	धर्मस्य उपक्रमादेः कथाया विनिश्चयस्य च त्रैविध्यम्	२०१-२०४
१९५	श्रमणोपासनायाः फलपरम्परा	२०५-२०६
१९६-२३४	**चतुर्थ उद्देशकः**	**२०६-२३८**
१९६-१९८	उपाश्रय-संस्तारक-कालादि-वचनादि-आराधनादित्रैविध्यम्	२०५-२१०
१९९	जम्बूद्वीपादौ विद्यमानं त्रिसंख्याकं कर्मभूम्यादि	२१०-२११
२००-२०१	पृथ्वी-तद्देशचलनकारणानि किल्बिषिकानां देवानां स्थित्यादि	२११-२१३
२०२-२०३	देव-देवीनां स्थितिः, प्रायश्चित्तादित्रैविध्यम्	२१४-२१६
२०४	त्रयोऽप्रव्राज्या अवाचनीया वाचनीया दुःसंज्ञाप्याः सुसंज्ञाप्याश्च	२१६-२१८
२०५-२०७	त्रयो मण्डलिकाः पर्वताः, त्रयो महातिमहालयाः, कल्पस्थितेः शरीराणां च त्रैविध्यम्	२१८-२२२
२०८-२०९	गुरुप्रत्यनीकादयस्त्रिविधाः प्रत्यनीकाः, त्रयः पित्रङ्गा मात्रङ्गाश्च	२२२-२२४
२१०	श्रमणस्य श्रमणोपासकस्य च त्रीणि महानिर्जराकारणानि	२२४-२२५
२११-२१६	पुद्गलप्रतिघात-चक्षुः-अभिगम-ऋद्धि-गौरव-करणानां त्रैविध्यम्	२२५-२२८
२१७-२१९	धर्मस्य, व्यापत्त्यादेः, अन्तस्य च त्रैविध्यम्	२२८-२३०
२२०-२२१	जिन-केवल्यर्हतां लेश्यानां च त्रैविध्यम्	२३०-२३१
२२२-२२३	मरणत्रैविध्यम्, अनगारस्य हिताहितानि स्थानानि	२३१-२३४
२२४-२२७	पृथ्व्या वलयानि, त्रिसमयिको विग्रहः, कर्मत्रयक्षयः, त्रितारणि नक्षत्राणि	२३४-२३५
२२८-२३१	तीर्थकरसम्बद्धाः त्रयः पदार्थाः	२३६-२३७
२३२-२३३	त्रयो ग्रैवेयकविमानप्रस्तटाः, पापकर्मचयादेस्त्रीणि कारणानि	२३७-२३८
२३४	त्रिप्रदेशिकादयः स्कन्धाः	२३८
२३५-३८८	**चतुर्थमध्ययनं 'चतुःस्थानकम्' (चत्वार उद्देशकाः)**	**२३९-४१४**
२३५-२७७	**प्रथम उद्देशकः**	**२३९-२८१**
२३५-२३६	चतस्रोऽन्तक्रियाः, चत्वारो वृक्षा वृक्षतुल्याः पुरुषाश्च	२३९-२४५
२३७-२३९	चतस्रो भाषाः, चत्वारि वस्त्राणि तत्तुल्याः पुरुषाश्च	२४५-२४७
२४०-२४३	चतुर्विधाः पुत्राः, विविधरूपेण चतुर्विधाः पुरुषाः	२४७-२४९
२४४-२४५	चतुर्विधास्तृणवनस्पतिकायिकाः, नारकस्य इहानागमनकारणानि	२५०-२५१
२४६-२४७	निर्ग्रन्थीनां चतुर्विधाः संघाट्यः, ध्यानचतुष्टयम्	२५१-२६०

सूत्राङ्काः	विषयः	पृष्ठाङ्काः
२४८-२५०	देवस्थिति-संवासौ, कषायादिचतुष्टयम्, कर्मचयादिकारणानि	२६०-२६३
२५१-२५३	चतुर्विधाः प्रतिमाः, अस्तिकायाः, फल-फलतुल्यपुरुषचतुष्टयम्	२६३-२६५
२५४-२५५	सत्यासत्ययोश्चातुर्विध्यम्, प्रणिधानचतुष्टयम्	२६५-२६६
२५६	विविधरूपेण चत्वारः पुरुषजाताः	२६६-२६७
२५७-२६५	लोकपालादयश्चतुर्विधा देवाः, चतुर्विधाः प्रमाणादयः	२६७-२७३
२६६-२६८	चतुर्यामो धर्मः, दुर्गति-सुगत्यादिचतुष्टयम्	२७३-२७५
२६९-२७२	हास्योत्पत्तेः कारणानि, अन्तर-भृतक-पुरुषचतुष्टयम्	२७५-२७७
२७३-२७६	चमरादिलोकपालानामग्रमहिष्यः, विकृतयः, कूटागारादि	२७७-२८१
२७७	चतस्रोऽङ्गबाह्याः प्रज्ञप्तयः	२८१
२७८-३१० द्वितीय उद्देशकः		**२८१-३२५**
२७८-२८१	चत्वारः प्रतिसंलीनाः, विविधरूपेण चत्वारः पुरुषजाताः	२८१-२८७
२८२	चतस्रो विकथाः कथाश्च	२८७-२९२
२८३-२८४	चतुर्विधाः पुरुषाः, इदानीमतिशायिज्ञानदर्शनानुत्पत्तिकारणानि	२९२-२९४
२८५-२८६	अस्वाध्याय-स्वाध्यायसमयाः, लोकस्थितिचातुर्विध्यम्	२९४-२९५
२८७-२८९	पुरुष-गर्हा-पुरुष-स्त्री-पुरुषचतुष्टयम्	२९५-२९९
२९०-२९१	निर्ग्रन्थस्य निर्ग्रन्थ्या आलापे निर्दोषत्वम्, तमस्कायनामानि	२९९-३००
२९२-२९७	पुरुषचतुष्टयम्, माया-मान-लोभादिचातुर्विध्यम्	३०१-३०९
२९८-३०७	मानुषोत्तर-जम्बूद्वीपादिसम्बद्धाश्चतुर्विधाः पदार्थाः	३१०-३२४
३०८-३०९	चतुर्विधं सत्यम्, आजीविकानां चतुर्विधं तपः	३२४
३१०	संयम-त्यागा-ऽकिञ्चनतानां चातुर्विध्यम्	३२४-३२५
३११-३८८ तृतीय उद्देशकः		**३२६-३६९**
३११-३१५	क्रोधश्चतुर्विधः, पुरुषचतुष्टयम्, आश्वासचतुष्टयम्	३२६-३३१
३१६-३१९	चत्वारः पुरुषाः, युग्माः, शूराः, पुरुषाः, लेश्याः, पुरुषाः	३३१-३३९
३२०-३२१	चतुर्विधा आचार्याः, अन्तेवासिनः, निर्ग्रन्थाः, निर्ग्रन्थ्यः श्रमणोपासकाः, श्रमणोपासिकाश्च	३३९-३४०
३२२	चतुर्विधाः श्रमणोपासकाः, तेषां स्थितिः	३४१
३२३	अधुनोत्पन्नदेवस्य इहानागमनागमनकारणानि	३४२-३४४

सूत्राङ्काः	विषयः	पृष्ठाङ्काः
३२४	लोकान्धकार-लोकोद्द्योत-देवेन्द्राद्यागमनकारणानि	३४५
३२५-३२६	चतस्रो दुःखशय्याः सुखशय्याश्च, अवाचनीया वाचनीयाश्च	३४६-३४९
३२७-३३१	पुरुषजाताः, समानप्रायाः, द्विशरीराः, पुरुषाः, प्रतिमाः	३४९-३५६
३३२-३३३	जीवस्पृष्टानि कर्मोन्मिश्राणि शरीराणि, अस्तिकायाः, बादरकायाः	३५६-३५७
३३४	तुल्यप्रदेशाः, दुर्दर्शं शरीरम्, इन्द्रियार्थाः लोकबहिरगमनहेतवः	३५७-३५८
३३५-३३८	ज्ञाता-ऽऽहरणादिचातुर्विध्यम्, अन्धकारस्योद्द्योतस्य च हेतवः	३५९-३६९
३३९-३८८	**चतुर्थ उद्देशकः**	**३७०-४१४**
३३९-३४२	प्रसर्पकाः, आहारः, आशीविषाः, व्याधयः, चिकित्साः, चिकित्सकाः	३७०-३७४
३४३-३४५	पुरुषजाताः, वादिसमवसरणानि, पुरुषजाताः	३७४-३७८
३४६-३५२	मेघाः, आचार्याः, भिक्षाकाः, पुरुषजाताः, चतुष्पदाः, पक्षिणः, क्षुद्रप्राणाः,भिक्षाकाः, पुरुषजाताः	३८६-३८६
३५३-३५४	संवासाः, अपध्वंसाः, तत्कारणानि	३८६-३८९
३५५-३६२	चतृर्विधाः प्रव्रज्याः, संज्ञाः, कामाः, पुरुषजाताः, उपसर्गाः, कर्माणि	३८९-३९९
३६३-३६६	चतुर्विधः सङ्गः, बुद्धिः, मतिः, जीवाः, पुरुषजाताः	३९९-४०३
३६७-३७०	चतुर्गत्यागतिकाः चतुर्विधः संयमः, असंयमः, क्रियाः, सतां गुणानां नाश-दीपनहेतवः	४०३-४०५
३७१-३७३	शरीरोत्पत्तिकारणानि, धर्मद्वाराणि, नारकादिगतिकारणानि	४०५-४०६
३७४-३७५	वाद्य-नाट्य-गेय-माल्या-ऽलङ्कारा-ऽभिनयाः, विमानानि, शरीराणि	४०६-४०८
३७६-३८०	उदकगर्भाः, मनुषीगर्भाः, उत्पादपूर्ववस्तूनि, काव्यानि, समुद्घाताः	४०८-४१०
३८१-३८५	चतुर्दशपूर्विसम्पद्, वादिसम्पद्, कल्पसंस्थानानि, समुद्राः, आवर्ताः	४१०-४१२
३८६-३८८	चतुस्ताराणि नक्षत्राणि, कर्मचयादिकारणानि, चतुष्प्रदेशिकस्कन्धादयः	४१२-४१४



अधरीकृत चिन्तामणि कल्पलता कामधेनुमाहात्म्याः।
विजयन्ती गुरुपादाः विमलीकृत शिष्यमतिविभवाः॥

ચિંતામણી, કલ્પવૃક્ષ અને કામધેનુના પ્રભાવને જેને ગૌણ કર્યા છે, તે ગુરુના ચરણકમલ વિજય પામે છે અને શિષ્યના મતિવૈભવને નિર્મળ કરી રહ્યા છે.

- પૂ. મલયગિરિ મ. કૃત રાયપ્પસેણિ વૃત્તિ.

॥ अर्हम् ॥

श्रीनगर्षिगणिविरचितदीपिकावृत्तिसमेतं

पञ्चमगणधरदेवश्रीसुधर्मस्वामिसन्दृब्धं

श्रीस्थानाङ्गसूत्रम् ।

प्रथममध्ययनम् एकस्थानकम् ।

ॐ नमः श्रीसर्वज्ञाय ।

प्रणतसुरासुरनाथं सुनाथमभिनम्य वीरजिननाथम् ।
स्मृत्वा श्रीश्रुतदेवीं श्री गुरुपादान्नमस्कृत्य ॥१॥
अति विस्तरवृत्त्यर्थादतिगम्भीरभासुरात् ।
सुखावबोधमुद्धृत्य शब्दार्थं च मनोहरम् ॥२॥
श्रीमत्स्थानाङ्गसूत्रस्य कुर्व्वेऽहं दीपिकां वराम ।
स्ववाचनकृते सन्तः प्रसीदन्तु सदा मम ॥३॥

इह हि श्रीमन्**महावीरवर्द्धमानस्वामिन** इक्ष्वाकुकुलनन्दनस्य प्रसिद्ध**सिद्धार्थ**-राजसूनोर्महाराजस्येव परमपुरुषकाराक्रान्तविक्रान्तरागादिशत्रोराज्ञाकरणदक्षक्षमा-पतिशतसततसेवितपादपद्मस्य सकलपदार्थसार्थसाक्षात्करणदक्षकेवलज्ञानदर्शनरूप-प्रधानप्रणिध्यवबुद्धसर्वविषयग्रामस्वभावस्य सकलत्रिभुवनातिशायिप्रवरसाम्राज्यस्य निखिलनीतिप्रवर्त्तकस्य परमगम्भीरान्महार्थानुपदेशान् निपुणबुद्ध्यादिगुणगणमाणि-क्यरोहणधरणीकल्पेन भाण्डागारनियुक्तेनेव गणधरेण पूर्वकाले चतुर्वर्णश्रीश्रमण-सङ्घभट्टारकस्य तत्सन्तानस्येवोपकाराय निरूपितस्य विविधार्थरत्नसारस्य देवता-धिष्ठितस्य विद्या-क्रियाबलवताऽपि पूर्वपुरुषेण केनापि कुतोऽपि कारणादनुन्मुद्रितस्याऽत एव च केषाञ्चिदनर्थभीरूणां मनोरथगोचरातिक्रान्तस्य महानिधानस्येव **स्थानाङ्गस्य** तथाविधविद्याबलविकलैरपि केवलधाष्ट्यप्रधानैः स्वपरोपकारायायथार्थविनियोजना-भिलाषिभिरत एवाविगणितस्वयोग्यतैर्निपुणपूर्वपुरुषप्रयोगानुश्रित्य किञ्चित् स्वमत्योत्प्रेक्ष्य तथाविधवर्तमानजनतमापृच्छ्य च तदुपायान् द्यूतादिमहाव्यसनोपहतैरिवास्माभिरु-न्मुद्रणमिवानुयोगः प्रारभ्यते इति शास्त्रप्रस्तावनादि विस्तरः सर्वोऽपि वृतितो ज्ञेयः। साम्प्रतं सूत्रं तच्चेदं –

[सू० १] ॐ नमः सिद्धं सुयं मे आउसं ! तेणं भगवता एवमक्खायं।

[टी०] '**सुयं**'त्ति इह किल **सुधर्म्मस्वामी** पञ्चमो गणधरदेवो **जम्बू**नामानं स्वशिष्यं प्रति प्रतिपादयाञ्चकार– **श्रुतम्** आकर्णितं **मे** मया, **आउसं** ति आयुः जीवितम्, तत् संयमप्रधानतया प्रशस्तं प्रभूतं वा विद्यते यस्यासावायुष्मांस्तस्यामन्त्रणं हे **आयुष्मन्** ! शिष्य ! **तेणं** ति यः सन्निहित-व्यवहित-सूक्ष्म-बादर-बाह्या-ऽऽध्यात्मिक-सकलपदार्थेष्वव्याहतवचनतयाऽऽप्तत्वेन जगति प्रतीतः अथवा पूर्वभवोपात्त-तीर्थकरनामकर्मादिलक्षणपरमपुण्यप्राग्भारो विलीनानादिकालालीनमिथ्यादर्शनादिवासनः परिहृतमहाराज्यो दिव्याद्युपसर्गवर्गसंसर्गाविचलितशुभध्यानमार्गो भास्कर इव घनघातिकर्म्मघनाघनपटलविघटनोल्लसितविमलकेवलभानुमण्डलो विबुधपतिषट्पद-पटलजुष्टपदपद्मो **मध्यमा**भिधानपुरीप्रथमप्रवर्त्तितप्रवचनो जिनो **महावीरस्तेन भगवता** अष्टमहाप्रातिहार्यरूपसमग्रैश्वर्यादियुक्तेन **एव**मित्यमुना वक्ष्यमाणेनैकत्वादिना प्रकारेण **आख्यात**मिति, **आ** मर्यादया जीवाऽजीवलक्षणासङ्कीर्णतारूपया अभिविधिना वा समस्तवस्तुविस्तारख्यापनलक्षणेन **ख्यातं** कथितम् आख्यातमात्मादिवस्तुजातमिति गम्यते, अत्र च **श्रुत**मित्यनेनावधारणाभिधायिना स्वयमवधारितमेवान्यस्मै प्रतिपादनीयमित्याह, अन्यथाऽभिधाने प्रत्युतापायसम्भवात्, उक्तं च–

किं एत्तो पावयरं ? सम्मं अणहिगयधम्मसब्भावो ।
अन्नं कुदेसणाए कट्ठयरागम्मि पाडेइ ॥ [ ] त्ति ।

मयेत्यनेनोपक्रमद्वाराभिहितभावप्रमाणद्वारगतात्मा-ऽनन्तर-परम्परभेदभिन्नागमेनायं वक्ष्यमाणो ग्रन्थोऽर्थतोऽनन्तरागमः सूत्रतस्त्वात्मागम इत्याह, **आयुष्मन्नि**त्यनेन तु कोमलवचोभिः शिष्यमनः प्रह्लादयताऽऽचार्येणोपदेशो देय इत्याह, उक्तं च–

धम्ममइएहिं अइसुंदरेहिं कारणगुणोवणीएहिं ।
पल्हायंतो य मणं सीसं चोएइ आयरिओ ॥ [उपदेशमाला १०४] त्ति ।

आयुष्मत्त्वाभिधानं चात्यन्तमाह्लादकम्, प्राणिनामायुषोऽत्यन्ताभीष्टत्वाद्, यत उच्यते– **सव्वे पाणा पियाउया अप्पियवहा सुहासाया दुक्खपडिकूला सव्वे जीविउकामा सव्वेसिं जीवियं पियं** [आचाराङ्ग० सू०७८] ति, तथा–

तृणायापि न मन्यन्ते पुत्र-दारा-ऽर्थसम्पदः ।
जीवितार्थे नरास्तेन तेषामायुरतिप्रियम् ॥ [ ] इति ।

अथवा **आयुष्मन्नि**त्यनेन ग्रहण-धारणादिगुणवते शिष्याय शास्त्रार्थो देय इति ज्ञापनार्थं सकलगुणाधारभूतत्वेनाऽशेषगुणोपलक्षणेन चिरायुर्लक्षणगुणेन शिष्यामन्त्रणमकारि, यत उक्तम्–

वुड्ढे वि दोणमेहे न कण्हभूमाउ लोट्टए उदयं ।
गहण-धरणासमत्थे इय देयमच्छित्तिकारिम्मि ॥ [विशेषाव० १४५८]

विपर्यये तु दोष इति, आह च–

आयरिए सुत्तम्मि य परिवाओ सुत्तअत्थपलिमंथो ।
अन्नेसिं पि य हाणी पुट्ठा वि न दुद्धदा वंझा ॥ [विशेषाव० १४५७] इति ।

तथा **तेने**त्यनेन त्वाप्तत्वादिगुणप्रसिद्धताऽभिधायकेन प्रस्तुताध्ययनप्रामाण्यमाह, वक्तृगुणापेक्षत्वाद्वचनप्रामाण्यस्येति । **भगवते**त्यनेन तु प्रस्तुताध्ययनस्योपादेयतामाह, अतिशयवान् किलोपादेयः, तद्वचनमपि तथेति इत्यादि [वृत्तौ इति]।

[सू० २] एगे आया ।

[टी०] यदाख्यातं भगवता तदधुनोच्यते । तत्र सकलपदार्थानां सम्यग्मिथ्याज्ञान-श्रद्धानाऽनुष्ठानैर्विषयीकरणेनोपयोगनयनादात्मनः सर्वपदार्थप्राधान्यमतस्तद्विचारं तावदादावाह– **एगे आया । एको** न द्व्यादिरूप **आत्मा** जीवः, कथञ्चिदिति गम्यते, तत्र अतति सततमवगच्छति, **अत सातत्यगमने** [पा० धा० ३८] इति वचनाद् 'अत'-धातोर्गत्यर्थत्वाद् गत्यर्थानां च ज्ञानार्थत्वादनवरतं जानातीति निपातनादात्मा जीवः, उपयोगलक्षणत्वादस्य सिद्ध-संसार्यवस्थाद्वयेऽप्युपयोगभावेन सततावबोधभावात्, सततावबोधाभावे चाजीवत्वप्रसङ्गात्, अजीवस्य च सतः पुनर्जीवत्वाभावात्, भावे चाकाशादीनामपि तथात्वप्रसङ्गात्, एवं च जीवानादित्वाभ्युपगमाभावप्रसङ्ग इति।

अथवा अतति सततं गच्छति स्वकीयान् ज्ञानादिपर्यायानित्यात्मा। नन्वेवमाकाशादी-नामप्यात्मशब्दव्यपदेशप्रसङ्गः, तेषामपि स्वपर्यायेषु सततगमनाद्, अन्यथा अपरिणामित्वेनावस्तुत्वप्रसङ्गादिति, नैवम्, व्युत्पत्तिमात्रनिमित्तत्वादस्य, उपयोगस्यैव च प्रवृत्तिनिमित्तत्वाद् जीव एव आत्मा, नाकाशादिरिति ।

[तदेवमुपयोगरूपैकलक्षणत्वात् सर्वे एवात्मान एकरूपाः, एवं चैकलक्षणत्वादेक आत्मेति ।] अथवा जन्म-मरण-सुख-दुःखादिसंवेदनेष्व-सहायत्वादेक आत्मेति

भावनीयमिति । इह च सर्वसूत्रेषु कथञ्चिदित्यनुस्मरणीयम्, कथञ्चिद्वादस्याविरोधेन सर्ववस्तुव्यवस्थानिबन्धनत्वात्, उक्तं च–

स्याद्वादाय नमस्तस्मै यं विना सकलाः क्रियाः ।
लोकद्वितयभाविन्यो नैव साङ्गत्यमिग्रति ॥ [ ] तथा–

नयास्तव स्यात्पदसत्त्वलाञ्छिता रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः ॥ [बृहत्स्वयम्भूस्तोत्रे] इति।

[सू० ३] एगे दंडे ।

[सू० ४] एगा किरिया ।

[टी०] आत्मन एकत्वमुक्तन्यायतोऽभ्युपगच्छद्भिरपि कैश्चिन्निष्क्रियत्वं तस्याभ्युपगतमतस्तन्निराकरणाय तस्य क्रियावत्त्वमभिधित्सुः क्रियायाः करणभूतं दण्डस्वरूपं प्रथमं तावदभिधातुमाह– **एगे दंडे,** एकोऽविवक्षितविशेषत्वात् दण्ड्यते ज्ञानाद्यैश्वर्यापहारतोऽसारीक्रियते आत्माऽनेनेति दण्डः, स च द्रव्यतो भावतश्च, द्रव्यतो यष्टिर्भावतो दुष्प्रयुक्तं मनःप्रभृति । तेन चात्मा क्रियां करोतीति तामाह– **एगा किरिया,** एका अविवक्षितविशेषतया करणमात्रविवक्षणात् करणं क्रिया कायिक्यादिकेति । अथवा **एगे दंडे एगा किरिय** त्ति सूत्रद्वयेनात्मनोऽक्रियत्वनिरासेन सक्रियत्वमाह, यतो दण्ड-क्रियाशब्दाभ्यां त्रयोदशक्रियास्थानानि प्रतिपादितानि, तत्रार्थदण्डा-ऽनर्थदण्ड-हिंसादण्डा-ऽकस्माद्दण्ड-दृष्टिविपर्यासदण्डरूपः पञ्चविधो दण्डः परप्राणापहरणलक्षणो दण्डशब्देन गृहीतः, तस्य चैकत्वं वधसामान्यादिति, क्रियाशब्देन तु मृषाप्रत्यया १, अदत्तादानप्रत्यया २, आध्यात्मिकी ३, मानप्रत्यया ४, मित्रद्वेषप्रत्यया ५, मायाप्रत्यया ६, लोभप्रत्यया ७, ऐर्यापथिकी ८, अष्टविधा क्रियोक्ता, तदेकत्वं च करणमात्रसामान्यादिति। दण्ड-क्रिययोश्च स्वरूपविशेषमुपरिष्टात् स्वस्थान एव वक्ष्याम इति ।

[सू० ५] एगे लोए । एगे अलोए ।

[टी०] उक्तरूपस्यात्मन आधारस्वरूपनिरूपणायाह– **एगे लोए** त्ति, **एको**ऽविवक्षितासङ्ख्यप्रदेशाधस्तिर्यगादिदिग्भेदतया लोक्यते दृश्यते केवलालोकेनेति **लोकः** धर्मास्तिकायादिद्रव्याधारभूत आकाशविशेषः।

लोकव्यवस्था ह्यलोके तद्विपक्षभूते सति भवतीति तमाह– **एगे अलोए, एको**ऽनन्तप्रदेशात्मकत्वेऽप्यविवक्षितभेदत्वा**दलोको** लोकव्युदासात्, न त्वलोक-नीयतया, केवलालोकेन तस्याप्यालोक्यमानत्वादिति ।

[सू० ६] एगे धम्मे । एगे अधम्मे ।

[टी०] लोकालोकयोश्च विभागकारणं धर्मास्तिकायोऽतस्तत्स्वरूपमाह– **एगे धम्मे, एक**: प्रदेशार्थतयाऽसङ्ख्यातप्रदेशात्मकत्वेऽपि द्रव्यार्थतया तस्यैकत्वात्, जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वे सति गतिपरिणतानां तत्स्वभावधारणाद् **धर्म्म**:, स चास्तीनां प्रदेशानां सङ्घातात्मकत्वात् कायोऽस्तिकाय इति ।

धर्मस्यापि विपक्षस्वरूपमाह – **एगे अधम्मे, एको** द्रव्यत एव, न धर्म्मोऽ**धर्म्म**: अधर्म्मास्तिकाय इत्यर्थः, धर्म्मो हि जीव-पुद्गलानां गत्युपष्टम्भकारी, अयं तु तद्विपरीतत्वात् स्थित्युपष्टम्भकारीति । ननु धर्म्मास्तिकाया-ऽधर्मास्तिकाययोः कथमस्तित्वावगमः ?, प्रमाणादिति ब्रूमः, तच्चेदम्– इह गतिः स्थितिश्च सकललोकप्रसिद्धं कार्यम्, कार्यं च परिणाम्यपेक्षाकारणायत्तात्मलाभं वर्त्तते, घटादिकार्येषु तथादर्शनात्, इत्यादि वृतौ इति।

[सू० ७] एगे बंधे । एगे मोक्खे ।

[टी०] आत्मा च लोकवृत्तिर्धर्म्मा-ऽधर्म्मास्तिकायोपगृहीतः सदण्डः सक्रियश्च कर्मणा बध्यत इति बन्धनिरूपणायाह- **एगे बंधे**, बन्धनं बन्धः, सकषायत्वात् जीवः कर्मणो योग्यान् पुद्गलान् आदत्ते यत् स बन्ध इति भावः, स च प्रकृति-स्थिति-प्रदेशा-ऽनुभावभेदात् चतुर्विधोऽपि बन्धसामान्यादेकः, मुक्तस्य सतः पुनर्बन्धाभावाद्वा एको बन्ध इति। अथवा द्रव्यतो बन्धो निगडादिभिर्भावतः कर्म्मणा, तयोश्च बन्धनसामान्यादेको बन्ध इति ।

अनादिबन्धसद्भावेऽपि भव्यात्मनः कस्यचिन्मोक्षो भवतीति मोक्षस्वरूपमाह– **एगे मोक्खे**, मोचनं कर्मपाशवियोजनमात्मनो मोक्षः, आह च– **कृत्स्नकर्मक्षयान्मोक्षः** [तत्त्वार्थ० १०।३], स चैको ज्ञानावरणादिकर्मापेक्षयाऽष्टविधोऽपि मोचनसामान्यात् मुक्तस्य वा पुनर्मोक्षाभावात् ईषत्प्राग्भाराख्यक्षेत्रलक्षणो वा द्रव्यार्थतयैकः । अथवा द्रव्यतो मोक्षो निगडादितो भावतः कर्मतस्तयोश्च मोचनसामान्यादेको मोक्ष इति ।

[सू० ८] एगे पुण्णे । एगे पावे ।

[टी०] मोक्षश्च पुण्य-पापक्षयाद्भवतीति पुण्य-पापयोः स्वरूपं वाच्यम्, तत्रापि मोक्षस्य पुण्यस्य च शुभस्वरूपसाधर्म्यात् पुण्यं तावदाह– **एगे पुण्णे,** पुण शुभे [पा० धा० १४२०] इति वचनात् पुणति शुभीकरोति पुनाति वा पवित्रीकरोत्यात्मानमिति **पुण्यं** शुभकर्म्म सद्वेद्यादि द्विचत्वारिंशद्विधम्, यथोक्तम्–

सायं १ उच्चागोयं २ नरतिरिदेवाउ ५ नाम एयाउ ।
मणुयदुगं ७ देवदुगं ९ पंचेंदियजाति १० तणुपणगं १५ ॥
अंगोवंगतियं पि य १८ संघयणं वज्जरिसहनारायं १९ ।
पढमं चिय संठाणं २० वन्नाइचउक्क सुपसत्थं २४ ॥
अगुरुलहु २५ पराघायं २६ उस्सासं २७ आयवं च २८ उज्जोयं २९ ।
सुपसत्था विहायगई ३० तसाइदसगं च ४० णिम्माणं ४१ ॥
तित्थयरेणं सहिया बायाला पुण्णपगईओ ॥ [ ] त्ति ।

एवं द्विचत्वारिंशद्विधमपि अथवा पुण्यानुबन्धि-पापानुबन्धिभेदेन द्विविधमपि अथवा प्रतिप्राणि विचित्रत्वादनन्तभेदमपि पुण्यसामान्यादेकमिति ।

पुण्यप्रतिपक्षभूतं पापमिति तत्स्वरूपमाह– **एगे पावे,** पांसयति गुण्डयत्यात्मानं पायति चात्मन आनन्दरसं शोषयति क्षपयतीति पापम्, तच्च ज्ञानावरणादि द्व्यशीतिभेदम्, यथाऽऽह-

नाणंतरायदसगं १० दंसण णव १९ मोहणीय छव्वीसं ४५ ।
अस्सायं ४६ निरयाउं ४७ नीयागोएण अडयाला ४८ ॥
निरयदुगं २ तिरियदुगं ४ जाइचउक्कं च ८ पंच संघयणा १३ ।
संठाणा वि य पंच उ १८ वन्नाइचउक्कमपसत्थं २२ ॥
उवघाय २३ कुविहयगई २४ थावरदसगेण होंति चोत्तीसं ३४ ।
सव्वाओ मिलिआओ बासीती पावपगईओ ८२ ॥ [ ]

तदेवं द्व्यशीतिभेदमपि पुण्यानुबन्धि-पापानुबन्धिभेदाद् द्विविधमपि वा अनन्त-सत्त्वाश्रितत्वादनन्तमपि वाऽशुभसामान्यादेकमिति ।

[सू० ९] एगे आसवे । एगे संवरे ।

[टी०] इदानीमनन्तरोक्तयोः पुण्य-पापकर्मणोर्बन्धकारणनिरूपणायाह– **एगे आसवे,**

आस्रवन्ति प्रविशन्ति तेन कर्म्माण्यात्मनीत्यास्रवः, कर्म्मबन्धहेतुरिति भावः, स चेन्द्रिय-कषाया-ऽव्रत-क्रिया-योगरूपः क्रमेण पञ्च-चतुः-पञ्च-पञ्चविंशति-त्रिभेदः, उक्तं च-

इंदिय ५ कसाय ४ अव्वय ५ किरिया २५ पण चउर पंच पणुवीसा ।
जोगा तिन्नेव भवे आसवभेया उ बायाला ॥ [ ] इति ।

तदेवमयं द्विचत्वारिंशद्विधः, अथवा द्विविधो द्रव्य-भावभेदात्, तत्र द्रव्याश्रवो जलान्तर्गतनावादौ तथाविधपरिणामेन छिद्रैर्जलप्रवेशनं भावाश्रवस्तु यज्जीवना-वीन्द्रियादिच्छिद्रतः कर्मजलसञ्चय इति । स चाश्रवसामान्यादेक एवेति ।

अथाश्रवप्रतिपक्षभूतसंवरस्वरूपमाह– **एगे संवरे**, संव्रियते कर्मकारणं प्राणातिपातादि रुध्यते येन परिणामेन स संवरः, आश्रवनिरोध इत्यर्थः, स च समिति-गुप्ति-धर्म्मा-ऽनुप्रेक्षा-परीषह-चारित्ररूपः क्रमेण पञ्च-त्रि-दश-द्वादश-द्वाविंशति-पञ्चभेदः, आह च-

समिई ५ गुत्ती ३ धम्मो १० अणुपेह १२ परीसहा २२ चरित्तं च ५ ।
सत्तावन्नं भेया पणतिगभेयाइ संवरणे ॥ [ ] त्ति ।

अथवाऽयं द्विधा– द्रव्यतो भावतश्च । तत्र द्रव्यतो जलमध्यगतनावादेरनवरत-प्रविशज्जलानां छिद्राणां तथाविधद्रव्येण स्थगनं संवरः, भावतस्तु जीवद्रोण्या-माश्रवत्कर्म्मजलानामिन्द्रियादिच्छिद्राणां समित्यादिना निरोधनं संवर इति, स च द्विविधोऽपि संवरसामान्यादेक इति भावः। स च ज्ञानावरणीयादि कर्म्मापेक्षया-ऽष्टविधोऽपि संवरसामान्यादेक इति ।

[सू० १०] एगा वेयणा । एगा निज्जरा ।

[टी०] संवरविशेषे चायोग्यवस्थारूपे कर्म्मणां वेदनैव भवति न बन्ध इति वेदना-स्वरूपमाह– **एगा वेयणा**, वेदनं वेदना स्वभावेनोदीरणाकरणेन वोदयावलिकाप्रविष्टस्य कर्म्मणोऽनुभवनमिति भावः, सा च ज्ञानावरणीयादिकर्म्मापेक्षया अष्टविधाऽपि, विपाकोदय-प्रदेशोदयापेक्षया वा द्विविधाऽपि, आभ्युपगमिकी शिरोलोचादिका औपक्रमिकी रोगादिजनितेत्येवं वा द्विविधाऽपि वेदनासामान्यादेकैवेति ।

अनुभूतरसं कर्म प्रदेशेभ्यः परिशटतीति वेदनानन्तरं कर्मपरिशटनरूपां निर्ज्जरां निरूपयन्नाह– **एगा निज्जरा**, निर्ज्जरणं निर्जरा, विशरणं परिशटनमित्यर्थः, सा

चाष्टविधकर्म्मापेक्षयाऽष्टविधाऽपि द्वादशविधतपोजन्यत्वेन द्वादशविधाऽपि अकामक्षुत्-पिपासा-शीता-ऽऽतप-दंशमशक-मलसहन-ब्रह्मचर्यधारणाद्यनेकविधकारणजनित-त्वेनानेकविधाऽपि द्रव्यतो वस्त्रादेर्भावतः कर्मणामेवं द्विविधाऽपि वा निर्जरा-सामान्यादेकैवेति । ननु निर्जरा-मोक्षयोः कः प्रतिविशेषः ?, उच्यते, देशतः कर्मक्षयो निर्जरा, सर्वतस्तु मोक्ष इति ।

[सू० ११] एगे जीवे पाडिक्कएणं सरीरएणं ।

[टी०] इह च जीवो विशिष्टनिर्ज्जराभाजनं प्रत्येकशरीरावस्थायामेव भवति न साधारणशरीरावस्थायामतः प्रत्येकशरीरावस्थस्य जीवस्य स्वरूपनिरूपणायाह– **एगे जीवे** इत्यादि, अथवा उक्ताः सामान्यतः प्रस्तुतशास्त्रव्युत्पादनीया जीवादयो नव पदार्थाः, साम्प्रतं जीवपदार्थं विशेषेण प्ररूपयन्नाह– **'एगे'**त्ति **एकः** केवलो जीवितवान् जीवति जीविष्यति चेति **जीवः** प्राणधारणधर्मा आत्मेत्यर्थः, एकं जीवं प्रति गतं यच्छरीरं प्रत्येकशरीरनामकर्मोदयात् तत् प्रत्येकम्, तदेव **प्रत्येककम्,** दीर्घत्वादि प्राकृतत्वात्, तेन **प्रत्येककेन,** शीर्यत इति **शरीरं** देहः, तदेवानुकम्पितादिधर्मोपेतं **शरीरकम्,** तेन लक्षितः तदाश्रित्य एको जीव इत्यर्थः, अथवा **णं**कारौ वाक्यालङ्कारार्थौ, तत **एको जीवः प्रत्येकके शरीरे** वर्त्तत इति वाक्यार्थः स्यादिति, इह च **पाडिक्खएणं** ति क्वचित् पाठो दृश्यते, स च न व्याख्यातः, अनवबोधाद्, इह च वाचनानामनियतत्वात् सर्वासां व्याख्यातुमशक्यत्वात् काश्चिदेव वाचनां व्याख्यास्याम इति ।

[सू० १२] एगा जीवाणं अपरिआइत्ता विगुव्वणा।

[टी०] इह बन्ध-मोक्षादय आत्मधर्म्मा अनन्तरमुक्तास्ततस्तदधिकारादेवातः परमात्मधर्म्मान् **एगा जीवाणं** इत्यादिना **एगे चरित्ते** इत्येतदन्तेन ग्रन्थेनाह । **एगा जीवाणं अपरियाइत्ता विगुव्वणा, एगा जीवाणं** ति प्रतीतम्, **अपरियाइत्त** त्ति अपर्यादाय परितः समन्तादगृहीत्वा वैक्रियसमुद्घातेन बाह्यान् पुद्गलान् या **विकुर्वणा** भवधारणीयवैक्रियशरीररचनलक्षणा स्वस्मिन् स्वस्मिन् उत्पत्तिस्थाने जीवैः क्रियते सा एकैव, प्रत्येकमेकत्वाद्भवधारणीयस्येति, सकलवैक्रियशरीर्यपेक्षया वा भवधारणीयस्यैक-लक्षणत्वात् कथञ्चिदिति, या पुनर्बाह्यपुद्गलपर्यादानपूर्विका सोत्तरवैक्रियरचनलक्षणा,

सा च विचित्राभिप्रायपूर्वकत्वाद् वैक्रियलब्धिमतस्तथाविधशक्तिमत्त्वाच्चैकजीवस्याऽप्यनेकापि स्यादिति पर्यवसितम् । अथ बाह्यपुद्गलोपादान एवोत्तरवैक्रियं भवतीति कुतोऽवसीयते, येनेह सूत्रे **अपरियाइत्ता** इत्यनेन तद्विकुर्वणा व्यवच्छिद्यते ? इति चेत्, उच्यते, **भगवती**वचनात्, तथाहि-

देवे णं भंते ! महिड्ढिए जाव महाणुभागे बाहिरए पोग्गले अपरियाइत्ता पभू एगवन्नं एगरूवं विउव्वित्तए ?, गोयमा ! नो इणमट्ठे समट्ठे । देवे णं भंते ! बाहिरए पोग्गले परियाइत्ता पभू ?, हंता पभु [भगवती० ६।९।२-३]त्ति, इह हि उत्तरवैक्रियं बाह्यपुद्गलादानाद् भवतीति विवक्षितमिति।

[सू० १३] एगे मणे । एगा वयी । एगे कायवायामे ।

[टी०] एगे मणे त्ति मननं मनः औदारिकादिशरीरव्यापाराहृतमनोद्रव्यसमूहसाचिव्याज्जीवव्यापारः, मनोयोग इति भावः, मन्यते वाऽनेनेति मनो मनोद्रव्यमात्रमेवेति, तच्च सत्यादिभेदादनेकमपि संज्ञिनां वा असङ्ख्यातत्वादसङ्ख्यातभेदमप्येकम्, मननलक्षणत्वेन सर्वमनसामेकत्वादिति।

एगा वइ त्ति वचनं वाक्, औदारिक-वैक्रिया-ऽऽहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारः, वाग्योग इति भावः, इयं च सत्यादिभेदादनेकाऽप्येकैव, सर्ववाचां वचनसामान्येऽन्तर्भावादिति ।

एगे कायवायामे त्ति चीयत इति **कायः** शरीरम्, तस्य **व्यायामो** व्यापारः **कायव्यायामः**, औदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेष इति भावः, स पुनरौदारिकादिभेदेन सप्तप्रकारोऽपि जीवानन्तत्वेनानन्तभेदोऽपि वा एक एव, कायव्यायामसामान्यादिति । यच्चैकस्यैकदा मनःप्रभृतीनामेकत्वं तत् सूत्र एव विशेषेण वक्ष्यति **एगे मणे देवासुरे**[**सू०३१**]त्यादिनेति सामान्याश्रयमेवेहैकत्वं व्याख्यातमिति ।

[सू० १४] एगा उप्पा । [सू० १५] एगा वियती । [सू० १६] एगा वियच्चा।

[टी०] उप्प त्ति प्राकृतत्वादुत्पादः, स चैक एकसमये एकपर्यायापेक्षया, न हि तस्य युगपदुत्पादद्वयादिरस्ति, अनपेक्षिततद्विशेषकपदार्थतया वैकोऽसाविति ।

वियइ त्ति विगतिर्विगमः, सा चैकोत्पादवदिति ।

वियच्च त्ति विकृतेः [विगतेः] प्रागुक्तत्वादिह **विगतस्य** विगमवतो जीवस्य मृतस्येत्यर्थः **अर्चा** शरीरं विगतार्चा, प्राकृतत्वादिति, सा चैका सामान्यादिति ।

[सू० १७] एगा गती । एगा आगती ।

[सू० १८] एगे चयणे । [सू० १९] एगे उववाए ।

[टी०] गइ त्ति मरणानन्तरं मनुजत्वादेः सकाशान्नारकत्वादौ जीवस्य गमनं गतिः, सा चैकदैकस्यैकैव ऋज्वादिका नरकगत्यादिका वा ।

आगइ त्ति आगमनमागतिः नारकत्वादेरेव प्रतिनिवृत्तिः, तदेकत्वं गतेरिवेति ।

चयणे त्ति च्युतिः च्यवनम्, वैमानिक-ज्योतिष्काणां मरणम्, तदेकमेकजीवापेक्षया नानाजीवापेक्षया च पूर्ववदिति ।

उववाए त्ति उपपतनमुपपातो देव-नारकाणां जन्म, स चैकश्च्यवनवदिति ।

[सू० २०] एगा तक्का । [सू० २१] एगा सन्ना ।

[सू० २२] एगा मन्ना । [सू० २३] एगा विन्नू ।

[टी०] तक्क त्ति तर्कणं **तर्क्का** विमर्शः, अवायात् पूर्वा ईहाया उत्तरा प्रायः शिरःकण्डूयनादयः पुरुषधर्म्मा इह घटन्त इतिसम्प्रत्ययरूपा, ईहा वा, एकत्वं तु प्रागिवेति ।

सन्न त्ति संज्ञानं **संज्ञा** व्यञ्जनावग्रहोत्तरकालभावी मतिविशेषः, आहार-भयाद्युपाधिका वा चेतना संज्ञा, अभिधानं वा संज्ञेति ।

मन्न त्ति प्राकृतत्वान्मननं मतिः, कथञ्चिदर्थपरिच्छित्तावपि सूक्ष्मधर्मालोचनरूपा बुद्धिरिति यावत्, आलोचनमिति केचित् ।

एगा विन्नु त्ति विद्वान् विज्ञो वा तुल्यबोधत्वादेक इति, स्त्रीलिङ्गत्वं च प्राकृतत्वात् उत्पाद **उप्पा**वत् ।

[सू० २४] एगा वेयणा । [सू० २५] एगे छेयणे ।

[सू० २६] एगे भेयणे । [सू० २७] एगे मरणे अंतिमसारीरियाणं ।

[टी०] **वेयण** त्ति प्राग् वेदना सामान्यकर्मानुभवलक्षणोक्ता, इह तु पीडालक्षणैव, सा च सामान्यत एकैवेति ।

अस्या एव कारणविशेषनिरूपणायाह– **छेयणे** त्ति छेदनं शरीरस्यान्यस्य वा खड्गादिनेति । **भेयणे** त्ति, भेदनं कुन्तादिना, अथवा **छेदनं** कर्मणः स्थितिघातः, **भेदनं** तु रसघात इति, एकता च विशेषाविवक्षणादिति ।

वेदनादिभ्यश्च मरणमतस्तद्विशेषमाह– **एगे मरणे** इत्यादि, मृतिर्मरणम्, अन्ते भव**मन्तिमं** चरमम्, तच्च तच्छरीरं चे**त्यन्तिमशरीरम्**, तत्र भवा **अन्तिमशारीरिका** उत्तरपदवृद्धेः, तद्वा तेषामस्तीति **अन्तिमशरीरिकाः**, दीर्घत्वं च प्राकृतशैल्या, तेषां चरमदेहानाम्, मरणैकता च सिद्धत्वे पुनर्मरणाभावादिति।

[सू० २८] एगे संसुद्धे अहाभूते पत्ते । एगदुक्खे जीवाणं एगभूते।

[टी०] अन्तिमशरीरश्च स्नातको भूत्वा म्रियते, अतस्तमाह– **एगे संसुद्धे** इत्यादि, एकः **संशुद्धः** अशबलचरणः अकषायत्वात्, **यथाभूतः** तात्त्विकः । पात्रमिव **पात्र**मतिशयवद्ज्ञानादिगुणरत्नानाम्, **प्राप्तो** वा गुणप्रकर्षमिति गम्यते। एकमेवान्तिमभव-ग्रहणसम्भवं दुःखं यस्य स **एकदुःखः** । जीवानां प्राणिना**मेकभूतः** एक एव आत्मोपम इत्यर्थः, एकान्तहितवृत्तित्वाद्, एकत्वं चास्य बहूनामपि समस्वभावत्वादिति ।

[सू० २९] एगा अहम्मपडिमा जं से आया परिकिलेसति ।

[सू० ३०] एगा धम्मपडिमा जं से आया पज्जवजाए ।

[टी०] दुःखं पुनरधर्म्माभिनिवेशादिति तत्स्वरूपमाह– **एगा अहम्मे**त्यादि। धारयति दुर्गतौ प्रपततो जीवान् धारयति सुगतौ वा [तान्] स्थापयतीति धर्म्मः, उक्तं च–

दुर्गतौ प्रसृतान् जन्तून्, यस्माद्धारयते ततः ।
धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म्म इति स्मृतः ॥ [ ]

स च श्रुत-चारित्रलक्षणः, तत्प्रतिपक्षस्त्व**धर्म्मः**, तद्विषया **प्रतिमा** प्रतिज्ञा अधर्म्मप्रधानशरीरं वा **अधर्म्मप्रतिमा**, सा चैका, सर्वस्याः परिक्लेशकारणतयैक-रूपत्वाद्, अत एवाह– **जं से** इत्यादि, **यत्** यस्मात् **से** तस्याः स्वाम्यात्**मा** जीवो अथवा **से** त्ति सोऽधर्म्मप्रतिमावानात्**मा परिक्लिश्यते** रागादिभिर्बाध्यते, संक्लिश्यत इत्यर्थः ।

एतद्विपर्ययमाह– **एगा धम्मे**त्यादि प्राग्वत्, नवरं पर्यवाः ज्ञानादिविशेषा जाता यस्य स **पर्यवजातो** भवतीति शेषः, विशुध्यतीत्यर्थः ।

[सू० ३१] एगे मणे देवा-ऽसुर-मणुयाणं तंसि तंसि समयंसि १।

[सू० ३२] एगा वती देवा-ऽसुर-मणुयाणं तंसि तंसि समयंसि २।

[सू० ३३] एगे कायवायामे देवा-ऽसुर-मणुयाणं तंसि तंसि समयंसि ३।

[सू० ३४] एगे उट्ठाण-कम्म-बल-वीरिय-पुरिसकार-परक्कमे देवा-ऽसुर-मणुयाणं तंसि तंसि समयंसि ४।

[टी०] धर्म्माधर्म्मप्रतिमे च योगत्रयाद्भवत इति तत्स्वरूपमाह- **एगे मणे** इत्यादि सूत्रत्रयम्, तत्र **मन** इति मनोयोगः, तच्च यस्मिन् यस्मिन् समये विचार्यते **तस्मिन् तस्मिन् समये** कालविशेष एकमेव, वीप्सानिर्देशेन न क्वचनापि समये तद् द्व्यादिसङ्ख्यं भवतीत्याह। एकत्वं च तस्यैकोपयोगत्वात् जीवानाम्। स्यादेतत्– नैकोपयोगो जीवः, युगपच्छीतोष्णस्पर्शविषयसंवेदनद्वयदर्शनात्, तथाविधभिन्नविषयोपयोगपुरुषद्वयवत्, अत्रोच्यते, यदिदं शीतोष्णोपयोगद्वयं तत् स्वरूपेण भिन्नकालमपि समय-मनसोरति-सूक्ष्मतया युगपदिव प्रतीयते, न पुनस्तद्युगपदेवेति ।

स मनोयोगः केषामित्याह– **देवासुरमणुयाणं** ति, तत्र दीव्यन्ति इति **देवाः** वैमानिकज्योतिष्कास्ते च, न सुरा **असुराः** भवनपति-व्यन्तरास्ते च, मनोर्जाता **मनुजाः** मनुष्यास्ते च **देवा-ऽसुर-मनुजाः**, तेषाम्। तथा **वागि**ति वाग्योगः, स चैषामेकदा एक एव, तथाविधमनोयोगपूर्वकत्वात् तथाविधवाग्योगस्य, सत्यादीनामन्यतरभावाद्वा, वक्ष्यति च– **छहिं ठाणेहिं णत्थि जीवाणं इड्ढी इ वा जाव परक्कमे इ वा, तंजहा-जीवं वा अजीवं करणयाए १, अजीवं वा जीवं करणयाए २, एगसमएणं दो भासाओ भासित्तए** [सू० ४७९] इति ।

तथा **कायव्यायामः** काययोगः, स चैषामेकदा **एक** एव, सप्तानां काययोगानामेकदा एकतरस्यैव भावात्। ननु यदाऽऽहारकप्रयोक्ता भवति तदौदारिकस्यावस्थितस्य श्रूयमाणत्वात् कथमेकदा न काययोगद्वयमिति ?, अत्रोच्यते, सतोऽप्यौदारिकस्य व्यायामाभावादाहारकस्यैव च तत्र व्याप्रियमाणत्वाद्, अथौदारिकमपि तदा व्याप्रियते

तर्हि मिश्रयोगता भविष्यति, केवलिसमुद्घाते सप्तम-षष्ठ-द्वितीयसमयेष्वौदारिकमिश्रवत्, तथा चाहारकप्रयोक्ता न लभ्येत, एवं च सप्तविधकाययोगप्रतिपादनमनर्थकं स्यादित्येक एव कायव्यायाम इति ।

इह च देवादिग्रहणं विशिष्टवैक्रियलब्धिसम्पन्नतयैषामनेकशरीररचने सत्येकदा मनोयोगादीनामनेकत्वं शरीरवद् भविष्यतीति प्रतिपत्तिनिरासार्थम्, न तु तिर्यग्नारकाणां व्यवच्छेदार्थम् इति विस्तरो वृत्तितो ज्ञेयः। सर्वत्र एवं च काययोगैकत्वे सत्यौदारिकादिकाययोगाहृतमनोद्रव्य-वाग्द्रव्यसाचिव्यजातजीवव्यापाररूपत्वात् मनोयोग-वाग्योगयोरेककाययोगपूर्वकतयाऽपि प्रागुक्तमेकत्वमवसेयमिति । अथवेदमेव वचनमत्र प्रमाणम्, आज्ञाग्राह्यत्वात् अस्य, यतः–

आणागेज्झो अत्थो आणाए चेव सो कहेयव्वो ।

दिट्ठंता दिट्ठंतिअ कहणविहि विराहणा इहरा ॥ [आव० नि० १६३३] इति । **दृष्टान्ताद्दार्ष्टान्तिको**ऽर्थ इत्यर्थः । एतेषां च मनःप्रभृतीनां यथाप्राधान्यकृतः क्रमः, प्रधानत्वं च बह्वल्पाऽल्पतरकर्मक्षयोपशमप्रभवलाभकृतमिति ।

कायव्यायामस्यैव भेदानामेकतामाह– **एगे उट्ठाणे**त्यादि, **उत्थानं** च चेष्टाविशेषः **कर्म्म** च भ्रमणादिक्रिया **बलं** च शरीरसामर्थ्यं **वीर्यं** च जीवप्रभवं **पुरुषकार**श्च अभिमानविशेषः **पराक्रम**श्च पुरुषकार एव निष्पादितस्वविषय इति विग्रहे द्वन्द्वैकवद्भावः, एते च वीर्यान्तरायक्षय-क्षयोपशमसमुत्था जीवपरिणामविशेषाः, एतेषु प्रत्येकमेकशब्दो योजनीयः, वीर्यान्तरायक्षय-क्षयोपशमवैचित्र्यतः प्रत्येकं जघन्यादिभेदैरनेकत्वेऽप्येषामेकजीवस्यैकदा क्षय-क्षयोपशममात्राया एकविधत्वादेक एव जघन्यादिरेतद्विशेषो भवति कारणमात्राधीनत्वात् कार्यमात्राया इति सूत्रभावार्थः, शेषं प्राग्वदिति ।

[सू० ३५] एगे नाणे १। एगे दंसणे २। एगे चरित्ते ३।

[टी०] पराक्रमादेश्च ज्ञानादिर्मोक्षमार्गोऽवाप्यते, यत आह–

अब्भुट्ठाणे विणये परक्कमे साहुसेवणाए य ।

सम्मद्दंसणलंभो विरयाविरईय विरईय ॥ [आव० नि० ८४८] इति ।

अतो ज्ञानादीनां निरूपणार्थमाह– **एगे नाणे** इत्यादि । ज्ञायते परिच्छिद्यतेऽर्थो

अनेनास्मिन्नस्माद्वेति **ज्ञानम्**, ज्ञान-दर्शनावरणयोः क्षयः क्षयोपशमो वा । ज्ञातिर्वा **ज्ञानम्**, आवरणद्वयक्षयाद्याविर्भूत आत्मपर्यवविशेषः सामान्यविशेषात्मके वस्तुनि विशेषांशग्रहणप्रवणः सामान्यांशग्राहकश्च ज्ञानपञ्चका-ऽज्ञानत्रयदर्शनचतुष्टयरूपः, तच्चानेकमप्यवबोधसामान्यादेकमुपयोगापेक्षया वा, तथाहि– लब्धितो बहूनां बोध-विशेषाणामेकदा सम्भवेऽप्युपयोगत एक एव सम्भवति, एकोपयोगत्वाज्जीवानामिति । ननु दर्शनस्य ज्ञानव्यपदेश्यत्वमयुक्तम्, विषयभेदाद्, उक्तं च– **जं सामन्नग्गहणं दंसणमेयं विसेसियं नाणं** [ ] ति, अत्रोच्यते, ईहा-ऽवग्रहौ हि दर्शनम्, सामान्यग्राहकत्वाद्, अपाय-धारणे च ज्ञानम्, विशेषग्राहकत्वाद् ।

दंसणे त्ति दृश्यन्ते श्रद्धीयन्ते पदार्था अनेनास्मादस्मिन् वेति **दर्शनं** दर्शनमोहनीयस्य क्षयः क्षयोपशम उपशमो वा, दृष्टिर्वा **दर्शनं** दर्शनमोहनीयक्षयाद्याविर्भूतस्तत्त्वश्रद्धानरूप आत्मपरिणामः, तच्चोपाधिभेदादनेकविधमपि श्रद्धानसामान्यादेकम्, एकजीवस्य वैकदा एकस्यैव भावादिति । नन्ववबोधसामान्याज्ज्ञान-सम्यक्त्वयोः कः प्रतिविशेषः ?, उच्यते, रुचिः सम्यक्त्वम्, रुचिकारणं तु ज्ञानम्, यथोक्तम्–

नाणमवाय-धिईओ दंसणमिट्ठं जहोग्गहेहाओ ।
तह तत्तरुई सम्मं रोइज्जइ जेण तं नाणं ॥ [ ] ति ।

चरित्ते त्ति चर्यते मुमुक्षुभिरासेव्यते तदिति चर्यते वा गम्यते अनेन निर्वृताविति चरित्रम्, चारित्रमोहनीयक्षयाद्याविर्भूत आत्मनो विरतिरूपः परिणाम इति, सामायिका-दितद्भेदानां विरतिसामान्यान्तर्भावादेकस्य चैकदा भावाद्वेति । एतेषां च ज्ञानादीनामयमेव क्रमः, यतो नाज्ञातं श्रद्धीयते नाश्रद्धितं सम्यगनुष्ठीयत इति ।

[सू० ३६] एगे समए । एगे पएसे । एगे परमाणू ।

[टी०] ज्ञानादीनि ह्युत्पत्ति-विगति-स्थितिमन्ति, स्थितिश्च समयादिकेति समयं प्ररूपयन्नाह– **एगे समए** । समयः परमनिरुद्धः काल उत्पलपत्रशतव्यतिभेददृष्टान्ता-ज्जरत्पट्टशाटिकापाटनदृष्टान्ताद्वा समयप्रसिद्धादवबोद्धव्यः, स चैक एव वर्त्तमानस्वरूपः, अतीता-ऽनागतयोर्विनष्टा-ऽनुत्पन्नत्वेनाभावात् । निरंशवस्त्वधिकारादेवेदं सूत्रद्वयमाह– **एगे पएसे, एगे परमाणू** । **प्रकृष्टो** निरंशो धर्म्मा-ऽधर्म्मा-ऽऽकाश-जीवानां **देशः** अवयवविशेषः **प्रदेशः**, स चैकः स्वरूपतः, सद्वितीयत्वादौ देशव्यपदेश्यत्वेन

प्रदेशत्वाभावप्रसङ्गादिति। **परमाणु** त्ति **परम**श्चासावात्यन्तिकोऽ**णु**श्च सूक्ष्मः **परमाणुः** द्व्यणुकादिस्कन्धानां कारणभूतः, आह च-

कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरस-वर्ण-गन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥ [ ] इति ।

स च स्वरूपतः एक एव, अन्यथा परमाणुरेवासौ न स्यादिति ।

[सू० ३७] एगा सिद्धी । एगे सिद्धे । एगे परिनिव्वाणे । एगे परिनिव्वुडे।

[टी०] सकलबादरस्कन्धप्रधानभूतमीषत्प्राग्भाराभिधानपृथिवीस्कन्धं प्ररूपयन्नाह- **एगा सिद्धी** । सिद्ध्यन्ति कृतार्था भवन्ति यस्यां सा सिद्धिः, सा च यद्यपि लोकाग्रम्, यत आह – **इहं बोदीं चइत्ताणं तत्थ गंतूण सिज्झइ** [आव० नि० ९५९] त्ति, तथापि तत्प्रत्यासत्त्येषत्प्राग्भाराऽपि तथा व्यपदिश्यते, आह च– **बारसहिं जोयणेहिं सिद्धी सव्वट्ठसिद्धाउ** [आव० नि० ९६०] त्ति, यदि च लोकाग्रमेव सिद्धिः स्यात् तदा कथमेतदनन्तरमुक्तं **निम्मलदगरयवण्णा तुसार-गोखीर-हार-सरिवन्ने**[आव० नि० ९६१] त्यादि तत्स्वरूपवर्णनं घटते ?, लोकाग्रस्यामूर्त्तत्वादिति, तस्मादीषत्प्राग्भारा सिद्धिरिहोच्यते, सा चैका ।

सिद्धेरनन्तरं सिद्धिमन्तमाह– **एगे सिद्धे**, सिद्ध्यति स्म कृतकृत्योऽभवत् सेधति स्म वा अगच्छत् अपुनरावृत्त्या लोकाग्रमिति **सिद्धः**, **सितं** वा बद्धं कर्म्म **ध्मातं** दग्धं यस्य स निरुक्तात् सिद्धः कर्म्मप्रपञ्चनिर्मुक्तः, स च एको द्रव्यार्थतया, पर्यायार्थतस्त्वनन्तपर्याय इति । अथवा सिद्धानाम् अनन्तत्वेऽपि तत्सामान्यादेकत्वम्। कर्म्मक्षयसिद्धस्य च परिनिर्वाणं धर्म्मो भवतीति तदाह– **एगे परिनिव्वाणे, परि** समन्तान्निर्**वाणं** सकलकर्म्मकृतविकारनिराकरणतः स्वस्थीभवनं **परिनिर्व्वाणम्**, तदेकम्, एकदा तस्य सम्भवे पुनरभावादिति । परिनिर्व्वाणधर्म्मयोगात् स एव कर्मक्षयसिद्धः परिनिर्वृत उच्यते इति तद्दर्शनायाह– **एगे परिनिव्वुए, परिनिर्वृतः** सर्वतः शारीर-मानसास्वास्थ्यविरहित इति भावः, तदेकत्वं सिद्धस्येव भावनीयमिति ।

[सू० ३८] एगे सद्दे । एगे रूवे । एगे गंधे । एगे रसे । एगे फासे। एगे सुब्भिसद्दे। एगे दुब्भिसद्दे । एगे सुरूवे । एगे दुरूवे । एगे दीहे। एगे

रहस्से । एगे वट्टे । एगे तंसे । एगे चउरंसे । एगे पिहुले। एगे परिमंडले। एगे किण्हे । एगे णीले । एगे लोहिते । एगे हालिद्दे । एगे सुक्किले। एगे सुब्भिगंधे । एगे दुब्भिगंधे । एगे तित्ते । एगे कडुए । एगे कसाए। एगे अंबिले । एगे महुरे । एगे कक्खडे जाव लुक्खे ।

[टी०] तदेतावता ग्रन्थेनैते प्रायो जीवधर्म्मा एकतया निरूपिताः, इदानीं जीवोपग्राहकत्वात् पुद्गलानां तल्लक्षणाजीवधर्म्मा **एगे सद्दे** इत्यादिना **जाव लुक्खे** इत्येतदन्तेन ग्रन्थेनैकतयैव दर्श्यन्ते, पुद्गलादीनां तु सत्ता केषाञ्चिदनुमानतोऽवसीयते घटादिकार्योपलब्धेः, केषाञ्चित् सांव्यवहारिकप्रत्यक्षत इति । तत्र शब्दादिसूत्राणि सुगमानि, तानीमानि शब्द्यते अभिधीयते अनेनेति **शब्दो** ध्वनिः श्रोत्रेन्द्रियविषयः, रूप्यते अवलोक्यत इति **रूपम्** आकारश्चक्षुर्विषयः, घ्रायते सिङ्घ्यते इति **गन्धो** घ्राणविषयः, रस्यते आस्वाद्यते इति **रसः** रसनेन्द्रियविषयः, स्पृश्यते छुप्यत इति **स्पर्शः** स्पर्शनकरणविषयः, शब्दादीनां चैकत्वं सामान्यतः सजातीयविजातीयव्यावृत्तरूपापेक्षया वा भावनीयम् । शब्दभेदावाह– **सुब्भिसद्दे** त्ति, शुभशब्दो मनोज्ञ इत्यर्थः, एवं **दुब्भि** त्ति अशुभः, एवं च शब्दान्तरमत्रान्तर्भूतमवसेयम्, एवं रूपव्याख्यानेऽपि, **सुरूपा**दयश्चतुर्दश **शुक्ला**न्ता रूपभेदाः, तत्र **सुरूपं** मनोज्ञरूपमितरत्तु **दूरूप**मिति । **दीर्घम्** आयततरम्, **ह्रस्वं** तदितरद् । **वृत्ता**दयः पञ्च स्कन्धसंस्थानभेदाः, तत्र **वृत्तं** संस्थानं मोदकवत्, तच्च प्रतर-घनभेदात् द्विधा, पुनः प्रत्येकं समविषमप्रदेशावगाढमिति चतुर्द्धा, एवं शेषाण्यपि । **तंसे** त्ति तिस्रोऽस्रयः कोटयो यस्मिंस्तत् त्र्यस्रं त्रिकोणम्, **चतुरंसे** त्ति चतस्रोऽस्रयो यस्य तत्तथा, चतुष्कोणमित्यर्थः, तथा **पिहुले** त्ति पृथुलं विस्तीर्णम्, अन्यत्र पुनरिह स्थाने आयतमभिधीयते, तदेव चेह दीर्घ-ह्रस्व-पृथुलशब्दैर्विभज्योक्तम्, आयतधर्मत्वादेषाम्, तच्चायतं प्रतर-घन-श्रेणिभेदात् त्रिधा, पुनरेकैकं समविषमप्रदेशमिति षोढा। **परिमंडले** त्ति परिमण्डलसंस्थानं वलयाकारं प्रतर-घनभेदाद् द्विविधमिति । रूपभेदो वर्णः, स च **कृष्णा**दिः पञ्चधा प्रतीत एव, नवरं **हारिद्रः** पीतः, कपिशादयस्तु संसर्गजा इति न तेषामुपन्यासः । गन्धो द्वेधा-सुरभिर्दुरभिश्च, तत्र सौमुख्यकृत् सुरभिः, वैमुख्यकृत् दुरभिः, साधारणपरिणामोऽस्पष्टो

दुर्ग्रह इति संसर्गजत्वादेव नोक्त इति । रसः पञ्चधा, तत्र श्लेष्मनाशकृत् **तिक्तः** १, वैशद्यच्छेदनकृत् **कटुकः** २, अन्नरुचिस्तम्भनकृत् **कषायः** ३, आश्रवण-क्लेदनकृ**दम्लः** ४, ह्लादन-बृंहणकृ**न्मधुरः** ५, संसर्गजो लवण इति नोक्त इति । स्पर्शोऽष्टविधः, तत्र **कर्कशः** कठिनोऽनमनलक्षणः १, **यावत्**करणात् मृद्वादयः षडन्ये, तत्र मृदुः सन्नतिलक्षणः २, गुरुरधोगमनहेतुः ३, लघुः प्रायस्तिर्यगूर्ध्वगमनहेतुः ४, शीतो वैशद्यकृत् स्तम्भन-स्वभावः ५, उष्णो मार्द्दवपाककृत् ६, स्निग्धः संयोगे सति संयोगिनां बन्धकारणम् ७, **रूक्षस्**तथैवाबन्धकारणमिति ८ ।

[सू० ३९] एगे पाणातिवाए जाव एगे परिग्गहे । एगे कोधे जाव लोभे। एगे पेज्जे, एगे दोसे जाव एगे परपरिवाए । एगा अरतिरती । एगे मायामोसे। एगे मिच्छादंसणसल्ले ।

एगे पाणातिवायवेरमणे जाव परिग्गहवेरमणे । एगे कोधविवेगे जाव मिच्छादंसणसल्लविवेगे ।

[टी०] उक्ता पुद्गलधर्म्माणामेकता, इदानीं पुद्गलालिङ्गितजीवाप्रशस्तधर्म्माणामष्टा-दशानां पापस्थानकाभिधानानाम् स्वरूपमाह– **एगे पाणाइवाए** इत्यादि **प्राणाः** उच्छ्वासादयः, तेषा**मतिपातनं** प्राणवता सह वियोजनं **प्राणातिपातो** हिंसेत्यर्थः, उक्तं च–

पञ्चेन्द्रियाणि त्रिविधं बलं च उच्छ्वासनिःश्वासमथान्यदायुः ।
प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा ॥ [ ] इति,

स च प्राणातिपातो द्रव्य-भावभेदात् द्विविधः, विनाश-परिताप-सङ्क्लेशभेदात् त्रिविधो वा, आह च–

तप्पज्जायविणासो दुक्खुप्पाओ य संकिलेसो य ।
एस वहो जिणभणिओ वज्जेयव्वो पयत्तेणं ॥ [**श्रावकप्र० १९१**] ति ।

अथवा मनोवाक्कायैः करण-कारणा-ऽनुमतिभेदान्नवधा, पुनः स क्रोधादिभेदात् षट्त्रिंशद्विधो वेति १ । तथा **मृषा** मिथ्या वदनं वादो **मृषावादः**, स च द्रव्य-भावभेदात् द्विधा, अभूतोद्भावनादिभिश्चतुर्धा वा, तथाहि– अभूतोद्भावनं यथा सर्वगत आत्मा,

भूतनिह्नवो यथा नास्त्यात्मा, वस्त्वन्तरन्यासो यथा गौरपि सन्नश्वोऽयमिति, निन्दा च यथा कुष्ठी त्वमसीति २ । तथा **अदत्तस्य** स्वामि-जीव-तीर्थकर-गुरुभिर-वितीर्णस्याननुज्ञातस्य सचित्ता-ऽचित्त-मिश्रभेदस्य वस्तुनः **आदानं** ग्रहणमदत्तादानम्, चौर्यमित्यर्थः, तच्च विविधोपाधिभेदादनेकविधमिति ३। तथा मिथुनस्य स्त्रीपुरुषलक्षणस्य कर्म्म **मैथुनम्** अब्रह्म, तत् मनोवाक्कायानां कृत-कारिता-ऽनुमतिभिरौदारिक-वैक्रियशरीरविषयाभिरष्टादशधा, विविधोपाधिवशाद् बहुविधतरं वेति ४ । तथा परिगृह्यते स्वीक्रियत इति परिग्रहः बाह्याभ्यन्तरभेदाद् द्विधा, तत्र बाह्यो धर्मसाधनव्यतिरेकेण धन-धान्यादिरनेकधा,आभ्यन्तरस्तु मिथ्यात्वा-ऽविरति-कषाय-प्रमादादिरनेकधा, परिग्रहणं वा **परिग्रहो** मूर्च्छेत्यर्थः ५ । तथा क्रोध-मान-माया-लोभाः कषायमोहनीय-कर्म्मपुद्गलोदयसम्पाद्या जीवपरिणामा इति, एते चानन्तानुबन्ध्यादिभेदतोऽसङ्ख्याता-ध्यवसायस्थानभेदतो वा बहुविधाः, तथा **पेज्ज** त्ति प्रियस्य भावः कर्म्म वा प्रेम, तच्चानभिव्यक्तमाया-लोभलक्षणभेदस्वभावमभिष्वङ्गमात्रमिति १०, तथा **दोसो** त्ति द्वेषणं द्वेषः, दूषणं वा दोषः, स चानभिव्यक्तक्रोध-मानलक्षणभेदस्वभावोऽप्रीतिमात्रमिति ११, '**कलहे**'त्यादि कलहो राटी १२, अभ्याख्यानं प्रकटमसद्दोषारोपणम् १३, पैशुन्यं पिशुनकर्म्म प्रच्छन्नं सदसद्दोषाविर्भावनम् १४, परेषां परिवादः **परपरिवादो** विकत्थनमित्यर्थः १५, **अरतिश्च** तन्मोहनीयोदयजश्चित्तविकार उद्वेगलक्षणो **रतिश्च** तथाविधानन्दरूपा '**अरतिरति**' इत्येकमेव विवक्षितम्, यतः क्वचन विषये या रतिस्तामेव विषयान्तरापेक्षया अरतिं व्यपदिशन्त्येवमरतिमेव रतिमित्यौपचारिकमेकत्वमनयोरस्तीति १६, तथा **मायामोस** त्ति माया च निकृतिर्मृषा च मृषावादो मायया वा सह मृषा मायामृषा प्राकृतत्वा**न्मायामोसं**, दोषद्वययोगः, इदं च मानमृषादिसंयोगदोषोपलक्षणम्, वेषान्तरकरणेन लोकप्रतारणमित्यन्ये १७, **मिथ्यादर्शनं** विपर्यस्ता दृष्टिः, तदेव तोमरादिशल्यमिव **शल्यं** दुःखहेतुत्वात् **मिथ्यादर्शनशल्य**मिति १८ । एतेषां च प्राणातिपातादीनाम् उक्तक्रमेणानेकविधत्वेऽपि वधादिसाम्यादेकत्वमवसेयमिति ।

उक्तान्यष्टादश पापस्थानानि, इदानीं तद्विपक्षाण्याह **एगे पाणाइवायवेरमणे** इत्यादिभिरष्टादशभिः सूत्रैरेकतामाह, सुगमानि चैतानि, नवरं **विरमणं** विरतिः, तथा

विवेकस्त्याग इति ।

[सू० ४०] एगा ओसप्पिणी, एगा सुसमसुसमा जाव एगा दूसमदूसमा। एगा उस्सप्पिणी, एगा दुस्समदुस्समा जाव एगा सुसमसुसमा ।

[टी०] उक्तं सपुद्गलजीवद्रव्यधर्म्माणामेकत्वमिदानीं कालस्य स्थितिरूपत्वेन तद्धर्म्मत्वात् तद्विशेषाणाम् **एगा ओसप्पिणी**त्यादिना **सुसमसुसमे**त्येतदन्तेनैतदेवाह । अथ काल एव कथमवसीयत इति चेत् ?, उच्यते, बकुल-चम्पका-ऽशोकादिपुष्पप्रदानस्य नियमेन दर्शनान्नियामकश्च काल इति । तत्र **ओसप्पिणि** त्ति अवसर्प्पति हीयमानारकतया अवसर्प्पयति वाऽऽयुष्क-शरीरादिभावान् हापयतीत्य-**वसर्प्पिणी** सागरोपमकोटीकोटीदशकप्रमाणः कालविशेषः । सुष्ठु समा सुषमा, अत्यन्तं सुषमा **सुषमसुषमा** अत्यन्तसुखस्वरूपस्तस्या एव प्रथमारक इति, एकत्वं चावसर्प्पिण्याः स्वरूपेणैकत्वादेवं सर्वत्र, **याव**दिति सीमोपदर्शनार्थः, ततश्च **सुषमसुषमे**त्यादि सूत्रं स्थानान्तरप्रसिद्धं तावदध्येयमिह **यावद् दूसमदूसमे**ति पदमित्यतिदेशः, अयं च सूत्रलाघवार्थमिति, एवं च सर्वत्र **याव**दिति व्याख्येयम्, अतिदेशलब्धानि च पदान्येकशब्दोपपदान्येतानि, 'एगा सुसमसुसमा, एगा सुसमा, एगा सुसमदुसमा, एगा दुसमसुसमा, एगा दुसमा, एगा दुसमदुसमे'त्ति । आसां स्वरूपं शब्दानुसारतो ज्ञेयम् । तथा उत्सर्प्पति वर्द्धतेऽरकापेक्षया उत्सर्प्पयति वा भावानायुष्कादीन् वर्द्धयतीति **उत्सर्प्पिणी** अवसर्प्पिणीप्रमाणा, दुष्ठु समा दुःषमा दुःखरूपा अत्यन्तं दुःषमा दुःषमदुःषमा, **यावत्**करणाद् 'एगा दूसमा, एगा दुसमसुसमा, एगा सुसमदुसमा, एगा सुसमे'ति दृश्यम्, एतत्प्रमाणं च पूर्वोक्तमेव नवरं विपर्यासादिति ।

[सू० ४१] [१] एगा नेरइयाणं वग्गणा, एगा असुरकुमाराणं वग्गणा, चउवीसादंडओ जाव एगा वेमाणियाणं वग्गणा ।

[२] एगा भवसिद्धीयाणं वग्गणा, एगा अभवसिद्धीयाणं वग्गणा । एगा भवसिद्धीयाणं णेरतियाणं वग्गणा, एगा अभवसिद्धीयाणं णेरतियाणं वग्गणा, एवं जाव एगा भवसिद्धियाणं वेमाणियाणं वग्गणा, एगा अभवसिद्धियाणं वेमाणियाणं वग्गणा ।

[३] एगा सम्मद्दिट्ठीयाणं वग्गणा, एगा मिच्छदिट्ठीयाणं वग्गणा, एगा सम्ममिच्छदिट्ठीयाणं वग्गणा । एगा सम्मदिट्ठीयाणं णेरइयाणं वग्गणा, एगा मिच्छदिट्ठीयाणं णेरइयाणं वग्गणा, एगा सम्मामिच्छदिट्ठियाणं णेरइयाणं वग्गणा, एवं जाव थणितकुमाराणं वग्गणा । एगा मिच्छदिट्ठियाणं पुढविक्काइयाणं वग्गणा, एवं जाव वणस्सतिकाइयाणं । एगा सम्मदिट्ठियाणं बेइंदियाणं वग्गणा, एगा मिच्छदिट्ठियाणं बेइंदियाणं वग्गणा, एवं तेइंदियाण वि चउरिंदियाण वि, सेसा जहा नेरइया जाव एगा सम्मामिच्छदिट्ठियाणं वेमाणियाणं वग्गणा ।

[४] एगा कण्हपक्खियाणं वग्गणा। एगा सुक्कपक्खियाणं वग्गणा। एगा कण्हपक्खियाणं णेरइयाणं वग्गणा। एगा सुक्कपक्खियाणं णेरइयाणं वग्गणा। एवं चउवीसादंडओ भाणयिव्वो।

[५] एगा कण्हलेसाणं वग्गणा, एगा नीललेसाणं वग्गणा, एवं जाव सुक्कलेसाणं वग्गणा । एगा कण्हलेसाणं नेरइयाणं वग्गणा जाव काउलेसाणं णेरइयाणं वग्गणा, एवं जस्स जति लेसाओ, भवणवइ-वाणमंतर-पुढवि-आउ-वणस्सइकाइयाणं च चत्तारि लेसाओ, तेउ-वाउ-बेइंदिय-तेइंदिअ-चउरिंदियाणं तिन्नि लेसाओ, पंचिंदियतिरिक्खजोणियाणं मणुस्साणं छ लेस्साओ, जोतिसियाणं एगा तेउलेसा, वेमाणियाणं तिन्नि उवरिमलेसाओ।

[६] एगा कण्हलेसाणं भवसिद्धियाणं वग्गणा, एगा कण्हलेसाणं अभवसिद्धियाणं वग्गणा, एवं छसु वि लेसासु दो दो पयाणि भाणियव्वाणि। एगा कण्हलेसाणं भवसिद्धियाणं नेरइयाणं वग्गणा, एगा कण्हलेसाणं अभवसिद्धियाणं णेरइयाणं वग्गणा, एवं जस्स जति लेसाओ तस्स तति भाणियव्वाओ जाव वेमाणियाणं ।

[७] एगा कण्हलेसाणं सम्मदिट्ठियाणं वग्गणा, एगा कण्हलेसाणं मिच्छदिट्ठियाणं वग्गणा, एगा कण्हलेसाणं सम्मामिच्छदिट्ठियाणं वग्गणा, एवं छसु वि लेसासु जाव वेमाणियाणं जेसिं जति दिट्ठीओ ।

[८] एगा कण्हलेसाणं कण्हपक्खियाणं वग्गणा, एगा कण्हलेसाणं

सुक्कपक्खियाणं वग्गणा, जाव वेमाणियाणं, जस्स जति लेसाओ । एए अट्ठ चउवीसदंडया ।

[टी०] कृता जीव-पुद्गल-काललक्षणद्रव्यविविधधर्म्मविशेषाणामेकत्वप्ररूपणा, अधुना संसारि-मुक्तजीव-पुद्गलद्रव्यविशेषाणां नारक-परमाण्वादीनां समुदाय-लक्षणधर्म्मस्य **एगा नेरइयाणं वग्गणे**त्यादिना ऽऽह । तत्र **नेरइयाणं** ति **निर्गतम्** अविद्यमान**मयम्** इष्टफलं कर्म्म येभ्यस्ते निरयाः, तेषु भवा नैरयिकाः क्लिष्टसत्त्वविशेषाः, ते च पृथिवी-प्रस्तट-नरकावासस्थिति-भव्यत्वादिभेदादनेकविधास्तेषां सर्वेषां **वर्ग्गणा** वर्गः समुदायः, तस्याश्चैकत्वं सर्वत्र नारकत्वादिपर्यायसाम्यादिति। तथा **असुराश्च** ते नवयौवनतया कुमारा इव **कुमारा**श्चेत्यसुरकुमारास्तेषामेका वर्गणेति, **चउवीसदंडउ** त्ति **चतुर्विंशति**पदप्रतिबद्धो **दण्डको** वाक्यपद्धतिश्चतुर्विंशतिदण्डकः, स इह वाच्य इति शेषः, स चायम्–

नेरइया १ असुरादी १० पुढवाई ५ बेंदियादयो चेव ४ ।
नर १ वंतर १ जोतिसिया १ वेमाणी १ दंडओ एवं ॥ [ ]

भवनपतयो दशधा–

असुरा नाग सुवण्णा विज्जू अग्गी य दीव उदही य ।
दिसि पवण थणियनामा दसहा एए भवणवासि ॥ [प्रज्ञा० २।१३७] त्ति ।

एतदनुसारेण सूत्राणि वाच्यानि । यावच्चतुर्विंशतितमम् **एगा वेमाणियाणं वग्गण** त्ति, एष सामान्यदण्डकः १।

एगा भवसिद्धियेत्यादि, भविष्यतीति **भवा** भाविनी, सा **सिद्धिः** निर्वृतिर्येषां ते **भवसिद्धिका** भव्याः, तद्विपरीतास्त्वभव्या इत्यर्थः । ननु जीवत्वे समाने सति को भव्या-ऽभव्ययोर्विशेषः ?, उच्यते, स्वभावकृतः, द्रव्यत्वेन समानयोर्ज्जीव-नभसोरिव, *आह च*-

दव्वाइत्ते तुल्ले जीव-नभाणं सभावओ भेदो ।
जीवा-ऽजीवाइगओ जह तह भव्वेयरविसेसो ॥ [विशेषाव० १८२३] त्ति ।

आभ्यां विशेषितोऽन्यो दण्डकः २ ।

एगा सम्मद्दिट्ठियाणमित्यादि, **सम्यग्** अविपरीता **दृष्टिः** दर्शनं रुचिस्तत्त्वानि प्रति

येषां ते **सम्यग्दृष्टिकाः**, ते च मिथ्यात्वमोहनीयक्षय-क्षयोपशमोपशमेभ्यो भवन्ति, तथा **मिथ्या** विपर्यासवती जिनाभिहितार्थसार्थाश्रद्धानवती **दृष्टिः** दर्शनं श्रद्धानं येषां ते **मिथ्यादृष्टिकाः**, मिथ्यात्वमोहनीयकर्मोदयादरुचितजिनवचना इति भावः, उक्तं च–

सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः ।
मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥ [ ] इति ।

तथा सम्यक् च मिथ्या च दृष्टिर्येषां ते **सम्यग्मिथ्यादृष्टिकाः**, जिनोक्तभावान् प्रत्युदासीनाः इति सम्यग्दृष्टि-मिथ्यादृष्टिमिश्रविशेषितोऽन्यो दण्डकः, तत्र च नारकादिष्वेकादशसु पदेषु दर्शनत्रयमप्यस्ति, अत उक्तम्– **एवं जाव थणिए**त्यादि, पृथिव्यादीनां मिथ्यात्वमेव, तेन तेषां तेनैव व्यपदेशः, उक्तं च– **चोद्दस तस सेसया मिच्छ** [**जीवसमा०२६**] त्ति, चतुर्दशगुणस्थानकवन्तस्त्रसाः, स्थावरास्तु मिथ्यादृष्टय एवेत्यर्थः । द्वीन्द्रियादीनां मिश्रं नास्ति, संज्ञिनामेव तद्भावात्, ततस्तेषु सम्यग्दृष्टि-मिथ्यादृष्टितयैव व्यपदेशः । **एवं तेइंदियाण वि चउरिंदियाण वि** त्ति द्वीन्द्रियवद् व्यपदेशद्वयेन वर्गणैकत्वं वाच्यम्, पञ्चेन्द्रियतिर्यगादीनां दर्शनत्रयमप्यस्ति ततस्त्रिधाऽपि तद्व्यपदेशः, अत एवोक्तम्– **सेसा जहा नेरइय** त्ति, तथा वाच्या इति शेषः, दण्डकपर्यन्तसूत्रं पुनरिदम् ['एगा सम्मद्दिट्ठियाणं वेमाणियाणं वग्गणा, एवं मिच्छद्दिट्ठियाणं एवं सम्मामिच्छदिट्ठियाणं', एतत्पर्यन्तमाह–] **जाव एगा सम्मामिच्छे**त्यादि ३ ।

एगा कण्हपक्खियाणं इत्यादि, कृष्णपाक्षिकेतरयोर्लक्षणम् –

जेसिमवड्ढो पोग्गलपरियट्टो सेसओ उ संसारो ।
ते सुक्कपक्खिया खलु अहिए पुण किण्हपक्खीय ॥ [**श्रावकप्र० ७२**] त्ति ।

एतद्विशेषितोऽन्यो दण्डकः ४।

एगा कण्हलेसाणमित्यादि, लिश्यते प्राणी कर्मणा यया सा लेश्या, यदाह –

श्लेष इव वर्णबन्धस्य कर्म्मबन्धस्थितिविधात्र्यः ॥ [**प्रशम० ३८**], तथा
कृष्णादिद्रव्यसाचिव्यात् परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं लेश्याशब्दः प्रयुज्यते ॥ [ ] इति ।

इयं च शरीरनामकर्म्मपरिणतिरूपा योगपरिणतिरूपत्वात्, योगस्य च शरीरनाम-कर्म्मपरिणतिविशेषत्वात्, यत उक्तं **प्रज्ञापनावृत्तिकृता**– **योगपरिणामो लेश्या, कथं**

पुनर्योगपरिणामो लेश्या ?, यस्मात् सयोगिकेवली शुक्ललेश्यापरिणामेन विहृत्यान्तर्मुहूर्त्ते शेषे योगनिरोधं करोति ततोऽयोगित्वमलेश्यत्वं च प्राप्नोति, अतोऽवगम्यते योगपरिणामो लेश्येति, स पुनर्योगः शरीरनामकर्म्मपरिणतिविशेषः, यस्मादुक्तम्– कर्म्म हि कार्मणस्य कारणमन्येषां च शरीराणाम् [ ] इति, तस्मादौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः १, तथौदारिक-वैक्रिया-ऽऽहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्यात् जीवव्यापारो यः स वाग्योगः २, तथौदारिकादिशरीरव्यापाराहृतमनोद्रव्यसमूहसाचिव्यात् जीवव्यापारो यः स मनोयोग इति ३, ततो यथैव कायादिकरणयुक्तस्यात्मनो वीर्यपरिणतिर्योग उच्यते तथैव लेश्यापीति [प्रज्ञापनावृ० १७।२] । अन्ये तु व्याचक्षते– कर्म्मनिस्यन्दो लेश्या [ ] इति।

सा च द्रव्य-भावभेदात् द्विधा, तत्र द्रव्यलेश्या कृष्णादिद्रव्याण्येव, भावलेश्या तु तज्जन्यो जीवपरिणाम इति । इयं च षट्प्रकारा जम्बूफलखादकपुरुषषट्कदृष्टान्ताद् ग्रामघातकचौरपुरुषषट्कदृष्टान्ताद्वा आगमप्रसिद्धादवसेयेति । तत्सूत्राणि सुगमानि, नवरं कृष्णवर्णद्रव्यसाचिव्यात् जाताऽशुभपरिणामरूपा कृष्णा [सा] लेश्या येषां ते तथा, एवं शेषाण्यपि पदानि, नवरं नीला ईषत्सुन्दररूपा। **एव**मिति अनेनैव क्रमेण **यावत्**करणात् 'एगा कवोयलेसाण'मित्यादि सूत्रत्रयं दृश्यम्, तत्र कपोतस्य पक्षिविशेषस्य वर्णेन तुल्यानि यानि द्रव्याणि, धूम्राणि इत्यर्थः, तत्साहाय्यजाता कापोतलेश्या मनाक् शुभतरा, सा लेश्या येषां ते तथा, तेजः अग्निज्वाला, तद्वर्णानि यानि द्रव्याणि, लोहितानीत्यर्थः, तत्साचिव्यजाता तेजोलेश्या शुभस्वभावा, पद्मगर्भवर्णानि यानि द्रव्याणि, पीतानीत्यर्थः तत्साचिव्यजाता पद्मलेश्या शुभतरा, शुक्लवर्णद्रव्यजनिता शुक्ललेश्या, अत्यन्तशुभेति, एतासां च विशेषतः स्वरूपं **लेश्याध्ययना**दवसेयमिति । **एवं जस्स जइ** त्ति नारकाणामिव **यस्या**ऽसुरादे**र्या** यावत्यो **लेश्या**स्तदुद्देशेन तद्वर्गणैकत्वं वाच्यम् । **भवणे**त्यादिना तल्लेश्यापरिमाणमाह । अत्र **सङ्ग्रहणी**–

काऊ नीला किण्हा लेसाओ तिन्नि होंति नरएसु ।
तइयाए काउनीला पृथिव्यामित्यर्थः **नीला किण्हा य रिट्ठाए** पञ्चम्यामित्यर्थः ॥ [बृहत्सं०२८८]
किण्हा नीला काऊ तेऊलेसा य भवण-वंतरिया ।
जोइससोहम्मीसाणे तेऊलेसा मुणेयव्वा ॥ [बृहत्सं० १९३]

कप्पे सणंकुमारे माहिंदे चेव बंभलोए य ।
एएसु पम्हलेसा तेण परं सुक्कलेसा उ ॥ [बृहत्सं० १९४]
पुढवी आउ वणस्सइ बायर पत्तेय लेस चत्तारि ।
गब्भयतिरियनरेसुं छल्लेसा तिन्नि सेसाणं ॥ [बृहत्सं० ३४२]

अयं सामान्यो लेश्यादण्डकः ५ । अयमेव भव्याभव्यविशेषादन्यः– **एगा कण्हलेसाणं भवसिद्धियाणं वग्गणे**त्यादि । **एव**मिति कृष्णलेश्यायामिव **छसु वि** त्ति कृष्णया सह षट्सु, अन्यथा अन्या पञ्चैवातिदेश्या भवन्तीति, **द्वे द्वे पदे** प्रतिलेश्यं भव्याभव्यलक्षणे वाच्ये, यथा 'एगा नीललेसाणं भवसिद्धियाणं वग्गणे'त्यादि ६ ।

लेश्यादण्डक एव दर्शनत्रयविशेषितोऽन्यः– **एगा कण्हलेसाणं सम्मद्दिट्ठियाण**मित्यादि, **जेसिं जइ दिट्ठीओ** त्ति **येषां** नारकादीनां **या** यावत्यो दृष्टयः सम्यक्त्वाद्यास्तेषां ता वाच्या इति, तत्र एकेन्द्रियाणां मिथ्यात्वमेव, विकलेन्द्रियाणां सम्यक्त्व-मिथ्यात्वे, शेषाणां तिस्रोऽपि दृष्टय इति ७ । लेश्यादण्डक एव कृष्ण-शुक्लपक्षविशिष्टोऽन्यः– **एगा कण्हलेसाणं कण्हपक्खियाण**मित्यादि । एते **अट्ठ चउवीस दंडय** त्ति, ते चैवम्–

ओहो १, भव्वाईहिं विसेसिओ २, दंसणेहिं ३, पक्खेहिं ४ ।
लेसाहिं ५, भव्व ६, दंसण ७, पक्खेहिं विसिट्ठलेसाहिं ८॥ [ ] ति ।

[सू० ४२] एगा तित्थसिद्धाणं वग्गणा, एगा अतित्थसिद्धाणं वग्गणा, एवं जाव एगा एक्कसिद्धाणं वग्गणा, एगा अणेक्कसिद्धाणं वग्गणा । एगा पढमसमयसिद्धाणं वग्गणा, एवं जाव अणंतसमयसिद्धाणं वग्गणा ।

[टी०] इतः सिद्धवर्गणा अभिधीयन्ते– तत्र सिद्धा द्विधा अनन्तरसिद्ध-परम्परसिद्धभेदात्, तत्रानन्तरसिद्धाः पञ्चदशविधाः, तद्वर्गणैकत्वमाह- **एगा तित्थे**त्यादिना, तत्र तीर्यतेऽनेनेति तीर्थम्, द्रव्यतो नद्यादीनां समोऽनपायश्च भूभागो भौतादिप्रवचनं वा, द्रव्यतीर्थता त्वस्याप्रधानत्वाद्, अप्रधानत्वं च भावतस्तरणीयस्य संसारसागरस्य तेन तरीतुमशक्यत्वात्, सावद्यत्वादस्येति, भावतीर्थं तु सङ्घो यतो ज्ञानादिभावेन तद्विपक्षादज्ञानादितो भवाच्च भावभूतात् तारयतीति, आह च–

जं णाण-दंसण-चरित्तभावओ तव्विवक्खभावाओ ।
भवभावओ य तारेइ तेण तं भावओ तित्थं ॥ [विशेषाव० १०३३] ति ।

त्रिषु वा क्रोधाग्निदाहोपशम-लोभतृष्णानिरास-कर्म्ममलापनयनलक्षणेषु ज्ञानादिलक्षणेषु वा अर्थेषु तिष्ठतीति त्रिस्थम्, प्राकृतत्वात् **तित्थं**, आह च–

दाहोवसमादिसु वा जं तिसु थियमहव दंसणाईसुं ।

तो तित्थं संघो च्चिय उभयं च विसेसणविसेसं ॥ [**विशेषाव० १०३५**] ति ।

तत्र **तीर्थे** सति **सिद्धाः** निर्वृतास्तीर्थसिद्धा **ऋषभसेन**गणधरादिवत्, तेषां वर्ग्गणेति १ । तथा **अतीर्थे** तीर्थान्तरे साधुव्यवच्छेदे जातिस्मरणादिना प्राप्तापवर्गमार्गा **मरुदेवी**वत् सिद्धा अतीर्थसिद्धास्तेषाम् २ । **एवं**करणात् 'एगा तित्थगरसिद्धाणं वग्गणे'त्यादि दृश्यम्, तीर्थमुक्तलक्षणम्, तत् कुर्वन्तीति तीर्थकराः ।

तीर्थकराः सन्तो ये सिद्धास्ते **तीर्थकरसिद्धा ऋषभा**दिवत्, तेषाम् ३, **अतीर्थकरसिद्धाः** सामान्यकेवलिनः सन्तो ये सिद्धा **गौतमा**दिवत्, तेषाम् ४, तथा **स्वयम्** आत्मना **बुद्धाः** तत्त्वं ज्ञातवन्तः **स्वयम्बुद्धा**स्ते सन्तो ये **सिद्धा**स्ते तथा, तेषाम् ५, तथा प्रतीत्यैकं किञ्चित् वृषभादिकं अनित्यतादिभावनाकारणं वस्तु **बुद्धाः** बुद्धवन्तः परमार्थमिति **प्रत्येकबुद्धा**स्ते सन्तो ये **सिद्धा**स्ते तथा, तेषाम् ६, स्वयम्बुद्ध-प्रत्येकबुद्धानां च बोध्युपधि-श्रुत-लिङ्गकृतो विशेषः, तथाहि– स्वयम्बुद्धानां बाह्यनिमित्तमन्तरेणैव बोधिः, प्रत्येकबुद्धानां तु तदपेक्षया, **करकण्ड्वा**दीनामिवेति । उपधिः स्वयम्बुद्धानां पात्रादिर्द्वादशविधः, तद्यथा–

पत्तं १ पत्ताबंधो २ पायट्ठवणं ३ च पायकेसरिया ४ ।

पडलाइं ५ रयत्ताणं च ६ गोच्छओ ७ पायनिज्जोगो ॥

तिन्नेव य पच्छागा १० रयहरणं ११ चेव होइ मुहपोत्ति १२ ।[**ओघनि० ६६८-६६९**] त्ति।

प्रत्येकबुद्धानां तु नवविधः प्रावरणवर्ज्ज इति । स्वयम्बुद्धानां पूर्वाधीते श्रुते अनियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव । लिङ्गप्रतिपत्तिः स्वयम्बुद्धानामाचार्य-सन्निधावपि भवति, प्रत्येकबुद्धानां तु देवता प्रयच्छतीति । बुद्धबोधिताः आचार्यादिबोधिताः सन्तो ये सिद्धास्ते, तेषाम् ७ । एतेषामेव **स्त्रीलिङ्गसिद्धानां** ८ **पुंलिङ्गसिद्धा**नां ९ **नपुंसकलिङ्गसिद्धानां** १० **स्वलिङ्गसिद्धानां** रजोहरणाद्यपेक्षया ११ **अन्यलिङ्गसिद्धानां** परिव्राजकादिलिङ्गसिद्धानां १२ **गृहिलिङ्गसिद्धानां मरुदेवी**प्रभृतीनाम् १३ **एकसिद्धानामे**कैकस्मिन् समये एकैकसिद्धानाम् १४

अनेकसिद्धानामेकसमये द्व्यादीनाम् अष्टशतान्तानां सिद्धानामेका वर्गणेति १५ । तत्रानेकसमयसिद्धानां प्ररूपणागाथा–

बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धव्वा ।

चुलसीई छन्नउई दुरहियमट्ठुत्तर सयं च ॥ [बृहत्सं० ३४७]

एवमनन्तरसिद्धानां तीर्थादिना भूतभावेन प्रत्यासत्तिव्यपदेश्यत्वेन पञ्चदशविधानां वर्गणैकत्वमुक्तम्, अधुना परम्परसिद्धानामुच्यते, तत्र **अपढमसमयसिद्धाण**मित्यादि-त्रयोदशसूत्री[१], न प्रथमसमयसिद्धाः **अप्रथमसमयसिद्धाः** सिद्धत्वद्वितीयसमयवर्त्तिनः, तेषाम् । **एवं जाव** त्ति करणाद् 'दुसमयसिद्धाणं ति-चउ-पंच-छ-सत्त-ऽट्ठ-नव-दस-संखेज्जा-ऽसंखेज्जसमयसिद्धाण'मिति दृश्यम्, तत्र सिद्धत्वस्य तृतीयादिषु समयेषु द्विसमयसिद्धादयः प्रोच्यन्ते, यद्वा सामान्येनाप्रथमसमयाभिधानं विशेषतो द्विसमयाद्यभिधानमिति, अतस्तेषां वर्गणा, क्वचित् **पढमसमयसिद्धाणं** ति पाठः, तत्र अनन्तर-परम्परसमयसिद्धलक्षणं भेदमकृत्वा प्रथमसमयसिद्धा अनन्तरसिद्धा एव व्याख्यातव्याः, द्व्यादिसमयसिद्धास्तु यथाश्रुता एवेति ।

[सू० ४३] [१] एगा परमाणुपोग्गलाणं वग्गणा, एवं जाव एगा अणंतपएसियाणं पोग्गलाणं वग्गणा १। एगा एगपदेसोगाढाणं पोग्गलाणं वग्गणा जाव एगा असंखेज्जपदेसोगाढाणं पोग्गलाणं वग्गणा २। एगा एगसमयट्ठितियाणं पोग्गलाणं वग्गणा जाव असंखेज्जसमयट्ठितियाणं पोग्गलाणं वग्गणा ३। एगा एगगुणकालगाणं पोग्गलाणं वग्गणा जाव एगा असंखेज्जगुणकालगाणं पोग्गलाणं वग्गणा, एगा अणंतगुणकालगाणं पोग्गलाणं वग्गणा । एवं वण्ण-गंध-रस-फासा भाणियव्वा जाव एगा अणंतगुणलुक्खाणं पोग्गलाणं वग्गणा ४।

[२] एगा जहन्नपतेसियाणं खंधाणं वग्गणा, एगा उक्कस्सपतेसियाणं खंधाणं वग्गणा, एगा अजहन्नुक्कस्सपतेसियाणं खंधाणं वग्गणा १, एवं जहन्नोगाहणगाणं उक्कस्सोगाहणगाणं अजहन्नुक्कस्सोगाहणगाणं २, जहन्नट्ठितियाणं उक्कस्सट्ठितियाणं

---

१. 'एगा अपढमसमयसिद्धाणं वग्गणा एवं दुसमयसिद्धाणं ति-चउ-पंच-छ-सत्त-ऽट्ठ-नव-दस-संखेज्जा-ऽसंखेज्जसमयसिद्धाणं अणंतसमयसिद्धाणं वग्गणा' इति त्रयोदश सूत्राणि ज्ञेयानि ॥

अजहन्नुक्कस्सट्ठितीयाणं ३, जहन्नगुणकालगाणं उक्कस्स-गुणकालयाणं अजहन्नुक्कस्सगुणकालगाणं, एवं वण्ण-गंध-रस-फासाणं वग्गणा भाणियव्वा, जाव एगा अजहन्नुक्कस्सगुणलुक्खाणं पोग्गलाणं वग्गणा ४।

[टी०] इतो द्रव्य-क्षेत्र-काल-भावानाश्रित्य पुद्गलवर्गणैकत्वं चिन्त्यते-- पूरणगलनधर्माणः पुद्गलाः, ते च स्कन्धा अपि स्युरिति विशेषयति– **परमाणवो** निष्प्रदेशास्ते च **पुद्गला**श्चेति विग्रहः, तेषाम्, **एवं**करणात् 'दुपएसियाणं खंधाणं ति-चउ-पंच-छ-सत्त-ऽट्ठ-नव-दस-संखेज्जपएसियाणं असंखेज्जपएसि-याण'मिति दृश्यमिति।

कृता द्रव्यतः पुद्गलचिन्ता, अतः क्षेत्रतः क्रियते– **एगा एगपएसे**त्यादि, एकस्मिन् प्रदेशे क्षेत्रस्यावगाढाः अवस्थिता **एकप्रदेशावगाढा**ः, तेषाम्, ते च परमाण्वादयो-ऽनन्तप्रदेशिकस्कन्धान्ताः स्युः, अचिन्त्यत्वात् द्रव्यपरिणामस्य, यथा पारदस्यैकेन कर्षेण चारिताः सुवर्णस्य ते सप्ताप्येकीभवन्ति, पुनर्वामिताः प्रयोगतः सप्तैव त इति। **जाव एगा असंखेज्जपएसोगाढाणं** ति, अनन्तप्रदेशावगाहित्वं तु नास्ति पुद्गलानाम्, लोकलक्षणस्यावगाहक्षेत्रस्याप्यसङ्ख्येयप्रदेशत्वादिति । कालत आह– **एगा एगसमए**त्यादि, एकं समयं यावत् स्थितिः परमाणुत्वादिना एकप्रदेशावगाढादित्वेन एकगुणकालादित्वेन वाऽवस्थानं येषां ते **एकसमयस्थितिका**ः, तेषामिति, इह च अनन्तसमयस्थितेः पुद्गलानामसम्भावाद् **असंखेज्जसमयट्ठितीयाणमि**त्युक्तमिति । भावतः पुद्गलानाह– **एगगुणे**त्यादि, एकेन **गुणो** गुणनं ताडनं यस्य स **एकगुण**ः, एकगुणः कालो वर्णो येषां ते **एकगुणकालका**ः, तारतम्येन कृष्णतर-कृष्णतमादीनां येभ्य आरभ्य प्रथममुत्कर्षप्रवृत्तिर्भवतीति भावः, तेषाम् । एवं सर्वाण्यपि भावसूत्राणि षष्ट्यधिकद्विशतप्रमाणानि वाच्यानि २६०, विंशतेः कृष्णादिभावानां त्रयोदशभि-र्गुणनादिति।

साम्प्रतं भङ्गचन्तरेण द्रव्यादिविशेषितानां जघन्यादिभेदभिन्नानां स्कन्धानां वर्गणैकत्वमाह– **एगा जहन्ने**त्यादि, **जघन्या**ः सर्वाल्पाः **प्रदेशा**ः परमाणवस्ते सन्ति येषां ते **जघन्यप्रदेशिका**ः, द्व्यणुकादय इत्यर्थः, स्कन्धाः अणुसमुदायाः, तेषाम्,

उत्कर्षन्तीत्युत्कर्षाः उत्कर्षवन्तः उत्कृष्टसङ्ख्याः परमानन्ताः **प्रदेशाः** अणवस्ते सन्ति येषां ते **उत्कर्षप्रदेशिकाः**, तेषाम्, जघन्याश्च उत्कर्षाश्च जघन्योत्कर्षाः, न तथा ये ते अजघन्योत्कर्षाः, मध्यमा इत्यर्थः, ते प्रदेशाः सन्ति येषां ते **अजघन्योत्कर्षप्रदेशिकाः**, तेषाम्, एतेषां चानन्तवर्गणत्वेऽप्यजघन्योत्कर्ष-शब्दव्यपदेश्यत्वादेकवर्गणत्वमिति । **जहन्नोगाहणगाणं** ति अवगाहन्ते आसते यस्यां साऽवगाहना क्षेत्रप्रदेशरूपा, सा जघन्या येषां ते स्वार्थिकप्रत्ययाज्**जघन्यावगाहनकाः**, तेषाम्, एकप्रदेशावगाढानामित्यर्थः, **उत्कर्षावगाहनकाना**मसङ्ख्यातप्रदेशावगाढानामित्यर्थः, **अजघन्योत्कर्षावगाहनकानां** सङ्ख्येयासङ्ख्येयप्रदेशावगाढानामित्यर्थः। **जघन्या** जघन्यसङ्ख्या समयापेक्षया **स्थिति**र्येषां ते **जघन्यस्थितिकाः**, एकसमय-स्थितिकाः इत्यर्थः, तेषाम्, **उत्कर्षा** उत्कर्षवत्सङ्ख्या समयापेक्षया **स्थिति**र्येषां ते तथा, तेषाम्, असङ्ख्यातसमय-स्थितिकानामित्यर्थः, तृतीयं कण्ठ्यम्, **जघन्येन** जघन्यसङ्ख्याविशेषेणैकेनेत्यर्थः **गुणो** गुणनं ताडनं यस्य स तथाविधः **कालो** वर्णो येषां ते **जघन्यगुणकालकाः**, तेषाम्, एव**मुत्कर्षगुणकालकाना**मनन्तगुणकालकानामित्यर्थः, एवं भावसूत्राण्यपि षष्टि-र्भावनीयानीति ।

[सू० ४४] एगे जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं जाव अद्धंगुलगं च किंचिविसेसाधिए परिक्खेवेणं ।

[टी०] सामान्यस्कन्धवर्गणैकत्वाधिकारादेवाजघन्योत्कर्षप्रदेशिकस्याजघन्योत्कर्ष-प्रदेशावगाढस्य स्कन्धविशेषस्यैकत्वमाह– **एगे जंबुद्दीवे**त्यादि । जम्ब्वा वृक्षविशेषेणोपलक्षितो द्वीपः **जम्बूद्वीपः**, **द्वीप** इति सामान्यम्, **याव**द्ग्रहणादेवं सूत्रं द्रष्टव्यम्– 'सव्वब्भंतरए सव्वखुड्डाए वट्टे तेल्लापूयसंठाणसंठिए इत्यादि सुगममेतत्, उक्तविशेषणश्च जम्बूद्वीप एक एव, अन्यथा अनेकेऽपि ते सन्तीति ।

[सू० ४५] एगे समणे भगवं महावीरे इमीसे ओसप्पिणीए चउव्वीसाए तित्थगराणं चरिमतित्थगरे सिद्धे बुद्धे मुत्ते जाव सव्वदुक्खप्पहीणे ।

[टी०] अनन्तरं जम्बूद्वीप उक्त इति तत्प्ररूपकस्य भगवतो **महावीरस्यै**कतामाह– **एगे समणे** इत्यादि, **एक**: असहायः, अस्य च **सिद्ध** इत्यादिना सम्बन्धः, उक्तं च –

एगो भगवं वीरो तेत्तीसाए सह निव्वुओ पासो ।

छत्तीसएहिं पंचहिं सएहिं नेमी उ सिद्धिगओ ॥ [आव० नि० ३०८] इत्यादि ।

[सू० ४६] अणुत्तरोववातिया णं देवा णं एगं रतणिं उड्ढंउच्चत्तेणं पन्नत्ता।

[टी०] एकाकी वीरो निर्वृत इत्युक्तम्, निर्वृतक्षेत्रासन्नानि चानुत्तरविमानानीति तन्निवासिदेवमानमाह– **अणुत्तरे**त्यादि, अनुत्तरत्वाद**नुत्तराणि** विजयादिविमानानि, तेषु य **उपपातो** जन्म स विद्यते येषां तेऽनुत्तरोपपातिकास्ते, **णं**कारौ वाक्यालङ्कारे, **देवाः** सुरा **एकां रत्निं** हस्तं यावत् **उड्ढंउच्चत्तेणं** ति वस्तुनो ह्यनेकधोच्चत्वम्, ऊर्ध्वस्थितस्यैकमपरं तिर्यक्स्थितस्यान्यत् गुणोन्नतिरूपम्, तत्रेतरापोहेनोर्ध्वस्थितस्य यदुच्चत्वं तदूर्ध्वोच्चत्वमित्यागमे रूढमिति तेनो**र्ध्वोच्चत्वेन**, अनुस्वारः प्राकृतत्वात्, **प्रज्ञप्ताः** प्ररूपिताः सर्वविद्भिरिति ।

[सू० ४७] अद्दाणक्खत्ते एगतारे पन्नत्ते १। चित्ताणक्खत्ते एगतारे पन्नत्ते २। सातीणक्खत्ते एगतारे पन्नत्ते ३।

[टी०] देवाधिकारादेव नक्षत्रदेवानाम् **अद्दानक्खत्ते** इत्यादिना कण्ठ्येन सूत्रत्रयेण तारैकत्वमुक्तम्, तारा च ज्योतिर्विमानरूपेति, कृत्तिकादिषु च नक्षत्रेष्विदं ताराप्रमाणम्–

छ ६ प्पंच ५ तिन्नि ३ एगं १ चउ ४ तिग ३ रस ६ वेय ४ जुयल २ जुयलं च २ ।
इंदिय ५ एगं १ एगं १ विसय ५ ऽग्गि ३ समुद्द ४ बारसगं १२ ॥
चउरो ४ तिन्नि य ३ तिय ३ तिय ३ पंच ५ सत्त ७ बे २ बे २ भवे तिया तिन्नि ३-३-३ ।
रिक्खे तारपमाणं जइ तिहितुल्लं हयं कज्जं ॥ [ ] ति ॥

इह चैकस्थानकानुरोधान्नक्षत्रत्रयस्य ताराप्रमाणमुक्तम्, शेषनक्षत्राणां तु प्रायोऽग्रेतनाध्ययनेषु तद् वक्ष्यति, यस्तु क्वचिद्विसंवादस्ताराप्रमाणस्य स तथाविधप्रयोजनेषु तिथिविशेषस्य नक्षत्रविशेषयुक्तस्याशुभत्वसूचनार्थत्वेनोक्तगाथयोर्मतान्तरभूतत्वान्न बाधक इति ।

[सू० ४८] एगपदेसोगाढा पोग्गला अणंता पन्नत्ता, एवमेगसमयट्ठितीया। एगगुणकालगा पोग्गला अणंता पन्नत्ता, जाव एगगुणलुक्खा पोग्गला अणंता पन्नत्ता ।

॥ एगट्ठाणं समत्तं ॥

[टी०] तारा पुद्गलरूपेति पुद्गलस्वरूपमभिधातुमाह– **एगपएसोगाढे**त्यादि सुगमम्, नवरमेकत्र **प्रदेशे** क्षेत्रस्यांशविशेषे **अवगाढाः** आश्रिता **एकप्रदेशावगाढाः**, ते च परमाणुरूपाः स्कन्धरूपा वेति, एवं वर्ण ५गन्ध २ रस ५ स्पर्श ८ भेदविशिष्टाः पुद्गला वाच्याः, अत एवोक्तम्–**जाव एगगुणलुक्खे**त्यादि ।

तदेवमनुगमोऽभिहितः । अन्यो विस्तरो वृत्तितो ज्ञेयः।

इति श्रीमत्तपागच्छाधिराजभट्टारकपुरन्दरसूरीश्वर**श्रीविजयसेनसूरि**राज्ये
श्रीमत्तपागच्छशृंगारहारसूरीश्वर**श्रीविजयदेवसूरि**यौवराज्ये
पण्डित**श्रीकुशलवर्धनगणि**शिष्यनगर्षिगणिना स्ववाचनपरोपकारकृते
कृतोद्धाररूपयां श्रीसकलवाचकशिरोमणिमहोपाध्यायश्रीविमलहर्षगणिभिः
संशोधितायां सुखावबोधायां श्रीस्थानाङ्गदीपिकायां
प्रथममेकस्थानकाभिधानमध्ययनं
समाप्तम्।

अथ द्वितीयमध्ययनं द्विस्थानकम् ।

प्रथम उद्देशकः ।

[सू० ४९] नमो सुयदेवयाए भगवईए। जदत्थि णं लोगे तं सव्वं दुपओआरं, तंजहा- जीव च्चेव अजीव च्चेव ।

[१] तस च्चेव थावर च्चेव १, सजोणिय च्चेव अजोणिय च्चेव २, साउय च्चेव अणाउय च्चेव ३, सइंदिय च्चेव अणिंदिय च्चेव ४, सवेयगा चेव अवेयगा चेव ५, सरूवि चेव अरूवि चेव ६, सपोग्गला चेव अपोग्गला चेव ७, संसारसमावन्नगा चेव असंसारसमावन्नगा चेव ८, सासया चेव असासया चेव ९।

[२] आगासे चेव नोआगासे चेव । धम्मे चेव अधम्मे चेव । बंधे चेव मोक्खे चेव । पुन्ने चेव पावे चेव । आसवे चेव संवरे चेव । वेयणा चेव निज्जरा चेव ।

[टी०] अथ सङ्ख्याक्रमसम्बद्धमेव **द्विस्थानका**ख्यं द्वितीयमध्ययनमारभ्यते, अस्य चायं विशेषसम्बन्धः– इह जैनानां सामान्यविशेषात्मकं वस्तु, तत्र सामान्यमाश्रित्य प्रथमाध्ययने आत्मादिवस्त्वेकत्वेन प्ररूपितमिह तु विशेषाश्रयणात् तदेव द्विविधत्वेन प्ररूप्यत इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराण्युपक्रमादीनि भवन्ति इत्यादि वृतितो ज्ञेयम्। साम्प्रतं सूत्रं तच्चेदं– **यद्** जीवादिकं वस्तु **अस्ति** विद्यते, **ण**मिति वाक्यालङ्कारे, क्वचित् पाठो **जदत्थिं च णं** ति, तत्रानुस्वार आगमिकः, **च**शब्दः पुनरर्थः, एवं चास्य प्रयोगः– अस्त्यात्मादि वस्तु, पूर्वाध्ययनप्ररूपितत्वाद्, यच्चास्ति **लोके** पञ्चास्तिकायात्मके, लोक्यते प्रमीयत इति लोक इति व्युत्पत्त्या लोकालोकरूपे वा, **तत् सर्वं** निरवशेषं **द्वयोः पदयोः** स्थानयोः पक्षयोर्विवक्षितवस्तु-तद्विपर्ययलक्षणयोरवतारो यस्य तद् **द्विपदावतार**मिति । **दुपडोयारं** ति क्वचित् पठ्यते, तत्र द्वयोः प्रत्यवतारो यस्य तत् द्विप्रत्यवतारमिति, स्वरूपवत् प्रतिपक्षवच्चेत्यर्थः । **तद्यथे**त्युदाहरणोपन्यासे, **जीव च्चेव अजीव च्चेव** त्ति, जीवाश्चैवाऽजीवाश्चैव, प्राकृतत्वात् संयुक्तपरत्वेन ह्रस्वः, **च**कारौ समुच्चयार्थौ, **एव**कारावववधारणे, तेन च

राश्यन्तरापोहमाह। नोजीवाख्यं राश्यन्तरमस्तीति चेत्, नैवम्, सर्वनिषेधकत्वे नोशब्दस्य नोजीवशब्देनाजीव एव प्रतीयते, देशनिषेधकत्वे तु जीवदेश एव प्रतीयते, न च देशो देशिनोऽत्यन्तव्यतिरिक्त इति जीव एवासाविति। **च्चेय** इति पूर्व्वाध्ययन एवकारार्थः, **चिय च्चेय एवार्थ** [ ] इति वचनात्, ततश्च **जीवा एवेति** विवक्षितवस्तु **अजीवा एवेति** च तत्प्रतिपक्ष इति, एवं सर्वत्र ।

अथ **तसेत्यादि** । तत्र त्रसनामकर्मोदयतस्त्रस्यन्तीति **त्रसाः** द्वीन्द्रियादयः, स्थावरनामकर्मोदयाच्च तिष्ठन्तीत्येवंशीलाः **स्थावराः** पृथिव्यादयः । सह योन्या उत्पत्तिस्थानेन **सयोनिकाः** संसारिणः, तद्विपर्यासभूताः **अयोनिकाः** सिद्धाः। सहाऽऽयुषा वर्तन्त इति **सायुषः**, तदन्येऽनायुषः सिद्धाः । एवं **सेन्द्रियाः** संसारिणः, **अनिन्द्रियाः** सिद्धादयः । **सवेदकाः** स्त्रीवेदाद्युदयवन्तः, **अवेदकाः** सिद्धादयः । सह **रूपेण** मूर्त्या वर्त्तन्त इति समासान्ते इन्प्रत्यये सति **सरूपिणः** संस्थान-वर्णादिमन्तः, सशरीरा इत्यर्थः, न रूपिणोऽरूपिणो मुक्ताः । **सपुद्गलाः** कर्म्मादिपुद्गलवन्तो जीवाः, **अपुद्गलाः** सिद्धाः । **संसारं** भवं **समापन्नका** आश्रिताः **संसारसमापन्नकाः** संसारिणः, तदितरे सिद्धाः । **शाश्वताः** सिद्धाः जन्म-मरणादिरहितत्वाद्, **अशाश्वताः** संसारिणस्तद्युक्त-त्वादिति ।

एवं जीवतत्त्वस्य द्विपदावतारं निरूप्याजीवतत्त्वस्य तं निरूपयन्नाह– **आगासेत्यादि**। **आकाशं** व्योम, **नोआकाशं** तदन्यद् धर्मास्तिकायादि । **धर्मः** धर्म्मास्तिकायो गत्युपष्टम्भगुणः, तदन्योऽधर्मः अधर्मास्तिकायः स्थित्युपष्टम्भगुणः । सविपक्षबन्धादि-तत्त्वसूत्राणि चत्वारि प्राग्वदिति ।

[सू० ५०] दो किरियाओ पन्नत्ताओ, तंजहा-जीवकिरिया चेव अजीवकिरिया चेव। जीवकिरिया दुविहा पन्नत्ता, तंजहा-सम्मत्तकिरिया चेव मिच्छत्तकिरिया चेव। अजीवकिरिया दुविहा पन्नत्ता, तंजहा-इरियावहिया चेव संपराइगा चेव ।

दो किरियाओ पन्नत्ताओ तंजहा-काइया चेव आधिकरणिया चेव । काइया किरिया दुविहा पन्नत्ता, तंजहा-अणुवरयकायकिरिया चेव दुप्पउत्तकायकिरिया चेव । आधिकरणिया किरिया दुविहा पन्नत्ता, तंजहा-

संजोयणाधिकरणिया चेव णिव्वत्तणाधिकरणिया चेव ।

दो किरियाओ पन्नत्ताओ, तंजहा-पाओसिया चेव पारियावणिया चेव। पातोसिया किरिया दुविहा पन्नत्ता, तंजहा-जीवपाओसिया चेव अजीवपाओसिया चेव । पारियावणिया किरिया दुविहा पन्नत्ता, तंजहा-सहत्थपारियावणिया चेव परहत्थपारियावणिया चेव ।

दो किरियाओ पन्नत्ताओ, तंजहा-पाणातिवायकिरिया चेव अपच्चक्खाणकिरिया चेव । पाणातिवायकिरिया दुविहा पन्नत्ता, तंजहा-सहत्थपाणातिवायकिरिया चेव परहत्थपाणातिवायकिरिया चेव । अपच्चक्खाणकिरिया दुविहा पन्नत्ता, तंजहा-जीवअपच्चक्खाणकिरिया चेव अजीवअपच्चक्खाणकिरिया चेव ।

दो किरियाओ पन्नत्ताओ, तंजहा-आरंभिया चेव पारिग्गहिया चेव। आरंभिया किरिया दुविहा पन्नत्ता, तंजहा-जीवआरंभिया चेव अजीवआरंभिया चेव । एवं पारिग्गहिया वि ।

दो किरियाओ पन्नत्ताओ, तंजहा-मायावत्तिया चेव मिच्छादंसणवत्तिया चेव । मायावत्तिया किरिया दुविहा पन्नत्ता, तंजहा-आयभाववंकणता चेव परभाववंकणता चेव । मिच्छादंसणवत्तिया किरिया दुविहा पन्नत्ता, तंजहा-ऊणाइरित्तमिच्छादंसणवत्तिया चेव तव्वइरित्तमिच्छादंसणवत्तिया चेव ।

दो किरियाओ पन्नत्ताओ, तंजहा-दिट्ठिया चेव पुट्ठिया चेव । दिट्ठिया किरिया दुविहा पन्नत्ता, तंजहा-जीवदिट्ठिया चेव अजीवदिट्ठिया चेव । एवं पुट्ठिया वि ।

दो किरियाओ पन्नत्ताओ, तंजहा-पाडुच्चिया चेव सामंतोवणिवाइया चेव। पाडुच्चिया किरिया दुविहा पन्नत्ता, तंजहा-जीवपाडुच्चिया चेव अजीवपाडुच्चिया चेव । एवं सामंतोवणिवाइया वि ।

दो किरियाओ पन्नत्ताओ, तंजहा-साहत्थिया चेव णेसत्थिया चेव। साहत्थिया किरिया दुविहा पन्नत्ता, तंजहा-जीवसाहत्थिया चेव अजीवसाहत्थिया चेव । एवं णेसत्थिया वि ।

दो किरियाओ पन्नत्ताओ, तंजहा-आणवणिया चेव वेतारणिया चेव, जहेव णेसत्थिया ।

दो किरियाओ पन्नत्ताओ, तंजहा-अणाभोगवत्तिया चेव अणवकंखवत्तिया चेव । अणाभोगवत्तिया किरिया दुविहा पन्नत्ता, तंजहा-अणाउत्तआइयणता चेव अणाउत्तपमज्जणता चेव । अणवकंखवत्तिया किरिया दुविहा पन्नत्ता, तंजहा-आयसरीरअणवकंखवत्तिया चेव परसरीरअणवकंखवत्तिया चेव ।

दो किरियाओ पन्नत्ताओ, तंजहा-पिज्जवत्तिया चेव दोसवत्तिया चेव। पेज्जवत्तिया किरिया दुविहा पन्नत्ता, तंजहा-मायावत्तिया चेव लोभवत्तिया चेव। दोसवत्तिया किरिया दुविहा पन्नत्ता, तंजहा-कोहे चेव माणे चेव।

[टी०] बन्धादयश्च क्रियायां सत्यामात्मनो भवन्तीति क्रियानिरूपणायाह– **दो किरिये**त्यादिसूत्राणि षट्त्रिंशत्, करणं **क्रिया** क्रियत इति वा **क्रिये**ति, ते च **द्वे प्रज्ञप्ते** प्ररूपिते जिनैः, तत्र जीवस्य क्रिया व्यापारो **जीवक्रिया**, तथा अजीवस्य पुद्गलसमुदायस्य यत् कर्म्मतया परिणमनं सा **अजीवक्रिये**ति, इह **चेव**शब्दस्य **चेय**शब्दस्य वा पाठान्तरे प्राकृतत्वाद् द्विर्भाव इति, **चेवे**त्ययं समुदायमात्र एव प्रतीयते 'अपिचे' त्यादिवदिति १।

जीवकिरियेत्यादि, सम्यक्त्वं तत्त्वश्रद्धानम्, तदपि जीवव्यापारत्वात् क्रिया **सम्यक्त्वक्रिया**, एवं **मिथ्यात्वक्रिया**ऽपि, नवरं मिथ्यात्वम् अतत्त्वश्रद्धानम्, तदपि जीवव्यापार एवेति । अथवा सम्यग्दर्शन-मिथ्यात्वयोः सतोर्ये भवतः ते सम्यक्त्व-मिथ्यात्वक्रिये इति २।

अजीवकिरियेत्यादि, तत्र **ईरियावहिय** त्ति ईरणमीर्या गमनम्, तद्विशिष्टः पन्था ईर्यापथः, तत्र भवा ऐर्यापथिकी, व्युत्पत्तिमात्रमिदम्, प्रवृत्तिनिमित्ततस्तु यत् केवलयोगप्रत्ययमुपशान्तमोहादित्रयस्य सातवेदनीयकर्म्मतया अजीवस्य पुद्गलराशेर्भवनं सा ऐर्यापथिकी क्रिया, इह जीवव्यापारेऽप्यजीवप्रधानत्वविवक्षयाऽजीवक्रियेयमुक्ता । कर्म्मविशेषो वैर्यापथिकी क्रियोच्यते, यतोऽभिहितम्– **इरियावहिया किरिया दुविहा बज्झमाणा वेइज्जमाणा य, जाव पढमसमये बद्धा बीयसमये वेइया सा बद्धा पुट्ठा वेइया णिज्जिण्णा सेयकाले अकम्मं चावि भवती** [आव० हारि०] ति । तथा सम्परायाः

कषायाः, तेषु भवा **सांपरायिकी,** सा ह्यजीवस्य पुद्गलराशेः कर्म्मतापरिणतिरूपा जीवव्यापारस्याविवक्षणादजीवक्रियेति, सा च सूक्ष्मसम्परायान्तानां गुणस्थानकवतां भवतीति ३।

पुनरन्यथा द्वे– **दो किरियेत्यादि । काइया चेव** त्ति कायेन निर्वृत्ता **कायिकी** कायव्यापारः, तथा **अहिगरणिया चेव** त्ति अधिक्रियते आत्मा नरकादिषु येन तदधिकरणम् अनुष्ठानं बाह्यं वा वस्तु, इह च बाह्यं विवक्षितं खड्गादि, तत्र भवा **आधिकरणिकी**ति ४।

कायिकी द्विधा– **अणुवरयकायकिरिया चेव** त्ति **अनुपरतस्य** अविरतस्य सावद्यात् मिथ्यादृष्टेः सम्यग्दृष्टेर्वा **कायक्रिया** उत्क्षेपादिलक्षणा कर्म्म-बन्धनिबन्धनम**नुपरतकायक्रिया,** तथा **दुप्पउत्तकायकिरिया चेव** त्ति दुष्प्रयुक्तस्य दुष्टप्रयोगवतो दुष्प्रणिहितस्येन्द्रियाण्याश्रित्येष्टा-ऽनिष्टेन्द्रियविषयप्राप्तौ मनाक् सङ्ग-निर्वेदगमनेन तथा अनिन्द्रियमाश्रित्याशुभमनःसङ्कल्पद्वारेणापवर्गमार्गं प्रति दुर्व्यवस्थितस्य, प्रमत्तसंयतस्येत्यर्थः, कायक्रिया **दुष्प्रयुक्तकायक्रिये**ति ५।

आधिकरणिकी द्विधा, तत्र **संजोयणाहिगरणिया चेव** त्ति यत् पूर्वं निर्वर्त्तितयोः खड्ग-तन्मुष्ट्यादिकयोरर्थयोः संयोजनं क्रियते सा संयोजनाधिकरणिकी, तथा **णिव्वत्तणाहिकरणिया चेव** त्ति यच्चादितस्तयोर्निर्वर्त्तनं सा निर्वर्त्तनाधिकरणिकीति ६।

पुनरन्यथा द्वे– **पाउसिया चेव** त्ति प्रद्वेषो मत्सरस्तेन निर्वृत्ता प्राद्वेषिकी, तथा **पारियावणिया चेव** त्ति परितापनं ताडनादिदुःखविशेषलक्षणं तेन निर्वृत्ता पारिता-पनिकीति ७।

आद्या द्विधा– **जीवपाउसिया चेव** त्ति जीवे प्रद्वेषाज्जीवप्राद्वेषिकी, तथा **अजीवपाउसिया चेव** त्ति अजीवे पाषाणादौ स्खलितस्य प्रद्वेषादजीवप्राद्वेषिकीति ८।

द्वितीयाऽपि द्विधा– **सहत्थपारियावणिया चेव** त्ति स्वहस्तेन स्वदेहस्य परदेहस्य वा परितापनं कुर्वतः **स्वहस्तपारितापनिकी,** तथा **परहत्थपारियावणिया चेव** त्ति परहस्तेन तथैव तत् कारयतः **परहस्तपारितापनिकी**ति ९।

अन्यथा द्वे– **पाणाइवायकिरिया चेव** त्ति प्रतीता, तथा **अपच्चक्खाणकिरिया**

चेव त्ति अप्रत्याख्यानम् अविरतिः, तन्निमित्तः कर्म्मबन्धोऽ**प्रत्याख्यानक्रिया,** सा चाविरतानां भवतीति १०।

आद्या द्वेधा– **सहत्थपाणाइवायकिरिया चेव** त्ति स्वहस्तेन स्वप्राणान् निर्वेदादिना परप्राणान् वा क्रोधादिना अतिपातयतः **स्वहस्तप्राणातिपातक्रिया,** तथा **परहत्थपाणाइवायकिरिया चेव** त्ति परहस्तेनापि तथैव **परहस्तप्राणातिपातक्रिये**ति ११।

द्वितीयापि द्विधा– **जीवअपच्चक्खाणकिरिया चेव** त्ति जीवविषये प्रत्याख्यानाभावेन यो बन्धादिव्यापारः सा **जीवाप्रत्याख्यानक्रिया,** तथा **अजीवअपच्चक्खाणकिरिया चेव** त्ति यदजीवेषु मद्यादिष्वप्रत्याख्यानात् कर्मबन्धनं सा **अजीवाप्रत्याख्यानक्रिये**ति १२।

पुनरन्यथा द्वे– **आरंभिया चेव** त्ति आरम्भणमारम्भः, तत्र भवा **आरम्भिकी,** तथा **पारिग्गहिया चेव** त्ति परिग्रहे भवा **पारिग्रहिकी**ति १३।

आद्या द्वेधा– **जीवआरंभिया चेव** त्ति यज्जीवानारभमाणस्य उपमृद्नतः कर्मबन्धनं सा **जीवारम्भिकी,** तथा **अजीवारंभिया चेव** त्ति यच्चाजीवान् जीवकडेवराणि पिष्टादिमयजीवाकृतींश्च वस्त्रादीन् वा आरभमाणस्य सा **अजीवारम्भिकी**ति १४।

एवं पारिग्गहिया चेव त्ति आरम्भिकीवद् द्विधेत्यर्थः, जीवाजीवपरिग्रहप्रभवत्वात् तस्या इति भावः १५।

पुनरन्यथा द्वे– **मायावत्तिया चेव** त्ति माया शाठ्यं प्रत्ययो निमित्तं यस्याः कर्मबन्धक्रियाया व्यापारस्य वा सा तथा, **मिच्छादंसणवत्तिया चेव** त्ति मिथ्यादर्शनं मिथ्यात्वं प्रत्ययो यस्याः सा तथेति १६।

आद्या द्वेधा– **आयभाववंकणया चेव** त्ति आत्मभावस्याप्रशस्तस्य वङ्कनता वक्रीकरणं प्रशस्तत्वोपदर्शनता आत्मभाववङ्कनता, वङ्कनानां च बहुत्वविवक्षायां भावप्रत्ययो न विरुद्धः, सा च क्रिया व्यापारत्वात्, तथा **परभाववंकणया चेव** त्ति परभावस्य वङ्कनता वञ्चनता या कूटलेखकरणादिभिः सा परभाववङ्कनतेति, यतो **वृद्ध**व्याख्येयम्– **तं तं भावमायरइ जेण परो वंचिज्जइ कूडलेहकरणाईहिं** [आव०

हारि०] ति १७।

द्वितीयाऽपि द्वेधा– **ऊणाइरित्तमिच्छादंसणवत्तिया चेव** त्ति **ऊनं** स्वप्रमाणाद्धीन**मतिरिक्तं** ततोऽधिकमात्मादि वस्तु, तद्विषयं मिथ्यादर्शनमूनातिरिक्तमिथ्यादर्शनम्, तदेव प्रत्ययो यस्याः सा **ऊनातिरिक्तमिथ्यादर्शनप्रत्यये**ति । तथाहि– कोऽपि मिथ्यादृष्टिरात्मानं शरीरव्यापकमपि अङ्गुष्ठपर्वमात्रं यवमात्रं श्यामाकतन्दुलमात्रं वेति हीनतयाऽवैति, तथाऽन्यः पञ्चधनुःशतिकं सर्वव्यापकं वेत्यधिकतयाऽभिमन्यते, तथा **तव्वइरित्तमिच्छादंसणवत्तिया चेव** त्ति **तस्माद्** ऊनातिरिक्तमिथ्यादर्शनाद् **व्यतिरिक्तं मिथ्यादर्शनं** नास्त्येवात्मेत्यादिमतरूपं प्रत्ययो यस्याः सा तथेति १८।

पुनरन्यथा द्वे– **दिट्ठिया चेव** त्ति दृष्टेर्जाता **दृष्टिजा**, अथवा दृष्टं दर्शनं वस्तु वा निमित्ततया यस्यामस्ति सा **दृष्टिका**, दर्शनार्थं या गतिक्रिया दर्शनाद् वा यत् कर्मोदेति सा दृष्टिजा दृष्टिका वा, तथा **पुट्ठिया चेव** त्ति पृष्टिः पृच्छा, ततो जाता **पृष्टिजा**, प्रश्नजनितो व्यापारः, अथवा पृष्टं प्रश्नः वस्तु वा तदस्ति कारणत्वेन यस्यां सा **पृष्टिके**ति, अथवा स्पृष्टिः स्पर्शनं ततो जाता **स्पृष्टिजा**, तथैव **स्पृष्टिका**ऽपीति १९।

आद्या द्वेधा– **जीवदिट्ठिया चेव** त्ति या अश्वादिदर्शनार्थं गच्छतः, तथा **अजीवदिट्ठिया चेव** त्ति अजीवानां चित्रकर्मादीनां दर्शनार्थं गच्छतो या सा **अजीवदृष्टिके**ति २०।

एवं पुट्ठिया वि त्ति **एव**मिति जीवाजीवभेदेन द्विधैव, तथाहि– जीवमजीवं वा राग-द्वेषाभ्यां पृच्छतः स्पृशतो वा या सा जीवपृष्टिका जीवस्पृष्टिका वा अजीवपृष्टिका अजीवस्पृष्टिका वेति २१।

पुनरन्यथा द्वे– **पाडुच्चिया चेव** त्ति बाह्यं वस्तु प्रतीत्य आश्रित्य भवा **प्रातीत्यिकी**, तथा **सामन्तोवणिवाइया चेव** त्ति समन्तात् सर्वत उपनिपातो जनमीलकस्तस्मिन् भवा **सामन्तोपनिपातिकी**ति २२।

आद्या द्वेधा– **जीवपाडुच्चिया चेव** त्ति जीवं प्रतीत्य यः कर्मबन्धः सा तथा, तथा **अजीवपाडुच्चिया चेव** त्ति अजीवं प्रतीत्य यो राग-द्वेषोद्भवस्तज्जो वा बन्धः सा **अजीवप्रातीत्यिकी**ति २३।

द्वितीयापि द्विविधेत्यतिदिशन्नाह– **एवं सामन्तोवणिवाइया वि** त्ति, तथाहि– कस्यापि षण्डो रूपवानस्ति, तं च जनो यथा यथा प्रलोकयति प्रशंसयति च तथा तथा तत्स्वामी हृष्यतीति जीवसामन्तोपनिपातिकी, तथा रथादौ तथैव हृष्यतोऽजीवसामन्तोपनिपातिकीति २४।

अन्यथा वा द्वे– **साहत्थिया चेव** त्ति स्वहस्तेन निर्वृत्ता स्वाहस्तिकी, तथा **नेसत्थिया चेव** त्ति, निसर्जनं निसृष्टम्, क्षेपणमित्यर्थः, तत्र भवा तदेव वा **नैसृष्टिकी**, निसृजतो यः कर्म्मबन्ध इत्यर्थः, निसर्ग्ग एव वेति २५।

तत्र आद्या द्वेधा– **जीवसाहत्थिया चेव** त्ति यत् स्वहस्तगृहीतेन जीवेन जीवं मारयति सा **जीवस्वाहस्तिकी**, तथा **अजीवसाहत्थिया चेव** त्ति यच्च स्वहस्तगृहीतेनैवाजीवेन खड्गादिना जीवं मारयति सा **अजीवस्वाहस्तिकी**ति। अथवा स्वहस्तेन जीवं ताडयत एका, अजीवं ताडयतोऽन्येति २६।

द्वितीयाऽपि जीवा-ऽजीवभेदैवेत्यतिदिशन्नाह– **एवं नेसत्थिया चेव** त्ति, तथाहि- - राजादिसमादेशाद्यदुदकस्य यन्त्रादिभिर्निसर्जनं सा जीवनैसृष्टिकीति, यत्तु काण्डादीनां धनुरादिभिः सा अजीवनैसृष्टिकीति। अथवा गुर्व्वादौ जीवं शिष्यं पुत्रं वा निसृजतो ददत एका, अजीवं पुनरेषणीयभक्तपानादिकं निसृजतो त्यजतोऽन्येति २७।

पुनरन्यथा द्वे– **आणवणिया चेव** त्ति आज्ञापनस्य आदेशनस्येयमाज्ञापनमेव वेत्याज्ञापनी, सैवाऽऽज्ञापनिका, तज्जः कर्मबन्धः आदेशनमेव वेति, आनायनं वा आनायनी। तथा **वेयारणिया चेव** त्ति विदारणं विचारणं वितारणं वा स्वार्थिकप्रत्ययोपादानाद् वैदारणीत्यादि वाच्यमिति २८।

एते च द्वे अपि द्वेधा जीवाजीवभेदादिति, तथाहि– जीवमाज्ञापयत आनाययतो वा परेण जीवाज्ञापनी जीवानायनी वा, एवमेवाजीवविषया अजीवाज्ञापनी अजीवानायनी वेति २९।

तथा **वेयारणिय** त्ति जीवमजीवं वा विदारयति स्फोटयतीति, अथवा जीवमजीवं वाऽसमानभावेषु विक्रीणति सति यद्वैभाषिको विचारयति परियच्छावेइ त्ति भणितं होति, अथवा जीवं पुरुषं वितारयति प्रतारयति वञ्चयतीत्यर्थः, असद्गुणैरेतादृशः

तादृशस्त्वमिति, पुरुषादिविप्रतारणबुद्ध्यैव वाऽजीवं भणत्येतादृशमेतदिति यत् सा जीववेयारणियाऽजीववेयारणिया व त्ति । एतत् सर्वमतिदेशेनाह – **जहेव नेसत्थिय** त्ति ३०।

अन्यथा वा द्वे– **अणाभोगवत्तिया चेव** त्ति **अनाभोगः** अज्ञानं **प्रत्ययो** निमित्तं यस्याः सा, तथा **अणवकंखवत्तिया चेव** त्ति **अनवकाङ्क्षा** स्वशरीराद्यनपेक्षत्वम्, सैव प्रत्ययो यस्याः सा**ऽनवकाङ्क्षाप्रत्यये**ति ३१।

आद्या द्विधा– **अणाउत्तआइयणया चेव** त्ति **अनायुक्तः** अनाभोगवान् अनुपयुक्त इत्यर्थः, तस्या**ऽऽदानता** वस्त्रादिविषये ग्रहणता **अनायुक्तादानता**, तथा **अणाउत्तपमज्जणया चेव** त्ति अनायुक्तस्यैव पात्रादिविषया प्रमार्जनता **अनायुक्त-प्रमार्जनता**, इह च ताप्रत्ययः स्वार्थिकः प्राकृतत्वेन आदानादीनां भावविवक्षया वेति ३२।

द्वितीयाऽपि द्विविधा– **आयसरीरे**त्यादि, तत्रात्मशरीरानवकाङ्क्षाप्रत्यया स्वशरीर-क्षतिकारिकर्माणि कुर्वतः, तथा परशरीरक्षतिकराणि तु कुर्वतो द्वितीयेति ३३।

दो किरियेत्यादि त्रीणि सूत्राणि कण्ठ्यानि, नवरं **प्रेम** रागो माया-लोभलक्षणः, **द्वेषः** क्रोध-मानलक्षण इति ३६। यदत्र न व्याख्यातं तत् सुगमत्वादिति ।

[सू० ५१] दुविहा गरहा पन्नत्ता, तंजहा-मणसा वेगे गरहति, वयसा वेगे गरहति ।

अहवा गरहा दुविहा पन्नत्ता, तंजहा-दीहं पेगे अद्धं गरहति, रहस्सं पेगे अद्धं गरहति ।

[टी०] एताश्च क्रियाः प्रायो गर्हणीया इति गर्हामाह- **दुविहा गरहे**त्यादि, विधानं विधा, द्वे **विधे** भेदौ यस्याः सा **द्विविधा**, गर्हणं **गर्हा** दुश्चरितं प्रति कुत्सा, सा च स्व-परविषयत्वेन द्विविधा, साऽपि मिथ्यादृष्टेरनुपयुक्तसम्यग्दृष्टेश्च द्रव्यगर्हा, अप्रधानगर्हेत्यर्थः, द्रव्यशब्दस्याप्रधानार्थत्वाद्, उक्तं च–

अप्पाहन्ने वि इहं कत्थइ दिट्ठो हु दव्वसद्दो त्ति ।

अंगारमद्दओ जह दव्वायरिओ सयाऽभव्वो ॥ [पञ्चा० ६।१३] त्ति ।

सम्यग्दृष्टेस्तूपयुक्तस्य भावगर्हेति चतुर्द्धा गर्हणीयभेदाद् बहुप्रकारा वा, सा चेह करणापेक्षया द्विविधोक्ता, तथा चाह– **मणसा वेगे गरहइ** त्ति **मनसा** चेतसा **वा**शब्दो विकल्पार्थो अवधारणार्थो वा, ततो मनसैव न वाचेत्यर्थः, कायोत्सर्गस्थो दुर्मुख-सुमुखाभिधानपुरुषद्वयनिन्दिता-ऽभिष्टुतस्तद्वचनोपलब्धसामन्तपरिभूतस्वतनयराजवार्त्तो मनसा समारब्धपुत्रपरिभवकारिसामन्तसङ्ग्रामो वैकल्पिकप्रहरणक्षये स्वशीर्षक-ग्रहणार्थव्यापारितहस्तसंस्पृष्टलुञ्चितमस्तकस्ततः समुपजातपश्चात्तापानलज्वालाकला-पदन्दह्यमानसकलकर्म्मेन्धनो राजर्षि**प्रसन्नचन्द्र** इव एकः कोऽपि साध्वादि**र्गर्हते** जुगुप्सते, गर्ह्यमिति गम्यते, तथा **वचसा वा** वाचा वा, अथवा वचसैव न मनसा भावतो दुश्चरिताविरक्तत्वाज्जनरञ्जनार्थं गर्हाप्रवृत्ताङ्गारमर्द्दकादिप्रायसाधुवत् एकोऽन्यो गर्हत इति। अथवा **मणसाऽवेगे** त्ति इह **अपि**ः, स च सम्भावने, तेन सम्भाव्यते अयमर्थः- अपि मनसैको गर्हते अन्यो वचसेति। अथवा **मनसाऽपि**, न केवलं वचसा एको गर्हते। तथा **वचसा**ऽपि, न केवलं मनसा, **एक** इति स एव **गर्हते**, उभयथाप्येक एव गर्हत इति भावः।

अन्यथा गर्हाद्वैविध्यमाह– **अहवे**त्यादि। **अथवे**ति पूर्वोक्तद्वैविध्यप्रकारापेक्षः, **द्विविधा गर्हा प्रज्ञप्ते**ति प्रागिव, **अपि**ः सम्भावने, तेन **अपि दीर्घां** बृहतीम् **अद्धां** कालं याव**देक**ः कोऽपि **गर्हते** गर्हणीयमाजन्मापीत्यर्थः, अन्यथा वा दीर्घत्वं विवक्षया भावनीयम्, आपेक्षिकत्वात् दीर्घह्रस्वयोरिति। एव**मपि ह्रस्वाम्** अल्पां याव**देको**ऽन्य इति। अथवा दीर्घामेव यावत् ह्रस्वामेव यावदिति व्याख्येय**मपे**रवधारणार्थत्वादिति। एक एव वा द्विधा कालभेदेन गर्हते भावभेदादिति। अथवा दीर्घं ह्रस्वं वा कालमेव गर्हत इति।

[सू० ५२] दुविहे पच्चक्खाणे पन्नत्ते, तंजहा-मणसा वेगे पच्चक्खाति, वयसा वेगे पच्चक्खाति।

अहवा पच्चक्खाणे दुविहे पन्नत्ते, तंजहा-दीहं पेगे अद्धं पच्चक्खाति, रहस्सं पेगे अद्धं पच्चक्खाति।

[टी०] अतीते गर्ह्ये कर्मणि गर्हा भवति, भविष्यति तु प्रत्याख्यानम्, उक्तं च-

अइयं निंदामि पडुप्पन्नं संवरेमि अणागयं पच्चक्खामी [**पाक्षिकसू०**] ति । प्रत्याख्यानमाह– **दुविहे पच्चक्खाणे** इत्यादि, प्रमादप्रातिकूल्येन मर्यादया **ख्यानं** कथनं **प्रत्याख्यानम्,** विधि-निषेधविषया प्रतिज्ञेत्यर्थः, तच्च द्रव्यतो मिथ्यादृष्टेः सम्यग्दृष्टेर्वाऽनुपयुक्तस्य कृतचतुर्मासमांसप्रत्याख्यानायाः पारणकदिनमांसदानप्रवृत्ताया राजदुहितुरिवेति, भावप्रत्याख्यानमुपयुक्तसम्यग्दृष्टेरिति, तच्च देश-सर्वमूलगुणोत्तरगुणभेदादनेकविधमपि करणभेदाद् द्विविधम्, आह च– **मनसा वैकः प्रत्याख्याति** वधादिकं निवृत्ति-विषयीकरोति, शेषं प्रागिवेति । प्रकारान्तरेणापि तदाह– **अहवे**त्यादि सुगमम् ।

[सू० ५३] दोहिं ठाणेहिं अणगारे संपन्ने अणादीयं अणवयग्गं दीहमद्धं चाउरंतसंसारकंतारं वीतिवतेज्जा, तंजहा-विज्जाए चेव चरणेण चेव ।

[टी०] ज्ञानपूर्वकं प्रत्याख्यानादि मोक्षफलमत आह– **दोहिं ठाणेही**त्यादि, **द्वाभ्यां स्थानाभ्यां** गुणाभ्यां **सम्पन्नो** युक्तो नास्यागारं गेहमस्ती**त्यनगारः** साधुः, नास्त्यादिरस्ये**त्यनादिकं** तत्, **अवदग्रं** पर्यन्तः, तन्नास्ति यस्य सामान्यजीवापेक्षया तद**नवदग्रं** तत्, दीर्घा अद्धा कालो यस्य तद् **दीर्घाद्धं** तत्, **म**कार आगमिकः, दीर्घो वाऽध्वा मार्गो यस्मिंस्तद्दीर्घाध्वं त**च्चतुरन्तं** चतुर्विभागं नरकादिगतिविभागेन, दीर्घत्वं प्रकटादित्वादिति, **संसारकान्तारं** भवारण्यं **व्यतिव्रजेद्** अतिक्रामेत्, **तद्यथा**--**विद्यया चैव** ज्ञानेन चैव **चरणेन चैव** चारित्रेण चैवेति, इह च संसारकान्तारव्यतिव्रजनं प्रति विद्या-चरणयोर्यौगपद्येनैव कारणत्वमवगन्तव्यम्, एकैकशो विद्या-क्रिययोरैहिकार्थेष्वप्यकारणत्वात् ।

नन्वनयोः कारणतया अविशेषाभिधानेऽपि प्रधानं ज्ञानमेव न चरणम्, अथवा ज्ञानमेवैकं कारणं न तु क्रिया, यतो ज्ञानफलमेवासौ । किञ्च, यथा क्रिया ज्ञानस्य फलं तथा शेषमपि यत् क्रियानन्तरमवाप्यते, बोधकालेऽपि यज्ज्ञेयपरिच्छेदात्मकं यच्च रागादिविनिग्रहमयमेषामविशेषेण ज्ञानं कारणम्, यथा मृत्तिका घटस्य कारणं भवन्तीत्यादिविस्तरो वृत्तौ।

[सू० ५४] दो ठाणाइं अपरियाणित्ता आया णो केवलिपन्नत्तं धम्मं लभेज्ज सवणयाए, तंजहा-आरंभे चेव परिग्गहे चेव १। दो ठाणाइं अपरियाणित्ता

आया णो केवलं बोधिं बुज्झेज्जा, तंजहा-आरंभे चेव परिग्गहे चेव २। दो ठाणाइं अपरियाइत्ता आया नो केवलं मुंडे भवित्ता अगाराओ अणगारियं पव्वएज्जा, तंजहा-आरंभे चेव परिग्गहे चेव ३। एवं णो केवलं बंभचेरवासमावसेज्जा ४, णो केवलेणं संजमेणं संजमेज्जा ५, नो केवलेणं संवरेणं संवरेज्जा ६, नो केवलमाभिणिबोधियणाणं उप्पाडेज्जा ७, एवं सुयनाणं ८, ओहिनाणं ९, मणपज्जवनाणं १०, केवलनाणं ११।

[टी०] विद्या-चरणे च कथमात्मा न लभत इत्याह- **दो ठाणाइ**मित्यादि-सूत्राण्येकादश, **द्वे स्थाने** द्वे वस्तुनी **अपरियाणित्त** त्ति अपरिज्ञाय ज्ञपरिज्ञया यथैतावारम्भ-परिग्रहावनर्थाय तथा अलं ममाभ्यामिति परिहाराभिमुख्यद्वारेण प्रत्याख्यानपरिज्ञया अप्रत्याख्याय च **ब्रह्मदत्त**वत्तयोरनिर्व्विण्ण इत्यर्थः, आत्मा **नो** नैव **केवलिप्रज्ञप्तं** जिनोक्तं **धम्मं** श्रुतधर्मं **लभेत श्रवणतया** श्रवणभावेन, श्रोतुमित्यर्थः, तद्यथा– **आरम्भाः** कृष्यादिद्वारेण पृथिव्याद्युपमर्द्दास्तान्, **परिग्रहा** धर्म्मसाधनव्यतिरेकेण धन-धान्यादयस्तान्, इह चैकवचनप्रक्रमेऽपि व्यक्त्यपेक्षं बहुवचनम्, अवधारण-समुच्चयौ स्वबुद्ध्या नेयाविति। **केवलां** शुद्धां **बोधिं** दर्शनं सम्यक्त्वमित्यर्थो **बुध्येत** अनुभवेत्, अथवा केवलया बोध्येति विभक्तिपरिणामात् बोध्यं जीवादीति गम्यते **बुध्येत** श्रद्दधीतेति। **मुण्डो** द्रव्यतः शिरोलोचेन भावतः कषायाद्यपनयनेन **भूत्वा** संपद्य **अगाराद्** गेहान्निष्क्रम्येति गम्यते, **केवला**मित्यस्येह सम्बन्धात् **केवलां** परिपूर्णां शुद्धां वाऽ**नगारितां** प्रव्रज्यां **प्रव्रजेत्** यायादिति । **एव**मिति यथा प्राक् तथोत्तरवाक्येष्वपि **दो ठाणा** इत्यादि वाक्यं पठनीयमित्यर्थः, **ब्रह्मचर्येण** अब्रह्मविरमणेन **वासो** रात्रौ स्वापः तत्रैव वा वासो निवासो ब्रह्मचर्यवासस्त**मावसेत्** कुर्यादिति, **संयमेन** पृथिव्यादिरक्षणलक्षणेन **संयमये**दात्मानमिति, **संवरेण** आश्रवनिरोधलक्षणेन **संवृणुया**-दाश्रवद्वाराणीति गम्यते, **केवलं** परिपूर्णं सर्वस्वविषयग्राहकम् **आभिणिबोहियनाणं** ति अर्थाभिमुखोऽविपर्ययरूपत्वान्नियतोऽसंशयस्वभावत्वाद् बोधो वेदनमभिनिबोधः, स एवाभिनिबोधिकम्, तच्च तज्ज्ञानं चेत्याभिनिबोधिकज्ञानम् इन्द्रियानिन्द्रियनिमित्तमोघतः सर्वद्रव्यासर्वपर्यायविषयम् **उप्पाडेज्ज** त्ति उत्पादयेदिति, तथा **एव**मित्यनेनोत्तरपदेषु **नो**

केवलं उप्पाडेज्ज त्ति द्रष्टव्यम्, **सुयनाणं** ति श्रूयते तदिति **श्रुतं** शब्द एव, स च भावश्रुतकारणत्वात् **ज्ञानं** श्रुतज्ञानं श्रुतग्रन्थानुसारि ओघतः सर्वद्रव्यासर्वपर्याय-विषयमक्षरश्रुतादिभेदमिति । तथा **ओहिनाणं** ति अवधीयतेऽनेनास्मादस्मिन् वेत्यवधिः, अवधीयते इत्यधोऽधो विस्तृतं परिच्छिद्यते मर्यादया वेत्यवधिः अवधिज्ञानावरणक्षयोपशम एव, तदुपयोगहेतुत्वादिति, अवधानं वाऽवधिर्विषयपरिच्छेदनमिति, अवधिश्चासौ ज्ञानं चेत्य**वधिज्ञानम्** इन्द्रियमनोनिरपेक्षमात्मनो रूपिद्रव्यसाक्षात्करणमिति । तथा **मणपज्जवनाणं** ति मनसि मनसो वा पर्यवः परिच्छेदः स एव ज्ञानम्, अथवा मनसः पर्यवाः पर्ययाः पर्याया वा विशेषाः अवस्था मनःपर्यवादयस्तेषां तेषु वा ज्ञानं **मनःपर्यवज्ञानम्**, एवमितरत्रापि, समयक्षेत्रगतसंज्ञिमन्यमानमनोद्रव्यसाक्षात्कारीति । **केवलनाणं** ति **केवलम्** असहायं मत्यादिनिरपेक्षत्वादकलङ्कं वा आवरणमलाभावात् सकलं वा तत्प्रथमतयैवाशेषतदावरणाभावतः सम्पूर्णोत्पत्तेरसाधारणं वा अनन्यसदृशत्वादनन्तं वा ज्ञेयानन्तत्वात् तच्च तज्ज्ञानं च **केवलज्ञान**मिति ।

[सू० ५५] दो ठाणाइं परियाइत्ता आया केवलिपन्नत्तं धम्मं लभेज्ज सवणयाए, तंजहा- आरंभे चेव परिग्गहे चेव, एवं जाव केवलनाणमुप्पाडेज्जा ।

दोहिं ठाणेहिं आया केवलिपन्नत्तं धम्मं लभेज्ज सवणयाए, तंजहा-सोच्च च्चेव अभिसमेच्च च्चेव जाव केवलनाणं उप्पाडेज्जा ।

[टी०] कथं पुनर्द्धर्मादीनि विद्या-चरणस्वरूपाणि प्राप्नोतीत्याह– **दो ठाणाइ**मित्याद्येकादशसूत्री सुगमा । धर्म्मादिलाभ एव पुनः कारणान्तरद्वयमाह– **दोही**त्यादि सुगमम्, केवलं **श्रवणतया** श्रवणभावेन, **सोच्च च्चेव** त्ति ह्रस्वत्वादि प्राकृतत्वादेव, **श्रुत्वा** आकर्ण्य, तस्यैवोपादेयतामिति गम्यते, **अभिसमेत्य** समधिगम्य, तामेवावबुध्येत्यर्थः, उक्तं च-

सद्धर्मश्रवणादेव नरो विगतकिल्बिषः ।
ज्ञाततत्त्वो महासत्त्वः परं संवेगमागतः ॥
धर्म्मोपादेयतां ज्ञात्वा सञ्जातेच्छोऽत्र भावतः ।
दृढं स्वशक्तिमालोच्य ग्रहणे संप्रवर्त्तते ॥ [धर्मबिन्दौ ३।१-२] इति ।

एवं बोहिं बुज्झेज्जेत्यादि यावत् **केवलनाणं उप्पाडेज्ज** त्ति ।

[सू० ५६] दो समाओ पन्नत्ताओ, तंजहा-ओसप्पिणी समा चेव उस्सप्पिणी समा चेव।

[टी०] केवलज्ञानं च कालविशेषे भवतीति तमाह– **दो समाओ** इत्यादि। समा कालविशेषः, शेषं सुगमम्।

[सू० ५७] दुविहे उम्माए पन्नत्ते, तंजहा-जक्खावेसे चेव, मोहणिज्जस्स चेव कम्मस्स उदएणं। तत्थ णं जे से जक्खावेसे से णं सुहवेयतराए चेव सुहविमोयतराए चेव। तत्थ णं जे से मोहणिज्जस्स कम्मस्स उदएणं से णं दुहवेयतराए चेव दुहविमोयतराए चेव।

[टी०] केवलज्ञानं मोहनीयोन्मादक्षय एव भवत्यतः सामान्येनोन्मादं निरूपयन्नाह– **दुविहे उम्माए** इत्यादि, **उन्मादो** ग्रहो बुद्धिविप्लव इत्यर्थः, **यक्षावेशः** देवाधिष्ठितत्वम्, ततो यः स यक्षावेश एवेत्येकः, **मोहनीयस्य** दर्शनमोहनीयादेः **कर्मण उदयेन** यः सोऽन्य इति, **तत्रेति** तयोर्मध्ये **योऽसौ यक्षावेशेन** भवति **स सुखवेद्यतरक एव** मोहजनितग्रहापेक्षयाऽकृच्छ्रानुभवनीयतर एव, अनैकान्तिकानात्यन्तिकभ्रमरूपत्वादस्येति, अतिशयेन सुखं विमोच्यते त्याज्यते यः स **सुखविमोच्यतरकश्चैव**, मन्त्र-मूलादिमात्रसाध्यत्वादस्येति, अथवा अत्यन्तं सुखापेयः सुखापनेयः **सुखापेयतरः**, तथा अत्यन्तं सुखेनैव विमुञ्चति यो देहिनं स **सुखविमोचतरक** इति। मोहजस्तु तद्विपरीतः, ऐकान्तिकात्यन्तिकभ्रमस्वभावतयाऽत्यन्तानुचितप्रवृत्तिहेतुत्वेनाऽनन्तभव-कारणत्वात् तथाऽऽन्तरकारणजनितत्वेन मन्त्राद्यसाध्यत्वात् कर्मक्षयोपशमादिनैव साध्यत्वादिति, अत एवोक्तम्– **दुहवेयतराए चेव दुहविमोयतराए चेव** त्ति।

[सू० ५८] दो दंडा पन्नत्ता, तंजहा-अट्ठादंडे चेव अणट्ठादंडे चेव। नेरइयाणं दो दंडा पन्नत्ता, तंजहा-अट्ठादंडे य अणट्ठादंडे य। एवं चउवीसादंडओ जाव वेमाणियाणं।

[टी०] उन्मादात् प्राणी प्राणातिपातादिरूपे दण्डे प्रवर्त्तते दण्डभाजनं वा भवतीति दण्डं निरूपयन्नाह– **दो दंडे**त्यादि, **दण्डः** प्राणातिपातादिः, स चाऽ**र्थाय** इन्द्रियादिप्रयोजनाय यः सो**ऽर्थदण्डः**, निष्प्रयोजनस्त्व**नर्थदण्ड** इति। उक्तरूपमेव दण्डं

सर्वजीवेषु चतुर्विंशतिदण्डकेन निरूपयन्नाह– **णेरइयाण**मित्यादि । **एव**मिति नारकवदर्थदण्डानर्थदण्डाभिलापेन चतुर्विंशतिदण्डको ज्ञेयः, नवरं नारकस्य स्वशरीररक्षार्थं परस्योपहनन**मर्थदण्ड**ः, प्रद्वेषमात्राद**नर्थदण्ड**ः, पृथिव्यादीनामनाभोगेनाप्याहारग्रहणे जीववधभावादर्थदण्डोऽन्यथा त्वनर्थदण्डः, अथवोभयमपि भवान्तरार्थदण्डादि-परिणतेरिति।

[सू० ५९] दुविहे दंसणे पन्नत्ते, तंजहा-सम्मद्दंसणे चेव मिच्छादंसणे चेव १। सम्मद्दंसणे दुविहे पन्नत्ते, तंजहा-णिसग्गसम्मद्दंसणे चेव अभिगमसम्मद्दंसणे चेव २। णिसग्गसम्मद्दंसणे दुविहे पन्नत्ते, तंजहा-पडिवाति चेव अपडिवाति चेव ३। अभिगमसम्मद्दंसणे दुविहे पन्नत्ते, तंजहा-पडिवाति चेव अपडिवाति चेव ४। मिच्छादंसणे दुविहे पन्नत्ते, तंजहा-अभिगहियमिच्छादंसणे चेव अणभिगहियमिच्छादंसणे चेव ५। अभिगहियमिच्छादंसणे दुविहे पन्नत्ते, तंजहा-सपज्जवसिते चेव अपज्जवसिते चेव ६। एवमणभिगहितमिच्छादंसणे वि ७।

[टी०] सम्यग्दर्शनादित्रयवतामेव च दण्डो नास्तीति त्रितयनिरूपणेच्छुर्दर्शनं सामान्येन तावन्निरूपयति, तत्र **दुविहे दंसणे** इत्यादिसूत्राणि सप्त सुगमान्येव, नवरं दृष्टि**र्दर्शनं** तत्त्वेषु रुचिः, तच्च **सम्यग्** अविपरीतं जिनोक्तानुसारि, तथा **मिथ्या** विपरीतमिति। **सम्मद्दंसणे** इत्यादि, **निसर्ग**ः स्वभावोऽनुपदेश इत्यनर्थान्तरम्, **अभिगमो**ऽधिगमो गुरूपदेशादिरिति, ताभ्यां यत्तत् तथा, क्रमेण **मरुदेवी-भरत**वदिति । **निसग्गे**त्यादि, प्रतिपतनशीलं **प्रतिपाति** सम्यग्दर्शनमौपशमिकं क्षायोपशमिकं च, **अप्रतिपाति** क्षायिकम्, तत्रैषां क्रमेण लक्षणम्– इहौपशमिकीं श्रेणिमनुप्रविष्टस्यानन्तानुबन्धिनां दर्शनमोहनीयत्रयस्य चोपशमादौपशमिकं भवति, यो वाऽनादिमिथ्यादृष्टिरकृतसम्यक्त्व-मिथ्यात्व-मिश्राभिधानशुद्धा-ऽशुद्धोभयरूपमिथ्यात्वपुद्गलत्रिपुञ्जीक एव अक्षीण-मिथ्यादर्शनोऽक्षपक इत्यर्थः, सम्यक्त्वं प्रतिपद्यते तस्यौपशमिकं भवतीति, कथम् ? इह यदस्य मिथ्यादर्शनमोहनीयमुदीर्णं तदनुभवेनैवोपक्षीणमन्यच्च मन्दपरिणामतया नोदितमतस्तदन्तर्मुहूर्त्तमात्रमुपशान्तमास्ते, विष्कम्भितोदयमित्यर्थः, तावन्तं काल-

मस्यौपशमिकसम्यक्त्वलाभ इति, आह च–

उवसामगसेढिगयस्स होइ उवसामिअं तु सम्मत्तं ।
जो वा अकयतिपुञ्जी अखवियमिच्छो लहइ सम्मं ॥
खीणम्मि उदिन्नम्मी अणुदिज्जंते य सेसमिच्छत्ते ।
अंतोमुहुत्तकालं उवसमसम्मं लहइ जीवो ॥ [विशेषाव० ५२९-५३०] त्ति ।

अन्तर्मुहूर्त्तमात्रकालत्वादेवास्य प्रतिपातित्वम् । यच्चानन्तानुबन्ध्युदये औपशमिक-सम्यक्त्वात् प्रतिपततः सास्वादनमुच्यते तदौपशमिकमेव, तदपि च प्रतिपात्येव, जघन्यतः समयमात्रत्वादुत्कृष्टतस्तु षडावलिकामानत्वादस्येति, तथा इह यदस्य मिथ्यादर्शन-दलिकमुदीर्णं तदुपक्षीणं यच्चानुदीर्णं तदुपशान्तम्, उपशान्तं नाम विष्कम्भितोदयमपनीत-मिथ्यास्वभावं च, तदिह क्षयोपशमस्वभावमनुभूयमानं क्षायोपशमिकमित्युच्यते । नन्वौपशमिकेऽपि क्षयश्चोपशमश्च तथेहापीति कोऽनयोर्विशेषः ?, उच्यते, अयमेव हि विशेषः यदिह वेद्यते दलिकं न तत्र, इह हि क्षायोपशमिके पूर्वशमितमनुसमयमुदेति वेद्यते क्षीयते च, औपशमिके तूदयविष्कम्भणमात्रमेव, आह च-

मिच्छत्तं जमुइन्नं तं खीणं अणुइयं च उवसंतं ।
मीसीभावपरिणयं वेइज्जंतं खओवसमं ॥ [विशेषाव० ५३२] ति ।

एतदपि जघन्यतोऽन्तर्मुहूर्त्तस्थितिकत्वादुत्कर्षतः षट्षष्टिसागरोपमस्थितिकत्वाच्च प्रतिपातीति। यदपि च क्षपकस्य सम्यग्दर्शनदलिकचरमपुद्गलानुभवनरूपं वेदकमित्युच्यते तदपि क्षायोपशमिकभेदत्वात् प्रतिपात्येवेति । तथा मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्वमोहनीयक्षयात् क्षायिकमिति, आह च–

खीणे दंसणमोहे तिविहम्मि वि भवनियाणभूयम्मि ।
निप्पच्चवायमउलं सम्मत्तं खाइयं होइ ॥ [ ] त्ति ।

इदं तु क्षायिकत्वादेवाप्रतिपाति, अत एव सिद्धत्वेऽप्यनुवर्त्तत इति ।

मिच्छादंसणे इत्यादि, **अभिग्रहः** कुमतपरिग्रहः स यत्रास्ति तद**भिग्रहिकम्**, तद्विपरीतम् **अनभिग्रहिक**मिति। **अभिग्गहिए**त्यादि, अभिग्रहिकमिथ्यादर्शनं **सपर्यवसितं** सपर्यवसानं सम्यक्त्वप्राप्तौ, **अपर्यवसित**मभव्यस्य सम्यक्त्वाप्राप्तेः, तच्च मिथ्यात्व-मात्रमप्यतीतकालनयानुवृत्त्याऽभिग्रहिकमिति व्यपदिश्यते, अनभिग्रहिकं भव्यस्य

सपर्यवसितमितरस्यापर्यवसितमिति, अत एवाह– **एवं अणभीत्यादि** ।

[सू० ६०] **दुविहे नाणे पन्नत्ते, तंजहा-पच्चक्खे चेव परोक्खे चेव १। पच्चक्खे नाणे दुविहे पन्नत्ते, तंजहा-केवलनाणे चेव णोकेवलनाणे चेव २। केवलणाणे दुविहे पन्नत्ते, तंजहा-भवत्थकेवलनाणे चेव सिद्धकेवलणाणे चेव ३। भवत्थकेवलणाणे दुविहे पन्नत्ते, तंजहा-सजोगिभवत्थकेवलणाणे चेव, अजोगिभवत्थकेवलणाणे चेव ४। सजोगिभवत्थकेवलणाणे दुविहे पन्नत्ते, तंजहा-पढमसमयसजोगिभवत्थकेवलणाणे चेव अपढमसमयसजोगि-भवत्थकेवलणाणे चेव ५। अहवा चरिमसमयसजोगिभवत्थकेवलणाणे चेव अचरिमसमयसजोगिभवत्थकेवलणाणे चेव ६। एवं अजोगिभवत्थकेवलनाणे वि ७-८। सिद्धकेवलणाणे दुविहे पन्नत्ते, तंजहा-अणंतरसिद्धकेवलणाणे चेव परंपरसिद्धकेवलनाणे चेव ९। अणंतरसिद्धकेवलनाणे दुविहे पन्नत्ते, तंजहा-एक्काणंतरसिद्धकेवलणाणे चेव अणेक्काणंतरसिद्धकेवलणाणे चेव १०। परंपरसिद्धकेवलणाणे दुविहे पन्नत्ते तंजहा-एक्कपरंपरसिद्धकेवलणाणे चेव अणेक्कपरंपरसिद्धकेवलणाणे चेव ११। णोकेवलणाणे दुविहे पन्नत्ते, तंजहा-ओहिणाणे चेव मणपज्जवणाणे चेव १२। ओहिणाणे दुविहे पन्नत्ते, तंजहा-भवपच्चइए चेव खतोवसमिते चेव १३। दोण्हं भवपच्चइए पन्नत्ते, तंजहा-देवाणं चेव नेरइयाणं चेव १४। दोण्हं खओवसमिते पन्नत्ते, तंजहा-मणुस्साणं चेव पंचिंदियतिरिक्खजोणियाणं चेव १५। मणपज्जवणाणे दुविहे पन्नत्ते, तंजहा-उज्जुमति चेव विउलमति चेव १६। परोक्खे णाणे दुविहे पन्नत्ते, तंजहा-आभिणिबोहियणाणे चेव सुयनाणे चेव १७। आभिणिबोहियणाणे दुविहे पन्नत्ते, तंजहा-सुतनिस्सिते चेव असुतनिस्सिते चेव १८। सुतनिस्सिते दुविहे पन्नत्ते, तंजहा-अत्थोग्गहे चेव वंजणोग्गहे चेव १९। असुयनिस्सिते वि एमेव २०। सुयनाणे दुविहे पन्नत्ते, तंजहा-अंगपविट्ठे चेव अंगबाहिरे चेव २१। अंगबाहिरे दुविहे पन्नत्ते, तंजहा-आवस्सए चेव आवस्सयवतिरित्ते चेव २२। आवस्सयवतिरित्ते दुविहे पन्नत्ते, तंजहा-कालिते चेव उक्कालिते**

चेव २३।

[टी०] दर्शनमभिहितमथ ज्ञानमभिधीयते, तत्र च **दुविहे नाणे** इत्यादीनि **आवस्सगवइरित्ते दुविहे** इत्यादिसूत्रावसानानि त्रयोविंशतिः सूत्राणि सुगमानि। नवरं **ज्ञानं** विशेषावबोधः, अश्नाति भुङ्क्ते अश्नुते वा व्याप्नोति ज्ञानेनार्थानित्यक्षः आत्मा, तं प्रति यद् वर्त्तते इन्द्रिय-मनोनिरपेक्षत्वेन तत् **प्रत्यक्षम्** अव्यवहितत्वेनाऽर्थ-साक्षात्करणदक्षमिति, आह च–

अक्खो जीवो अत्थव्वावण-भोयणगुणण्णिओ जेण ।

तं पइ वट्टइ नाणं जं पच्चक्खं तमिह तिविहं ॥ [विशेषाव० ८९] ति ।

परेभ्यः अक्षापेक्षया पुद्गलमयत्वेन द्रव्येन्द्रिय-मनोभ्योऽक्षस्य जीवस्य यत्तत् परोक्षं निरुक्तवशादिति, आह च–

अक्खस्स पोग्गलकया जं दव्विंदिय-मणा परा तेण ।

तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व ॥ [विशेषाव० ९०] त्ति ।

अथवा परैरुक्षा सम्बन्धनं जन्य-जनकभावलक्षणमस्येति **परोक्षम्** इन्द्रिय-मनोव्यवधानेनाऽऽत्मनोऽर्थप्रत्यायकम्, असाक्षात्कारीत्यर्थः। **पच्चक्खे**त्यादि, **केवलम्** एकं **ज्ञानं** केवलज्ञानम्, तदन्यद् **नोकेवलज्ञानम्** अवधि-मनःपर्यायलक्षणमिति। **केवले**त्यादि, **भवत्थकेवलनाणे चेव** त्ति भवस्थस्य केवलज्ञानं यत्तत्तथा, एवमितरदपि। **भवत्थे**त्यादि, सह योगैः कायव्यापारादिभिर्यः स **सयोगी**, इन्समासान्तत्वात्, स चासौ भवस्थश्च, तस्य केवलज्ञानमिति विग्रहः, न सन्ति योगा यस्य स न योगीति वा योऽसा**वयोगी** शैलेशीकरणव्यवस्थितः, शेषं तथैव। **सयोगी**त्यादि, प्रथमः समयः सयोगित्वे यस्य स तथा, एव**मप्रथमो** द्व्यादिः **समयो** यस्य स तथा, शेषं तथैव। **अथवे**त्यादि, **चरमः** अन्त्यः **समयो** यस्य सयोग्यवस्थायाः स तथा, शेषं तथैव। **एव**मिति सयोगिसूत्रवत् प्रथमा-ऽप्रथम-चरमा-ऽचरमविशेषणयुक्तमयोगिसूत्रमपि वाच्यमिति। **सिद्धे**त्यादि, **अनन्तरसिद्धो** यः सम्प्रतिसमये सिद्धः, स चैकोऽनेको वा, तथा **परम्परसिद्धो** यस्य द्व्यादयः समयाः सिद्धस्य, सोऽप्येकोऽनेको वेति, तेषां यत् केवलज्ञानं तत्तथाऽपदिश्यत इति। **ओहिनाणे**त्यादि, **भवपच्चइए** त्ति क्षयोपशम-निमित्तत्वेऽप्यस्य क्षयोपशमस्यापि भवप्रत्ययत्वेन तत्प्राधान्येन भव एव प्रत्ययो यस्य

तद्भवप्रत्ययमिति व्यपदिश्यत इति, इदमेव **भाष्यकारेण** साक्षेप-परिहारमुक्तम् ।

तथा तदावरणस्य क्षयोपशमे भवं क्षायोपशमिकमिति । **'दोण्हं भवपच्चइए'**त्यादि सुगमम् । **मणपज्जवे**त्यादि, **'उज्जुमइ'** ऋज्वी सामान्यग्राहिणी मतिः **ऋजुमतिः** घटोऽनेन चिन्तित इत्यध्यवसायनिबन्धनं मनोद्रव्यपरिच्छित्तिरित्यर्थः, **विपुला** विशेषग्राहिणी मतिर्विपुलमतिः घटोऽनेन चिन्तितः स च सौवर्णः पाटलिपुत्रकोऽद्यतनो महानित्याद्यध्यवसायहेतुभूता मनोद्रव्यविज्ञप्तिरिति ।

आभिणिबोहियेत्यादि, **श्रुतं** कर्म्मतापन्नं **निश्रितम्** आश्रितम्, श्रुतं वा निश्रितमनेनेति **श्रुतनिश्रितम्**, यत् पूर्वमेव श्रुतकृतोपकारस्येदानीं पुनस्तदनपेक्षमेवानुप्रवर्त्तते तदवग्रहादिलक्षणं श्रुतनिश्रितमिति, यत् पुनः पूर्वं तदपरिकर्मितमतेः क्षयोपशमपटीयस्त्वादौत्पत्तिक्यादिलक्षणमुपजायतेऽन्यद्वा श्रोत्रादिप्रभवं त**दश्रुतनिश्रित**मिति ।

सुयेत्यादि, **अत्थोग्गहे** त्ति अर्यते अधिगम्यतेऽर्थ्यते वा अन्विष्यत इति **अर्थः**, तस्य सामान्यरूपस्य अशेषविशेषनिरपेक्षानिर्देश्यस्य रूपादेर**वग्रहणं** प्रथमपरिच्छेदनमर्थावग्रह इति, निर्विकल्पकं ज्ञानम्, दर्शनमिति यदुच्यते इत्यर्थः, स च नैश्चयिको यः स सामयिको यस्तु व्यावहारिकः शब्दोऽयमित्याद्युल्लेखवान् स आन्तर्मौहूर्त्तिक इति, अयं चेन्द्रिय-मनःसम्बन्धात् षोढा इति । तथा व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति **व्यञ्जनम्**, तच्चोपकरणेन्द्रियं शब्दादित्वपरिणतद्रव्यसङ्घातो वा, ततश्च व्यञ्जनेन उपकरणेन्द्रियेण शब्दादित्वपरिणतद्रव्याणां व्यञ्जनानामवग्रहो **व्यञ्जनावग्रह** इति ।

सुयणाणे इत्यादि, प्रवचनपुरुषस्याङ्गानी**वाङ्गानि**, तेषु **प्रविष्टं** तदभ्यन्तरम्, तत्स्वरूपमित्यर्थः, तच्च गणधरकृतम् 'उप्पन्ने इ वा' इत्यादिमातृकापदत्रयप्रभवं वा, ध्रुवश्रुतं वा **आचारा**दि, यत् पुनः स्थविरकृतं मातृकापदत्रयव्यतिरिक्तव्याकरणनिबद्धमध्रुवश्रुतं वो**त्तराध्ययना**दि तदङ्गबाह्यमिति ।

अंगबाहीत्यादि, अवश्यं कर्त्तव्य**मावश्यकं** सामायिकादि षड्विधम्, आह च–

समणेण सावएण य अवस्स कायव्वयं हवइ जम्हा ।
अंतो अहोणिसिस्स य तम्हा आवस्सयं नामं ॥ [विशेषाव० ८७३]

आवश्यकाद् व्यतिरिक्तं ततो यदन्यदिति । **आवस्सगवतिरित्ते**त्यादि । यदिह दिवस-निशा-प्रथम-पश्चिमपौरुषीद्वय एव पठ्यते तत् कालेन निर्वृत्तं **कालिकम् उत्तराध्ययना**दि, यत् पुनः कालवेलावर्जं पठ्यते तदूर्ध्वं कालिकादि**त्युत्कालिकं दशकालिका**दीति ।

[सू० ६१] दुविहे धम्मे पन्नत्ते, तंजहा-सुयधम्मे चेव चरित्तधम्मे चेव। सुयधम्मे दुविहे पन्नत्ते, तंजहा-सुत्तसुयधम्मे चेव अत्थसुयधम्मे चेव । चरित्तधम्मे दुविहे पन्नत्ते, तंजहा-अगारचरित्तधम्मे चेव अणगारचरित्तधम्मे चेव ।

[टी०] उक्तं ज्ञानम्, चारित्रं प्रस्तावयति- **दुविहे**त्यादि । **सुयधम्मे**त्यादि, सूत्र्यन्ते सूच्यन्ते वाऽर्था अनेनेति सूत्रम्, सुस्थितत्वेन व्यापित्वेन च सुष्ठूक्तत्वाद्वा सूक्तम्, सुप्तमिव वा सुप्तम् अव्याख्यानेनाऽप्रबुद्धावस्थत्वादिति ।

चरित्तेत्यादि । अगारं गृहम्, तद्योगा**दगाराः** गृहिणः, तेषां य**श्चरित्रधर्म्मः** सम्यक्त्वमूलाणुव्रतादिपालनरूपः स तथा, एवमितरोऽपि, नवरमगारं नास्ति येषां ते**ऽनगाराः** साधव इति ।

[सू० ६२] दुविहे संजमे पन्नत्ते, तंजहा-सरागसंजमे चेव वीयरागसंजमे चेव ।

सरागसंजमे दुविहे पन्नत्ते, तंजहा-सुहुमसंपरायसरागसंजमे चेव बादरसंपरायसरागसंजमे चेव ।

सुहुमसंपरायसरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयसुहुम-संपरायसरागसंजमे चेव अपढमसमयसुहुमसंपरायसरागसंजमे चेव १, अधवा चरमसमयसुहुमसंपरायसरागसंजमे चेव अचरिमसमयसुहुमसंपरायसरागसंजमे चेव २। अधवा सुहुमसंपरायसरागसंजमे दुविहे पन्नते, तंजहा-संकिलेसमाणते चेव विसुज्झमाणते चेव ।

बादरसंपरायसरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयबादर-संपरायसरागसंजमे चेव अपढमसमयबादरसंपरायसरागसंजमे चेव १, अहवा

चरिमसमयबादरसंपरायसरागसंजमे चेव अचरिमसमयबादरसंपरायसरागसंजमे चेव २। अहवा बायरसंपरायसरागसंजमे दुविधे पन्नत्ते, तंजहा-पडिवाति चेव अपडिवाति चेव ।

वीयरागसंजमे दुविधे पन्नत्ते, तंजहा-उवसंतकसायवीयरागसंजमे चेव खीणकसायवीतरागसंजमे चेव ।

उवसंतकसायवीयरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयउवसंत-कसायवीतरागसंजमे चेव अपढमसमयउवसंतकसायवीतरागसंजमे चेव १, अहवा चरिमसमयउवसंतकसायवीतरागसंजमे चेव अचरिमसमयउवसंत-कसायवीतरागसंजमे चेव २।

खीणकसायवीतरागसंजमे दुविहे पन्नत्ते, तंजहा-छउमत्थखीणकसाय-वीतरागसंजमे चेव केवलिखीणकसायवीयरागसंजमे चेव ।

छउमत्थखीणकसायवीयरागसंजमे दुविहे पन्नत्ते, तंजहा-सयंबुद्धछउमत्थ-खीणकसायवीयरागसंजमे चेव बुद्धबोधियछउमत्थखीणकसायवीयरागसंजमे चेव।

सयंबुद्धछउमत्थखीणकसायवीयरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयसयंबुद्धछउमत्थखीणकसायवीयरागसंजमे चेव अपढमसमय-सयंबुद्धछउमत्थखीणकसायवीयरागसंजमे चेव १, अहवा चरिमसमय-सयंबुद्धछउमत्थखीणकसायवीयरागसंजमे चेव अचरिमसमयसयंबुद्ध-छउमत्थखीणकसायवीयरागसंजमे चेव २। बुद्धबोधियछउमत्थखीणकसाय-वीयरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयबुद्धबोधियछउमत्थ-खीणकसायवीयरागसंजमे चेव अपढमसमयबुद्धबोधियछउमत्थ-खीणकसायवीयरागसंजमे चेव ३, अहवा चरिमसमयबुद्धबोधियछउमत्थ-खीणकसायवीयरागसंजमे चेव अचरिमसमयबुद्धबोधियखीण-कसायवीयरागसंजमे चेव ४।

केवलिखीणकसायवीतरागसंजमे दुविहे पन्नत्ते, तंजहा-सजोगिकेवलि-खीणकसायवीतरागसंजमे चेव अजोगिकेवलिखीणकसायवीतरागसंजमे चेव ५।

सजोगिकेवलिखीणकसायवीयरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयसजोगिकेवलिखीणकसायवीयरागसंजमे चेव अपढमसमयसजोगिकेवलिखीणकसायवीयरागसंजमे चेव ६। अहवा चरिमसमयसजोगिकेवलिखीणकसायवीयरागसंजमे चेव अचरिमसमयसजोगिकेवलिखीणकसायवीयरागसंजमे चेव ७।

अजोगिकेवलिखीणकसायवीयरागसंजमे दुविहे पन्नत्ते, तंजहा-पढमसमयअजोगिकेवलिखीणकसायवीयरागसंजमे चेव अपढमसमयअजोगिकेवलिखीणकसायवीयरागसंजमे चेव ८। अहवा चरिमसमयअजोगिकेवलिखीणकसायवीयरागसंजमे चेव अचरिमसमयअजोगिकेवलिखीणकसायवीयरागसंजमे चेव ९।

[टी०] चारित्रधर्मश्च संयमोऽतस्तमेवाह– **दुविहे**त्यादि, सह रागेण अभिष्वङ्गेण मायादिरूपेण यः स सरागः, स चासौ संयमश्च सरागस्य वा संयम इति वाक्यम्, वीतो विगतो रागो यस्मात् स चासौ संयमश्च वीतरागस्य वा संयम इति वाक्यमिति । **सरागे**त्यादि, **सूक्ष्मः** असङ्ख्यातकिट्टिकावेदनतः **सम्परायः** कषायः, सम्परैति संसरति संसारं जन्तुरनेनेति व्युत्पादनात् ।

स च लोभकषायरूपः उपशमकस्य क्षपकस्य वा यस्य स **सूक्ष्मसम्परायः** साधुः, तस्य सरागसंयमः, विशेषणसमासो वा भणनीय इति । **बादराः** स्थूराः **सम्परायाः** कषाया यस्य साधोः यस्मिन् वा संयमे स तथा सूक्ष्मसम्परायप्राचीनगुणस्थानकेषु, शेषं प्राग्वदिति ।

सुहुमेत्यादिसूत्रद्वये प्रथमाप्रथमसमयादिविभागः केवलज्ञानवदिति ।

अहवेत्यादि, सङ्क्लिश्यमानकः संयमः उपशमश्रेण्याः प्रतिपततः, विशुद्ध्यमानस्तामुपशमश्रेणीं क्षपकश्रेणीं वा समारोहत इति । **बादरे**त्यादिसूत्रद्वयम्, बादरसम्परायसरागसंयमस्य प्रथमाप्रथमसमयता संयमप्रतिपत्तिकालापेक्षया चरमाचरमसमयता तु यदनन्तरं सूक्ष्मसम्परायता असंयतत्वं वा भविष्यति तदपेक्षयेति। **अहवे**त्यादि, प्रतिपाती उपशमकस्यान्यस्य वा, **अप्रतिपाती** क्षपकस्येति । सरागसंयम उक्तोऽतो वीतरागसंयममाह– **वीयरागे**त्यादि, उपशान्ताः प्रदेशतोऽप्यवेद्यमानाः कषाया यस्य

यस्मिन् वा स तथा साधुः संयमो वेति एकादशगुणस्थानवर्त्तीति, क्षीणकषायो द्वादशगुणस्थानवर्त्तीति। **उवसंते**त्यादि सूत्रद्वयं प्रागिव। **खीणे**त्यादि, छादयत्यात्मस्वरूपं यत्तच्छद्म ज्ञानावरणादिघातिकर्म, तत्र तिष्ठतीति **छद्मस्थः** अकेवली, शेषं तथैव । **केवलम्** उक्तस्वरूपं ज्ञानं च दर्शनं चास्यास्तीति केवलीति। **सयंबुद्धे**त्यादि नव सूत्राणि गतार्थान्येवेति ।

[सू० ६३] दुविहा पुढविकाइया पन्नत्ता, तंजहा-सुहुमा चेव बायरा चेव १। एवं जाव दुविहा वणस्सतिकाइया पन्नत्ता, तंजहा-सुहुमा चेव बायरा चेव ५।

दुविहा पुढविकाइया पन्नत्ता, तंजहा-पज्जत्तगा चेव अपज्जत्तगा चेव ६। एवं जाव वणस्सतिकाइया १०।

दुविहा पुढविकाइया पन्नत्ता, तंजहा-परिणता चेव अपरिणता चेव ११, एवं जाव वणस्सतिकाइया १५। दुविहा दव्वा पन्नत्ता, तंजहा-परिणता चेव अपरिणता चेव १६।

दुविहा पुढविकाइया पन्नत्ता, तंजहा-गतिसमावन्नगा चेव अगतिसमावन्नगा चेव १७, एवं जाव वणस्सतिकाइया २१। दुविहा दव्वा पन्नत्ता, तंजहा-गतिसमावन्नगा चेव अगतिसमावन्नगा चेव २२।

दुविहा पुढविकाइया पन्नत्ता, तंजहा-अणंतरोगाढगा चेव परंपरोगाढगा चेव २३, जाव दव्वा २८।

[टी०] उक्तः संयमः, स च जीवाजीवविषय इति पृथिव्यादिजीवस्वरूपमाह– **दुविहा पुढवी**त्यादि अष्टाविंशतिः सूत्राणि। तत्र पृथिव्येव कायो येषां ते पृथिवीकायिनः, समासान्तविधौः, त एव स्वार्थिककप्रत्यया(विधानात्)त् **पृथिवीकायिकाः**, पृथिव्येव वा **कायः** शरीरम्, सोऽस्ति येषां ते पृथिवीकायिकाः ते सूक्ष्मनामकर्मोदयात् **सूक्ष्माश्चै**व ये सर्वलोकापन्नाः, बादरनामकर्मोदयात् **बादरा** ये पृथिवी-नगादिष्वेवेति, नैषामापेक्षिकं सूक्ष्मबादरत्वमिति । **एव**मिति पृथिवीसूत्रवदप्तेजोवायूनां सूत्राणि वाच्यानि यावद्वनस्पतिसूत्रम्। **दुविहे**त्यादि पर्याप्तनामकर्मोदयवर्त्तिनः **पर्याप्तकाः**, ये हि चतस्रः

पर्याप्तीः पूरयन्तीति, अपर्याप्तनामकर्मोदयाद**पर्याप्तका** ये पर्याप्तीर्न पूरयन्तीति। इह च पर्याप्तिर्नाम शक्तिः सामर्थ्यविशेष इति यावत्, सा च पुद्गलद्रव्योपचयादुत्पद्यते, षड्भेदा चेयम्, तद्यथा-

आहार १ सरीरिंदियपज्जत्ती २-३ आणुपाणु ४ भास ५ मणे ६ ।
चत्तारि पंच छप्पि य एगिंदियविगलसन्नीणं ॥ [**जीवसमास० २५**] ति ।

तत्र एकेन्द्रियाणां चतस्रः, विकलेन्द्रियाणां पञ्च, संज्ञिनां षट् इति।

दुविहा पुढवीत्यादिषट्सूत्री, **परिणताः** स्वकाय-परकायशस्त्रादिना परिणामान्तरमापादिताः, अचित्तीभूता इत्यर्थः, तत्र द्रव्यतः क्षत्रादिना मिश्रेण द्रव्येण कालतः पौरुष्यादिना कालेन भावतो वर्ण-गन्ध-रस-स्पर्शान्यथात्वेन परिणताः, क्षेत्रतस्तु

जोयणसयं तु गंताऽणाहारेणं तु भंडसंकंती ।
वायागणिधूमेण य विद्धत्थं होइ लोणाई ॥
हरियाल मणोसिल पिप्पली य खज्जूर मुद्दिया अभया ।
आइन्नमणाइन्ना ते वि हु एमेव णायव्वा ॥
आरुहणे ओरुहणे णिसियण गोणाइणं च गातुम्हा ।
भूमाहारच्छेदे उवक्कमेणेव परिणामो ॥ [**निशीथभा० ४८३३-३४३५**]

अणाहारेणं ति स्वदेशजाहाराभावेनेति, **भंडसंकंति** त्ति भाजनाद् भाजनान्तरसङ्क्रान्त्या, खर्ज्जूरादयोऽनाचरिताः अभयादयस्तु आचरिता इति। परिणामान्तरेऽपि पृथिवीकायिका एव ते, केवलमचेतना इति, कथमन्यथाऽचेतनपृथिवीकायपिण्डप्रयोजनाभिधानमिदं स्यात्, यथा–

घट्टग-डगलग-लेवो एमादि पयोयणं बहुहा ॥ [**ओघनि० ३४२, पिण्डनि० १५**] इति ।

एवमित्यादि प्रागिव, तदेवं पञ्चैतानि सूत्राणि। द्रवन्ति गच्छन्ति विचित्रपर्यायानिति **द्रव्याणि** जीव-पुद्गलरूपाणि, तानि च विवक्षितपरिणामत्यागेन परिणामान्तरापन्नानि **परिणतानि**, विवक्षितपरिणामवन्त्येव **अपरिणतानी**ति द्रव्यसूत्रं षष्ठम् १६ ।

दुविहेत्यादि षट्सूत्री, **गति**र्गमनं तां **समापन्नाः** प्राप्तास्तद्वन्तो **गतिसमापन्नाः**, ये हि पृथिवीकायिकाद्यायुष्कोदयात् पृथिवीकायिकादिव्यपदेशवन्तो विग्रहगत्या उत्पत्तिस्थानं

व्रजन्ति, **अगतिसमापन्नास्तु** स्थितिमन्तः । द्रव्यसूत्रे **गतिर्ग**मनमात्रमेव, शेषं तथैवेति २२ ।

दुविहा पुढवीत्यादि षट्सूत्री, **अनन्तरं** सम्प्रत्येव समये क्वचिदाकाशदेशे **अवगाढाः** आश्रितास्त एवाऽ**नन्तरावगाढकाः**, येषां तु द्व्यादयः समया अवगाढानां ते **परम्परावगाढकाः**, अथवा विवक्षितं क्षेत्रं द्रव्यं वाऽपेक्ष्या**नन्तरम्** अव्यवधानेनावगाढा **अनन्तरावगाढा** इतरे तु **परम्परावगाढा** इति २८ ।

[सू० ६४] दुविहे काले पन्नत्ते, तंजहा-ओसप्पिणीकाले चेव उस्सप्पिणीकाले चेव १।

दुविहे आगासे पन्नत्ते, तंजहा-लोगागासे चेव अलोगागासे चेव २।

[टी०] अनन्तरं द्रव्यस्वरूपमुक्तम्, अधुना द्रव्याधिकारादेव द्रव्यविशेषयोः काला-ऽऽकाशयोर्द्विसूत्र्या प्ररूपणामाह, **दुविहे**त्यादि कल्यते सङ्ख्यायतेऽसावनेन वा कलनं वा कलासमूहो वेति **कालः** वर्त्तना-परत्वा-ऽपरत्वादिलक्षणः, स चावसर्प्पिण्यु-त्सर्प्पिणीरूपतया **द्विविधो** द्विस्थानकानुरोधादुक्तः, अन्यथाऽवस्थितलक्षणो महाविदेह-भोगभूमिसम्भवी तृतीयोऽप्यस्तीति ।

आगासे त्ति सर्वद्रव्यस्वभावानाकाशयति आदीपयति तेषां स्वभावलाभेऽ-वस्थानदानादित्याकाशम्, तत्र **लोको** यत्राकाशदेशे धर्मास्तिकायादिद्रव्याणां वृत्तिरस्ति स एवाकाशं **लोकाकाश**मिति, विपरीत**मलोकाकाश**मिति ।

[सू० ६५] णेरइयाणं दो सरीरगा पन्नत्ता, तंजहा-अब्भंतरगे चेव बाहिरगे चेव । अब्भंतरए कम्मए, बाहिरए वेउव्विए । एवं देवाणं भाणियव्वं।

पुढविकाइयाणं दो सरीरगा पन्नत्ता, तंजहा-अब्भंतरए चेव बाहिरए चेव। अब्भंतरऐ कम्मए, बाहिरए ओरालिगे । जाव वणस्सइकाइयाणं।

बेइंदियाणं दो सरीरगा पन्नत्ता, तंजहा-अब्भंतरए चेव बाहिरए चेव। अब्भंतरए कम्मए, अट्ठि-मंस-सोणियबद्धे बाहिरए ओरालिए । जाव चउरिंदियाणं।

पंचिंदियतिरिक्खजोणियाणं दो सरीरगा पन्नत्ता, तंजहा-अब्भंतरए चेव बाहिरए चेव। अब्भंतरए कम्मए, अट्ठि-मंस-सोणिय-ण्हारु-छिराबद्धे बाहिरए

ओरालिए । मणुस्साण वि एवं चेव ।

विग्गहगइसमावण्णगाणं नेरइयाणं दो सरीरगा पन्नत्ता, तंजहा-तेयए चेव कम्मए चेव । निरंतरं जाव वेमाणियाणं ।

नेरइयाणं दोहिं ठाणेहिं सरीरुप्पत्ती सिया, तंजहा-रागेण चेव दोसेण चेव। जाव वेमाणियाणं ।

नेरइयाणं दुट्ठाणनिव्वत्तिए सरीरए पन्नत्ते, तंजहा-रागनिव्वत्तिए चेव दोसनिव्वत्तिए चेव । जाव वेमाणियाणं ।

दो काया पन्नत्ता, तंजहा-तसकाए चेव थावरकाए चेव ।

तसकाए दुविहे पन्नत्ते, तंजहा-भवसिद्धिए चेव अभवसिद्धिए चेव १। एवं थावरकाए वि २।

[टी०] अनन्तरं लोकालोकभेदेनाकाशद्वैविध्यमुक्तम्, लोकश्च शरीरि-शरीराणां सर्वत आश्रयस्वरूप इति नारकादिशरीरदण्डकेन शरीरप्ररूपणामाह- **णेरइयाण**मित्यादि प्रायः कण्ठ्यम्, नवरं शीर्यते अनुक्षणं चयापचयाभ्यां विनश्यतीति शरीरम्, तदेव शटनादिधर्मतयाऽनुकम्पितत्वात् **शरीरकम्**, ते च **द्वे प्रज्ञप्ते** जिनैः, **अभ्यन्त**र्मध्ये भव**माभ्यन्तरम्**, आभ्यन्तरत्वं च तस्य जीवप्रदेशैः सह क्षीर-नीरन्यायेन लोलीभवनात् भवान्तरगतावपि च जीवस्यानुगतिप्रधानत्वादपवरकाद्यन्तःप्रविष्टपुरुषवदनतिशयिनाम-प्रत्यक्षत्वाच्चेति। अत्रा**भ्यन्तरं कम्मए** त्ति कार्मणशरीरनामकर्मोदयनिर्वर्त्यमशेषकर्मणां प्ररोहभूमिराधारभूतम्, तथा संसार्यात्मनां गत्यन्तरसङ्क्रमणे साधकतमं तत् कार्मणवर्गणास्वरूपम्, कर्मैव **कर्मक**मिति, कर्मकग्रहणे च तैजसमपि गृहीतं द्रष्टव्यम्, तयोरव्यभिचारित्वेनैकत्वस्य विवक्षितत्वादिति। **एवं देवाणं भाणियव्वं** ति, अयमर्थः-यथा नैरयिकाणां शरीरद्वयं भणित**मेवं देवानाम्** असुरादीनां वैमानिकान्तानां **भणितव्यम्**, कार्मण-वैक्रिययोरेव तेषां भावात्, चतुर्विंशतिदण्डकस्य च विवक्षितत्वादिति ।

पुढवीत्यादि, पृथिव्यादीनां तु **बाह्य**मौदारिकशरीरनामकर्मोदयादुदारपुद्गलनिर्वृत्त-मौदारिकम्, केवलमेकेन्द्रियाणामस्थ्यादिविरहितम्, वायूनां वैक्रियं यत्तन्न विवक्षितं प्रायिकत्वात् तस्येति ।

बेइंदियाणमित्यादि, **अस्थि-मांस-शोणितैर्बद्धं** नद्धं यत्तत्तथा, द्वीन्द्रियादीनामौदारिकत्वेऽपि शरीरस्यायं विशेषः।

पंचेंदियेत्यादि, पञ्चेन्द्रियतिर्यङ्-मनुष्याणां पुनरयं विशेषो यद**स्थि-मांस-शोणित-स्नायु-शिराबद्ध**मिति, अस्थ्यादयस्तु प्रतीता इति ।

प्रकारान्तरेण चतुर्विंशतिदण्डकेन शरीरप्ररूपणामेवाह– **विग्गहे**त्यादि, **विग्रहगतिः** वक्रगतिर्यदा विश्रेणिव्यवस्थितमुत्पत्तिस्थानं गन्तव्यं भवति तदा या स्यात्तां समापन्ना **विग्रहगतिसमापन्ना**स्तेषां द्वे शरीरे, इह तैजस-कार्मणयोर्भेदेन विवक्षेति, एवं दण्डकः।

शरीराधिकारात् शरीरोत्पत्तिं दण्डकेन निरूपयन्नाह– **नेरइयाण**मित्यादि, कण्ठ्यम्, किन्तु राग-द्वेषजनितकर्मणा शरीरोत्पत्तिः सा राग-द्वेषाभ्यामेवेति व्यपदिश्यते, कार्ये कारणोपचारादिति **जाव वेमाणियाणं** ति दण्डकः सूचितः ।

शरीराधिकाराच्छरीरनिर्वर्त्तनसूत्रम्, तदप्येवम्, नवर**मुत्पत्तिः** आरम्भमात्रम्, **निर्वर्त्तना** तु निष्ठानयनमिति ।

शरीराधिकाराच्छरीरवतां राशिद्वयेन प्ररूपणामाह– **दो काये**त्यादि। त्रसनामकर्मोदयात् त्रस्यन्तीति त्रसाः, तेषां कायो राशि**स्त्रसकायः**, स्थावरनामकर्मोदयात् तिष्ठन्तीत्येवंशीलाः स्थावराः, तेषां कायः **स्थावरकाय** इति । त्रस-स्थावरकाययोरेव द्वैविध्यप्ररूपणार्थं **तसकाये**त्यादि सूत्रद्वयं सुगमं चेति ।

[सू० ६६] दो दिसाओ अभिगिज्झ कप्पइ निग्गंथाण वा णिग्गंथीण वा पव्वावित्तए- पाईणं चेव उदीणं चेव १। एवं मुंडावित्तए २, सिक्खावित्तए ३, उवट्ठावित्तए ४, संभोइत्तए ५, संव(वा?)सित्तए ६, सज्झायमुद्दिसित्तए ७, सज्झायं समुद्दिसित्तए ८, सज्झायमणुजाणित्तए ९, आलोइत्तए १०, पडिक्कमित्तए ११, निंदित्तए १२, गरहित्तए १३, विउट्टित्तए १४, विसोहित्तए १५, अकरणयाए अब्भुट्ठित्तए १६, अहारिहं पायच्छित्तं तवोकम्मं पडिवज्जित्तए १७ ।

दो दिसातो अभिगिज्झ कप्पति निग्गंथाण वा निग्गंथीण वा अपच्छिम-मारणंतियसंलेहणाझूसणाझूसियाणं भत्तपाणपडियाइक्खिताणं पाओवगताणं कालं अणवकंखमाणाणं विहरित्तए, तंजहा-पाईणं चेव उदीणं चेव १८।

।। बिट्ठाणस्स पढमो उद्देसओ समत्तो ।।

[टी०] पूर्वसूत्रे भव्याः शरीरिण उक्ताः, इतस्तद्विशेषाणामेव यद्यथा कर्त्तुमुचितं तत् तथा द्विस्थानकानुपातेनाह– **दो दिसाओ** इत्यादि, **द्वे दिशौ** काष्ठे **अभिगृह्य** अङ्गीकृत्य, तदभिमुखीभूयेत्यर्थः, **कल्पते** युज्यते, निर्गता ग्रन्थाद् धनादेरिति **निर्ग्रन्थाः** साधवस्तेषाम्, **निर्ग्रन्थ्यः** साध्व्यस्तासाम्, **प्रव्राजयितुं** रजोहरणादिदानेन, **प्राचीनं** प्राचीम्, पूर्वामित्यर्थः, **उदीचीनम्** उदीचीम्, उत्तरामित्यर्थः, उक्तं च-

पुव्वामुहो उ उत्तरमुहो व्व देज्जाऽहवा पडिच्छेज्जा ।
जाए जिणादओ वा हवेज्ज जिणचेइयाइं वा ।। [पञ्चव० १३१] इति ।

एवमिति यथा प्रव्राजनसूत्रं दिग्द्वयाभिलापेनाधीतमेवं मुण्डनादिसूत्राण्यपि षोडशाध्येतव्यानीति, तत्र **मुण्डयितुं** शिरोलोचतः १, **शिक्षयितुं** ग्रहणशिक्षापेक्षया सूत्रार्थौ ग्राहयितुम्, आसेवनाशिक्षापेक्षया तु प्रत्युपेक्षणादि शिक्षयितुमिति २, **उत्थापयितुं** महाव्रतेषु व्यवस्थापयितुम् ३, **संभोजयितुं** भोजनमण्डल्यां निवेशयितुम् ४, **संवासयितुं** संस्तारकमण्डल्यां निवेशयितुम् ५, सुष्ठु आ मर्यादया अधीयत इति स्वाध्यायः अङ्गादिः, त**मुद्देष्टुं** योगविधिक्रमेण सम्यग्योगेनाधीष्वेदमित्येवमुपदेष्टुमिति ६, **समुद्देष्टुं** योगसामाचार्यैव स्थिरपरिचितं कुर्विदमिति वक्तुमिति ७, **अनुज्ञातुं** तथैव सम्यगेतद् धारय अन्येषां च प्रवेदयेत्येवमभिधातुमिति ८, **आलोचयितुं** गुरवेऽपराधान्निवेदयितुमिति ९, **प्रतिक्रमितुं** प्रतिक्रमणं कर्त्तुमिति १०, **निन्दितु**मतिचारान् स्वसमक्षं जुगुप्सितुम्, आह च– **सचरित्तपच्छयावो निंद** [आव०नि० १०६२]त्ति ११, **गर्हितुं** गुरुसमक्षं तानेव जुगुप्सितुम्, आह च– **गरहा वि तहाजातीयमेव नवरं परप्पयासणय** [आव०नि० १०६३] त्ति १२, **विउट्टित्तए** त्ति व्यतिवर्त्तयितुं वित्रोटयितुं विकुट्टयितुं वा, अतिचारानुबन्धं विच्छेदयितुमित्यर्थः १३, **विशोधयितु**मतिचारपङ्कापेक्षयाऽऽत्मानं विमलीकर्त्तुमिति १४, **अकरणतया** पुनर्न करिष्यामीत्येवम**भ्युत्थातुम्** अभ्युपगन्तुमिति १५, **यथार्हम्** अतिचाराद्यपेक्षया यथोचितं पापच्छेदकत्वात् प्रायश्चित्तविशोधकत्वाद्वा **प्रायश्चित्तम्** ।

तपःकर्म निर्विकृतिकादिकं **प्रतिपत्तुम्** अभ्युपगन्तुमिति १६ । सप्तदशं सूत्रं साक्षादेवाह– **दो दिसे**त्यादि, पश्चिमैवामङ्गलपरिहारार्थमपश्चिमा सा चासौ मरणमेव

योऽन्तस्तत्र भवा मारणान्तिकी च सा चासौ संलिख्यतेऽनया शरीर-कषायादीति संलेखना तपोविशेषः सा चेति **अपश्चिममारणान्तिकसंलेखना**, तस्याः **झूसण** त्ति जोषणा सेवा, तया, तल्लक्षणधर्मेणेत्यर्थः, **झूसियाणं** ति सेवितानाम्, तद्युक्तानामित्यर्थः, तया वा **झूषितानां** क्षपितानां क्षपितदेहानामित्यर्थः, तथा **भक्तपाने प्रत्याख्याते** यैस्ते तथा, तेषाम्, **पादपवदुपगतानाम्** अचेष्टतया स्थितानाम्, अनशनविशेषं प्रतिपन्नानामित्यर्थः, **कालं** मरणकालम**नवकाङ्क्षतां** तत्रानुत्सुकानां **विहर्त्तुं** स्थातुमिति १७ । एवमेतानि दिक्सूत्राण्यादितोऽष्टादश । सर्वत्र यन्न व्याख्यातं तत् सुगमत्वादिति ।

॥ द्विस्थानकस्य प्रथमोद्देशको समाप्तः ॥

❖ ❖ ❖

[अथ द्वितीय उद्देशकः]

[सू० ६७] जे देवा उड्ढोववन्नगा कप्पोववन्नगा विमाणोववन्नगा चारोववन्नगा चारट्ठिइया गतिरतिया गतिसमावण्णगा तेसि णं देवाणं सता समितं जे पावकम्मे कज्जति तत्थगता वि एगतिया वेयणं वेदेंति, अन्नत्थगता वि एगतिया वेयणं वेदेंति ।

णेरइयाणं सता समियं जे पावे कम्मे कज्जइ तत्थगया वि एगइया वेयणं वेदेंति अन्नत्थगया वि एगतिता वेयणं वेदेंति,जाव पंचेंदियतिरिक्खजोणियाणं।

मणुस्साणं सता समितं जे पावे कम्मे कज्जति इहगया वि एगइया वेयणं वेदेंति, अन्नत्थगता वि एगतिया वेयणं वेदेंति । मणुस्सवज्जा सेसा एक्कगमा।

[टी०] इहानन्तरोद्देशके जीवाजीवधर्मा द्वित्वविशिष्टा उक्ताः, द्वितीयोद्देशके तु द्वित्वविशिष्टा एव जीवधर्मा उच्यन्ते, इत्यनेन सम्बन्धेन आयातस्यास्योद्देशकस्येदमादिसूत्रम्– **जे देवे**त्यादि । अस्य चानन्तरसूत्रेण सहायमभिसम्बन्धः– प्रथमोद्देशकान्त्यसूत्रे पादपोपगमनमुक्तम्, तस्माच्च देवत्वं केषाञ्चिद्भवतीति देवविशेषभणनेन तत्कर्मबन्ध-वेदने प्रतिपादयन्नाह– **जे देवे**त्यादि । ये देवाः सुराः वक्ष्यमाणविशेषणेभ्यो वैमानिका अनशनादेरुत्पन्नाः, किंभूताः? **उड्ढ** त्ति ऊर्ध्वलोकस्तत्रोपपन्नकाः उत्पन्ना

ऊर्ध्वोपपन्नकाः, ते च द्विधा-**कल्पोपपन्नकाः** सौधर्मादिदेवलोकोत्पन्नास्तथा **विमानोपपन्नकाः** ग्रैवेयका-ऽनुत्तरलक्षणविमानोत्पन्नाः, कल्पातीता इत्यर्थः, तथा परे **चारोववन्नग** त्ति चरन्ति भ्रमन्ति ज्योतिष्कविमानानि यत्र स **चारो** ज्योतिश्चक्रक्षेत्रं समस्तमेव, व्युत्पत्त्यर्थमात्रानपेक्षणेन शब्दप्रवृत्ति-निमित्ताश्रयणात्, तत्रोपपन्नकाश्च**ारोप-पन्नकाः** ज्योतिष्काः, न च पादपोपगमनादे-र्ज्योतिष्कत्वं न भवति, परिणामविशेषादिति, तेऽपि च द्विधैव, तथाहि- **चारे** ज्योतिश्चक्रक्षेत्रे **स्थिति**रेव येषां ते **चारस्थितिकाः** समयक्षेत्रबहिर्वर्त्तिनो घण्टाकृतय इत्यर्थः, तथा गतौ रतिर्येषां ते **गतिरतिकाः**, समयक्षेत्रवर्त्तिन इत्यर्थः, गतिरतयश्चासततगतयोऽपि भवन्तीत्यत आह– **गतिं** गमनं **स**मिति सतत**मापन्नकाः** प्राप्ता **गतिसमापन्नकाः**, अनुपरतगतय इत्यर्थः, **तेषां देवानां** द्विविधानां पुनर्द्विविधानां **सदा** नित्यं **समितं** सन्ततं **यत् पापं कर्म** ज्ञानावरणादि, सततबन्धकत्वात् जीवानाम्, **क्रियते** बध्यते, कर्मकर्तृप्रयोगोऽयम्, भवति सम्पद्यत इत्यर्थः, ते देवास्तस्य कर्मणः आबाधाकालातिक्रमे सति **तत्थगया वि** त्ति **अपि**रेवकारार्थस्तस्य चैवं प्रयोगः– **तत्रैव** देवभव एव कल्पातीतानां क्षेत्रान्तरादि-गमनासम्भवात्, इह **तत्रान्यत्र**शब्दाभ्यां भव एव विवक्षितः, न क्षेत्र-शयना-ऽऽसनादीति, **गताः** वर्त्तमाना **एके** केचन देवा **वेदनाम् वेदयन्ति** अनुभवन्ति, **अन्नत्थगया वि** त्ति देवभवादन्यत्रैव भवान्तरे गता उत्पन्ना **वेदना**मनुभवन्ति, केचित्तूभयत्रापि, अन्ये विपाकोदयापेक्षया नोभयत्रापीति, एतच्च विकल्पद्वयं सूत्रे नाश्रितम्, द्वित्वाधिकारादिति।

सूत्रोक्तमेव विकल्पद्वयं सर्वजीवेषु चतुर्विंशतिदण्डकेन प्ररूपयन्नाह– **नेरइयाण**मित्यादि प्रायः सुगमम्, नवरं **तत्थगया वि अन्नत्थगया वि** एवमभिलापेन दण्डको नेयो यावत् पञ्चेन्द्रियतिर्यञ्चोऽत एवाह– **जावे**त्यादि।

मनुष्येषु पुनरभिलापविशेषो दृश्यः, यथा– **इहगता वि एगइया** इति, सूत्रकारो हि मनुष्योऽतस्तत्रेत्येवंभूतं परोक्षानासन्ननिर्देशं विमुच्य मनुष्यसूत्रे **इहे**त्येवं निर्दिशति स्म, मनुष्यभवस्य स्वीकृतत्वेन प्रत्यक्षासन्नवाचिन 'इदं'शब्दस्य विषयत्वादिति, अत एवाह– **मणुस्सवज्जा सेसा एक्कगम** त्ति, **शेषाः** व्यन्तर-ज्योतिष्क-वैमानिका **एकगमाः** तुल्याभिलापाः। ननु प्रथमसूत्र एव ज्योतिष्क-वैमानिकदेवानां विवक्षि-

तार्थस्याभिहितत्वात् किं पुनरिह तद्भणनेनेति ?, उच्यते, तत्रानुष्ठानफलदर्शनप्रसङ्गेन भेदतश्चोक्तत्वाद्, इह तु दण्डकक्रमेण सामान्यतश्चोक्तत्वादिति न दोषः, दृश्यते चेह तत्र तत्र विशेषोक्तावपि सामान्योक्तिरितरोक्तौ त्वितरेति ।

[सू० ६८] नेरइया दुगतिगा दुयागतिया पन्नत्ता, तंजहा-नेरइए नेरइएसु उववज्जमाणे मणुस्सेहिंतो वा पंचेंदियतिरिक्खजोणिएहिंतो वा उववज्जेज्जा, से चेव णं से नेरइए णेरइयत्तं विप्पजहमाणे मणुस्सत्ताए वा पंचेंदियतिरिक्खजोणियत्ताए वा गच्छेज्जा । एवं असुरकुमारा वि, णवरं से चेव णं से असुरकुमारे असुरकुमारत्तं विप्पजहमाणे मणुस्सत्ताए वा तिरिक्खजोणियत्ताए वा गच्छेज्जा, एवं सव्वदेवा ।

पुढविकाइया दुगइया दुयागइया पन्नत्ता, तंजहा- पुढविकाइए पुढविकाइएसु उववज्जमाणे पुढविकाइएहिंतो वा नोपुढविकाइएहिंतो वा उववज्जेज्जा, से चेव णं पुढविकाइए पुढविकाइयत्तं विप्पयहमाणे पुढविकाइयत्ताए वा नोपुढविकाइयत्ताए वा गच्छेज्जा, एवं जाव मणुस्सा।

[टी०] तत्रगता वेदनां वेदयन्तीत्युक्तमतो नारकादीनां गतिं तद्विपर्यस्तामागतिं च निरूपयन्नाह– **नेरइये**त्यादि दण्डकः कण्ठ्यः, नवरं **नैरयिका** नारका **द्वयो**ः मनुष्यगतितिर्यग्गतिलक्षणयोर्गत्योरधिकरणभूतयो**र्गतिर्ये**षां ते तथा, **द्वाभ्या**मेताभ्यामेवावधिभूताभ्या**मागतिः** आगमनं येषां ते तथा, उदितनारकायुर्नारक एव व्यपदिश्यते, अत उच्यते **णेरइए णेरइएसु** त्ति, नारकेषु मध्ये इत्यर्थः, इह चोद्देशक्रमव्यत्ययात् प्रथमवाक्येनाऽऽगतिरुक्ता, **से चेव णं से** त्ति यो मानुषत्वादितो नरकं गतः स एवासौ नारको नान्यः, अनेनैकान्तानित्यत्वं निरस्तमिति, **विप्पजहमाणे** त्ति **विप्रजहन्** परित्यजन्, इह च भूतभावतया नारकव्यपदेशः, अनेन वाक्येन गतिरुक्ता, इत्थं च व्याख्यातं 'तेजस्कायिका द्व्यागतयस्तिर्यङ्-मनुष्यापेक्षया एकगतयस्तिर्यगपेक्षये'ति वाक्यमुपजीव्येति, **एवं असुरकुमारा वि** त्ति, नारकवद्वक्तव्या इत्यर्थः, **नवरं** ति केवलमयं विशेषः-तिर्यक्षु न पञ्चेन्द्रियेष्वेवोत्पद्यन्ते पृथिव्यादिष्वपि तदुत्पत्तेरित्यतः सामान्यत आह– **से चेव णं से** इत्यादि **जाव तिरिक्खजोणियत्ताए वा गच्छेज्ज** त्ति, **एवं**

सव्वदेव त्ति असुरवत् द्वादशापि दण्डकदेवपदानि वाच्यानि, तेषामप्येकेन्द्रियेषूत्पत्तेरिति। **णोपुढविकाइएहिंतो** त्ति अनेन पृथिवीकायिकनिषेधद्वारेणाप्कायिकादयः सर्वे गृहीता द्विस्थानकानुरोधादिति, तेभ्यो वा नारकवर्जेभ्यः समुत्पद्येत। **णोपुढविकाइयत्ताए** त्ति देव-नारकवज्र्जाप्कायादितया गच्छेदिति, **एवं जाव मणुस्स** त्ति, यथा पृथिवीकायिका **दुगइया** इत्यादिभिरभिलापैरुक्ता एवमेभिरेवाप्कायादयो मनुष्यावसानाः पृथिवीकायिकशब्दस्थानेऽप्कायादिव्यपदेशं कुर्वद्भिरभिधातव्या इति। व्यन्तरादयस्तु पूर्वमतिदिष्टा एवेति।

[सू० ६९] दुविहा णेरइया पन्नत्ता, तंजहा-भवसिद्धिया चेव अभवसिद्धिया चेव, जाव वेमाणिया १।

दुविहा नेरइया पन्नत्ता, तंजहा-अणंतरोववण्णगा चेव परंपरोववण्णगा चेव, जाव वेमाणिया २।

दुविहा णेरइया पन्नत्ता, तंजहा-गतिसमावन्नगा चेव अगतिसमावन्नगा चेव, जाव वेमाणिया ३।

दुविधा नेरइया पन्नत्ता, तंजहा-पढमसमओववन्नगा चेव अपढमसमओववन्नगा चेव, जाव वेमाणिया ४।

दुविधा नेरइया पन्नत्ता, तंजहा-आहारगा चेव अणाहारगा चेव, एवं जाव वेमाणिया ५।

दुविहा णेरइया पन्नत्ता, तंजहा-उस्सासगा चेव णोउस्सासगा चेव, जाव वेमाणिया ६।

दुविहा नेरइया पन्नत्ता, तंजहा-सइंदिया चेव अणिंदिया चेव, जाव वेमाणिया ७।

दुविहा नेरइया पन्नत्ता, तंजहा-पज्जत्तगा चेव अपज्जत्तगा चेव, जाव वेमाणिया ८।

दुविहा नेरइया पन्नत्ता, तंजहा-सन्नि चेव असन्नि चेव, एवं पंचेंदिया सव्वे विगलिंदियवज्जा, जाव वाणमंतरा ९।

दुविधा नेरइया पन्नत्ता, तंजहा-भासगा चेव अभासगा चेव, एवमेगिंदियवज्जा सव्वे १०।

दुविहा नेरइया पन्नत्ता, तंजहा-सम्मदिट्ठीया चेव, मिच्छादिट्ठीया चेव, एगिंदियवज्जा सव्वे ११।

दुविहा नेरइया पन्नत्ता, तंजहा-परित्तसंसारिया चेव अणंतसंसारिया चेव, जाव वेमाणिया १२।

दुविहा नेरइया पन्नत्ता, तंजहा-संखेज्जकालसमयट्ठितीया चेव असंखेज्ज-कालसमयट्ठितीया चेव, एवं पंचेंदिया एगिंदियविगलिंदियवज्जा जाव वाणमंतरा १३।

दुविहा नेरइया पन्नत्ता, तंजहा-सुलभबोहिया चेव दुल्लभबोहिया चेव, जाव वेमाणिया १४।

दुविहा नेरइया पन्नत्ता, तंजहा-कण्हपक्खिया चेव सुक्कपक्खिया चेव, जाव वेमाणिया १५।

दुविहा नेरइया पन्नत्ता, तंजहा-चरिमा चेव अचरिमा चेव, जाव वेमाणिया १६।

[टी०] जीवाधिकारादेव भव्यादिविशेषणैः षोडशभिर्दण्डकप्ररूपणामाह । तत्र भव्यदण्डकः कण्ठ्यः १। अनन्तरदण्डके **अणंतर** त्ति एकस्मादनन्तरमुत्पन्ना ये तेऽनन्तरोपपन्नकाः, तदन्यथा तु **परम्परोपपन्नकाः**, विवक्षितदेशापेक्षया वा येऽनन्तरतयोत्पन्नास्ते आद्याः, परम्परया त्वितरे इति २ । गतिदण्डके **गतिसमापन्नका** नरकं गच्छन्तः, इतरे तु तत्र ये गताः, अथवा गतिसमापन्ना नारकत्वं प्राप्ता इतरे तु द्रव्यनारकाः, अथवा चल-स्थिरत्वापेक्षया ते ज्ञेया इति ३ । प्रथमसमयदण्डके **पढमे**त्यादि, प्रथमः समय उपपन्नानां येषां ते **प्रथमसमयोपपन्नकाः**, तदन्ये **अप्रथमसमयोपपन्नका** इति ४ । आहारकदण्डके **आहारकाः** सदैव, **अनाहारकास्तु** विग्रहगतावेकं द्वौ वा समयौ ये नाडीमध्ये मृत्वा तत्रैवोत्पद्यन्ते, ये त्वन्यथा ते त्रीनिति ५ । उच्छ्वासदण्डके उच्छ्वसन्तीत्यु**च्छ्वासका**स्तत्पर्याप्तिपर्याप्तकाः, तदन्ये तु **नोच्छ्वासकाः**

६ । इन्द्रियदण्डके **सेन्द्रियाः** इन्द्रियपर्याप्त्या पर्याप्ताः, तदपर्याप्तास्तु **अनिन्द्रियाः** ७ । पर्याप्तदण्डके **पर्याप्ताः** पर्याप्तनामकर्मोदयादितरे त्वितरोदयादिति ८ । संज्ञिदण्डके **संज्ञिनो** मनःपर्याप्त्या पर्याप्तकाः, तया अपर्याप्तकास्तु ये ते **असंज्ञिन** इति । **एवं पंचिंदिये**त्यादि, अस्यायमर्थः-यथा नारकाः संज्ञ्यसंज्ञिभेदेनोक्ताः **एवं विगलेंदियवज्ज** त्ति, **विकलानि** अपरिपूर्णानि सङ्ख्ययेन्द्रियाणि येषां ते **विकलेन्द्रियाः**, तान् पृथिव्यादीन् द्वित्रिचतुरिन्द्रियांश्च वर्ज्जयित्वा येऽन्ये चतुर्विंशतिदण्डके पञ्चेन्द्रिया असुरादयो भवन्ति ते सर्वेऽपि संज्ञ्यसंज्ञितया वाच्याः । दण्डकावसानमाह– **जाव वेमाणिय** त्ति वैमानिकपर्यवसाना अप्येवं वाच्या इति । क्वचिद् **जाव वाणमंतर** त्ति पाठस्तत्रायमर्थः-येऽसंज्ञिभ्यो नारकादितयोत्पद्यन्ते तेऽसंज्ञिन एवोच्यन्ते, असंज्ञिनश्च नारकादिषु व्यन्तरावसानेषूत्पद्यन्ते न ज्योतिष्क-वैमानिकेष्विति तेषामसंज्ञित्वाभावादिहाग्रहणमिति ९ । भाषादण्डके **भाषका** भाषापर्याप्त्युदये, **अभाषका**स्तदपर्याप्तकावस्थायामिति, एकेन्द्रियाणां भाषापर्याप्तिर्नास्तीत्यत आह– **एव**मित्यादि १० । सम्यग्दृष्टिदण्डके सम्यक्त्वमेकेन्द्रियाणां नास्ति, द्वीन्द्रियादीनां तु सास्वादनं स्यादपीत्युक्तम्– **एगिंदियवज्जा सव्वे** त्ति ११ । संसारदण्डके **परीत्तसंसारकाः** सङ्क्षिप्तभवा इतरे त्वितरे इति १२ । स्थितिदण्डके कालः कृष्णोऽपि स्यात्, समय आचारोऽपि स्यादतः कालश्चासौ समयश्चेति **कालसमय**ः सङ्ख्येयो वर्षप्रमाणतः स यस्यां सा **सङ्ख्येयकालसमया**, सा स्थितिः अवस्थानं येषां ते **सङ्ख्येयकालसमयस्थितिकाः**, दशवर्षसहस्रादिस्थितय इत्यर्थः, इतरे तु पल्योपमासङ्ख्येयभागादिस्थितयः । **एव**मिति नारकवद् द्विविधस्थितिका दण्डकोक्ताः, किं सर्वेऽपि ?, नेत्याह- **पञ्चेन्द्रियाः** असुरादयः, किमुक्तं भवति ? **एकेन्द्रियविकलेन्द्रियवर्ज्जाः**, एतेषां हि द्वाविंशतिवर्षसहस्रादिका सङ्ख्यातैव स्थितिः, पञ्चेन्द्रिया अपि किं सर्वे ?, नेत्याह-**यावद् व्यन्तराः** व्यन्तरान्ताः, एते हि उभयस्वभावा भवन्ति, ज्योतिष्क-वैमानिकास्तु असङ्ख्यातकालस्थितय एवेति १३ । बोधिदण्डके बोधिः जिनधर्म्मः, सा सुलभा येषां ते **सुलभबोधिकाः**, एवमितरेऽपि १४ । पाक्षिकदण्डके **शुक्लो** विशुद्धत्वात् **पक्षः** अभ्युपगमः शुक्लपक्षस्तेन चरन्तीति **शुक्लपाक्षिकाः**, शुक्लत्वं च क्रियावादित्वेनेति, आह च– **किरियावाई भव्वे, णो**

अभव्वे, सुक्कपक्खिए, णो कण्हपक्खिए [ ] त्ति, शुक्लानां वा आस्तिकत्वेन विशुद्धानां पक्षो वर्गः शुक्लपक्षः, तत्र भवाः शुक्लपाक्षिकाः, तद्विपरीतास्तु कृष्णपाक्षिका इति १५ । चरमदण्डके येषां स नारकादिभवश्चरमः, पुनस्तेनैव नोत्पत्स्यन्ते सिद्धिगमनात् ते **चरमाः**, अन्ये **त्वचरमा** इति १६ । एवमेते आदितोऽष्टादश दण्डकाः ।

[सू० ७०] दोहिं ठाणेहिं आया अहेलोगं जाणति पासति, तंजहा-समोहतेणं चेव अप्पाणेणं आता अहेलोगं जाणति पासति, असमोहतेणं चेव अप्पाणेणं आता अहेलोगं जाणति पासति, आहोहि समोहतासमोहतेणं चेव अप्पाणेणं आता अहेलोगं जाणति पासति १। एवं तिरियलोगं २ उड्ढलोगं ३ केवलकप्पं लोगं ४।

दोहिं ठाणेहिं आता अहेलोगं जाणति पासति, तंजहा-विउव्वितेण चेव अप्पाणेणं आता अहेलोगं जाणति पासति, अविउव्वितेणं चेव अप्पाणेणं आता अहेलोगं जाणति पासति, आहोधि विउव्वियाविउव्वितेण चेव अप्पाणेणं आता अहेलोगं जाणति पासति १। एवं तिरियलोगं २ उड्ढलोगं ३ केवलकप्पं लोगं ४।

[टी०] प्राग् वैमानिकाश्चरमाचरमत्वेनोक्ताः, ते चावधिनाऽधोलोकादीन् विदन्त्य-तस्तद्वेदने जीवस्य प्रकारद्वयमाह– **दोहीत्यादि** सूत्रचतुष्टयम् । **द्वाभ्यां स्थानाभ्यां** प्रकाराभ्यामात्मगताभ्या**मात्मा** जीवो**ऽधोलोकं जानात्य**वधिज्ञानेन **पश्यत्य**वधिदर्शनेन **समवहतेन** वैक्रियसमुद्घातगतेनाऽऽ**त्मना** स्वभावेन, समुद्घातान्तरगतेन वा, **असमवहतेन** त्वन्यथेति, एतदेव व्याख्याति– **आहोहीत्यादि** यत्प्रकारोऽवधिरस्येति **यथावधिः**, आदिदीर्घत्वं प्राकृतत्वात्, परमावधेर्वाऽधोवर्त्यवधिर्यस्य सोऽ**धोवधि**रात्मा नियतक्षेत्रविषयावधिज्ञानी, स कदाचित् **समवहतेन** कदाचिदन्यथेति **समवहता-समवहतेने**ति । **एव**मित्यादि, **एव**मिति यथाऽधोलोकः समवहतासमवहतप्रकाराभ्याम-वधेर्विषयतयोक्त एवं तिर्यग्लोकादयोऽपीति, सुगमानि च तिर्यग्लोकोर्ध्वलोक-केवलकल्पलोकसूत्राणि, नवरं **केवलः** परिपूर्णः स चासौ स्वकार्यसामर्थ्यात् **कल्पश्च** केवलज्ञानमिव वा परिपूर्णतयेति **केवलकल्पः**, अथवा **केवलकल्पः** समयभाषया

परिपूर्णस्तं **लोकं** चतुर्दशरज्ज्वात्मकमिति ।

वैक्रियसमुद्घातानन्तरं वैक्रियं शरीरं भवतीति वैक्रियशरीरमाश्रित्याधोलोकादिज्ञाने प्रकारद्वयमाह– **दोहीत्यादि** सूत्रचतुष्टयं कण्ठ्यम्, नवरं **विउव्विएणं** ति कृत-वैक्रियशरीरेणेति ।

[सू० ७१] दोहिं ठाणेहिं आया सद्दाइं सुणेति, तंजहा-देसेण वि आया सद्दाइं सुणेति, सव्वेण वि आया सद्दाइं सुणेति १, एवं रूवाइं पासति २, गंधाइं अग्घाति ३, रसाइं आसादेति ४, फासाइं पडिसंवेदेति ५।

दोहिं ठाणेहिं आया ओभासति, तंजहा-देसेण वि आया ओभासति, सव्वेण वि आया ओभासति १। एवं पभासति २, विकुव्वति ३, परियारेति ४, भासं भासति ५, आहारेति ६, परिणामेति ७, वेदेति ८, निज्जरेति ९।

दोहिं ठाणेहिं देवे सद्दाइं सुणेति, तंजहा-देसेण वि देवे सद्दाइं सुणेति, सव्वेण वि देवे सद्दाइं सुणेति, जाव निज्जरेति १४।

[टी०] ज्ञानाधिकार एवेदमपरमाह– **दोहीत्यादि** पञ्चसूत्री, **स्थानाभ्यां** प्रकाराभ्यां **देसेण वि** त्ति **देशेन** च **शृणोत्येकेन** श्रोत्रेणैकश्रोत्रोपघाते सति, **सर्वेण वा**ऽनुपहतश्रोत्रेन्द्रियो यो वा सम्भिन्नश्रोतोऽभिधानलब्धियुक्तः स सर्वैरिन्द्रियैः **शृणोती**ति सर्वेणेति व्यपदिश्यते । **एव**मिति यथा शब्दान् देश-सर्वाभ्याम् एवं **रूपादीन**पि, नवरं जिह्वादेशस्य प्रसुप्त्यादिनोपघाताद्देशेनाऽऽ**स्वादयती**त्यवसेयमिति ।

शब्दश्रवणादयो जीवपरिणामा उक्ताः, तत्प्रस्तावात् तत्परिणामान्तराण्याह– **दोहीत्यादि**, नव सूत्राणि सुगमानि, नवरम् **अवभासते** द्योतते **देशेन** खद्योतकवत्, **सर्वतः** प्रदीपवत्, अथवा **अवभासते** जानाति, स च **देशतः** फड्डकावधिज्ञानी **सर्वतो**ऽभ्यन्तरावधिरिति १, **एव**मिति देश-सर्वाभ्यां **प्रभासते** प्रकर्षेण द्योतते २, **विकरोति** देशेन हस्तादिवैक्रियकरणेन, सर्वेण सर्वस्यैव कायस्येति ३, **परियारेइ** त्ति मैथुनं सेवते देशेन मनोयोगादीनामन्यतमेन, सर्वेण योगत्रयेणापि ४, **भाषां भाषते** देशेन जिह्वाग्रादिना, सर्वेण समस्ताल्वादिस्थानैः ५, **आहारयति** देशेन मुखमात्रेण, सर्वेण ओजआहारापेक्षया ६, आहारमेव **परिणमयति** परिणामं नयति खल-रसविभागेन,

भक्ताशयदेशस्य प्लीहादिना रुद्धत्वाद् देशतः, अन्यथा तु सर्वतः ७, **वेदयति** अनुभवति, देशेन हस्तादिना अवयवेन, सर्वेण सर्वावयवैराहारसत्कान् परिणमितपुद्गलान् इष्टानिष्टपरिणामतः ८, **निर्जरयति** त्यजत्याहारितान् परिणमितान् वेदितान् आहारपुद्गलान् देशेनापानादिना सर्वेण सर्वशरीरेणैव प्रस्वेदवदिति ९, अथवैतानि चतुर्दशापि सूत्राणि विवक्षितविषयवस्त्वपेक्षया नेयानि, तत्र देश-सर्वयोजना यथा **देशेनापी**ति देशतोऽपि शृणोति विवक्षितशब्दानां मध्ये कांश्चिच्छृणोतीति, **सर्वेणापी**ति सर्वतश्च सामस्त्येन, सर्वानेवेत्यर्थः एवं रूपादीनपि, तथा विवक्षितस्य देशं सर्वं वा विवक्षितमवभासयत्येवं प्रभासयति, एवं विकुर्वणीयं विकुरुते, परिचारणीयं स्त्रीशरीरादि परिचारयति, भाषणीयापेक्षया देशतो भाषां भाषते सर्वतो वेति, अभ्यवहार्यमाहारयति, आहृतं परिणमयति, वेद्यं कर्म वेदयति देशतः सर्वतो वा, एवं निर्जरयत्यपि ।

देश-सर्वाभ्यां सामान्यतः श्रवणाद्युक्तं विशेषविवक्षायां प्रधानत्वाद् देवानां तानाश्रित्य तदाह– **दोही**त्यादि, एतदपि विवक्षितशब्दादिविषयापेक्षया सूत्रचतुर्दशकं नेयमिति ।

[सू० ७२] मरुया देवा दुविहा पन्नत्ता, तंजहा- एगसरीरि चेव बिसरीरि चेव १। एवं किन्नरा २, किंपुरिसा ३, गंधव्वा ४, णागकुमारा ५, सुवन्नकुमारा ६, अग्गिकुमारा ७, वायुकुमारा ८। देवा दुविहा पन्नत्ता, तंजहा-एगसरीरि चेव बिसरीरि चेव ।

॥ बिट्ठाणस्स बीओ उद्देसओ समत्तो ॥

[टी०] देशतः सर्वतो वा एतेऽनन्तरोक्ता भावाः शरीर एव सति भवन्तीति देवानां च प्रधानत्वात् तेषामेव व्यक्तितः शरीरनिरूपणायाह–**मरुये**त्यादि सूत्राष्टकं कण्ठ्यम्, नवरं मरुतो देवा लोकान्तिकदेवविशेषाः, यत उक्तम्– **सारस्वता १-ऽऽदित्य २ वह्न्य ३ रुण ४ गर्दतोय ५ तुषिता ६ ऽव्याबाध ७ मरुतो ८ ऽरिष्टाश्च ९** [तत्त्वार्थ० ४।२६] इति। ते **चैकशरीरिणो** विग्रहे कार्मणशरीरत्वात्, तदनन्तरं वैक्रियभावाद् **द्विशरीरिणः**, द्वयोः शरीरयोः समाहारो द्विशरीरम्, तदस्ति येषां ते तथा, अथवा भवधारणीयमेव यदा तदैकशरीराः यदा तूत्तरवैक्रियमपि तदा द्विशरीराः, किन्नराद्यास्त्रयो व्यन्तराः, शेषा भवनपतय इति, परिगणितभेदग्रहणं च भेदान्तरोपलक्षणम्, न तु व्यवच्छेदार्थम्,

सर्वजीवानामपि विग्रहे एकशरीरत्वस्यान्यदा द्विशरीरत्वस्य चोपपद्यमानत्वादिति ८ । अत एव सामान्यत आह– **देवा दुविहेत्यादि** कण्ठ्यम् ।

॥ द्विस्थानकस्य द्वितीय उद्देशको समाप्तः ॥

❋ ❋ ❋

[अथ तृतीय उद्देशकः]

[सू० ७३] दुविहे सद्दे पन्नत्ते, तंजहा-भासासद्दे चेव णोभासासद्दे चेव १। भासासद्दे दुविहे पन्नत्ते, तंजहा-अक्खरसंबद्धे चेव नोअक्खरसंबद्धे चेव २। णोभासासद्दे दुविहे पन्नत्ते, तंजहा-आउज्जसद्दे चेव णोआउज्जसद्दे चेव ३। आउज्जसद्दे दुविहे पन्नत्ते, तंजहा-तते चेव विततते चेव ४। तते दुविहे पन्नत्ते, तंजहा-घणे चेव झुसिरे चेव ५। एवं विततते वि ६। णोआउज्जसद्दे दुविहे पन्नत्ते, तंजहा-भूसणसद्दे चेव नोभूसणसद्दे चेव ७। णोभूसणसद्दे दुविहे पन्नत्ते, तंजहा-तालसद्दे चेव लत्तियासद्दे चेव ८।

दोहिं ठाणेहिं सद्दुप्पाए सिया, तंजहा-साहन्नंताण चेव पुग्गलाणं सद्दुप्पाए सिया, भिज्जंताण चेव पोग्गलाणं सद्दुप्पाए सिया ।

[टी०] उक्तो द्वितीयोद्देशकः, अथ तृतीय आरभ्यते, अस्य चानन्तरेण सहायमभिसम्बन्धः– अनन्तरोद्देशके जीवपदार्थोऽनेकधोक्तः, अत्र तु तदुपग्राहक-पुद्गल-जीवधर्म-क्षेत्रेन्द्रलक्षणपदार्थप्ररूपणोच्यते इत्येवंसम्बन्धस्याऽस्येदमादिसूत्राष्टकम्– **दुविहेत्यादि** । अस्य च पूर्वसूत्रेण सहायमभिसम्बन्धः– इहानन्तरोद्देशकान्त्यसूत्रे देवानां शरीरं निरूपितं तद्वांश्च शब्दादिग्राहको भवतीत्यत्र शब्दस्तावन्निरूप्यते, इत्येवम्-सम्बन्धस्याऽस्य व्याख्या, सा च सुकरैव, नवरं **भाषाशब्दो** भाषापर्याप्ति-नामकर्मोदयापादितो जीवशब्दः, इतरस्तु **नोभाषाशब्दः** १, **अक्षरसम्बद्धो** वर्णव्यक्तिमान्, **नोअक्षरसम्बद्धस्त्वितर** इति २, **आतोद्यं** पटहादि, तस्य यः **शब्दः** स तथा, **नोआतोद्यशब्दो** वंशस्फोटादिरवः ३, **ततं** यत्तन्त्री-वर्ध्रादिबद्धमातोद्यम् ४, तच्च किञ्चिद् घनं यथा पिञ्जनिकादि, किञ्चिच्छुषिरं यथा वीणा-पटहादिकम्, तज्जनितः

शब्द**स्ततो घनः शुषिरश्चे**ति व्यपदिश्यते ५, विततं ततविलक्षणं तन्त्र्यादिरहितम्, तदपि घनं भाणकवत् शुषिरं काहलादिवत्, तज्जः शब्दो **विततो घनः शुषिरश्चे**ति, चतुःस्थानके पुनरिदमेवं भणिष्यते–

ततं वीणादिकं ज्ञेयम्, विततं पटहादिकम् ।
घनं तु कांस्यतालादि, वंशादि शुषिरं मतम् ॥ [ ] इति ।

विवक्षाप्राधान्याच्च न विरोधो मन्तव्य इति ६, **भूषणं** नुपूरादि, **नोभूषणं** भूषणादन्यत् ७, **तालो** हस्ततालः, **लत्तिय** त्ति कंसिकाः, ता हि आतोद्यत्वेन न विवक्षिता इति, अथवा **लत्तियासद्दे** त्ति पार्ष्णिप्रहारशब्दः ८ ।

उक्ताः शब्दभेदाः, इतस्तत्कारणनिरूपणायाह– **दोहीत्यादि, द्वाभ्यां स्थानाभ्यां** कारणाभ्यां **शब्दोत्पादः स्याद्** भवेत् ८, **संहन्यमानानां च** सङ्घातमापद्यमानानां सतां कार्यभूतः **शब्दोत्पादः स्यात्,** पञ्चम्यर्थे वा षष्ठीति संहन्यमानेभ्य इत्यर्थः, **पुद्गलानां** बादरपरिणामानां यथा घण्टा-लालयोः, एवं **भिद्यमानानां च** वियुज्यमानानां यथा वंशदलानामिति।

[सू० ७४] दोहिं ठाणेहिं पोग्गला साहन्नंति, तंजहा-सइं वा पोग्गला साहन्नंति, परेण वा पोग्गला साहन्नंति १। दोहिं ठाणेहिं पोग्गला भिज्जंति, तंजहा-सइं वा पोग्गला भिज्जंति, परेण वा पोग्गला भिज्जंति २।

दोहिं ठाणेहिं पोग्गला परिपडंति, तंजहा-सइं वा पोग्गला परिपडंति, परेण वा पोग्गला परिपाडिज्जंति ३, एवं परिसडंति ४, विद्धस्संति ५।

[टी०] पुद्गलसङ्घात-भेदयोरेव कारणनिरूपणायाह– **दोहीत्यादि** सूत्रपञ्चकं कण्ठ्यम्। नवरं **स्वयं वे**ति स्वभावेन वा अभ्रादिष्विव **पुद्गलाः संहन्यन्ते** सम्बध्यन्ते, कर्मकर्तृप्रयोगोऽयम्, **परेण वा** पुरुषादिना वा **संहन्यन्ते** संहताः क्रियन्ते, कर्म्मप्रयोगोऽयम्। एवं **भिद्यन्ते** विघटन्ते, तथा **परिपतन्ति** पर्वतशिखरादेरिवेति, **परिशटन्ति** कुष्ठादेर्निमित्तादङ्गुल्यादिवत्, **विध्वस्यन्ते** विनश्यन्ति घनपटलवदिति ५।

[सू० ७५] दुविहा पोग्गला पन्नत्ता, तंजहा-भिन्ना चेव अभिन्ना चेव १। दुविहा पोग्गला पन्नत्ता, तंजहा–भेउरधम्मा चेव नोभेउरधम्मा चेव २।

दुविहा पोग्गला पन्नत्ता, तंजहा-परमाणुपोग्गला चेव नोपरमाणुपोग्गला चेव ३।

दुविहा पोग्गला पन्नत्ता, तंजहा-सुहुमा चेव बायरा चेव ४।

दुविहा पोग्गला पन्नत्ता, तंजहा-बद्धपासपुट्ठा चेव नोबद्धपासपुट्ठा चेव ५।

दुविहा पोग्गला पन्नत्ता, तंजहा-परियाइय च्चेव अपरियाइय च्चेव ६।

दुविहा पोग्गला पन्नत्ता, तंजहा-अत्ता चेव अणत्ता चेव ७।

दुविहा पोग्गला पन्नत्ता, तंजहा-इट्ठा चेव अणिट्ठा चेव ८, एवं कंता ९, पिया १०, मणुन्ना ११, मणामा १२।

दुविहा सद्दा पन्नत्ता, तंजहा-अत्ता चेव अणत्ता चेव १, एवमिट्ठा जाव मणामा ६। दुविहा रूवा पन्नत्ता, तंजहा-अत्ता चेव अणत्ता चेव, जाव मणामा ६। एवं गंधा ६, रसा ६, फासा ६, एवमेक्केक्के छ आलावगा भाणियव्वा।

[टी०] पुद्गलानेव द्वादशसूत्र्या निरूपयन्नाह– **दुविहे**त्यादि, **भिन्ना**: विचटिता इतरे **त्वभिन्ना**: १, स्वयमेव भिद्यत इति भिदुरम्, भिदुरत्वं धर्मो येषां ते **भिदुरधर्माण**: अन्तर्भूतभावप्रत्ययोऽयम्, प्रतिपक्षः प्रतीत एवेति २, परमाश्च ते अणवश्चेति **परमाणव**:, **नोपरमाणव**: स्कन्धाः ३, **सूक्ष्मा**: येषां सूक्ष्मपरिणामः, शीतोष्ण-स्निग्ध-रूक्षलक्षणाश्चत्वार एव च स्पर्शाः, ते च भाषादयः, **बादरा**स्तु येषां बादरः परिणामः पञ्चादयश्च स्पर्शाः, ते चौदारिकादयः ४, पार्श्वेन स्पृष्टा देहत्वचा छुप्ता रेणुवत् **पार्श्वस्पृष्टा**स्ततो **बद्धा**: गाढतरं श्लिष्टाः तनौ तोयवत्, पार्श्वस्पृष्टाश्च ते बद्धाश्चेति राजदन्तादित्वाद् **बद्धपार्श्वस्पृष्टा**:, आह च– **पुट्ठं रेणुं व तणुम्मि बद्धमप्पीकयं पएसेहिं** [**विशेषाव० ३३७**] ति, एते च घ्राणेन्द्रियादिग्रहणगोचराः । तथा नोबद्धाः पार्श्वस्पृष्टा इत्येकपदप्रतिषेधे श्रोत्रेन्द्रियग्रहणगोचराः, यत उक्तम्–

पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु ।

गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥ [**विशेषाव० ३३६**] त्ति ।

उभयपदनिषेधे श्रोत्राद्यविषयाश्चक्षुर्विषयाश्चेति, इयमिन्द्रियापेक्षया बद्धपार्श्वस्पृष्टता पुद्गलानां व्याख्याता, एवं जीवप्रदेशापेक्षया परस्परापेक्षया च व्याख्येयेति ५, **परियाइय**

त्ति विवक्षितं पर्यायमतीताः पर्यायातीताः पर्याप्ता वा सामस्त्यगृहीताः कर्मपुद्गलवत्, प्रतिषेधः सुज्ञानः ६, **आत्ताः** गृहीताः स्वीकृता जीवेन परिग्रहमात्रतया शरीरादितया वा ७, इष्यन्ते स्म अर्थक्रियार्थिभिरि**तीष्टाः** ८, **कान्ताः** कमनीया विशिष्टवर्णादियुक्ताः ९, **प्रियाः** प्रीतिकराः इन्द्रियाह्लादकाः १०, मनसा ज्ञायन्ते शोभना एत इत्येवं विकल्पमुत्पादयन्तः शोभनत्वप्रकर्षाद्ये ते **मनोज्ञाः** ११, मनसो मता वल्लभाः सर्वस्याप्युपभोक्तुः सर्वदा च शोभनत्वप्रकर्षादेव निरुक्तविधिना **मणामा** १२ इति, व्याख्यानान्तरं त्वेवम्– **इष्टाः** वल्लभाः सदैव जीवानां सामान्येन, **कान्ताः** कमनीयाः सदैव तद्भावेन, **प्रियाः** अद्वेष्याः सर्वेषामेव, **मनोज्ञाः** मनोरमाः कथयाऽपि, **मनआमा** मनःप्रियाश्चिन्तयाऽपीति, विपक्षः सुज्ञानः सर्वत्रेति ।

पुद्गलाधिकारादेव तद्धर्मान् शब्दादीन् अनन्तरोक्तसविपर्ययात्तादिविशेषण-षट्कविशिष्टान् **दुविहा सद्दे**त्यादिसूत्रत्रिंशताऽऽह, कण्ठ्या चेयमिति ।

[सू० ७६] दुविहे आयारे पन्नत्ते, तंजहा-णाणायारे चेव नोनाणायारे चेव १। णोनाणायारे दुविहे पन्नत्ते, तंजहा-दंसणायारे चेव नोदंसणायारे चेव २। नोदंसणायारे दुविहे पन्नत्ते, तंजहा-चरित्तायारे चेव नोचरित्तायारे चेव ३। णोचरित्तायारे दुविहे पन्नत्ते, तंजहा-तवायारे चेव वीरियायारे चेव ४।

[टी०] उक्ताः पुद्गलधर्माः, सम्प्रति धर्माधिकाराज्जीवधर्मानाह– **दुविहे** इत्यादि सूत्रचतुष्टयं कण्ठ्यम्, नवरम् आचरण**माचारो** व्यवहारः, **ज्ञानं** श्रुतज्ञानम्, तद्विषय आचारः कालादिरष्टविधो **ज्ञानाचारः**, आह च–

काले विणए बहुमाणुवहाणे चेव तह अनिण्हवणे ।
वंजणमत्थ तदुभए अट्ठविहो नाणमायारो ॥ [दशवै०नि० १८४, निशीथभा० ८] त्ति ।

नोज्ञानाचारः एतद्विलक्षणो दर्शनाचार इति । **दर्शनं** सम्यक्त्वम्, तदाचारो निःशङ्कितादिरष्टविध एव, आह च–

णिस्संकिय १ निक्कंखिय २ निव्वितिगिच्छा ३ अमूढदिट्ठी ४ य ।
उववूह ५ थिरीकरणे ६ वच्छल्ल ७ पभावणे ८ अट्ठ ॥[दशवै०नि० १८२, निशीथभा० २३] त्ति।

नोदर्शनाचारश्चारित्रादिरिति । **चारित्राचार**: समिति-गुप्तिरूपोऽष्टधा, आह च–

पणिहाणजोगजुत्तो पंचहिं समिईहिं तीहि उ गुत्तीहिं ।
एस चरित्तायारो अट्ठविहो होइ नायव्वो ॥ [दशवै०नि० १८५, निशीथभा० ३५] त्ति ।

नोचारित्राचारस्तपआचारप्रभृतिः, तत्र **तपआचारो** द्वादशधा, उक्तं च–

बारसविहम्मि वि तवे सब्भिंतरबाहिरे कुसलदिट्ठे ।
अगिलाए अणाजीवी नायव्वो सो तवायारो ॥ [दशवै०नि० १८६, निशीथभा० ४२] त्ति।

वीर्याचारस्तु ज्ञानादिष्वेव शक्तेरगोपनं तदनतिक्रमश्चेति, उक्तं च–

अणिगूहियबलविरिओ परक्कमइ जो जहुत्तमाउत्तो ।
जुंजइ य जहाथामं नायव्वो वीरियायारो ॥ [दशवै०नि० १८७, निशीथभा० ४३] त्ति ।

[सू० ७७] दो पडिमाओ पन्नत्ताओ, तंजहा-समाहिपडिमा चेव उवहाणपडिमा चेव१।

दो पडिमाओ पन्नत्ताओ,तंजहा-विवेगपडिमा चेव विउस्सग्गपडिमा चेव२।

दो पडिमाओ पन्नत्ताओ, तंजहा-भद्दा चेव सुभद्दा चेव ३।

दो पडिमाओ पन्नत्ताओ, तंजहा-महाभद्दा चेव सव्वतोभद्दा चेव ४।

दो पडिमाओ पन्नत्ताओ, तंजहा-खुड्डिया चेव मोयपडिमा, महल्लिया चेव मोयपडिमा ५।

दो पडिमाओ पन्नत्ताओ, तंजहा-जवमज्झा चेव चंदपडिमा, वइरमज्झा चेव चंदपडिमा ६।

[टी०] अथ वीर्याचारस्यैव विशेषाभिधानाय षट्सूत्रीमाह– **दो पडिमे**त्यादि, **प्रतिमा** प्रतिपत्तिः, प्रतिज्ञेति यावत्, समाधानं **समाधि**: प्रशस्तभावलक्षणः, तस्य प्रतिमा **समाधिप्रतिमा दशाश्रुतस्कन्धो**क्ता द्विभेदा श्रुतसमाधिप्रतिमा सामायिकादि-चारित्रसमाधिप्रतिमा च । उपधानं तपः, तत्प्रतिमो**पधानप्रतिमा** द्वादश भिक्षुप्रतिमा एकादशोपासकप्रतिमाश्चेत्येवंरूपेति। विवेचनं **विवेक**: त्यागः, स चान्तराणां कषायादीनां बाह्यानां गण-शरीर-भक्त-पानादीनामनुचितानाम्, तत्प्रतिपत्ति**र्विवेकप्रतिमा**, **व्युत्सर्ग-प्रतिमा** कायोत्सर्गकरणमेवेति । **भद्रा** पूर्वादिदिक्चतुष्टये प्रत्येकं प्रहरचतुष्टयकायो-

त्सर्गकरणरूपा अहोरात्रद्वयमानेति, **सुभद्रा**ऽप्येवंप्रकारैव सम्भाव्यते, अदृष्टत्वेन तु नोक्तेति । **महाभद्रा**पि तथैव, नवरमहोरात्रकायोत्सर्गरूपा अहोरात्रचतुष्टयमाना, **सर्वतोभद्रा** तु दशसु दिक्षु प्रत्येकमहोरात्रकायोत्सर्गरूपा अहोरात्रदशकप्रमाणेति । **मोकप्रतिमा** प्रश्रवणप्रतिज्ञा, सा च कालभेदेन क्षुद्रिका महती च भवतीति, यत उक्तं **व्यवहारे– खुड्डियं णं मोयपडिमं पडिवण्णस्से**[व्यवहार०९।२४२] त्यादि, इयं च द्रव्यतः प्रश्रवणविषया क्षेत्रतो ग्रामादेर्बहिः कालतः शरदि निदाघे वा प्रतिपद्यते, भुक्त्वा चेत् प्रतिपद्यते चतुर्दशभक्तेन समाप्यते, अभुक्त्वा तु षोडशभक्तेन, भावतस्तु दिव्याद्युपसर्गसहनमिति, एवं महत्यपि, नवरं भुक्त्वा चेत् प्रतिपद्यते षोडशभक्तेन समाप्यते, अन्यथा त्वष्टादशभक्तेनेति ।

यवस्येव मध्यं यस्याः सा **यवमध्या**, चन्द्र इव कलावृद्धि-हानिभ्यां या प्रतिमा सा **चन्द्रप्रतिमा**, तथाहि– शुक्लप्रतिपदि एकं कवलमभ्यवहृत्य ततः प्रतिदिनं कवलवृद्ध्या पञ्चदश पौर्णमास्यां कृष्णप्रतिपदि च पञ्चदश भुक्त्वा प्रतिदिनमेक-हान्याऽमावास्यायामेकमेव यस्यां भुङ्क्ते सा यवमध्या **चन्द्रप्रतिमे**ति, एवं भिक्षादावपि वाच्यमिति ।

[सू० ७८] दुविहे सामाइए पन्नत्ते, तंजहा-अगारसामाइए चेव अणगारसामाइए चेव ।

[टी०] प्रतिमाश्च सामायिकवतामेव भवन्तीति सामायिकमाह–**दुविहे**त्यादि, समानां ज्ञानादीनामायो लाभः समायः, स एव **सामायिक**मिति, तद् द्विविधम् अगारवदनगारस्वामिभेदाद्, देश-सर्वविरती इत्यर्थः ।

[सू० ७९] दोण्हं उववाते पन्नत्ते, तंजहा-देवाणं चेव नेरइयाणं चेव १।

दोण्हं उव्वट्टणा पन्नत्ता, तंजहा-णेरइयाणं चेव भवणवासीणं चेव २।

दोण्हं चयणे पन्नत्ते, तंजहा-जोइसियाणं चेव वेमाणियाणं चेव ३।

दोण्हं गब्भवक्कंती पन्नत्ता, तंजहा-मणुस्साणं चेव पंचेंदियतिरिक्खजोणियाणं चेव ४।

दोण्हं गब्भत्थाणं आहारे पन्नत्ते, तंजहा-मणुस्साण चेव पंचेंदियतिरिक्ख-

जोणियाण चेव ५।

दोण्हं गब्भत्थाणं वुड्ढी पन्नत्ता, तंजहा-मणुस्साण चेव पंचेंदियतिरिक्ख-जोणियाण चेव ६। एवं निवुड्ढी ७, विगुव्वणा ८, गतिपरियाए ९, समुग्घाते १०, कालसंजोगे ११, आयाति १२, मरणे १३।

दोण्हं छविपव्वा पन्नत्ता, तंजहा-मणुस्साण चेव पंचेंदियतिरिक्खजोणियाण चेव १४।

दो सुक्क-सोणितसंभवा पन्नत्ता, तंजहा-मणुस्सा चेव पंचेंदियतिरिक्ख-जोणिया चेव १५।

दुविहा ठिती पन्नत्ता, तंजहा-कायट्ठिती चेव भवट्ठिती चेव १६।

दोण्हं कायट्ठिती पन्नत्ता, तंजहा-मणुस्साण चेव पंचेंदियतिरिक्खजोणियाण चेव १७।

दोण्हं भवट्ठिती पन्नत्ता, तंजहा-देवाण चेव नेरइयाण चेव १८।

दुविहे आउए पन्नत्ते, तंजहा-अद्धाउए चेव भवाउए चेव १९।

दोण्हं अद्धाउए पन्नत्ते, तंजहा-मणुस्साण चेव पंचेंदियतिरिक्खजोणियाण चेव २०।

दोण्हं भवाउए पन्नत्ते, तंजहा-देवाण चेव णेरइयाण चेव २१।

दुविहे कम्मे पन्नत्ते, तंजहा- पदेसकम्मे चेव अणुभावकम्मे चेव २२। दो अहाउयं पालेंति, तंजहा- देव च्चेव नेरइय च्चेव २३।

दोण्हं आउयसंवट्टए पन्नत्ते, तंजहा-मणुस्साण चेव पंचेंदियतिरिक्ख-जोणियाण चेव २४।

[**टी०**] जीवधर्माधिकार एव तद्धर्मान्तराणि **दोण्हं उववाए** इत्यादिभिश्चतुर्विंशत्या सूत्रैराह, सुगमानि चैतानि, नवरं **दोण्हं** ति **द्वयो**र्जीवस्थानकयोरुपपतन**मुपपातो** गर्भ-संमूर्छनलक्षणजन्मप्रकारद्वयविलक्षणो जन्मविशेष इति, दीव्यन्ति इति **देवा**: चतुर्निकायाः सुराः, **नैरयिका**: प्राग्वत्, तेषाम् १ । उद्वर्त्तन**मुद्वर्त्तना** तत्कायान्निर्गमः, मरणमित्यर्थः, तच्च नैरयिक-भवनवासिनामेवैवं व्यपदिश्यते, अन्येषां तु मरणमेवेति । **नैरयिकाणां**

नारकाणाम्, तथा **भवनेषु** अधोलोकदेवावासविशेषेषु वस्तुं शीलमेषामिति **भवनवासिनः**, तेषाम् २ । च्युतिश्च्यवनं मरणमित्यर्थः, तच्च ज्योतिष्क-वैमानिकानामेव व्यपदिश्यते, ज्योतिष्षु नक्षत्रेषु भवाः **ज्योतिष्काः**, शब्दव्युत्पत्तिरेवेयम्, प्रवृत्तिनिमित्ताश्रयणात्तु चन्द्रादयो ज्योतिष्का इति, **विमानेषु** ऊर्ध्वलोकवर्त्तिषु भवाः **वैमानिकाः** सौधर्मादिवासिनः, तेषाम् ३ **गर्भे** गर्भाशये **व्युत्क्रान्तिः** उत्पत्तिर्**गर्भ-व्युत्क्रान्तिः**, मनोरपत्यानि **मनुष्याः**, तेषाम्, तिरोऽञ्चन्ति गच्छन्तीति **तिर्यञ्चः**, तेषां सम्बन्धिनी **योनिः** उत्पत्तिस्थानं येषां ते **तिर्यग्योनिकाः**, ते चैकेन्द्रियादयो भवन्तीति विशेष्यन्ते– पञ्चेन्द्रियाश्च ते तिर्यग्योनिकाश्चेति **पञ्चेन्द्रियतिर्यग्योनिकाः**, तेषाम् ४ । तथा **द्वयो**रेव **गर्भस्थयोराहारो**ऽन्येषां गर्भस्यैवाभावादिति ५ । **वृद्धिः** शरीरोपचयः ६, **निवृद्धिस्**तद्धानिर्वातपित्तादिभिः, **नि**शब्दस्याभावार्थत्वात्, निवरा कन्येत्यादिवत् ७, वैक्रियलब्धिमतां **विकुर्वणा** ८, **गतिपर्यायः** चलनं मृत्वा वा गत्यन्तरगमनलक्षणः, यच्च वैक्रियलब्धिमान् गर्भान्निर्गत्य प्रदेशतो बहिः सङ्ग्रामयति स वा गतिपर्यायः, उक्तं च **भगवत्याम्**–

जीवे णं भंते ! गब्भगए समाणे णेरइएसु उववज्जेज्जा ?, गोतमा !, अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा, से केणट्ठेणं ?, गोतमा ! से णं सन्नी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए वीरियलद्धीए विउव्विअलद्धीए पराणीयं आगतं सोच्चा णिसम्म पएसे निच्छुब्भइ, २ वेउव्वियसमुग्घाएणं समोभन्नइ, २ चाउरंगिणिं सेन्नं(णं) विउव्वइ, २ चाउरंगिणीए सेणाए पराणीएणं सद्धिं संगामं संगामेइ [भगवती०१।७।१९] इत्यादि ९,

समुद्घातो मारणान्तिकादिः १०, **कालसंयोगः** कालकृतावस्था ११, **आयातिः** गर्भान्निर्गमः १२, **मरणं** प्राणत्यागः १३, **दोण्हं छविपव्व** त्ति **द्वयानाम्** उभयेषां **छवि** त्ति मतुब्लोपाच्छविमन्ति त्वग्वन्ति **पव्व** त्ति पर्वाणि सन्धिबन्धनानि **छविपर्वाणि**, क्वचित् **छवियत्त** त्ति पाठः, तत्र छवियोगाच्छविः, स एव छविकः, स चासौ **अत्त** त्ति आत्मा च शरीरं **छविकात्मे**ति, **गर्भस्थाना**मिति सर्वत्र सम्बन्धनीयम् १४ । **दो सुक्के**त्यादि, द्वये **शुक्रं** रेतः **शोणित**म् आर्त्तवं ताभ्यां **सम्भवो** येषां ते तथा १५ । **कायट्ठिति** त्ति **काये** निकाये पृथिव्यादिसामान्यरूपेण **स्थितिः** कायस्थितिः

असङ्ख्योत्सर्प्पिण्यादिका, भवे भवरूपा वा स्थितिः **भवस्थिति**र्भवकाल इत्यर्थः १६। **दोण्हं** ति **द्वयाना**मुभयेषामित्यर्थः, **कायस्थितिः** सप्ताष्टभवग्रहणरूपा, पृथिव्यादीनामपि साऽस्ति, न चानेन तद्व्यवच्छेदः, अयोगव्यवच्छेदपरत्वात् सूत्राणामिति १७। **दोण्हे**त्यादि, देव-नारकाणां भवस्थितिरेव, देवादेः पुनर्देवादित्वेनाऽनुत्पत्तेरिति १८। **दुविहे** इत्यादि, **अद्धा** कालः, तत्प्रधान**मायुः** कर्मविशेषोऽद्धा**युः**, भवात्ययेऽपि कालान्तरानुगामीत्यर्थः, यथा मनुष्यायुः, कस्यापि भवात्यय एव नापगच्छत्यपि तु सप्ताष्टभवमात्रं कालमुत्कर्षतोऽनुवर्त्तत इति, तथा भवप्रधानमायु**र्भवायुः**, यद् भवात्यये अपगच्छत्येव न कालान्तरमनुयाति, यथा देवायुरिति, १९। **दोण्ह**मित्यादि सूत्रद्वयं भावितार्थमेव २१। **दुविहे कम्मे** त्ति, प्रदेशा एव पुद्गला एव यस्य वेद्यन्ते न यथाबद्धो रसस्तत् प्रदेशमात्रतया वेद्यं कर्म **प्रदेशकर्म**, यस्य त्वनुभावो यथाबद्धरसो वेद्यते तदनुभावतो वेद्यं कर्माऽ**नुभावकर्मे**ति २२। **दो** इत्यादि, यथाबद्धमायु**र्यथायुः पालयन्ति** अनुभवन्ति, नोपक्रम्यते तदिति,

देवा नेरइया वि य असंखवासाउया य तिरि-मणुया।
उत्तमपुरिसा य तहा चरमसरीरा य निरुवकमा॥ [श्रावकप्र० ७४]

इति वचने सत्यपि देव-नारकयोरेवेह भणनं द्विस्थानकानुरोधादिति २३।

दोण्हमित्यादि, **संवर्त्तन**मपवर्त्तनं संवर्तः, स एव **संवर्त्तकः**, उपक्रम इत्यर्थः, आयुषः संवर्त्तकः **आयुःसंवर्त्तक** इति २४।

[सू० ८०] जंबूदीवे दीवे मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा प[3]न्नत्ता बहुसमतुल्ला अविसेसमणाणत्ता अन्नमन्नं णातिवट्टंति आयाम-विक्खंभ-संठाण-परिणाहेणं, तंजहा-भरहे चेव एरवते चेव। एवमेतेणमभि-लावेणं हेमवते चेव हेरन्नवते चेव, हरिवासे चेव रम्मयवासे चेव ३।

[टी०] पर्यायाधिकारादेव नियतक्षेत्राश्रितत्वात् क्षेत्रव्यपदेश्यान् पुद्गलपर्याया-नभिधित्सुः **जंबूदीवे**त्यादिना क्षेत्रप्रकरणमाह, सुगमं चैतत्, नवरमिह जम्बूद्वीपप्रकरणं परिपूर्णचन्द्रमण्डलाकारं जम्बूद्वीपं तन्मध्ये मेरुम् उत्तरदक्षिणतः क्रमेण वर्षाणि च स्थापयित्वा, तद्यथा–

भरहं हेमवयं ति य हरिवासं ति य महाविदेहं ति ।
रम्मयमेरन्नवयं एरवयं चेव वासाइं ॥ [बृहत्क्षेत्र० २३] ति ।
तथा वर्षान्तरेषु वर्षधरपर्वतान् कल्पयित्वा, तद्यथा-
हिमवंत १ महाहिमवंत २ पव्वया निसढ ३ नीलवंता य ४ ।
रुप्पी ५ सिहरी ६ एए वासहरगिरी मुणेयव्वा ॥ [बृहत्क्षेत्र० २४] इति ।
सर्वमवबोद्धव्यमिति ।

मन्दरस्य मेरोः, उत्तरा च दक्षिणा च उत्तरदक्षिणे तयोरुत्तरदक्षिणयोरिति वाक्ये **उत्तरदक्षिणेने**ति स्याद्, एनप्रत्ययविधानादिति, **द्वे वर्षे** क्षेत्रे **प्रज्ञप्ते** जिनैः, **समतुल्य**शब्दः सदृशार्थः, अत्यन्तं समतुल्ये **बहुसमतुल्ये** प्रमाणतः, **अविशेषे** अविलक्षणे नग-नगर-नद्यादिकृतविशेषरहिते, **अनानात्वे** अवसर्प्पिण्यादिकृतायुरादिभावभेदवर्जिते, किमुक्तं भवतीत्याह– **अन्योन्यं** परस्परं **नातिवर्त्तेते**, इतरेतरं न लङ्घयत इत्यर्थः, कैरित्याह– **आयामेन** दैर्घ्येण **विष्कम्भेन** पृथुत्वेन **संस्थानेन** आरोपितज्याधनुराकारेण **परिणाहेन** परिधिनेति, इह च द्वन्द्वैकवद्भावः कार्य इति ।

तद्यथा– **भरहे चेवे**त्यादि, **उत्तरदाहिणेणं** ति एतस्य पाठस्य यथा-सङ्ख्यन्यायानाश्रयणाद् यथासत्तिन्यायाश्रयणाच्च जम्बूद्वीपस्य दक्षिणे भागे भरतमा हिमवतः, तस्यैवोत्तरे भागे ऐरवतं शिखरिणः परत इति, **एव**मिति भरतैरवतवत् **एतेनाभिलापेन** 'जंबुद्दीवे दीवे मंदरस्से'त्यादिना उच्चारणेनाऽपरं सूत्रद्वयं वाच्यम्, तयोश्चायं विशेषः– **हेमवए चेवे**त्यादि, तत्र हैमवतं दक्षिणतो हिमवन्महाहिमवतोर्मध्ये, हैरण्यवतमुत्तरतः रुक्मि-शिखरिणोरन्तः, हरिवर्षं दक्षिणतो महाहिमवन्निषधयोरन्तः, रम्यकवर्षं चोत्तरतो नील-रुक्मिणोरन्तरिति ।

[सू० ८१] जंबूदीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमपच्चत्थिमेणं दो खेत्ता पन्नत्ता बहुसमतुल्ला अविसेस जाव पुव्वविदेहे चेव अवरविदेहे चेव १।

[टी०] पुरत्थिमपच्चत्थिमेणं ति पुरस्तात् पूर्वस्यां दिशि पश्चात् पश्चिमायामित्यर्थः, यथाक्रमं पूर्वश्चासौ विदेहश्चेति **पूर्वविदेहः**, एव**मपरविदेह** इति, एतेषां चायामादि ग्रन्थान्तरादवसेयमिति ।

[सू० ८२] जंबुमंदरस्स पव्वतस्स उत्तरदाहिणेणं दो कुराओ पन्नत्ताओ बहुसमतुल्लाओ जाव देवकुरा चेव उत्तरकुरा चेव। तत्थ णं दो महतिमहालया महादुमा पन्नत्ता बहुसमतुल्ला अविसेसमणाणत्ता अन्नमन्नं णाइवट्टंति आयाम-विक्खंभुच्चत्तोव्वेध-संठाण-परिणाहेणं, तंजहा-कूडसामली चेव जंबू चेव सुदंसणा। तत्थ णं दो देवा महिड्ढिया जाव महासोक्खा पलिओवमट्ठितीया परिवसंति, तंजहा-गरुले चेव वेणुदेवे, अणाढिते चेव जंबूदीवाहिवती ३।

[टी०] जंबू इत्यादि, दक्षिणेन देवकुरवः उत्तरेण उत्तरकुरवः, तत्र आद्या विद्युत्प्रभ-सौमनसाभिधानवक्षस्कारपर्वताभ्यां गजदन्ताकाराभ्यामावृताः, इतरे तु गन्धमादन-माल्यवद्भ्यामावृताः, उभये चामी अर्द्धचन्द्राकाराः दक्षिणोत्तरतो विस्तृताः, तत्प्रमाणं चेदम्–

अट्ठ सया बायाला एक्कारस सहस दो कलाओ य।
विक्खंभो उ कुरूणं तेवन्न सहस्स जीवा सिं॥ [बृहत्क्षेत्र० २६३]

पूर्वापरायामाश्चैत इति। **महतिमहालय** त्ति महान्तौ गुरू **अती**ति अत्यन्तं **महसां** तेजसां महानां वा उत्सवाना**मालयौ** आश्रयौ महातिमहआलयौ महातिमहालयौ वा, समयभाषया वा महान्तावित्यर्थः, **महाद्रुमौ** प्रशस्ततया, **आयामो** दैर्घ्यम्, **विष्कम्भो** विस्तारः, **उच्चत्वम्** उच्छ्रयः, **उद्वेधो** भुवि प्रवेशः, **संस्थानम्** आकारः, **परिणाहः** परिधिरिति, तत्रानयोः प्रमाणम्–

रयणमया पुप्फफला विक्खंभो अट्ठ अट्ठ उच्चत्तं।
जोयणमद्धोवेहो खंधो दोजोयणुव्विद्धो॥
दो कोसे वित्थिन्नो विडिमा छज्जोयणाणि जंबूए।
चाउद्दिसिं पि साला पुव्विल्ले तत्थ सालम्मि॥
भवणं कोसपमाणं सयणिज्जं तत्थऽणाढियसुरस्स।
तिसु पासाया सालेसु तेसु सीहासणा रम्मा॥ [बृहत्क्षेत्र० २८६-२८७-२८८] इति।

शाल्मल्यामप्येवमेवेति, कूटाकारा शिखराकारा शाल्मली कूटशाल्मलीति संज्ञा, सुष्ठु दर्शनमस्या इति सुदर्शनेतीयमपि संज्ञेति, **तत्थ** त्ति तयोर्महाद्रुमयोः **महे**त्यादि महती ऋद्धिः आवास-परिवार-रत्नादिका ययोस्तौ महर्द्धिकौ, **यावद्ग्रहणात् महज्जुइया**

महाणुभागा महायसा महाबल महासोक्ख त्ति, तत्र **द्युतिः** शरीराभरणदीप्तिः, **अनुभागः** अचिन्त्या शक्तिर्वैक्रियकरणादिका, **यशः** ख्यातिः, **बलं** सामर्थ्यं शरीरस्य, **सौख्यम्** आनन्दात्मकम्, **महेसक्खा** इति क्वचित् पाठः, **महेशौ** महेश्वरावित्याख्या ययोस्तौ महेशाख्याविति, **पल्योपमं** यावत् **स्थितिः** आयुर्ययोस्तौ तथा । **गरुडः** सुपर्णकुमारजातीयः, **वेणुदेवो** नाम्ना, **अणाढिओ** त्ति नाम्ना ।

[सू० ८३] जंबूमंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासहरपव्वया पन्नत्ता बहुसमतुल्ला अविसेसमणाणत्ता अन्नमन्नं णातिवट्टंति आयाम-विक्खंभुच्चत्तोव्वेध-संठाण-परिणाहेणं, तंजहा-चुल्लहिमवंते चेव सिहरी चेव, एवं महाहिमवंते चेव रुप्पी चेव, एवं निसढे चेव णीलवंते चेव ३।

[टी०] जंबू इत्यादि, **वर्षं** क्षेत्रविशेषं **धारयतो** व्यवस्थापयत इति वर्षधरौ **चुल्लो** त्ति महदपेक्षया लघु**र्हिमवान्** चुल्लहिमवान् भरतानन्तरः, **शिखरी** पुनर्यत्परमैरवतम्, तौ च पूर्वापरतो लवणसमुद्रावबद्धावायामतश्च—

चउवीस सहस्साइं णव य सए जोयणाण बत्तीसे ।

चुल्लहिमवंतजीवा आयामेणं कलद्धं च ॥ [बृहत्क्षेत्र० ५२] २४९३२ $\frac{१}{३८}$, एवं शिखरिणोऽपि।

तथा भरतद्विगुणविस्तारौ योजनशतोच्छ्रायौ पञ्चविंशतियोजनान्यवगाढौ आयतचतुरस्रसंस्थानसंस्थितौ, परिणाहस्तु तयोः—

पणयालीस सहस्सा सयमेगं नव य बारस कलाओ ।

अद्धं कलाए हिमवंतपरिरओ सिहरिणो चेवं ॥ [ ] ति, ४५१०९ $\frac{१२}{१९}$ $\frac{१}{३८}$ ।

एवमिति यथा हिमवच्छिखरिणौ **जंबूदीवे**त्यादिनाऽभिलापेनोक्तौ एवं महाहिमवदादयोऽपीति, एतेषामायामादयो विशेषतः **क्षेत्रसमासाद्** अवसेयाः ।

[सू० ८४] जंबूमंदरस्स पव्वयस्स उत्तरदाहिणेणं हेमवतेरण्णवतेसु वासेसु दो वट्टवेयड्ढपव्वता पन्नत्ता बहुसमतुल्ला अविसेसमणाणत्ता जाव सद्दावती चेव वियडावती चेव १, तत्थ णं दो देवा महिड्ढिया जाव पलिओवमट्ठितीया परिवसंति, तंजहा-साती चेव पभासे चेव २।

जंबूमंदरस्स उत्तरदाहिणेणं हरिवरिस-रम्मतेसु वासेसु दो वट्टवेयड्ढपव्वया पन्नत्ता बहुसमतुल्ला अविसेसमणाणत्ता जाव गंधावती चेव मालवंतपरियाए चेव १, तत्थ णं दो देवा महिड्ढिया जाव पलिओवमट्ठितीया परिवसंति, तंजहा-अरुणे चेव पउमे चेव २।

[टी०] **जंबू** इत्यादि, **दो वट्टवेयड्ढपव्वय** त्ति **द्वौ वृत्तौ** पल्याकारत्वाद्, **वैताढ्यौ** नामतः, तौ च तौ पर्वतौ चेति विग्रहः, सर्वतः सहस्रपरिमाणौ रजतमयौ, तत्र हैमवते **शब्दापाती**, उत्तरतस्तु ऐरण्यवते **विकटापाती**ति, **तत्थ** त्ति तयोर्वृत्तवैताढ्ययोः क्रमेण स्वाति-प्रभासौ देवौ वसतः, तद्भवनभावादिति । एवं हरिवर्षे **गन्धापाती** रम्यकवर्षे **माल्यवत्पर्यायः**, देवौ च क्रमेणैवेति ॥

[सू० ८५] जंबूमंदरस्स पव्वयस्स दाहिणेणं देवकुराए कुराए पुव्वावरे पासे एत्थ णं आसक्खंधगसरिसा अद्धचंदसंठाणसंठिया दो वक्खारपव्वता पन्नत्ता बहुसम जाव सोमणसे चेव विज्जुप्पभे चेव १।

जंबूमंदरउत्तरेणं उत्तरकुराए कुराए पुव्वावरे पासे एत्थ णं आसक्खंधगसरिसा अद्धचंदसंठाणसंठिया दो वक्खारपव्वया पन्नत्ता बहु जाव गंधमादणे चेव मालवंते चेव १।

[टी०] **जंबू** इत्यादि, **पुव्वावरे पासे** त्ति, **पार्श्व**शब्दस्य प्रत्येकं सम्बन्धात् पूर्वपार्श्वेऽपरपार्श्वे च, किंभूते ? **एत्थ** त्ति प्रज्ञापकेनोपदर्श्यमाने क्रमेण **सौमनस-विद्युत्प्रभौ प्रज्ञप्तौ**, किम्भूतौ ? **अश्वस्कन्धसदृशा**वादौ निम्नौ पर्यवसान उन्नतौ, यतो निषधसमीपे चतुःशतोच्छ्रितौ मेरुसमीपे तु पञ्चशतोच्छ्रिताविति, आह च–

वासहरगिरी तेणं रुंदा पंचेव जोयणसयाइं ।
चत्तारि सउव्विद्धा ओगाढा जोयणाण सयं ॥
पंचसए उव्विद्धा ओगाढा पंच गाउयसयाइं ।
अंगुलअसंखभागो विच्छिन्ना मंदरंतेणं ॥ [बृहत्क्षेत्र० २६०-२६१]
वक्खारपव्वयाणं आयामो तीस जोयणसहस्सा ।
दोन्नि य सया णवहिया छच्च कलाओ चउण्हं पि ॥ [बृहत्क्षेत्र० २५९] त्ति ।

अवद्धचंद त्ति अपकृष्टमर्द्धं चन्द्रस्याऽ**पार्द्धचन्द्रस्तस्य** यत् **संस्थानम्** आकारो गजदन्ताकृतिरित्यर्थः, तेन संस्थिता**वपार्द्धचन्द्रसंस्थानसंस्थितौ, अर्द्धचन्द्रसंस्थान-संस्थिता**विति क्वचित् पाठः, तत्र **अर्द्ध**शब्देन विभागमात्रं विवक्ष्यते, न तु समप्र-विभागतेति, ताभ्यां चार्द्धचन्द्राकारा देवकुरवः कृताः, अत एव वक्षाराकारक्षेत्रकारिणौ पर्वतौ **वक्षारपर्वता**विति ।

जंबू इत्यादि तथैव, नवरम् अपरपार्श्वे **गन्धमादनः** पूर्वपार्श्वे **माल्यवा**निति।

[सू० ८६] जंबूमंदरस्स पव्वयस्स उत्तरदाहिणेणं दो दीहवेयड्ढपव्वया पन्नत्ता [तं] बहुसमतुल्ला जाव भारहए चेव दीहवेयड्ढे, एरावते चेव दीहवेयड्ढे। भारहए णं दीहवेयड्ढे दो गुहाओ पन्नत्ताओ बहुसमतुल्लाओ अविसेसमणाणत्ताओ अन्नमन्नं णातिवट्टंति आयाम-विक्खंभुच्चत्त-संठाण-परिणाहेणं, तंजहा-तिमिसगुहा चेव खंडगप्पवायगुहा चेव, तत्थ णं दो देवा महिड्ढिया जाव पलिओवमट्ठितीया परिवसंति, तंजहा-कयमालए चेव नट्टमालए चेव । एरावए णं दीहवेयड्ढे दो गुहाओ पन्नत्ताओ जाव कयमालए चेव नट्टमालए चेव ५।

[टी०] दो दीहवेयड्ढ त्ति, वृत्तवैताढ्यव्यवच्छेदार्थं दीर्घग्रहणम्, वैताढ्यौ विजयाढ्यौ वेति संस्कारः, तौ च भरतैरवतयोर्मध्यभागे पूर्वापरतो लवणोदधिं स्पृष्टवन्तौ पञ्चविंशतियोजनोच्छ्रितौ तत्पादावगाढौ पञ्चाशद् विस्तृतौ आयतसंस्थितौ सर्वराजतावुभयतो बहिः काञ्चनमण्डनाङ्कावि ति ।

भारहए णमित्यादि, वैताढ्येऽपरतस्**तमिश्रा गुहा** गिरिविस्तारायामा द्वादश-योजनविस्ताराऽष्टयोजनोच्छ्रया आयतचतुरस्रसंस्थाना विजयद्वारप्रमाणद्वारा वज्रकपाट-पिहिता बहुमध्ये द्वियोजनान्ताभ्यां त्रियोजनविस्ताराभ्यामुन्मग्नजला-निमग्नजला-भिधानाभ्यां नदीभ्यां युक्ता, तद्वत् पूर्वतः **खण्डप्रपाता गुहे**ति । **तत्थ णं** ति तयोः तमिस्रायां **कृतमालक** इतरस्यां **नृत्तमालक** इति । **एरावए**त्यादि तथैव ।

[सू० ८७] जंबूमंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंते वासहरपव्वए दो कूडा पन्नत्ता बहुसमतुल्ला जाव विक्खंभुच्चत्तसंठाणपरिणाहेणं, तंजहा-चुल्लहिमवंतकूडे चेव वेसमणकूडे चेव । जंबूमंदरदाहिणेणं महाहिमवंते

वासहरपव्वते दो कूडा पन्नत्ता बहुसम जाव महाहिमवंतकूडे चेव वेरुलियकूडे चेव । एवं निसढे वासहरपव्वते दो कूडा पन्नत्ता बहुसम जाव निसढकूडे चेव रुयगकूडे चेव ३।

जंबूमंदरउत्तरेणं नीलवंते वासहरपव्वते दो कूडा पन्नत्ता बहुसम जाव तंजहा-नीलवंतकूडे चेव उवदंसणकूडे चेव । एवं रुप्पिम्मि वासहरपव्वते दो कूडा पन्नत्ता बहुसम जाव तंजहा-रुप्पिकूडे चेव मणिकंचणकूडे चेव। एवं सिहरिम्मि वासहरपव्वते दो कूडा पन्नत्ता बहुसम जाव तंजहा-सिहरिकूडे चेव तिगिंच्छिकूडे चेव ३।

[टी०] **जंबू** इत्यादि, हिमवद्वर्षधरपर्वते ह्येकादश कूटानि सिद्धायतन १-क्षुल्लहिमवत् २-भरत ३-इला ४-गङ्गा ५-श्री ६-रोहितांशा ७-सिन्धु ८-सुरा ९-हैमवत १०-वैश्रवण ११ कूटाभिधानानि भवन्ति, पूर्वदिशि सिद्धायतनकूटं ततः क्रमेणापरतोऽन्यानि सर्वरत्नमयानि स्वनामदेवतास्थानानि पञ्चयोजनशतोच्छ्रयाणि तावदेव मूले विस्तृतानि उपरि तदर्द्धविस्तृतानि, आद्ये सिद्धायतनं पञ्चाशद्योजनायामं तदर्द्धविष्कम्भं षट्त्रिंशदुच्चम् अष्टयोजनायामैश्चतुर्योजनविष्कम्भप्रवेशैस्त्रिभिर्द्वारैरुपेतं जिनप्रतिमाष्टोत्तर-शतसमन्वितम्, शेषेषु प्रासादाः सार्द्धद्विषष्टियोजनोच्चास्तदर्द्धविस्तृतास्तन्निवासिदेवता-सिंहासनवन्त इति। इह तु प्रकृतनगनायकनिवासभूतत्वाद्देवनिवासभूतानामेषां मध्ये आद्यत्वाच्च हिमवत्कूटं गृहीतं सर्वान्तिमत्वाच्च वैश्रमणकूटं द्विस्थानकानुरोधेनेति, आह च–

कत्थइ देसग्गहणं कत्थइ घेप्पंति निरवसेसाइं ।
उक्कम-कमजुत्ताइं कारणवसओ निउत्ताइं ॥ [विशेषाव० ३८८] ति ।

कूटसङ्ग्रहश्चायम्–

वेयड्ढ ९ मालवंते ९ विज्जुप्पह ९ निसह ९ नीलवंते य ९ ।
णव णव कूडा भणिया एक्कारस सिहरि ११ हिमवंते ११ ॥
रुप्पि ८ महाहिमवंते ८ सोमणसे ७ गंधमायणनगे य ७ ।
अट्ठऽट्ठ सत्त सत्त य वक्खारगिरीसु चत्तारि ॥ [बृहत्क्षेत्र० १३२-१३३] त्ति ।

जंबू इत्यादि, महाहिमवति ह्यष्टौ कूटानि, सिद्ध १-महाहिमवत् २-हैमवत ३-रोहिता ४-ह्री ५-हरिकान्ता ६-हरि ७-वैडूर्य ८ कूटाभिधानानि, द्वयग्रहणे च कारणमुक्तमिति। **एव**मित्यादि, **एवं**करणात् **जंबू** इत्यादिरभिलापो दृश्यः, निषधवर्षधरपर्वते हि सिद्ध १-निषध २-हरिवर्ष ३-प्राग्विदेह ४-हरि ५-धृति ६-शीतोदा ७-अपरविदेह ८-रुचकाख्यानि ९ स्वनामदेवतानि नव कूटानि, इहापि द्वितीयान्त्ययोर्ग्रहणं प्राग्वद् व्याख्येयमिति ।

नीलवर्षधरपर्वते हि सिद्ध १-नील २-पूर्वविदेह ३-शीता ४-कीर्त्ति ५-नारीकान्ता ६-ऽपरविदेह ७-रम्यक ८-उपदर्शना ९ ख्यानि नव कूटानि, इहापि द्वितीयान्त्यग्रहणं प्राग्वदिति । **एव**मित्यादि, रुक्मिवर्षधरे हि सिद्ध १-रुक्मि २-रम्यक ३-नरकान्ता ४-बुद्धि ५-रूप्यकूला ६-हैरण्यवत ७-मणिकाञ्चनकूटा ८ ख्यानि अष्ट कूटानि, द्वयाभिधानं च प्राग्वदिति । **एव**मित्यादि शिखरिणि हि वर्षधरे सिद्ध १-शिखरि २-हैरण्यवत ३-सुरादेवी ४-रक्ता ५-लक्ष्मी ६-सुवर्णकूला ७-रक्तोदा ८-गन्धापाति ९-ऐरावत १०-तिगिंच्छकूटा ११ ख्यानि एकादश कूटानि, इहापि द्वयोर्ग्रहणं तथैवेति।

[सू० ८८] जंबूमंदरउत्तरदाहिणेणं चुल्लहिमवंत-सिहरीसु वासहरपव्वतेसु दो महद्दहा पन्नत्ता बहुसमतुल्ला अविसेसमणाणत्ता अण्णमण्णं णातिवट्टंति, आयाम-विक्खंभ-उव्वेह-संठाण-परिणाहेणं, तंजहा-पउमद्दहे चेव पुंडरीयद्दहे चेव, तत्थ णं दो देवयाओ महिड्ढियाओ जाव पलिओवमट्ठितीयाओ परिवसंति, तंजहा-सिरी चेव लच्छी चेव । एवं महाहिमवंत-रुप्पीसु वासहरपव्वएसु दो महद्दहा पन्नत्ता बहुसम [जाव तंजहा-]महापउमद्दहे चेव महापुंडरीयद्दहे चेव, देवताओ हिरि च्चेव बुद्धि च्चेव । एवं निसढ-नीलवंतेसु तिगिंच्छिद्दहे चेव केसरिद्दहे चेव, देवताओ धिती चेव कित्ती चेव १२।

[टी०] जंबू इत्यादि, इह च हिमवदादिषु षट्सु वर्षधरेषु क्रमेणैते पद्मादयः षडेव ह्रदाः, तद्यथा–

पउमे य १ महापउमे २ तिगिंछी ३ केसरी ४ दहे चेव ।
हरए महपुंडरीए ५ पुंडरीए चेव य ६ दहाओ ॥ [बृहत्क्षेत्र० १६८]

हिमवत उपरि बहुमध्यभागे पद्महृद एवं शिखरिणः पौण्डरीकः, तौ च पूर्वापरायतौ सहस्रं पञ्चशतविस्तृतौ चतुष्कोणौ दशयोजनावगाढौ रजतकूलौ वज्रमयपाषाणौ तपनीयतलौ सुवर्णमध्यरजतमणिवालुकौ चतुर्दशमणिसोपानौ शुभावतारौ तोरण-ध्वज-च्छत्रादिविभूषितौ नीलोत्पल-पुण्डरीकादिचितौ विचित्रशकुनि-मत्स्यविचरितौ षट्पदपटलोपभोग्याविति । **तत्थ णं** ति तयोः महाहृदयोर्द्वे **देवते परिवसतः**, पद्महृदे श्रीः, पौण्डरीके च लक्ष्मीः, ते च भवनपतिनिकायाभ्यन्तरभूते, पल्योपमस्थितिकत्वाद्, व्यन्तरदेवीनां हि पल्योपमार्द्धमेवायुरुत्कर्षतो भवति, भवनपतिदेवीनां तूत्कर्षतो-ऽर्द्धपञ्चमपल्योपमान्यायुर्भवतीति, शेषं ह्रदायामादि सर्व्वं वृत्तितो ज्ञेयम्।

[सू० ८९] जंबूमंदरदाहिणेणं महाहिमवंताओ वासहरपव्वयाओ महापउमद्दहाओ दहाओ दो महाणदीओ पवहंति, तंजहा-रोहिय च्चेव हरिकंत च्चेव । एवं निसढाओ वासहरपव्वताओ तिगिंच्छिद्दहाओ दहाओ दो महाणईओ पवहंति, तंजहा-हरि च्चेव सीतोत च्चेव २।

जंबूमंदरउत्तरेणं नीलवंताओ वासधरपव्वताओ केसरिद्दहाओ दहाओ दो महानईओ पवहंति, तंजहा-सीता चेव नारिकंता चेव । एवं रुप्पीओ वासहरपव्वताओ महापुंडरीयद्दहाओ दहाओ दो महानईओ पवहंति, तंजहा-णरकंता चेव रुप्पकूला चेव २।

[टी०] जंबू इत्यादि, तत्र रोहिन्नदी महापद्महृदाद्दक्षिणतोरणेन निर्गत्य षोडश पञ्चोत्तराणि योजनशतानि सातिरेकाणि दक्षिणतो गिरिणा गत्वा हाराकारधारिणा सातिरेकयोजनद्विशतिकेन प्रपातेन मकरमुखप्रणालेन महाहिमवतो रोहिदभिधानकुण्डे निपतति, मकरमुखजिह्वा योजनमायामेन अर्द्धत्रयोदशयोजनानि विष्कम्भेण क्रोशं बाहल्येन, रोहित्प्रपातकुण्डाच्च दक्षिणतोरणेन निर्गत्य हैमवतवर्षमध्यभागवर्त्तिनं शब्दापातिवृत्तवैताढ्यमर्द्धयोजनेनाऽप्राप्याष्टाविंशत्या नदीसहस्रैः संयुज्याधो जगतीं विदार्य पूर्वतो लवणसमुद्रमतिगच्छतीति, रोहिन्नदी हि प्रवाहेऽर्द्धत्रयोदशयोजनविष्कम्भा क्रोशोद्वेधा ततः क्रमेण वर्द्धमाना मुखे पञ्चविंशत्यधिकयोजनशतविष्कम्भा सार्द्धद्वियोजनोद्वेधा, उभयतो वेदिकाभ्यां वनखण्डाभ्यां च युक्ता, एवं सर्वा महानद्यः पर्वताः कूटानि च

वेदिकादियुक्तानीति, हरिकान्ता तु महापद्महृदादेवोत्तरतोरणेन निर्गत्य पञ्चोत्तराणि षोडश शतानि सातिरेकाणि उत्तराभिमुखी पर्वतेन गत्वा सातिरेकयोजनशतद्वयप्रमाणेन प्रपातेन हरिकान्ताकुण्डे तथैव पतति, मकरमुखजिह्विकाप्रमाणं पूर्वोक्तद्विगुणम्, ततः प्रपातकुण्डादुत्तरतोरणेन निर्गत्य हरिवर्षमध्यभागवर्त्तिनं गन्धापातिवृत्तवैताढ्यं योजनेनाऽसम्प्राप्ता पश्चिमाभिमुखीभूय षट्पञ्चाशता सरित्सहस्रैः समग्रा समुद्रमतिगच्छति, इयं च हरिकान्ता प्रमाणतो रोहिन्नदीतो द्विगुणेति ।

एवमित्यादि, **एव**मिति 'जंबूदीवे' इत्याद्यभिलापसूचनार्थः । हरिन्महानदी तिगिंच्छिह्रदस्य दक्षिणतोरणेन निर्गत्य सप्त योजनसहस्राणि चत्वारि चैकविंशत्यधिकानि योजनशतानि सातिरेकाणि दक्षिणाभिमुखी पर्व्वतेन गत्वा सातिरेकचतुर्योजनशतिकेन प्रपातेन हरित्कुण्डे निपत्य पूर्वसमुद्रे प्रपतति, शेषं हरिकान्तासमानमिति । शीतोदा महानदी तिगिंच्छिह्रदस्योत्तरतोरणेन निर्गत्य तावन्त्येव योजनसहस्राणि गिरिणा उत्तराभिमुखी गत्वा सातिरेकचतुर्योजनशतिकेन प्रपातेन शीतोदाकुण्डे निपततीति, जिह्विका मकरमुखस्य चत्वारि योजनानि आयामेन पञ्चाशद्विष्कम्भेण योजनं बाहल्येन, कुण्डादुत्तरतोरणेन निर्गत्य देवकुरून् विभजन्ती चित्र-विचित्रकूटौ पर्वतौ निषधह्रदादींश्च पञ्च ह्रदान् द्विधा कुर्वती चतुरशीत्या नदीसहस्रैरापूर्यमाणा भद्रशालवनमध्येन मेरुं योजनद्वयेनाप्राप्ता प्रत्यङ्मुखी आवर्त्तमाना अधो विद्युत्प्रभं वक्षारपर्वतं दारयित्वा मेरोरपरतोऽपरविदेहमध्यभागेन एकैकस्माद् विजयादष्टाविंशत्या अष्टाविंशत्या नदीसहस्रैरापूर्यमाणा अधो जयन्तद्वारस्य अपरसमुद्रं प्रविशतीति, शीतोदा हि प्रवहे पञ्चाशद्योजनविष्कम्भा योजनोद्वेधा [ततो मात्रया परिवर्द्धमाना मुखे पञ्चयोजनशतविष्कम्भा दशयोजनोद्वेधेति ।]

जंबू इत्यादि, शीता महानदी केसरिह्रदस्य दक्षिणतोरणेन विनिर्गत्य कुण्डे पतित्वा मेरोः पूर्वतः पूर्वविदेहमध्येन विजयद्वारस्याधः पूर्वसमुद्रं शीतोदासमानशेषवक्तव्या प्रविशतीति। नारिकान्ता तु उत्तरतोरणेन निर्गत्य कुण्डे पतित्वा हरिन्महानदीसमानवक्तव्या रम्यकवर्षमध्येनापरसमुद्रं प्रविशतीति ।

एवमित्यादि, नरकान्ता महापुण्डरीकह्रदाद्दक्षिणतोरणेन निर्गत्य रम्यकवर्षं विभजन्ती हरिकान्तातुल्यवक्तव्या पूर्वसमुद्रमधिगता । रूप्यकूला तु तस्यैवोत्तरतोरणेन विनिर्गत्य

ऐरण्यवद्वर्षं विभजन्ती रोहिन्नदीतुल्यवक्तव्या अवरसमुद्रं गच्छतीति ।

[सू० ९०] जंबूमंदरदाहिणेणं भरहे वासे दो पवायद्दहा पन्नत्ता बहुसम [जाव] तंजहा-गंगप्पवायद्दहे चेव सिंधुप्पवायद्दहे चेव । एवं हेमवए वासे दो पवायद्दहा पन्नत्ता बहु[सम जाव] तंजहा-रोहियप्पवातद्दहे चेव रोहियंसप्पवातद्दहे चेव २।

जंबूमंदरदाहिणेणं हरिवासे वासे दो पवायद्दहा पन्नत्ता बहुसम [जाव] तंजहा-हरिपवातद्दहे चेव हरिकंतपवातद्दहे चेव १।

जंबूमंदरउत्तरदाहिणेणं महाविदेहे वासे दो पवायद्दहा पन्नत्ता बहुसम जाव सीतप्पवातद्दहे चेव सीतोदप्पवायद्दहे चेव १।

जंबूमंदरउत्तरेणं रम्मए वासे दो पवायद्दहा पन्नत्ता बहु[सम जाव] नरकंतप्पवायद्दहे चेव णारीकंतप्पवायद्दहे चेव । एवं हेरन्नवते वासे दो पवायद्दहा पन्नत्ता बहु[सम जाव] सुवन्नकूलप्पवायद्दहे चेव रुप्पकूलप्पवायद्दहे चेव २।

जंबूमंदरउत्तरेणं एरवए वासे दो पवायद्दहा पन्नत्ता बहु[सम] जाव रत्तप्पवायद्दहे चेव रत्तावइप्पवातद्दहे चेव १।

[टी०] **जंबू** इत्यादि, **पवायदह** त्ति प्रपतनं प्रपातस्तदुपलक्षितौ ह्रदौ प्रपातह्रदौ, इह यत्र हिमवदादेर्नगात् गङ्गादिका महानदी प्रणालेनाधो निपतति स **प्रपातह्रदः** प्रपातकुण्डमित्यर्थः, **गंगापवायदहे चेव** त्ति हिमवद्वर्षधरपर्वतोपरिवर्त्तिपद्मह्रदस्य पूर्वतोरणेन निर्गत्य पूर्वाभिमुखी पञ्च योजनशतानि गत्वा गङ्गावर्त्तनकूटे आवृत्ता सती पञ्च त्रयोविंशत्यधिकानि योजनशतानि साधिकानि दक्षिणाभिमुखी पर्वतेन गत्वा गङ्गामहानदी अर्द्धयोजनायामया सक्रोशषड्योजनविष्कम्भयाऽर्धक्रोशबाहल्यया जिह्विकया युक्तेन विवृतमहामकरमुखप्रणालेन सातिरेकयोजनशतिकेन च मुक्तावलीकल्पेन प्रपातेन यत्र प्रपतति यश्च षष्टियोजनायामविष्कम्भः किञ्चिन्न्यूननवत्युत्तरशतपरिक्षेपो दशयोजनोद्वेधो नानामणिनिबद्धः यस्य च पूर्वापरदक्षिणासु त्रयस्त्रिसोपानप्रतिरूपकाः सविचित्रतोरणाः मध्यभागे च गङ्गादेवीद्वीपोऽष्टयोजनायामविष्कम्भः सातिरेकपञ्चविंशतिपरिक्षेपः जलान्ताद्

द्विक्रोशोच्छ्रितो वज्रमयो गङ्गादेवीभवनेन क्रोशायामेन तदर्द्धविष्कम्भेन किञ्चिदून-क्रोशोच्चेनाऽनेकस्तम्भशतसन्निविष्टेनाऽलङ्कृतोपरितनभागः, यतश्च दक्षिणतोरणेन विनिर्गत्य प्रवहे सक्रोशषड्योजनविष्कम्भाऽर्द्धक्रोशोद्वेधा गङ्गा उत्तरभरतार्द्धं विभजन्ती सप्तभिः नदीसहस्रैरापूर्यमाणा अधः पूर्वतः खण्डप्रपातगुहाया वैताढ्यपर्वतं विदार्य दक्षिणार्द्धभरतं विभजन्ती तन्मध्यभागेन गत्वा पूर्वाभिमुखी आवृत्ता सती चतुर्दशभिर्नदीसहस्रैः समग्रा मुखे सार्द्धद्विषष्टियोजनविष्कम्भा सक्रोशयोजनोद्वेधा जगतीं विदार्य पूर्वलवणसमुद्रं प्रविशति स **गङ्गाप्रपातह्रदः**, एतदनुसारेण सिन्धुप्रपातह्रदोऽपि व्याख्यातव्यः, अत एव एतौ बहुसमादिविशेषणावायाम-विष्कम्भो-द्वेध-परिणाहैर्भावनीयाविति, सर्व एव प्रपातह्रदा दशयोजनोद्वेधा वक्तव्या इति । यच्चेह वर्षधरनद्यधिकारे गङ्गा-सिन्धु-रोहितांशानां तथा सुवर्णकूला-रक्ता-रक्तवतीनां नाभिधानं तद् द्विस्थानकानुरोधात्, तासां हि एकैकस्मात् पर्वतात् त्रयं त्रयं प्रवहतीति द्विस्थानके नावतार इति। **एव**मित्यादि, **एव**मिति प्राग्वत् **रोहियप्पवायद्दहे चेव** त्ति रोहिद् उक्तस्वरूपा यत्र पतति यश्च सविंशतिकं योजनशतमायाम-विष्कम्भाभ्यां किञ्चिन्न्यूनाशीत्यधिकानि त्रीणि शतानि परिक्षेपेण यस्य च मध्यभागे रोहिद्द्वीपः षोडशयोजनायाम-विष्कम्भः सातिरेकपञ्चाशद्-योजनपरिक्षेपः जलान्ताद् द्विक्रोशोच्छ्रितो यश्च रोहिद्देवताभवनेन गङ्गादेवताभवनसमानेन विभूषितोपरितनभागः स **रोहितप्रपातह्रद** इति । **रोहियंसप्पवायद्दहे चेव** त्ति हिमवद्वर्षधरपर्वतोपरिवर्त्तिपद्महृदोत्तरतोरणेन निर्गत्य रोहितांशा महानदी द्वे षट्सप्तत्युत्तरे योजनशते सातिरेके उत्तराभिमुखीं पर्वतेन गत्वा योजनायामया अर्द्धत्रयोदश-योजनविष्कम्भया क्रोशबाहल्यया जिह्विकया विवृतमकरमुखप्रणालेन हाराकारेण च सातिरेकयोजनशतिकेन प्रपातेन यत्र प्रपतति यश्च रोहित्प्रपातकुण्डसमानमानः यस्य च मध्ये रोहितांशाद्वीपो रोहिद्द्वीपसमानमानः रोहितांशाभवनेन प्रागुक्तमानेनाऽलङ्कृतः, यतश्च रोहितांशा नदी रोहिन्नदीसमानमाना उत्तरतोरणेन निर्गत्य पश्चिमसमुद्रं प्रविशति स **रोहितांशाप्रपातह्रद** इति ।

जंबू इत्यादि, **हरिप्पवायद्दहे** इत्यादि सर्वं वृत्तितो ज्ञेयं।

[सू० ९१] जंबूमंदरदाहिणेणं भरहे वासे दो महानईओ पन्नत्ताओ बहु[सम]

जाव गंगा चेव सिंधू चेव । एवं जधा पवातद्दहा एवं णदीओ भाणियव्वाओ, जाव एरवए वासे दो महानईओ पन्नत्ताओ बहुसमतुल्लाओ जाव रत्त च्चेव रत्तवती चेव २।

[टी०] **जह** त्ति यथा पूर्वं वर्षे वर्षे द्वौ द्वौ प्रपातह्रदावुक्तौ एवं नद्यो वाच्याः, ताश्चैवम्–

गंगा सिंधू १ तह रोहियंस रोहीणई य २ हरिकंता ।
हरिसलिला ३ सीयोया सत्तेया होंति दाहिणओ ॥
सीया य ४ नारिकंता नरकंता चेव ५ रूप्पकूला य ।
सलिला सुवण्णकूला ६ रत्तवती रत्त ७ उत्तरओ ॥ [बृहत्क्षेत्र० १७१-१७२] इति ।

[सू० ९२] जंबूदीवे दीवे भरहेरवतेसु वासेसु तीताए उस्सप्पिणीए सुसमदूसमाए समाए दो सागरोवमकोडाकोडीओ काले होत्था १, एवमिमीसे ओसप्पिणीए जाव पन्नत्ते २, एवं आगमेसाए उस्सप्पिणीए जाव भविस्सति ३।

जंबूदीवे दीवे भरहेरवतेसु वासेसु तीताए उस्सप्पिणीए सुसमाए समाए मणुया दो गाउयाइं उड्ढंउच्चत्तेणं होत्था, दोन्नि य पलिओवमाइं परमाउं पालयित्था ४, एवमिमीसे ओसप्पिणीए जाव पालयित्था ५, एवमागमेसाते उस्सप्पिणीए जाव पालयिस्संति ६।

[टी०] अथ जम्बूद्वीपाधिकारात् क्षेत्रधर्मव्यपदेश्यपुद्गलधर्माधिकाराच्च जम्बूद्वीप-सम्बन्धिभरतादिसत्ककाललक्षणपर्यायधर्माननेकधाऽष्टादशसूत्र्याऽऽह, सुगमानि चैतानि, नवरं **तीताए** त्ति अतीता या **उत्सर्प्पिणी** प्राग्वत्, तस्यां तस्या वा **सुषमदुःषमायाः** बहुसुखायाः **समायाः** कालविशेषस्य चतुर्थारकलक्षणस्य **कालो** त्ति स्थितिः प्रमाणं वा **होत्थ** त्ति बभूवेति । **एव**मिति जंबूदीवे दीवे इत्यादि उच्चारणीयम्, नवरम् **इमीसे** त्ति अस्यां प्रत्यक्षायाम्, वर्त्तमानायामित्यर्थः, **अवसर्प्पिण्याम्** उक्तार्थायाम्, **जाव** त्ति सुसमदुसमाए समाए, तृतीयारक इत्यर्थः, **दो सागरोवमकोडाकोडीओ काले पण्णत्ते** प्रज्ञप्त इति पूर्वसूत्राद्विशेषः, पूर्वसूत्रे हि **होत्थ** त्ति भणितमिति २। **एव**मित्यादि, **आगमिस्साए** त्ति आगमिष्यन्त्यामुत्सर्पिण्यामिति **भविष्यती**ति पूर्वसूत्राद्विशेषः ३।

जबूं इत्यादि **सुषमायां** पञ्चमारके **होत्थ** त्ति बभूवुः । **पालयित्थ** त्ति पालितवन्तः पूर्वसूत्राद्विशेषः पालयिष्यन्तीत्यपि।

[सू० ९३] जंबूदीवे दीवे भरहेरवएसु वासेसु एगसमये एगजुगे दो अरहंतवंसा उप्पज्जिंसु वा उप्पज्जंति वा उप्पज्जिस्संति वा ७, एवं चक्कवट्टिवंसा ८, दसारवंसा ९।

जंबू[दीवे दीवे] भरहेरवतेसु [वासेसु] एगसमए दो अरहंता उप्पज्जिंसु वा उप्पज्जंति वा उप्पज्जिस्संति वा १०, एवं चक्कवट्टि ११, एवं बलदेवा १२, एवं वासुदेवा जाव उप्पज्जिस्संति वा १३।

[टी०] जंबू इत्यादि, **एगजुगे** त्ति पञ्चाब्दिकः कालविशेषो युगम्, तत्रैकस्मिन्, तस्याप्ये**कस्मिन् समये, एगसमए एगजुगे** इत्येवं पाठेऽपि व्याख्योक्तक्रमेणैव, इत्थमेवार्थसम्बन्धाद्, अन्यथा वा भावनीयेति । **द्वावर्हतां वंशौ** प्रवाहावेको भरतप्रभवोऽन्य ऐरवतप्रभव इति ७। **दसार** त्ति दसाराः, समयभाषया वासुदेवाः९ ।

[सू० ९४] जंबूदीवे दीवे दोसु कुरासु मणुया सता सुसमसुसममुत्तमं इड्ढिं पत्ता पच्चणुभवमाणा विहरंति, तंजहा-देवकुराए चेव उत्तरकुराए चेव १४। जंबूदीवे दीवे दोसु वासेसु मणुया सता सुसममुत्तमं इड्ढिं पत्ता पच्चणुभवमाणा विहरंति, तंजहा-हरिवासे चेव रम्मगवासे चेव १५। जंबूदीवे दीवे दोसु वासेसु मणुया सता सुसमदूसममुत्तमं इड्ढिं पत्ता पच्चणुभवमाणा विहरंति, तंजहा-हेमवते चेव हेरन्नवते चेव १६। जंबूदीवे दीवे दोसु खेत्तेसु मणुया सता दूसमसुसममुत्तमं इड्ढिं पत्ता पच्चणुभवमाणा विहरंति, तंजहा-पुव्वविदेहे चेव अवरविदेहे चेव १७। जंबूदीवे दीवे दोसु वासेसु मणुया छव्विहं पि कालं पच्चणुभवमाणा विहरंति, तंजहा-भरहे चेव एरवते चेव १८।

[टी०] जंबू इत्यादि, सदा सर्वदा **सुसमसुसमं** ति प्रथमारकानुभागः सुषमसुषमा तस्याः सम्बन्धिनी या सा सुषमसुषमैव, ताम् **उत्तमर्द्धिं** प्रधानविभूतिम् उच्चैस्त्वा-ऽऽयुः-कल्पवृक्षदत्तभोगोपभोगादिकां **प्राप्ताः** सन्तस्तामेव **प्रत्यनुभवन्तो** वेदयन्तः, न सत्तामात्रेणेत्यर्थः, अथवा **सुषमसुषमां** कालविशेषं **प्राप्ताः** अधिगता **उत्तमामृद्धिं**

प्रत्यनुभवन्तो विहरन्ति आसत इति, अभिधीयते च-

दोसु वि कुरासु मणुया तिपल्लपरमाउणो तिकोसुच्चा ।
पिट्ठिकरंडसयाइं दो छप्पन्नाइं मणुयाणं ॥
सुसमसुसमाणुभावं अणुभवमाणाणऽवच्चगोवणया ।
अउणापन्नदिणाइं अट्ठमभत्तस्स आहारो ॥ [बृहत्क्षेत्र० ३०१-३०२] इति ।

देवकुरवो दक्षिणाः **उत्तरकुरव** उत्तरास्तेष्विति १४ । **जंबू** इत्यादि, **सुसमं** ति सुषमा द्वितीयारकानुभागः, शेषं तथैव, पठ्यते च-

हरिवासरम्मएसु आउपमाणं सरीरउस्सेहो ।
पलिओवमाणि दोन्नि उ दोन्नि य कोसा समा भणिया ॥
छट्ठस्स य आहारो चउसट्ठिदिणाणुपालणा तेसिं ।
पिट्ठिकरंडाण सयं अट्ठावीसं मुणेयव्वं ॥ [बृहत्क्षेत्र० २५५-२५६] ति १५।

जंबू इत्यादि, **सुसमदूसमं** ति सुषमदुःषमा तृतीयारकानुभागः तस्या या सा सुषमदुःषमा ऋद्धिः, शेषं तथैव, उच्यते च–

गाउयमुच्चा पलिओवमाउणो वज्जरिसहसंघयणा ।
हेमवएरन्नवए अहमिंदणरा मिहुणवासी ॥
चउसट्ठी पिट्ठिकरंडयाण मणुयाण तेसिमाहारो ।
भत्तस्स चउत्थस्स उ उणसीतिदिणाणुपालणय ॥ [बृहत्क्षेत्र० २५३-२५४] त्ति १६।

जंबू इत्यादि, **दूसमसुसमं** ति दुःषमसुषमा चतुर्थारकप्रतिभागः, तत्सम्बन्धिनी ऋद्धिर्दुःषमसुषमैव, शेषं तथैव, अधीयते च–

मणुयाण पुव्वकोडी आउं पंचूसिया धणुसयाइं ।
दुसमसुसमाणुभावं अणुहोंति णरा नियकालं ॥ [ ] ति १७।

जंबूदीवे इत्यादि, **छव्विहं पि** त्ति सुषमसुषमादिकं उत्सर्प्पिण्यवसर्पिणीरूपमिति १८।

[सू० ९५] जंबूदीवे दीवे दो चंदा पभासिंसु वा पभासंति वा पभासिस्संति वा १, दो सूरिया तवइंसु वा तवंति वा तवइस्संति वा २ । दो कत्तियाओ, दो रोहिणीओ, दो मगसिरा, दो अद्दाओ, एवं भाणियव्वं,

कत्तिय, रोहिणि, मिगसिर, अद्दा य, पुणव्वसू य, पूसो य ६।
तत्तो वि अस्सलेसा, महा य, दो फग्गुणीओ य ९-१० ॥१॥
हत्थो, चित्ता, साती य, विसाहा, तह य होति अणुराहा १५।
जेट्ठा, मूलो, पुव्वा य आसाढा, उत्तरा चेव १९ ॥२॥
अभिई, सवण, धणिट्ठा, सयभिसया, दो य होंति भद्दवया २४-२५।
रेवति, अस्सिणी, भरणी, २८ नेतव्वा आणुपुव्वीए ॥३॥
एवं गाहाणुसारेणं णेयव्वं जाव दो भरणीओ ।

दो अग्गी १, दो पयावती २, दो सोमा ३, दो रुद्दा ४, दो अदिती ५, दो बहस्सती ६, दो सप्पी ७, दो पीती ८, दो भगा ९, दो अज्जमा १०, दो सविता ११, दो तट्ठा १२, दो वाऊ १३, दो इंदग्गी १४, दो मित्ता १५, दो इंदा १६, दो निरीती १७, दो आऊ १८, दो विस्सा १९, दो बम्हा २०, दो विण्हू २१, दो वसू २२, दो वरुणा २३, दो अया २४, दो विविद्धी २५, दो पुस्सा २६, दो अस्सा २७, दो यमा २८।

दो इंगालगा १, दो वियालगा २, दो लोहितक्खा ३, दो सणिंचरा ४, दो आहुणिया ५, दो पाहुणिया ६, दो कणा ७, दो कणगा ८, दो कणकणगा ९, दो कणगवितागणगा १०, दो कणगसंतागणगा ११, दो सोमा १२, दो सहिया १३, दो आसासणा १४, दो कज्जोवगा १५, दो कब्बडगा १६, दो अयकरगा १७, दो दुंदुभगा १८, दो संखा १९, दो संखवन्ना २०, दो संखवन्नाभा २१, दो कंसा २२, दो कंसवन्ना २३, दो कंसवन्नाभा २४, दो रुप्पी २५, दो रुप्पाभासा २६, दो णीला २७, दो णीलोभासा २८, दो भासा २९, दो भासरासी ३०, दो तिला ३१, दो तिलपुप्फवण्णा ३२, दो दगा ३३, दो दगपंचवन्ना ३४, दो काका ३५, दो काकंधा ३६, दो इंदग्गी ३७, दो धूमकेऊ ३८, दो हरी ३९, दो पिंगला ४०, दो बुधा ४१, दो सुक्का ४२, दो बहस्सती ४३, दो राहू ४४, दो अगत्थी ४५, दो माणवगा ४६, दो कासा ४७, दो फासा ४८, दो धुरा ४९, दो पमुहा

५०, दो वियडा ५१, दो विसंधी ५२, दो नियल्ला ५३, दो पइल्ला ५४, दो जडियाइल्ला ५५, दो अरुणा ५६, दो अग्गिल्ला ५७, दो काला ५८, दो महाकालगा ५९, दो सोत्थिया ६०, दो सोवत्थिया ६१, दो वद्धमाणगा ६२, दो पलंबा ६३, दो निच्चालोगा ६४, दो णिच्चुज्जोता ६५, दो सयंपभा ६६, दो ओभासा ६७, दो सेयंकरा ६८, दो खेमंकरा ६९, दो आभंकरा ७०, दो पभंकरा ७१, दो अपराजिता ७२, दो अरया ७३, दो असोगा ७४, दो विगतसोगा ७५, दो विमला ७६, दो वितत्ता ७७, दो वितत्था ७८, दो विसाला ७९, दो साला ८०, दो सुव्वता ८१, दो अणियट्टी ८२, दो एगजडी ८३, दो दुजडी ८४, दो करकरिगा ८५, दो रायग्गला ८६, दो पुप्फकेऊ ८७, दो भावकेऊ ८८ ।

[टी०] अनन्तरं जम्बूद्वीपे काललक्षणद्रव्यपर्यायविशेषा उक्ताः, अधुना तु जम्बूद्वीप एव कालपदार्थव्यञ्जकानां ज्योतिषां द्विस्थानकानुपातेन प्ररूपणामाह– **जंबूदीवे** इत्यादि सूत्रद्वयम्, **पभासिंसु व** त्ति प्रभासितवन्तौ वा प्रकाशनीयम्, एवं **प्रभासयतः प्रभासयिष्यतः**, चन्द्रयोश्च सौम्यदीप्तिकत्वात् प्रभासनमात्रमुक्तम्, आदित्ययोश्च खररश्मित्वात्**तापितवन्तौ वा** एवं **तापयतस्तापयिष्यत** इति वस्तुनस्तापनमुक्तम्, अनेन कालत्रयप्रकाशनभणनेन सर्वकालं चन्द्रादीनां भावानामस्तित्वमुक्तम्, अत एव चोच्यते– **न कदाचिदनीदृशं जगत्** [ ] इति ।

द्विसङ्ख्यत्वाच्चन्द्रयोस्तत्परिवारस्यापि द्वित्वमाह– **दो कत्तिये**त्यादिना **दो भावकेऊ** इत्येतदवसानेन ग्रन्थेन, सुगमश्चायम्, नवरं **द्वे कृत्तिके** नक्षत्रापेक्षया, न तु तारिकापेक्षयेत्येवं सर्वत्रेति, **कत्तिये**त्यादिगाथात्रयेण नक्षत्रसूत्रसङ्ग्रहः, कृत्तिकादीनामष्टाविंशतेर्नक्षत्राणां क्रमेणाग्न्यादयोऽष्टाविंशतिरेव देवता भवन्ति, ता आह– **द्वावग्नी** १, एवं **प्रजापती** २, **सोमौ** ३, **रुद्रौ** ४, **अदिती** ५, **बृहस्पती** ६, **सर्प्पौ** ७, **पितरौ** ८, **भगौ** ९, **अर्यमणौ** १०, **सवितारौ** ११, **त्वष्टारौ** १२, **वायू** १३, **इन्द्राग्नी** १४, **मित्रौ** १५, **इन्द्रौ** १६, **निर्ऋती** १७, **आपः** १८, **विश्वौ** १९, **ब्रह्माणौ** २०, **विष्णू** २१, **वसू** २२, **वरुणौ** २३, **अजौ** २४, **विवृद्धी** २५, ग्रन्थान्तरे अहिर्बुध्नावुक्तौ,

पूषणौ २६, **अश्विनौ** २७, **यमा**विति २८, ग्रन्थान्तरे पुनरश्विनीत आरभ्यैता एवमुक्ताः,

अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः ।
योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राख्याः ॥
ऐन्द्रो निर्ऋतिस्तोयं विश्वे ब्रह्मा हरिर्वसुर्वरुणः ।
अजपादोऽहिर्बुध्न्यः पूषा चेतीश्वरा भानाम् ॥ [वाराही० बृहत्संहिता ९७।४-५]

अङ्गारकादयोऽष्टाशीतिर्ग्रहाः सूत्रसिद्धाः, केवलमस्मद्दृष्टपुस्तकेषु केषुचिदेव यथोक्तसङ्ख्या संवदतीति **सूर्यप्रज्ञप्त्यनु**सारेणासाविह संवादनीया, तथाहि तत्सूत्रम्– इत्यादि वृत्तितो ज्ञेयम्।

[सू० ९६] जंबूदीवस्स णं दीवस्स वेइया दो गाउयाइं उड्ढंउच्चत्तेणं पण्णत्ता।

[टी०] जम्बूद्वीपाधिकारादेवेदमपरमाह– **जंबू** इत्यादि कण्ठ्यम्, नवरं वज्रमय्याः अष्टयोजनोच्छ्रायायाश्चतुर्द्वादशोपर्यधोविस्तृताया जम्बूद्वीपनगरप्राकारकल्पाया जगत्या द्विगव्यूतोच्छ्रितेन पञ्चधनुःशतविस्तृतेन नानारत्नमयेन जालकटकेन परिक्षिप्ताया उपरि **वेदिके**ति पद्मवरवेदिकेत्यर्थः, पञ्चधनुःशतविस्तीर्णा गवाक्षहेमकिङ्किणीघण्टायुक्ता देवानामासन-शयन-मोहन-विविधक्रीडास्थानमुभयतो वनखण्डवतीति ।

[सू० ९७] लवणे णं समुद्दे दो जोयणसयसहस्साइं चक्कवालविक्खंभेणं पण्णत्ते ।

[सू० ९८] लवणस्स णं समुद्दस्स वेतिया दो गाउयाइं उड्ढंउच्चत्तेणं पन्नत्ता।

[टी०] जम्बूद्वीपवक्तव्यतानन्तरं तदनन्तरत्वादेव लवणसमुद्रवक्तव्यतामाह– **लवणे ण**मित्यादि कण्ठ्यम्, नवरं **चक्रवाल**स्य मण्डलस्य **विष्कम्भः** पृथुत्वं **चक्रवालविष्कम्भ**स्तेनेति, समुद्रवेदिकासूत्रं जम्बूद्वीपवेदिकासूत्रवद्वाच्यमिति ।

[सू० ९९] धायइसंडे दीवे पुरत्थिमद्धे णं मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा पन्नत्ता बहुसमतुल्ला जाव भरहे चेव एरवए चेव, एवं जहा जंबूदीवे तहा एत्थ वि भाणियव्वं जाव दोसु वासेसु मणुया छव्विहं पि कालं पच्चणुभवमाणा विहरंति, तंजहा-भरहे चेव एरवते चेव । णवरं कूडसामली चेव धायइरुक्खे चेव, देवा गरुले चेव वेणुदेवे, सुदंसणे चेव।

धाततीसंडदीवपच्चत्थिमद्धे मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा पन्नत्ता बहुसमतुल्ला जाव भरहे चेव एरवए चेव जाव छव्विहं पि कालं पच्चणुभवमाणा विहरंति, [तंजहा-] भरहे चेव एरवए चेव। णवरं कूडसामली चेव महाधायईरुक्खे चेव, देवा गरुले चेव वेणुदेवे, पियदंसणे चेव।

[सू० १००] धायइसंडे णं दीवे दो भरहाइं, दो एरवताइं, दो हेमवताइं, दो हेरन्नवताइं, दो हरिवासाइं, दो रम्मगवासाइं, दो पुव्वविदेहाइं, दो अवरविदेहाइं, दो देवकुराओ, दो देवकुरमहद्दुमा, दो देवकुरमहद्दुमवासी देवा, दो उत्तरकुराओ, दो उत्तरकुरमहद्दुमा, दो उत्तरकुरमहद्दुमवासी देवा,

दो चुल्लहिमवंता, दो महाहिमवंता, दो निसढा, दो नीलवंता, दो रुप्पी, दो सिहरी,

दो सद्दावती, दो सद्दावतिवासी साती देवा, दो वियडावती, दो वियडावतिवासी पभासा देवा, दो गंधावती, दो गंधावतिवासी अरुणा देवा, दो मालवंतपरियागा, दो मालवंतपरियागवासी पउमा देवा,

दो मालवंता, दो चित्तकूडा, दो पम्हकूडा, दो नलिणकूडा, दो एगसेला, दो तिकूडा, दो वेसमणकूडा, दो अंजणा, दो मातंजणा, दो सोमणसा, दो विज्जुप्पभा, दो अंकावती, दो पम्हावती, दो आसीविसा, दो सुहावहा, दो चंदपव्वता, दो सूरपव्वता, दो णागपव्वता, दो देवपव्वया, दो गंधमायणा, दो उसुगारपव्वता, दो चुल्लहिमवतंकूडा, दो वेसमणकूडा, दो महाहिमवंतकूडा, दो वेरुलियकूडा, दो निसढकूडा, दो रुयगकूडा, दो नीलवंतकूडा, दो उवदंसणकूडा, दो रुप्पिकूडा, दो मणिकंचणकूडा, दो सिहरिकूडा, दो तिगिंच्छिकूडा,

दो पउमद्दहा, दो पउमद्दहवासिणीओ सिरीदेवीओ, दो महापउमद्दहा, दो महापउमद्दहवासिणीओ हिरीओ देवीओ, एवं जाव दो पुंडरीयद्दहा, दो पुंडरीयद्दहवासिणीओ लच्छीओ देवीओ,

दो गंगप्पवायद्दहा जाव दो रत्तावतिप्पवातद्दहा, दो रोहियाओ जाव दो

रुप्पकूलाओ,

दो गाहावतीओ १, दो दहवतीओ २, दो पंकवतीओ ३, दो तत्तजलाओ ४, दो मत्तजलाओ ५, दो उम्मत्तजलाओ ६, दो खारोयाओ ७, दो सीहसोताओ ८, दो अंतोवाहिणीओ ९, दो उम्मिमालिणीओ १०, दो फेणमालिणीओ ११, दो गंभीरमालिणीओ १२,

दो कच्छा १, दो सुकच्छा २, दो महाकच्छा ३, दो कच्छावती ४, दो आवत्ता ५, दो णंगलावत्ता ६, दो पुक्खला ७, दो पुक्खलावती ८, दो वच्छा ९, दो सुवच्छा १०, दो महावच्छा ११, दो वच्छगावती १२, दो रम्मा १३, दो रम्मगा १४, दो रमणिज्जा १५, दो मंगलावती १६, दो पम्हा १७, दो सुपम्हा १८, दो महापम्हा १९, दो पम्हगावती २०, दो संखा २१, दो णलिणा २२, दो कुमुया २३, दो सलिलावती २४, दो वप्पा २५, दो सुवप्पा २६, दो महावप्पा २७, दो वप्पगावती २८, दो वग्गू २९, दो सुवग्गू ३०, दो गंधिला ३१, दो गंधिलावती ३२,

दो खेमाओ १, दो खेमपुराओ २, दो रिट्ठाओ ३, दो रिट्ठपुराओ ४, दो खग्गीतो ५, दो मंजूसाओ ६, दो ओसधीओ ७, दो पुंडरिगिणीओ ८, दो सुसीमाओ ९, दो कुंडलाओ १०, दो अपराजियाओ ११, दो पभंकराओ १२, दो अंकावईओ १३, दो पम्हावईओ १४, दो सुभाओ १५, दो रयणसंचयाओ १६, दो आसपुराओ १७, दो सीहपुराओ १८, दो महापुराओ १९, दो विजयपुराओ २०, दो अवराजिताओ २१, दो अरयाओ २२, दो असोगाओ २३, दो विगयसोगाओ २४, दो विजयाओ २५, दो वेजयंतीओ २६, दो जयंतीओ २७, दो अपराजियाओ २८, दो चक्कपुराओ २९, दो खग्गपुराओ ३०, दो अवज्झाओ ३१, दो अउज्झाओ ३२,

दो भद्दसालवणा, दो णंदणवणा, दो सोमणसवणा, दो पंडगवणाइं,

दो पंडुकंबलसिलाओ, दो अतिपंडुकंबलसिलाओ, दो रत्तकंबलसिलाओ,

दो अतिरत्तकंबलसिलाओ,

दो मंदरा, दो मंदरचूलिताओ ।

[सू० १०१] धायइसंडस्स णं दीवस्स वेदिया दो गाउयाइं उड्ढमुच्चत्तेणं पण्णत्ता ।

[सू० १०२] कालोदस्स णं समुद्दस्स वेइया दो गाउयाइं उड्ढंउच्चत्तेणं पण्णत्ता।

[सू० १०३] पुक्खरवरदीवड्ढपुरत्थिमद्धे णं मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा पन्नत्ता बहुसमतुल्ला जाव भरहे चेव एरवए चेव, तहेव जाव दो कुराओ पन्नत्ताओ० देवकुरा चेव उत्तरकुरा चेव। तत्थ णं दो महतिमहालया महद्दुमा पन्नत्ता, तंजहा-कूडसामली चेव पउमरुक्खे चेव, देवा गरुले चेव वेणुदेवे, पउमे चेव, जाव छव्विहं पि कालं पच्चणुभवमाणा विहरंति ।

पुक्खरवरदीवड्ढपच्चत्थिमद्धे णं मंदरस्स पव्वयस्स उत्तरदाहिणेणं दो वासा पन्नत्ता तहेव, णाणत्तं कूडसामली चेव महापउमरुक्खे चेव, देवा गरुले चेव वेणुदेवे, पुंडरीए चेव ।

पुक्खरवरदीवड्ढे णं दीवे दो भरहाइं, दो एरवताइं, जाव दो मंदरा, दो मंदरचूलियाओ ।

[सू० १०४] पुक्खरवरस्स णं दीवस्स वेइया दो गाउयाइं उड्ढमुच्चत्तेणं पन्नत्ता। सव्वेसिं पि णं दीवसमुद्दाणं वेदियाओ दो गाउयाइं उड्ढमुच्चत्तेणं पन्नत्ताओ ।

[टी०] क्षेत्रप्रस्तावाल्लवणसमुद्रवक्तव्यतानन्तरं धातकीखण्डवक्तव्यतां **धायइसंडे** इत्यादिना वेदिकासूत्रान्तेन ग्रन्थेनाह, कण्ठ्यश्चायम्, नवरं धातकीखण्डप्रकरणमपि जम्बूद्वीप-लवणसमुद्रमध्यं वलयाकृतिं धातकीखण्डमालिख्य हिमवदादिवर्षधरान् जम्बूद्वीपानुसारेणैवोभयतः पूर्वापरविभागेन भरत-हैमवतादिवर्षाणि च व्यवस्थाप्य पूर्वापरदिशोर्वलयविष्कम्भमध्ये मेरुं च कल्पयित्वाऽवबोद्धव्यम् । अनेनैव च क्रमेण पुष्करवरद्वीपार्द्धप्रकरणमपीति। तत्र **धातकीनां** वृक्षविशेषाणां **खण्डो** वनं समूह इत्यर्थो

धातकीखण्डस्तद्युक्तो यो द्वीपः स धातकीखण्ड एवोच्यते, यथा दण्डयोगाद्दण्ड इति, धातकीखण्डश्चासौ द्वीपश्चेति **धातकीखण्डद्वीपस्तस्य पुरत्थिमं** ति पौरस्त्यं पूर्वमित्यर्थो यदर्द्धं विभागस्तद्धातकीखण्डद्वीपपौरस्त्यार्द्धम्, पूर्वापरार्द्धता च लवणसमुद्रवेदिकातो दक्षिणत उत्तरतश्च धातकीखण्डवेदिकां यावद् गताभ्यामिषुकारपर्वताभ्यां धातकीखण्डस्य विभक्तत्वादिति, उक्तं च-

पंचसयजोयणुच्चा सहस्समेगं तु होंति वित्थिन्ना ।
कालोयलवणजले पुट्ठा ते दाहिणुत्तरओ ॥
दो इसुयारनगवरा धायइसंडस्स मज्झयारठिया ।
तेहिं दुहा णिद्दिस्सइ पुव्वद्धं पच्छिमद्धं च ॥ [बृहत्क्षेत्र० ३।४-५] इति ।

तत्र **ण**मिति वाक्यालङ्कारे, **मन्दरस्य** मेरोरित्येवं धातकीखण्डपूर्वार्द्धपश्चिमार्द्धप्रकरणे प्रत्येकमेकोनसप्ततिसूत्रप्रमाणे **जम्बूद्वीपप्रकरण**वदध्येतव्ये व्याख्येये च, अत एवाह- **एवं जहा जंबूदीवे तहे**त्यादि, नवरं वर्षधरादिस्वरूपमायामादिसमता चैवं भावनीया-

पुव्वद्धस्स य मज्झे मेरू तस्स पुण दाहिणुत्तरओ ।
वासाइं तिन्नि तिन्नि विदेहवासं च मज्झम्मि ॥

इत्यादि विस्तरार्थो वृत्तितो ज्ञेयो यावद् वेदिकासूत्रं जम्बूद्विपवत्।

धातकीखण्डानन्तरं कालोदसमुद्रो भवतीति तद्वक्तव्यतामाह- **कालोदे**त्यादि सुगमम्, पुष्करवरद्वीपस्य वक्तव्यतामाह- **पुक्खरे**त्यादि, त्रीण्यप्यतिदेशप्रधानानि, अतिदेश-लभ्यश्चार्थः सुगम एव, नवरं पूर्वार्द्धा-ऽपरार्द्धता धातकीखण्डवदिषुकाराभ्यामवगन्तव्या, भरतादीनां चायामादिसमतैवं भावनीया- विस्तरो वृत्तितो ज्ञेयः।

पुष्करद्वीपवेदिकाप्ररूपणानन्तरं शेषद्वीप-समुद्रवेदिकाप्ररूपणामाह- **सव्वेसिं पि ण**मित्यादि कण्ठ्यम् ।

[सू० १०५] दो असुरकुमारिंदा पण्णत्ता, तंजहा-चमरे चेव बली चेव। दो णागकुमारिंदा पण्णत्ता, तंजहा-धरणे चेव भूयाणंदे चेव २। दो सुवन्नकुमारिंदा पन्नत्ता, तंजहा-वेणुदेवे चेव वेणुदाली चेव ३। दो विज्जुकुमारिंदा पण्णत्ता, तंजहा-हरिच्चेव हरिस्सहे चेव ४। दो अग्गिकुमारिंदा

पन्नत्ता, तंजहा-अग्गिसिहे चेव अग्गिमाणवे चेव ५। दो दीवकुमारिंदा पण्णत्ता, तंजहा-पुन्ने चेव वसिट्ठे चेव ६। दो उदहिकुमारिंदा पण्णत्ता, तंजहा-जलकंते चेव जलप्पभे चेव ७। दो दिसाकुमारिंदा पन्नत्ता, तंजहा-अमियगती चेव अमितवाहणे चेव ८। दो वातकुमारिंदा पन्नत्ता, तंजहा-वेलंबे चेव पभंजणे चेव ९। दो थणियकुमारिंदा पण्णत्ता, तंजहा-घोसे चेव महाघोसे चेव १०।

दो पिसाइंदा पन्नत्ता, तंजहा-काले चेव महाकाले चेव १। दो भूइंदा पन्नत्ता, तंजहा-सुरूवे चेव पडिरूवे चेव २। दो जक्खिंदा पन्नत्ता, तंजहा-पुन्नभद्दे चेव माणिभद्दे चेव ३। दो रक्खसिंदा पन्नत्ता, तंजहा-भीमे चेव महाभीमे चेव ४। दो किन्नरिंदा पन्नत्ता, तंजहा-किन्नरे चेव किंपुरिसे चेव ५। दो किंपुरिसिंदा पन्नत्ता, तंजहा-सप्पुरिसे चेव महापुरिसे चेव ६। दो महोरगिंदा पन्नत्ता, तंजहा-अतिकाए चेव महाकाए चेव ७। दो गंधव्विंदा पन्नत्ता, तंजहा-गीतरती चेव गीयजसे चेव ८।

दो अणपन्निंदा पन्नत्ता, तंजहा-संनिहिए चेव सामाणे चेव १। दो पणपन्निंदा पन्नत्ता, तंजहा-धाते चेव विधाते चेव २। दो इसिवाइंदा पन्नत्ता, तंजहा-इसि च्चेव इसिवालए चेव ३। दो भूतवाइंदा पन्नत्ता, तंजहा-इस्सरे चेव महिस्सरे चेव ४। दो कंदिंदा पन्नत्ता तंजहा-सुवच्छे चेव विसाले चेव ५। दो महाकंदिंदा पन्नत्ता, तंजहा-हस्से चेव हस्सरती चेव ६। दो कुभंडिंदा पन्नत्ता, तंजहा-सेए चेव महासेए चेव ७। दो पतइंदा पन्नत्ता, तंजहा-पतए चेव पतयवई चेव ८।

जोतिसियाणं देवाणं दो इंदा पन्नत्ता, तंजहा-चंदे चेव सूरे चेव ।

सोहम्मीसाणेसु णं कप्पेसु दो इंदा पन्नत्ता, तंजहा-सक्के चेव ईसाणे चेव। एवं सणंकुमार-माहिंदेसु कप्पेसु दो इंदा पन्नत्ता, तंजहा-सणंकुमारे चेव माहिंदे चेव । बंभलोग-लंतएसु णं कप्पेसु दो इंदा पन्नत्ता, तंजहा-बंभे चेव लंतए चेव। महासुक्क-सहस्सारेसु णं कप्पेसु दो इंदा पन्नत्ता, तंजहा-

महासुक्के चेव सहस्सारे चेव । आणत-पाणता-ऽऽरण-ऽच्चुतेसु णं कप्पेसु दो इंदा पन्नत्ता, तंजहा-पाणते चेव अच्चुते चेव ।

महासुक्क-सहस्सारेसु णं कप्पेसु विमाणा दुवण्णा पन्नत्ता, तंजहा-हालिद्दा चेव सुक्किला चेव ।

गेविज्जगा णं देवा णं दो रयणीओ उड्ढमुच्चत्तेणं पन्नत्ता ।

॥ तइओ उद्देसओ समत्तो ॥

[टी०] एते च द्वीप-समुद्रा इन्द्राणामुत्पातपर्वताश्रया इतीन्द्रवक्तव्यतामाह- **दो असुरे**त्यादि **अच्चुए चेव** इत्येतदन्तं सूत्रं सुगमम्, नवरम् असुरादीनां दशानां भवनपतिनिकायानां मेर्वपेक्षया दक्षिणोत्तरदिगूद्वयाश्रितत्वेन द्विविधत्वाद् विंशतिरिन्द्राः, तत्र चमरो दाक्षिणात्यो बली त्वौदीच्य इत्येवं सर्वत्र, एवं व्यन्तराणामष्टनिकायानां द्विगुणत्वात् षोडशेन्द्राः, तथा अणपन्निकादीनामप्यष्टानामेव व्यन्तरविशेषरूपनिकायानां द्विगुणत्वात् षोडशेति, ज्योतिष्कानां त्वसङ्ख्यातचन्द्र-सूर्यत्वेऽपि जातिमात्राश्रयणाद् द्वावेव चन्द्र-सूर्याख्याविन्द्रावुक्तौ, सौधर्म्मादिकल्पानां तु दशेन्द्रा इत्येवं सर्वेऽपि चतुःषष्टिरिति ।

देवाधिकारात् तन्निवासभूतविमानवक्तव्यतामाह– **महासुक्के**त्यादि कण्ठ्यम्, नवरं **हारिद्राणि** पीतानि, क्रमश्चायं सौधर्मादिविमानवर्णविषयो यथा– सौधर्मेशानयोः पञ्चवर्णानि, ततो द्वयोरकृष्णानि, पुनर्द्वयोरप्यकृष्ण-नीलानि, ततो द्वयोः शुक्र-सहस्राराभिधानयोः पीत-शुक्लानि, ततः शुक्लान्येवेति, आह च–

सोहम्मे पंचवन्ना एक्कगहाणी उ जा सहस्सारो ।
दो दो तुल्ला कप्पा तेण परं पुंडरीयाइं ॥ [बृहत्संग्र०१३२] इति ।

देवाधिकारादेव द्विस्थानकानुपातिनीं तदवगाहनामाह– **गेवेज्जगा ण**मित्यादि पूर्ववद् व्याख्येयमिति ।

॥ द्विस्थानकस्य तृतीय उद्देशकः समाप्तः ॥

❋ ❋ ❋

[अथ चतुर्थ उद्देशकः]

[सू० १०६] समया ति वा आवलिया ति वा जीवा ति या अजीवा ति या पवुच्चति १, आणापाणू ति वा थोवा ति वा जीवा ति या अजीवा ति या पवुच्चति २, खणा ति वा लवा ति वा जीवा ति या अजीवा ति या पवुच्चति ३, एवं मुहुत्ता ति वा अहोरत्ता ति वा ४, पक्खा ति वा मासा ति वा ५, उदू ति वा अयणा ति वा ६, संवच्छरा ति वा जुगा ति वा ७, वाससता ति वा वाससहस्सा ति वा ८, वाससतसहस्सा ति वा वासकोडी ति वा ९, पुव्वंगा ति वा पुव्वा ति वा १०, तुडियंगा ति वा तुडिया ति वा ११, अटटंगा ति वा अटटा ति वा १२, अववंगा ति वा अववा ति वा १३, हूहूयंगा ति वा हूहूया ति वा १४, उप्पलंगा ति वा उप्पला ति वा १५, पउमंगा ति वा पउमा ति वा १६, णलिणंगा ति वा णलिणा ति वा १७, अत्थणिकुरंगा ति वा अत्थणिउरा ति वा १८, अउअंगा ति वा अउआ ति वा १९, णउअंगा ति वा णउआ ति वा २०, पउतंगा ति वा पउता ति वा २१, चूलितंगा ति वा चूलिता ति वा २२, सीसपहेलियंगा ति वा सीसपहेलिया ति वा २३, पलिओवमा ति वा सागरोवमा ति वा २४, उस्सप्पिणी ति वा ओसप्पिणी ति वा जीवा ति या अजीवा ति या पवुच्चति २५।

गामा ति वा णगरा ति वा १, निगमा ति वा रायहाणी ति वा २, खेडा ति वा कब्बडा ति वा ३, मडंबा ति वा दोणमुहा ति वा ४, पट्टणा ति वा आगरा ति वा ५, आसमा ति वा संवाहा ति वा ६, संनिवेसा इ वा घोसा ति वा ७, आरामा ति वा उज्जाणा ति वा ८, वणा ति वा वणसंडा ति वा ९, वावी ति वा पुक्खरणी ति वा १०, सरा ति वा सरपंतिता ति वा ११, अगडा ति वा तलागा ति वा १२, दहा ति वा णदी ति वा १३, पुढवी ति वा उदही ति वा १४, वातखंधा ति वा उवासंतरा ति वा १५, वलता ति वा विग्गहा ति वा १६, दीवा

ति वा समुद्दा ति वा १७, वेला ति वा वेतिता ति वा १८, दारा ति वा तोरणा ति वा १९, णेरतिता ति वा णेरतितावासा ति वा २०, जाव वेमाणिया ति वा वेमाणियावासा ति वा ४३, कप्पा ति वा कप्पविमाणावासा ति वा ४४, वासा ति वा वासधरपव्वता ति वा ४५, कूडा ति वा कूडागारा ति वा ४६, विजया ति वा रायहाणी ति वा ४७, जीवा ति या अजीवा ति या पवुच्चति ।

छाया ति वा आतवा ति वा १, जोसिणा ति वा अंधगारा ति वा २, ओमाणा ति वा उम्माणा ति वा ३, अइयाणगिहा ति वा उज्जाणगिहा ति वा ४, अवलिंबा ति वा सणिप्पवाता ति वा ५, जीवा ति या अजीवा ति या पवुच्चइ ।

दो रासी पन्नत्ता, तंजहा-जीवरासी चेव अजीवरासी चेव ।

[टी०] उक्तस्तृतीयोद्देशकः, साम्प्रतं चतुर्थ आरभ्यते, अस्य च जीवा-ऽजीव-वक्तव्यताप्रतिबद्धस्य पूर्वेण सहाऽयं सम्बन्धः– पूर्वस्मिन् हि पुद्गल-जीवधर्मा उक्ताः, इह तु सर्वं जीवा-ऽजीवात्मकमिति वाच्यम् । अनेन सम्बन्धेनायातस्याऽस्योद्देशकस्येमानि पञ्चविंशतिरादिसूत्राणि **समये**त्यादीनि । एषां चानन्तरसूत्रेणायमभिसम्बन्धः– पूर्वत्र जीवविशेषाणामुच्चत्वलक्षणो धर्मोऽभिहितः, इह तु धर्माधिकारादेव समयादिः स्थितिलक्षणो धर्मो जीवाजीवसम्बन्धी जीवाजीवतयैव धर्मधर्मिणोरभेदेनोच्यत इति, तत्र सर्वेषां कालप्रमाणानामाद्यः परमसूक्ष्मोऽभेद्यो निरवयव उत्पलपत्रशतव्यति-भेदाद्युदाहरणोपलक्षितः समयः, तस्य चातीतादिविवक्षया बहुत्वाद् बहुवचनमित्याह– **समया इ वा** इत्यादि, **इति**शब्द उपप्रदर्शने, **वा**शब्दो विकल्पे, तथा असङ्ख्यात-समयसमुदयात्मिका **आवलिका** क्षुल्लकभवग्रहणकालस्य षट्पञ्चाशदुत्तरद्विशततम-भागभूता इति, तत्र **समया इति वा आवलिका इति वा** यत् कालवस्तु तदविगानेन **जीवा इति च**, जीवपर्यायत्वात्, पर्याय-पर्यायिणोश्च कथञ्चिदभेदात्, तथा अजीवानां पुद्गलादीनां पर्यायत्वा**दजीवा इति च**, **च**कारौ समुच्चयार्थौ, दीर्घता च प्राकृतत्वात्, **प्रोच्यते** अभिधीयत इति, न जीवादिव्यतिरेकिणः समयादयः, तथाहि– जीवाजीवानां

सादिसपर्यवसानादिभेदा या स्थितिस्तद्भेदाः समयादयः सा च तद्धर्मः, धर्मश्च धर्मिणो नात्यन्तं भेदवान्, अत्यन्तं भेदे हि विप्रकृष्टधर्ममात्रोपलब्धौ प्रतिनियतधर्मिविषय एव संशयो न स्यात्, तदन्येभ्योऽपि तस्य भेदाविशेषाद्, दृश्यते च यदा कश्चिद्धरित-तरुतरुणशाखाविसरविवरान्तरतः किमपि शुक्लं पश्यति तदा 'किमियं पताका किं वा बलाके'त्येवं प्रतिनियतधर्मिविषयः संशय इति, अभेदेऽपि सर्वथा संशयानुत्पत्तिरेव, गुणग्रहणत एव तस्यापि गृहीतत्वादिति, इह त्वभेदनयाश्रयणाज्**जीवा इ ये**त्याद्युक्तम्, इह च समया-ऽऽवलिकालक्षणार्थद्वयस्य जीवादिद्वयात्मकतया भणनाद् द्विस्थानकावतारो दृश्यः, एवमुत्तरसूत्राण्यपि नेयानि, विशेषं तु वक्ष्याम इति । **आणापाणू** इत्यादि, **आनप्राणा**विति उच्छ्वास-निःश्वासकालः सङ्ख्यातावलिकाप्रमाणः,आह च–

हट्ठस्स अणवगल्लस्स, निरुवकिट्ठस्स जंतुणो ।
एगे ऊसासनीसासे, एस पाणु त्ति वुच्चइ ॥ [**जम्बूद्वीपप्र० २।१, बृहत्सं० २०७**] त्ति ।

तथा **स्तोकाः** सप्तोच्छ्वासनिःश्वासप्रमाणाः २, **क्षणाः** सङ्ख्यातानप्राणलक्षणाः, सप्तस्तोकप्रमाणा **लवाः** ३, **मुहूर्त्ताः** सप्तसप्ततिलवप्रमाणाः, **अहोरत्त** ति, **अहोरात्राः** त्रिंशन्मुहूर्त्तप्रमाणाः ४, **पक्षाः** पञ्चदशाहोरात्रप्रमाणाः, **मासा** द्विपक्षाः ५, **ऋतवो** द्विमासमानाः वसन्ताद्याः, **अयनानि** ऋतुत्रयमानानि ६, **संवत्सरा** अयनद्वयमानाः, **युगानि** पञ्च संवत्सराणि ७, **वर्षशता**दीनि प्रतीतानि, **पूर्वाङ्गानि** चतुरशीतिवर्षलक्षप्रमाणानि, **पूर्वाणि** पूर्वाङ्गान्येव चतुरशीतिलक्षगुणितानि, इदं चैषां मानम्–

पुव्वस्स उ परिमाणं सयरिं खलु होंति कोडिलक्खाओ ।
छप्पन्नं च सहस्सा बोद्धव्वा वासकोडीणं ॥ [**बृहत्सं० ३१६**] ति ७०५६०००००००००।

पूर्वाणि चतुरशीतिलक्षगुणितानि **त्रुटिताङ्गानि** भवन्ति, एवं पूर्वस्य पूर्वस्य चतुरशीतिलक्षगुणनेनोत्तरमुत्तरं सङ्ख्यानं भवति याव**च्छीर्षप्रहेलिके**ति, तस्यां चतुर्नवत्यधिकमङ्कस्थानशतं भवति, अत्र करणगाथा–

इच्छियठाणेण गुणं पणसुन्नं चउरसीतिगुणितं च ।
काऊणं तइवारे पुव्वंगाईण मुण संखं ॥ [ ]

शीर्षप्रहेलिकान्तः सांव्यवहारिकः सङ्ख्यातकालः, तेन च प्रथमपृथिवीनारकाणां भवनपति-व्यन्तराणां भरतैरवतेषु सुषमदुःषमायाः पश्चिमे भागे नर-तिरश्चां चायुर्मीयत इति । किञ्च, शीर्षप्रहेलिकायाः परतोऽप्यस्ति सङ्ख्यातः कालः, स चानतिशायिनां न व्यवहारविषय इति कृत्वौपम्ये प्रक्षिप्तः, अत एव शीर्षप्रहेलिकायाः परतः पल्योपमाद्युपन्यासः, तत्र पल्येनोपमा येषु तानि **पल्योपमानि** असङ्ख्यातवर्षकोटीकोटीप्रमाणानि वक्ष्यमाणलक्षणानि, सागरेणोपमा येषु तानि **सागरोपमाणि** पल्योपमकोटीकोटीदशकमानानीति, दशसागरोपमकोटीकोट्य **उत्सर्प्पिणी**, एवमेवाऽ**वसर्प्पिणी**ति ।

कालविशेषवद् ग्रामादिवस्तुविशेषा अपि जीवाजीवा एवेति द्विपदैः सप्तचत्वारिंशता सूत्रैराह– **गामे**त्यादि, इह च प्रत्येकं **जीवा इ ये**त्यादिरालापोऽध्येतव्यो, ग्रामादीनां च जीवाजीवता प्रतीतैव, तत्र करादिगम्या **ग्रामाः**, नैतेषु करोऽस्तीति **नकराणि** १, **निगमाः** वणिग्निवासाः, **राजधान्यो** यासु राजानोऽभिषिच्यन्ते २, **खेटा**नि धूलीप्राकारोपेतानि, **कर्बटानि** कुनगराणि ३, **मडम्बानि** सर्वतोऽर्द्धयोजनात् परतोऽवस्थितग्रामाणि, **द्रोणमुखानि** येषां जल-स्थलपथावुभावपि स्तः ४, **पत्तनानि** येषु जल-स्थलपथयोरन्यतरेण पर्याहारप्रवेशः, **आकरा** लोहाद्युत्पत्तिभूमयः ५, **आश्रमाः** तीर्थस्थानानि, **संवाहाः** समभूमौ कृषिं कृत्वा येषु दुर्गभूमिभूतेषु धान्यानि कृषीवलाः संवहन्ति रक्षार्थमिति ६, **सन्निवेशाः** सार्थकटकादेः, **घोषा** गोष्ठानि ७, **आरामा** विविधवृक्षलतोपशोभिताः कदल्यादिप्रच्छन्नगृहेषु स्त्रीसहितानां पुंसां रमणस्थानभूता इति, **उद्यानानि** पत्र-पुष्प-फल-च्छायोपगादिवृक्षोपशोभितानि बहुजनस्य विविधवेषस्योन्नतमानस्य भोजनार्थं यानं गमनं येष्विति ८, **वनानी**त्येकजातीयवृक्षाणि, **वनखण्डाः** अनेकजातीयोत्तमवृक्षाः ९, **वापी** चतुरस्रा, **पुष्करिणी** वृत्ता पुष्करवती वेति १०, **सरांसि** जलाशयविशेषाः, **सरःपङ्क्तयः** सरसां पद्धतयः ११, **अगड** त्ति अवटाः कूपाः, **तडागा**दीनि प्रतीतानि १२, **पृथिवी** रत्नप्रभादिका, **उदधिः** तदधो घनोदधिः १४, **वातस्कन्धाः** घनवात-तनुवाता इतरे वा, **अवकाशान्तराणि** वातस्कन्धानामधस्तादाकाशानि, जीवता चैषां सूक्ष्मपृथिवीकायिकादिजीवव्याप्तत्वात्

१५, **वलयानि** पृथिवीनां वेष्टनानि घनोदधि-घनवात-तनुवातलक्षणानीति, **विग्रहा** लोकनाडीवक्राणि, जीवता चैषां पूर्ववत् १६, **द्वीपाः समुद्राश्च** प्रतीताः १७, **वेला** समुद्रजलवृद्धिः, **वेदिकाः** प्रतीताः १८, **द्वाराणि** विजयादीनि, **तोरणानि** तेष्वेवेति १९, **नैरयिकाः** क्लिष्टसत्त्वविशेषास्तेषां चाजीवता कर्मपुद्गलाद्यपेक्षया, तदुत्पत्तिभूमयो **नैरयिकावासास्**तेषां च जीवता पृथिवीकायिकाद्यपेक्षया, इत्येवं चतुर्विंशति-दण्डकोऽभिधेयः, अत एवाह **यावदित्यादि** ४३, **कल्पाः** देवलोकाः, तदंशाः **कल्पविमानावासाः** ४४, **वर्षाणि** भरतादिक्षेत्राणि, **वर्षधरपर्वताः** हिमवदादयः ४५, **कूटानि** 'हिमवत्'कूटादीनि, **कूटागाराणि** तेष्वेव देवभवनानि ४६, **विजयाः** चक्रवर्त्तिविजेतव्यानि कच्छादीनि क्षेत्रखण्डानि, **राजधान्यः** क्षेमादिकाः ४७, **जीवेत्यादि** इहोक्तं सर्वत्र सम्बन्धनीयमिति ।

येऽपि पुद्गलधर्मास्तेऽपि तथैवेत्याह– **छायेत्यादि** सूत्रपञ्चकं गतार्थम्, नवरं **छाया** वृक्षादीनाम्, **आतपः** आदित्यस्य, **जोसिणा ति व** त्ति ज्योत्स्ना, **अन्धकाराणि** तमांसि, **अवमानानि** क्षेत्रादीनां प्रमाणानि हस्तादीनि, **उन्मानानि** तुलायाः कर्षादीनि, **अतियानगृहाणि** नगरादिप्रवेशे यानि गृहाणि, **उद्यानगृहाणि** प्रतीतानि, **अवलिंबा सणिप्पवाया य** रूढितोऽवसेया इति, किमेतत् सर्वमित्याह **जीवा इति च**, जीवव्याप्तत्वात् तदाश्रितत्वाद्वा, **अजीवा इति च** पुद्गलाद्यजीवरूपत्वात् तदाश्रितत्वाद्वेति, **प्रोच्यते** जिनैः प्ररूप्यत इति । इह च **जीवा इ येत्यादि** सूत्रपञ्चकेऽपि प्रत्येकमध्येतव्यमिति ।

अथ समयादिवस्तु जीवा-ऽजीवरूपमेव कस्मादभिधीयते ?, उच्यते, तद्विलक्षणराश्यन्तराभावाद्, अत एवाह– **दो रासीत्यादि** कण्ठ्यम् ।

[सू० १०७] दुविहे बंधे पन्नत्ते, तंजहा-पेज्जबंधे चेव दोसबंधे चेव । जीवा णं दोहिं ठाणेहिं पावं कम्मं बंधंति, तंजहा-रागेण चेव दोसेण चेव। जीवा णं दोहिं ठाणेहिं पावं कम्मं उदीरेंति, तंजहा-अब्भोवगमिताते चेव वेयणाते, उवक्कमिताते चेव वेयणाते । एवं वेदेंति, एवं णिज्जरेंति अब्भोवगमिताते चेव वेयणाते, उवक्कमिताते चेव वेयणाते ।

[टी०] जीवराशिश्च द्विधा बद्ध-मुक्तभेदात्, तत्र बद्धानां बन्धनिरूपणायाह- **दुविहे**त्यादि । **प्रेम** रागो माया-लोभकषायलक्षणः, **द्वेष**स्तु क्रोध-मानकषायलक्षणः, यदाह–

माया लोभकषायश्चेत्येतद् रागसंज्ञितं द्वन्द्वम् ।
क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥ [प्रशम० ३२] इति ।

प्रेम्णः प्रेमलक्षणचित्तविकारसम्पादकमोहनीयकर्मपुद्गलराशे**र्बन्धनं** जीवप्रदेशेषु योगप्रत्ययतः प्रकृतिरूपतया प्रदेशरूपतया च सम्बन्धनम् तथा कषायप्रत्ययतः स्थित्यनुभागविशेषापादनं च **प्रेमबन्ध**ः, एवं द्वेषमोहनीयस्य बन्धो **द्वेषबन्ध** इति, उक्तं हि–

जोगा पयडिपदेसं ठितिअणुभागं कसायओ कुणइ [**बन्धशतके** ९९] त्ति ।

प्रेम-द्वेषलक्षणाभ्यां कर्मभ्यामुदयगताभ्यां जीवानामशुभकर्मबन्धो भवतीत्याह– **जीवा ण**मित्यादि । अथवा पूर्वसूत्रमन्यथा व्याख्याय सम्बन्धान्तरमस्य क्रियते, सामान्येन बन्धो द्वेधा प्रेमतो द्वेषतश्चेति, स चानिवृत्तिसूक्ष्मसम्परायान्तान् गुणस्थानिनः प्रतीत्य द्रष्टव्यः, यस्तूपशान्तमोह-क्षीणमोह-सयोगिनां स योगप्रत्यय एव, स तु बन्धत्वेन न विवक्षितः, बन्धस्यापि तस्य शेषकर्मबन्धविलक्षणतयाऽबन्धकल्पत्वात्, यस्य हि कर्मणोऽसौ तदल्पस्थितिकादिविशेषणम्, उक्तं च-

अप्पं बायर मउयं बहुं च रुक्खं च सुक्किलं चेव ।
मंदं महव्वयं ति य सायाबहुलं च तं कम्मं ॥ [ ] ति ।

अल्पं स्थित्या, **बादरं** परिणामतः, **मृदु** अनुभवतः, **बहु** प्रदेशैः, **मन्दं** लेपतो वालुकावत्, **महाव्ययं** सर्वापगमात् । एतदेव दर्शयन्नाह– **जीवा ण**मित्यादि, **जीवाः** सत्त्वाः, **णं** वाक्यालङ्कारे, **द्वाभ्यां स्थानाभ्यां** कारणाभ्यां **पापम्** अशुभमशुभ-भवनिबन्धनत्वात्, न तु निरनुबन्धं द्विसमयस्थितिकमत्यन्तं शुभम्, तस्य केवलयोग-प्रत्ययत्वादिति, **बध्नन्ति** स्पृष्टाद्यवस्थं कुर्वन्ति, **रागेण चैव द्वेषेण चैव**, कषायैरित्यर्थः, ननु मिथ्यात्वाऽविरति-कषाय-योगा बन्धहेतवः, तत् कथं कषाया एव इहोक्ता इति ?, उच्यते, कषायाणां पापकर्मबन्धं प्रति प्राधान्यख्यापनार्थम्, प्राधान्यं च स्थित्यनुभाव-

प्रकर्षकारणत्वात् तेषामिति, अथवा अत्यन्तमनर्थकारित्वाद्, उक्तं च–

को दुक्खं पावेज्जा कस्स व सोक्खेहिं विम्हओ होज्जा ? ।
को व न लहेज्ज मोक्खं ? रागद्दोसा जइ न होज्जा ॥ [उपदेशमा० १२९] इति ।

उक्तस्थानद्वयबद्धपापकर्मणश्च यथोदीरण-वेदन-निर्ज्जराः कुर्वन्ति देहिनस्तथा सूत्रत्रयेणाह– **जीवे**त्यादि गतार्थम्, नवरम् **उदीरयन्ति** अप्राप्तावसरं सदुदये प्रवेशयन्ति, **अभ्युपगमेन** अङ्गीकरणेन निर्वृत्ता तत्र वा भवा **आभ्युपगमिकी**, तया शिरोलोच-तपश्चरणादिकया **वेदनया** पीडया, **उपक्रमेण** कर्मोदीरणकारणेन निर्वृत्ता तत्र वा भवा **औपक्रमिकी**, तया ज्वरा-ऽतीसारादिजन्यया, **एव**मिति उक्तप्रकारत एव **वेदयन्ति** विपाकतोऽनुभवन्त्युदीरितं सदिति, **निर्जरयन्ति** प्रदेशेभ्यः शाटयन्तीति ।

[सू० १०८] दोहिं ठाणेहिं आता सरीरं फुसित्ताणं णिज्जाति, तंजहा-देसेण वि आता सरीरं फुसित्ताणं णिज्जाति, सव्वेण वि आया सरीरं फुसित्ताणं णिज्जाति, एवं फुरित्ताणं, एवं फुडित्ताणं, एवं संवट्टइत्ताणं, एवं निव्वट्टइत्ताणं।

[टी०] निर्ज्जरणे च कर्मणो देशतः सर्वथा वा भवान्तरे सिद्धौ वा गच्छतः शरीरान्निर्याणं भवतीति सूत्रपञ्चकेन तदाह- **दोही**त्यादि कण्ठ्यम्, नवरं द्वाभ्यां प्रकाराभ्यां **देसेण वि** त्ति देशेनापि कतिपयप्रदेशलक्षणेन केषाञ्चित् प्रदेशानामिलिकागत्योत्पादस्थानं गच्छता जीवेन शरीराद् बहिः क्षिप्तत्वात्, **आत्मा** जीवः **शरीरं** देहं **स्पृष्ट्वा** श्लिष्ट्वा **निर्याति** शरीरान्मरणकाले निःसरतीति, **सव्वेण वि** त्ति सर्वेण सर्वात्मना सर्वैर्जीवप्रदेशैः कन्दुकगत्योत्पादस्थानं गच्छता शरीराद् बहिः प्रदेशानामप्रक्षिप्तत्वादिति, अथवा **देशेनापि** देशतोऽपि, **अपि**शब्दः सर्वेणापीत्यपेक्षः, **आत्मा, शरीरम्,** कोऽर्थः ? शरीरदेशं पादादिकं **स्पृष्ट्वा**ऽवयवान्तरेभ्यः प्रदेशसंहारा**न्निर्याति,** स च संसारी, **सर्वेणापि** सर्वतयाऽपि, **अपि**र्देशेनापीत्यपेक्षः, सर्वमपि **शरीरं स्पृष्ट्वा निर्याती**ति भावः, स च सिद्धः, वक्ष्यति च– **पायणिज्जाणा णिरएसु उववज्जंती**त्यादि यावत् **सव्वंगणिज्जाणा सिद्धेसु** [**सू०** ४६१] त्ति ।

आत्मना शरीरस्य स्पर्शने सति स्फुरणं भवतीत्यत उच्यते– **एव**मित्यादि, **एव**मिति **दोहिं ठाणेही**त्याद्यभिलापसंसूचनार्थः, तत्र **देशेनापि** कियद्भिरप्यात्म-

प्रदेशैरिलिकागतिकाले **सव्वेण वि** त्ति सर्व्वैरपि गेन्दुकगतिकाले शरीरं **फुरित्ताणं** ति स्फोरयित्वा सस्पन्दं कृत्वा निर्याति, अथवा **शरीरकं देशतः** शरीरदेशमित्यर्थः, स्फोरयित्वा पादादिनिर्याणकाले, **सर्वतः** सर्वं शरीरं स्फोरयित्वा सर्वाङ्गनिर्याणावसर इति । स्फुरणाच्च सात्मकत्वं स्फुटं भवतीत्याह– **एव**मित्यादि, **एव**मिति तथैव, देशेन आत्मदेशेन **शरीरकं फुडित्ताणं** ति सचेतनतया स्फुरणलिङ्गतः स्फुटं कृत्वा इलिकागतौ, **सर्वेण** सर्वात्मना स्फुटं कृत्वा गेन्दुकगताविति । अथवा शरीरकं देशतः सात्मकतया स्फुटं कृत्वा पादादिना निर्याणकाले, सर्वतः सर्वाङ्गनिर्याणप्रस्ताव इति । अथवा **फुडित्ता** स्फोटयित्वा विशीर्णं कृत्वा, तत्र **देशतो**ऽक्ष्यादिविघातेन, **सर्वतः** सर्वविशरणेन देव-दीपादिजीववदिति । शरीरकं सात्मकतया स्फुटीकुर्वंस्तत्संवर्त्तनमपि कश्चित् करोतीत्याह– **एव**मित्यादि, **एव**मिति तथैव **संवट्टइत्ताणं** ति संवर्त्त्य सङ्कोच्य शरीरकं **देशेने**लिकागतौ शरीरस्थितप्रदेशैः **सर्वेण** सर्वात्मना गेन्दुकगतौ सर्वात्मप्रदेशानां शरीरस्थितत्वान्निर्यातीति, अथवा **शरीरकं देशतः संवर्त्त्य** हस्तादिसङ्कोचनेन, **सर्वतः** सर्वशरीरसङ्कोचनेन पिपीलिकादिवदिति । आत्मनश्च संवर्त्तनं कुर्वन् शरीरस्य निवर्त्तनं करोतीत्याह– **एवं निव्वट्टइत्ताणं** ति, तथैव निवर्त्त्य जीवप्रदेशेभ्यः शरीरकं पृथक्कृत्वेत्यर्थः, तत्र देशेनेलिकागतौ सर्वेण गेन्दुकगतौ, अथवा देशतः शरीरकं निवर्त्त्यात्मनः पादादिनिर्याणवान् सर्वतः सर्वाङ्गनिर्याणवानिति ।

[सू० १०९] दोहिं ठाणेहिं आता केवलिपन्नत्तं धम्मं लभेज्जा सवणताते, तंजहा-खतेण चेव उवसमेण चेव, एवं जाव मणपज्जवनाणं उप्पाडेज्जा, तंजहा-खतेण चेव उवसमेण चेव ।

[टी०] अनन्तरं सर्वनिर्याणमुक्तम्, तच्च परम्परया धर्मश्रवणलाभादिषु, ते च यथा स्युस्तथा दर्शयन्नाह– **दोही**त्यादि कण्ठ्यम्, नवरं **खएण चेव** त्ति ज्ञानावरणीयस्य दर्शनमोहनीयस्य च कर्मणः उदयप्राप्तस्य **क्षयेण** निर्जरणेन अनुदितस्य चो**पशमेन** विपाकाननुभवेन, क्षयोपशमेनेत्युक्तं भवति, **यावत्**करणात् 'केवलं बोहिं बुज्झेज्जा, मुंडे भवित्ता अगाराओ अणगारियं पव्वएज्जा, केवलं बंभचेरवासमावसेज्जा, केवलेणं संजमेणं संजमेज्जा, केवलेणं संवरेणं संवरेज्जा, केवलं आभिणिबोहियनाणमुप्पाडेज्जा'

इत्यादि दृश्यं **यावन्मनःपर्यवज्ञानमुत्पादयेदिति**, केवलज्ञानं तु क्षयादेव भवतीति तन्नोक्तम् । इह च यद्यपि बोध्यादयः सम्यक्त्व-चारित्ररूपत्वात् केवलेन क्षयेण उपशमेन च भवन्ति तथाऽप्येते क्षयोपशमेनापि भवन्ति, श्रवणा-ऽऽभिनिबोधिकादीनि तु क्षयोपशमेनैव भवन्तीति सर्वसाधारणः क्षयोपशम उक्तः पदद्वयेनाऽतः स एव व्याख्यात इति ।

[सू० ११०] दुविहे अद्धोवमिए पन्नत्ते, तंजहा-पलिओवमे चेव सागरोवमे चेव । से किं तं पलिओवमे ? पलिओवमे-

जं जोयणवित्थिन्नं, पल्लं एगाहियप्परूढाणं ।
होज्ज निरंतरणिचितं, भरितं वालग्गकोडीणं ॥४॥
वाससते वाससते, एक्केक्के अवहडंमि जो कालो ।
सो कालो बोद्धव्वो, उवमा एगस्स पल्लस्स ॥५॥
एतेसिं पल्लाणं, कोडाकोडी हवेज्ज दसगुणिता ।
तं सागरोवमस्स उ, एगस्स भवे परीमाणं ॥६॥

[टी०] बोध्याभिनिबोधिकश्रुतावधिज्ञानानि च षट्षष्टिसागरोपमस्थितिकान्युत्कर्षतो भवन्ति, सागरोपमाणि च पल्योपमाश्रितानीति तद्द्वितयप्ररूपणामाह– **दुविहे अद्धो** इत्यादि । **उपमा** औपम्यम्, तया निर्वृत्त**मौपमिकम् अद्धा** कालस्तद्विषयमौपमिक-**मद्धौपमिकम्**, उपमानमन्तरेण यत् कालप्रमाणमनतिशयिना ग्रहीतुं न शक्यते तदद्धौपमिकमिति भावः, तच्च द्विधा– **पल्योपमं चैव सागरोपमं चैव**, तत्र पल्यवत् पल्यस्तेनोपमा यस्मिंस्तत् पल्योपमम्, तथा सागरेणोपमा यस्मिंस्तत् सागरोपमम्, सागरवन्महापरिमाणमित्यर्थः, इदं च पल्योपम-सागरोपमरूपमौपमिकं सामान्यत उद्धारा-ऽद्धा-क्षेत्रभेदात् त्रिधा, पुनरेकैकं संव्यवहार-सूक्ष्मभेदाद् द्विधा, तत्र संव्यवहारपल्योपमं नाम यावता कालेन योजनायाम-विष्कम्भोच्चत्वः पल्यो मुण्डनानन्तरमेकादि-सप्तान्ताहोरात्रप्ररूढानां वालाग्राणां भृतः प्रतिसमयं वालाग्रोद्धारे सति निर्लेपो भवति स कालो व्यावहारिकमुद्धारपल्योपममुच्यते, तेषां दशभिः कोटीकोटिभिः व्यावहारिक-मुद्धारसागरोपममुच्यते, तेषामेव वालाग्राणां दृष्टिगोचरातिसूक्ष्मद्रव्यासङ्ख्येय-

भागमात्रसूक्ष्मपनकावगाहनाऽसङ्ख्यातगुणरूपखण्डीकृतानां भृतः पल्यो येन कालेन निर्लेपो भवति तथैवोद्धारे तत् सूक्ष्ममुद्धारपल्योपमम्, तथैव च सूक्ष्ममुद्धारसागरोपमम्, अनेन च द्वीप-समुद्राः परिसङ्ख्यायन्ते, आह च–

उद्धारसागराणं अड्ढाइज्जाण जत्तिया समया ।

दुगुणादुगुणपवित्थर दीवोदहि रज्जु एवइया ॥ [बृहत्क्षेत्र० १।३] इति ।

अद्धापल्योपम-सागरोपमे अपि सूक्ष्म-बादरभेदे एवमेव, नवरं वर्षशते वर्षशते वालस्य वालासङ्ख्येयखण्डस्य चोद्धार इति, अनेन नारकादिस्थितयो मीयन्ते, क्षेत्रतोऽपि ते द्विविधे एवमेव, नवरं प्रतिसमयमेकैकाकाशप्रदेशापहारे यावता कालेन वालाग्रस्पृष्टा एव प्रदेशा उद्धियन्ते स कालो व्यावहारिक इति, यावता च वालाग्रासङ्घ्चातखण्डैः स्पृष्टाश्च अस्पृष्टाश्चोद्धियन्ते स कालः सूक्ष्म इति, एते च प्ररूपणामात्रविषये एव, आभ्यां च दृष्टिवादे स्पृष्टास्पृष्टप्रदेशविभागेन द्रव्यमाने प्रयोजनमिति श्रूयते, बादरे च त्रिविधे अपि प्ररूपणामात्रविषये एवेति, तदेवमिह प्रक्रमे उद्धार-क्षेत्रौपमिकयोर्निरुपयोगत्वादद्धौपमिकस्यैव चोपयोगित्वाद् **अद्धे**ति विशेषणं सूत्रे उपात्तमिति । अत एवाद्धापल्योपमलक्षणाभिधित्सयाऽऽह सूत्रकारः– **से किं त**मित्यादि, अथ **किं तत् पल्योपमं** यदद्धौपमिकतया निर्दिष्टमिति प्रश्ने निर्वचनमेतदनुवादेनाह-**पलिओवमे** त्ति, **पल्योपम**मेवं भवतीति वाक्यशेषः ।

जं गाहा, किल **यद्योजनविस्तीर्ण**मित्युपलक्षणत्वात् सर्वतो यद्योजनप्रमाणं **पल्यं** धान्यस्थानविशेषः एकाह एव **एकाहिक**स्तेन **प्ररूढानां** वृद्धानाम्, मुण्डिते शिरसि एकेनाह्ना यावत्यो भवन्तीत्यर्थः, एतस्य चोपलक्षणत्वादुत्कर्षतः सप्ताहप्ररूढानां वालाग्राणां **कोटयो** विभागाः सूक्ष्मपल्योपमापेक्षयाऽसंख्येयखण्डानि, बादरपल्योपमापेक्षया तु **कोटयः** सङ्ख्याविशेषाः, तासां किं भवेत् ? **भरितं** भृतम्, कथमित्याह– **निरन्तरनिचितं** निबिडतया निचयवत् कृतमिति । **वास** गाहा, एतस्मात् पल्याद्**वर्षशते वर्षशते**ऽतिक्रान्ते सति, प्रतिवर्षशतमित्यर्थः, **एकैकस्मिन्** वालाग्रे असङ्ख्येयखण्डे चाऽ**पहृते** उद्धृते सति **यः कालो** यावती अद्धा भवति प्रमाणतः **स** तावान् **कालो बोद्धव्यः**, किमित्याह– **उपमा** उपमेयः, कस्येत्याह– **एकस्य पल्यस्य**, इदमुक्तं

भवति– स काल एकं पल्योपमं सूक्ष्मं व्यावहारिकं चोच्यत इति । **एएसिं** गाहा, एतेषाम् उक्तरूपाणां सूक्ष्मबादराणां **पल्यानां** पल्योपमानां **कोटीकोटी भवेद् दशगुणिता** यदिति गम्यते, दश कोटीकोट्य इत्यर्थः, **तदेकस्य** सूक्ष्मरूपस्य बादररूपस्य वा **सागरोपमस्यैव भवेत् परिमाण**मिति ।

[सू० १११] दुविहे कोधे पन्नत्ते, तंजहा-आयपतिट्ठिते चेव परपइट्ठिए चेव, एवं नेरइयाणं जाव वेमाणियाणं । एवं जाव मिच्छादंसणसल्ले ।

[टी०] एतैश्च येषां क्रोधादीनां फलभूतकर्मस्थितिर्निरूप्यते तत्स्वरूपनिरूपणायाह– **दुविहे कोहे** इत्यादि । आत्मापराधादैहिकापायदर्शनादात्मनि प्रतिष्ठितः आत्मविषयो जातः आत्मना वा परत्राक्रोशादिना प्रतिष्ठितो जनित आत्मप्रतिष्ठितः, परेणाक्रोशादिना प्रतिष्ठितः उदीरितः परस्मिन् वा प्रतिष्ठितो जातः परप्रतिष्ठित इति । **एव**मिति यथा सामान्यतो द्विधा क्रोध उक्त एवं नारकादीनां चतुर्विंशतेर्वाच्यः, नवरं पृथिव्यादीनामसंज्ञिनामुक्तलक्षणमात्मप्रतिष्ठितत्वादि पूर्वभवसंस्कारात् क्रोधगतमवगन्तव्यमिति । एवं मानादीनि मिथ्यात्वान्तानि पापस्थानकान्यात्म-परप्रतिष्ठितविशेषणानि सामान्यपदपूर्वकचतुर्विंशतिदण्डकेनाऽध्येतव्यानि, अत एवाह– **एवं जाव मिच्छादंसणसल्ले** त्ति, एतेषां च मानादीनां स्वविकल्पजात-परजनितत्वाभ्यां स्वात्मवर्त्ति-परात्मवर्त्तित्वाभ्यां वा स्व-परप्रतिष्ठितत्वमवसेयम् । एवमेते पापस्थानाश्रितास्त्रयोदश दण्डका इति ।

[सू० ११२] दुविहा संसारसमावन्नगा जीवा पन्नत्ता, तंजहा-तसा चेव थावरा चेव ।

दुविधा सव्वजीवा पन्नत्ता, तंजहा-सिद्धा चेव असिद्धा चेव । दुविहा सव्वजीवा पण्णत्ता, तंजहा-सइंदिया चेव अणिंदिया चेव । एवं एसा गाहा फासेतव्वा जाव ससरीरी चेव असरीरी चेव –

सिद्ध-सइंदिय-काए, जोगे वेदे कसाय लेसा य ।
णाणुवओगाहारे, भासग-चरिमे य ससरीरी ॥७॥

[टी०] उक्तविशेषणानि च पापस्थानानि संसारिणामेव भवन्तीति तान् भेदत आह– **दुविहे**त्यादि कण्ठ्यमिति । ननु संसारिण एव जीवा उतान्येऽपि सन्ति?, सन्त्येवेति प्राय उभयदर्शनाय त्रयोदशसूत्रीमाह– **दुविहा सव्वे**त्यादि, कण्ठ्या चेयम्, नवरं **सेन्द्रियाः** संसारिणः, **अनिन्द्रियाः** अपर्याप्तक-केवलि-सिद्धाः २ । **एवं एस** त्ति, **एवं** सिद्धादिसूत्रोक्तक्रमेण **दुविहा सव्वजीवे**त्यादिलक्षणेन **एषा** वक्ष्यमाणा प्रस्तुतसूत्रसङ्ग्रह**गाथा स्पर्शनीया** अनुसरणीया, एतदनुसारेण त्रयोदशापि सूत्राण्यध्येतव्यानीत्यर्थः, अत एवाह– **जाव ससरीरी चेव असरीरी चेव** त्ति । **सिद्ध** गाहा, सिद्धाः सेन्द्रियाश्च सेतरा उक्ताः, एवं **काए** त्ति, कायाः पृथिव्यादयस्तानाश्रित्य सर्वजीवाः सविपर्यया वाच्याः, एवं सर्वाणि व्याख्येयानि, वाचना चैवम्–'सकायच्चेव अकायच्चेव', सकायाः पृथिव्यादिषड्विधकायविशिष्टाः संसारिणः, अकायास्तद्विलक्षणाः सिद्धाः ३, **सयोगाः** संसारिणः, **अयोगा** अयोगिनः सिद्धाश्च ४, **वेदे** त्ति सवेदाः संसारिणः, अवेदाः अनिवृत्तिबादरसम्परायविशेषादयः षट् सिद्धाश्च ५, **कसाय** त्ति, सकषायाः सूक्ष्मसम्परायान्ताः, अकषायाः उपशान्तमोहादयश्चत्वारः सिद्धाश्च ६, **लेसा य** त्ति सलेश्याः सयोग्यन्ताः संसारिणः, अलेश्याः अयोगिनः सिद्धाश्च ७, **नाणे** त्ति ज्ञानिनः सम्यग्दृष्टयोऽज्ञानिनो मिथ्यादृष्टयः ८ ।

उवओगि त्ति, 'सागारोवउत्ते च्चेय अणगारोवउत्ते च्चेय' त्ति सहाऽऽकारेण विशेषांशग्रहणशक्तिलक्षणेन वर्त्तते य उपयोगः स साकारः, ज्ञानोपयोग इत्यर्थः, तेनोपयुक्ताः साकारोपयुक्ताः, अनाकारस्तु तद्विलक्षणो दर्शनोपयोग इत्यर्थः, अभिधीयते च–

जं सामन्नग्गहणं भावाणं नेय कट्टु आगारं ।
अविसेसिऊण अत्थे दंसणमिति वुच्चए समए ॥ [ ] त्ति ।

तेनोपयुक्ता अनाकारोपयुक्ता इति ९, **आहारे** त्ति, आहारका ओजो-लोम-कवलभेदभिन्नाहारविशेषग्राहिणः, अनाहारकास्तु

विग्गहगइमावण्णा १ केवलिणो समोहया २ अजोगी य ३ ।
सिद्धा य ४ अणाहारा सेसा आहारगा जीवा ॥ [जीवसमासे ८२] इति १० । **भास**

त्ति भाषकाः भाषापर्याप्तिपर्याप्ताः, अभाषकाः तदपर्याप्तका अयोगि-सिद्धाः ११ । **चरम** त्ति **चरमा** येषां चरमो भवो भविष्यति, **अचरमास्तु** येषां भव्यत्वे सत्यपि चरमो भवो न भविष्यति, न निर्वास्यन्तीत्यर्थः १२ । **ससरीरि** त्ति सह यथासम्भवं पञ्चविधशरीरेण ये ते इन्समासान्तविधेः सशरीरिणः संसारिणः, अशरीरिणस्तु शरीरमेषामस्तीति शरीरिणस्तन्निषेधादशरीरिणः सिद्धाः १३ ॥

[सू० ११३] दो मरणाइं समणेणं भगवता महावीरेणं समणाणं णिग्गंथाणं णो णिच्चं वन्नियाइं णो णिच्चं कित्तियाइं णो णिच्चं पूइयाइं णो णिच्चं पसत्थाइं णो णिच्चं अब्भणुण्णाताइं भवंति, तंजहा-वलयमरणे चेव वसट्टमरणे चेव १। एवं णियाणमरणे चेव तब्भवमरणे चेव २। गिरिपडणे चेव तरुपडणे चेव ३। जलप्पवेसे चेव जलणप्पवेसे चेव ४। विसभक्खणे चेव सत्थोवाडणे चेव ५।

दो मरणाइं जाव णो णिच्चं अब्भणुन्नाताइं भवंति, कारणे पुण अप्पडिकुट्ठाइं, तंजहा-वेहाणसे चेव गिद्धपट्ठे चेव ६।

दो मरणाइं समणेणं भगवया महावीरेणं समणाणं निग्गंथाणं णिच्चं वन्नियाइं जाव अब्भणुण्णाताइं भवंति, तंजहा-पाओवगमणे चेव भत्तपच्चक्खाणे चेव ७। पाओवगमणे दुविहे पन्नत्ते, तंजहा-णीहारिमे चेव अनीहारिमे चेव, णियमं अपडिकम्मे ८। भत्तपच्चक्खाणे दुविहे पन्नत्ते, तंजहा-णीहारिमे चेव अणीहारिमे चेव, णियमं सपडिकम्मे ९।

[टी०] एते च संसारिणः सिद्धाश्च मरणा-ऽमरणधर्मकाः, अप्रशस्त-प्रशस्तमरणतश्चैते भवन्तीति प्रशस्ता-ऽप्रशस्तमरणनिरूपणाय नवसूत्रीमाह– **दो मरणाइ**मित्यादि, कण्ठ्या चेयम्, नवरं द्वे मरणे **श्रमणेन भगवता महावीरेण**, श्राम्यन्ति तपस्यन्तीति **श्रमणा**स्तेषाम्, ते च शाक्यादयोऽपि स्युः, यथोक्तम्– **णिग्गंथ १ सक्क २ तावस ३ गेरुय ४ आजीव ५ पंचहा समणा** [**पिण्डनि० ४४५**] इति, तद्व्यवच्छेदार्थमाह– निर्गता ग्रन्थाद् बाह्याभ्यन्तरादिति **निर्ग्रन्थाः** साधवस्तेषां **नो नित्यं** सदा **वर्णिते** तांस्तयोः प्रवर्त्तयितुमुपादेयफलतया नाभिहिते, **कीर्त्तिते** नामतः संशब्दिते उपादेयधिया, **बुइयाइं**

ति व्यक्तवाचा उक्ते उपादेयस्वरूपतः, पाठान्तरेण **पूजिते** वा तत्कारिपूजनतः, **प्रशस्ते** प्रशंसिते श्लाघिते, **शंसु स्तुतौ** [पा०धा० ७२८] इति वचनात्, **अभ्यनुज्ञाते** अनुमते यथा कुरुतेति, **वलयमरणे** त्ति **वलतां** संयमान्निवर्त्तमानानां परीषहादिबाधितत्वात् **मरणं** वलन्मरणम्, **वसट्टमरणे** त्ति इन्द्रियाणां **वशम्** अधीनता**मृतानां** गतानां स्निग्ध-दीपकलिकावलोकनाकुलितपतङ्गादीनामिव **मरणं** वशार्त्तमरणमिति ।

एवं णियाणेत्यादि, **एव**मिति दो मरणाइं समणेणमित्याद्यभिलापस्योत्तरसूत्रेष्वपि सूचनार्थः, ऋद्धि-भोगादिप्रार्थना **निदानम्**, तत्पूर्वकं मरणं **निदानमरणम्** । यस्मिन् भवे वर्त्तते जन्तुस्तद्भवयोग्यमेवायुर्बद्ध्वा पुनर्म्रियमाणस्य मरणं **तद्भवमरणम्**, एतच्च सङ्ख्यातायुष्कनर-तिरश्चामेव, तेषामेव हि तद्भवायुर्बन्धो भवतीति, उक्तं च–

मोत्तुं अकम्मभूमगनर-तिरिए सुरगणे य णेरइए ।
सेसाणं जीवाणं तब्भवमरणं तु केसिंचि ॥ [उत्तरा० नि० २२०] इति ।

सत्थोवाडणे त्ति **शस्त्रेण** क्षुरिकादिना **अवपाटनं** विदारणं स्वशरीरस्य यस्मिंस्तच्**छस्त्रावपाटनम्** । **कारणे पुणे**त्यादि, शीलभङ्गरक्षणादौ, पाठान्तरे तु **कारणेन**, **अप्रतिक्रुष्टे** अनिवारिते भगवता, वृक्षशाखादावुद्बद्धत्वाद् **विहायसि** नभसि भवं **वैहायसम्**, प्राकृतत्वेन तु **वेहाणस**मित्युक्तमिति, गृध्रैः **स्पृष्टं** स्पर्शनं यस्मिंस्तद् **गृध्रस्पृष्टम्**, यदिवा गृध्राणां भक्ष्यं **पृष्ठ**मुपलक्षणत्वादुदरादि च तद्भक्ष्यकरि-करभादि-शरीरानुप्रवेशेन महासत्त्वस्य मुमूर्षोर्यस्मिंस्तद् **गृध्रपृष्ठ**मिति ।

एते द्वे मरणे कारणे जातेऽभ्यनुज्ञाते इति। अप्रशस्तमरणानन्तरं तत् प्रशस्तं भव्यानां भवतीति तदाह– **दो मरणाइं** इत्यादि, **पादपो** वृक्षः, तस्येव छिन्नपतितस्यो**पगमनम्** अत्यन्तनिश्चेष्टतया व्यवस्थानं यस्मिंस्तत् **पादपोपगमनम्**, भक्तं भोजनं तस्यैव न चेष्टाया अपि पादपोपगमन इव प्रत्याख्यानं वर्जनं यस्मिंस्तद्भक्तप्रत्याख्यानमिति । **णीहारिमं** ति यद्वसतेरेकदेशे विधीयते तत् ततः शरीरस्य **निर्हरणात्** निस्सारणा-**न्निर्हारिमम्**, यत् पुनर्गिरिकन्दरादौ तदनिर्हरणादनिर्हारिमम्। **णियमं** ति विभक्ति-परिणामान्नियमा**दप्रतिकर्म** शरीरप्रतिक्रियावर्जं पादपोपगमनमिति ।

इङ्गितमरणं त्विह नोक्तम्, द्विस्थानकानुरोधात्, तल्लक्षणं चेदम्–

इंगियदेसम्मि सयं चउव्विहाहारचायनिप्फन्नं ।
उव्वत्तणाइजुत्तं नऽण्णेण उ इंगिणीमरणं ॥ [ ] ति ।

[सू० ११४] के अयं लोगे ? जीव च्चेव अजीव च्चेव । के अणंता लोए? जीव च्चेव अजीव च्चेव । के सासया लोगे ? जीव च्चेव अजीव च्चेव ।

[टी०] इदं च मरणादिस्वरूपं भगवता लोके प्ररूपितमिति लोकस्वरूपप्ररूपणाय प्रश्नं कारयन्नाह– **के अय**मित्यादि । **क** इति प्रश्नार्थः, **अय**मिति देशतः प्रत्यक्ष आसन्नश्च यत्र भगवता मरणादि प्रशस्ता-ऽप्रशस्तसमस्तवस्तुस्तोमतत्त्वमभ्यधायि, लोक्यत इति **लोक** इति प्रश्नः, अस्य निर्वचनं **जीवाश्चाजीवाश्चे**ति, पञ्चास्तिकायमयत्वाल्लोकस्य, तेषां च जीवाजीवरूपत्वादिति, उक्तं च–

पंचत्थिकायमइयं लोगमणाइणिहणं जिणक्खायं [ध्यानश० ५३] ति ।

लोकस्वरूपभूतानां च जीवाजीवानां स्वरूपं प्रश्नपूर्वकेण सूत्रद्वयेनाह– **के अणंते**त्यादि, **के अनन्ताः लोके ?** इति प्रश्नः, अत्रोत्तरं **जीवा अजीवाश्चे**ति । एत एव च **शाश्वता** द्रव्यार्थतयेति ।

[सू० ११५] दुविधा बोधी पन्नत्ता, तंजहा-णाणबोधी चेव दंसणबोधी चेव। दुविहा बुद्धा पन्नत्ता, तंजहा-णाणबुद्धा चेव दंसणबुद्धा चेव । एवं मोहे, मूढा।

[टी०] ये चैतेऽनन्ताः शाश्वताश्च जीवास्ते बोधि-मोहलक्षणधर्मयोगाद् बुद्धा मूढाश्च भवन्तीति दर्शनाय द्विस्थानकानुपातेन सूत्रचतुष्टयमाह– **दुविहे**त्यादि, बोधनं **बोधिः** जिनधर्मलाभः, **ज्ञानबोधिः** ज्ञानावरणक्षयोपशमसम्भूता ज्ञानप्राप्तिः, **दर्शनबोधिः** दर्शनमोहनीयक्षयोपशमादिसम्पन्नः श्रद्धानलाभ इति, एतद्वन्तो **द्विविधा बुद्धाः**, एते च धर्मत एव भिन्ना न धर्मितया, ज्ञान-दर्शनयोरन्योन्याविनाभूतत्वादिति । **एवं मोहे मूढ** त्ति, यथा बोधिर्बुद्धाश्च द्विधोक्ताः तथा मोहो मूढाश्च वाच्या इति, तथाहि– 'दुविहे मोहे पन्नत्ते तं०–णाणमोहे चेव, दंसणमोहे चेव', ज्ञानं मोहयति आच्छादयतीति ज्ञानमोहो ज्ञानावरणोदयः, एवं 'दंसणमोहे चेव' सम्यग्दर्शनमोहोदय इति । 'दुविहा

मूढा पं० तं० णाणमूढा चेव', ज्ञानमूढा उदितज्ञानावरणाः, 'दंसणमूढा चेव' दर्शनमूढा मिथ्यादृष्टय इति ।

[सू० ११६] णाणावरणिज्जे कम्मे दुविधे पन्नत्ते, तंजहा-देसणाणावरणिज्जे चेव सव्वणाणावरणिज्जे चेव । दरिसणावरणिज्जे कम्मे एवं चेव ।

वेयणिज्जे कम्मे दुविहे पन्नत्ते, तंजहा-सातावेयणिज्जे चेव असातावेयणिज्जे चेव ।

मोहणिज्जे कम्मे दुविहे पन्नत्ते, तंजहा-दंसणमोहणिज्जे चेव चरित्तमोहणिज्जे चेव ।

आउए कम्मे दुविहे पन्नत्ते, तंजहा-अद्धाउए चेव भवाउए चेव ।

णामे कम्मे दुविहे पन्नत्ते, तंजहा-सुभणामे चेव असुभणामे चेव ।

गोत्ते कम्मे दुविहे पन्नत्ते, तंजहा-उच्चागोते चेव णीयागोते चेव ।

अंतराइए कम्मे दुविहे पन्नत्ते, तंजहा-पडुप्पन्नविणासिए चेव, पिहेति य आगामिपहं ।

[टी०] द्विविधोऽप्ययं मोहो ज्ञानावरणादिकर्मनिबन्धनमिति सम्बन्धेन ज्ञानावरणादिकर्मणामष्टाभिः सूत्रैर्द्वैविध्यमाह— **णाणे**त्यादि, सुगमानि चैतानि, नवरं ज्ञानमावृणोतीति **ज्ञानावरणीयम्**, देशं ज्ञानस्याऽऽभिनिबोधिकादिमावृणोतीति **देशज्ञानावरणीयम्**, सर्वं ज्ञानं केवलाख्यमावृणोतीति **सर्वज्ञानावरणीयम्**, केवलावरणं हि आदित्यकल्पस्य केवलज्ञानरूपस्य जीवस्याच्छादकतया सान्द्रमेघवृन्दकल्पमिति तत् सर्वज्ञानावरणम्, मत्याद्यावरणं तु घनातिच्छादितादित्येषत्प्रभाकल्पस्य केवलज्ञानदेशस्य कट-कुट्यादिरूपावरणतुल्यमिति देशावरणमिति, पठ्यते च—

केवलणाणावरणं १ दंसणछक्कं च मोहबारसगं अनन्तानुबन्ध्यादीत्यर्थः ।
ता सव्वघाइसन्ना भवंति मिच्छत्तवीसइमं ॥ [बन्धश० ७८] ति ।

अथवा देशोपघाति-सर्वोपघातिफड्डकापेक्षया देश-सर्वावरणत्वमस्य, यदाह—

मतिसुयणाणावरणं दंसणमोहं च तदुवघाईणि ।
तप्फड्डगाइं दुविहाइं देस-सव्वोवघाईणि ॥१॥ इत्यादि।

[तथा दर्शनं सामान्यार्थबोधरूपमावृणोतीति दर्शनावरणीयम्, उक्तं च–

दंसणसीले जीवे दंसणघायं करेइ जं कम्मं ।

तं पडिहारसमाणं दंसणवरणं भवे जीवे ॥ [**प्रथमकर्म०** १९] इति ।

एवं चेव त्ति देशदर्शनावरणीयं चक्षुरचक्षुरवधिदर्शनावरणीयम्, सर्वदर्शनावरणीयं तु निद्रापञ्चकं केवलदर्शनावरणीयं चेत्यर्थः, भावना तु पूर्ववदिति ।

तथा वेद्यते अनुभूयत इति **वेदनीयम्, सातं** सुखं तद्रूपतया वेद्यते यत्तत्तथा, दीर्घत्वं प्राकृतत्वात्, इतरद् एतद्विपरीतम्, आह च-

महुलित्तनिसियकरवालधारजीहाए जारिसं लिहणं ।

तारिसयं वेयणियं सुहदुहउप्पायगं मुणह ॥ [**प्रथमकर्म०** २८] इति ।

मोहयतीति **मोहनीयम्**, तथाहि–

जह मज्जपाणमूढो लोए पुरिसो परव्वसो होइ ।

तह मोहेण वि मूढो जीवो उ परव्वसो होइ ॥ [**प्रथमकर्म०** ३४] इति ।]

दर्शनं मोहयतीति **दर्शनमोहनीयं** मिथ्यात्व-मिश्र-सम्यक्त्वभेदम्, **चारित्रं** सामायिकादि मोहयति यत् कषाय १६ नोकषाय ९ भेदं तत्तथा ।

एति च याति चेत्**यायुः**, एतद्रूपं च–

दुक्खं न देइ आउं न वि य सुहं देइ चउसु वि गईसु ।

दुक्ख-सुहाणाहारं धरेइ देहट्ठियं जीयं ॥ [**प्रथमकर्म०** ६३] ति ।

अद्धायुः कायस्थितिरूपम्, भावना तु प्राग्वत्, **भवायु**र्भवस्थितिरिति, विचित्रपर्यायैर्नामयति **तन्नाम**, एतत्स्वरूपं च–

जह चित्तयरो निउणो अणेगरूवाइं कुणइ रूवाइं ।

सोहणमसोहणाइं चोक्खमचोक्खेहिं वण्णेहिं ॥

तह नामं पि हु कम्मं अणेगरूवाइं कुणइ जीवस्स ।

सोहणमसोहणाइं इट्ठाणिट्ठाइं लोयस्स ॥ [**प्रथमकर्म०** ६७-६८] इति ।

शुभं तीर्थकरादि, **अशुभम्** अनादेयत्वादीति ।

पूज्योऽयमित्यादिव्यपदेशरूपां गां वाचं त्रायत इति **गोत्रम्**, स्वरूपं चास्येदम्–

जह कुंभारो भंडाइं कुणइ पुज्जेयराइं लोयस्स ।
इय गोयं कुणइ जियं लोए पुज्जेयरावत्थं ॥ [ ] इति ।

उच्चैर्गोत्रं पूज्यत्वनिबन्धनमितरत्तद्विपरीतम् ।

जीवं चार्थसाधनं चाऽन्तरा एति पततीत्**यन्तरायम्**, इदं चैवम्–

जह राया दाणाइ ण कुणइ भंडारिए विकूलम्मि ।
एवं जेणं जीवो कम्मं तं अंतरायं ति ॥ [ ]

पडुपन्नविणासिए चेव त्ति **प्रत्युत्पन्नं** वर्त्तमानलब्धं वस्त्वित्यर्थो **विनाशितम्** उपहतं येन तत्तथा, पाठान्तरे प्रत्युत्पन्नं विनाशयतीत्येवंशीलं **प्रत्युत्पन्नविनाशि, चैवः** समुच्चये, इत्येकम्, अन्यच्च **पिधत्ते च** निरुणद्धि च, **आगामिनो** लब्धव्यस्य वस्तुनः **पन्था** आगामिपथस्तमिति, क्वचि**दागामिपथा**निति दृश्यते, क्वचिच्च **आगमपहं** ति, तत्र च लाभमार्गमित्यर्थः ।

[सू० ११७] दुविहा मुच्छा पन्नत्ता, तंजहा-पेज्जवत्तिता चेव दोसवत्तिता चेव ।

पेज्जवत्तिता मुच्छा दुविहा पन्नत्ता, तंजहा-माया चेव लोभे चेव ।

दोसवत्तिता मुच्छा दुविहा पन्नत्ता, तंजहा-कोधे चेव माणे चेव ।

[टी०] इदं चाष्टविधं कर्म मूर्च्छाजन्यमिति मूर्च्छास्वरूपमाह– **दुविहे**त्यादि सूत्रत्रयं कण्ठ्यम्, नवरं **मूर्च्छा** मोहः सदसद्विवेकनाशः, **प्रेम** रागो **वृत्तिः** वर्त्तनं रूपं **प्रत्ययो** वा हेतुर्यस्याः सा प्रेमवृत्तिका प्रेमप्रत्यया वा, एवं द्वेषवृत्तिका द्वेषप्रत्यया वेति ।

[सू० ११८] दुविधा आराहणा पन्नत्ता, तंजहा-धम्मिताराहणा चेव केवलि-आराहणा चेव।

धम्मियाराहणा दुविहा पन्नत्ता, तंजहा- सुतधम्माराहणा चेव चरित्त-धम्माराहणा चेव ।

केवलिआराहणा दुविधा पन्नत्ता, तंजहा-अंतकिरिया चेव कप्प-विमाणोववत्तिया चेव ।

[टी०] मूर्च्छोपात्तकर्मणश्च क्षय आराधनयेति तां सूत्रत्रयेणाह– **दुविहे**त्यादि सूत्रत्रयं कण्ठ्यम्, नवरम् आराधन**माराधना** ज्ञानादिवस्तुनोऽनुकूलवर्तित्वम्, निरतिचार-

ज्ञानाद्यासेवेति यावत्, धर्मेण श्रुत-चारित्ररूपेण चरन्तीति धार्मिकाः साधवस्तेषामियं धार्मिकी, सा चासावाराधना च **धार्मिकाराधना**, केवलिनां श्रुताऽ-वधि-मनःपर्याय-केवलज्ञानिनामियं कैवलिकी, सा चासावाराधना चेति **कैवलिकाराधने**ति। **सुयधम्मे**त्यादौ विषयभेदेनाराधनाभेद उक्तः, **केवलिआराहणे**त्यादौ तु फलभेदेनेति, तत्र **अन्तो** भवान्तः, तस्य **क्रिया अन्तक्रिया**, भवच्छेद इत्यर्थः, तद्धेतुर्याऽऽराधना शैलेशीरूपा साऽन्तक्रियेति, उपचारात्, एषा च क्षायिकज्ञानकेवलिनामेव भवति। तथा **कल्पेषु** देवलोकेषु, न तु ज्योतिश्चारे, **विमानानि** देवावासविशेषाः, अथवा **कल्पा**श्च सौधर्मादयो **विमानानि** च तदुपरिवर्त्तिग्रैवेयकादीनि **कल्पविमानानि**, तेषू**पपत्ति**ः उपपातो जन्म यस्याः सकाशात् सा **कल्पविमानोपपत्तिका** ज्ञानाद्याराधना, एषा च श्रुतकेवल्यादीनां भवतीति, एवंफला चेयमनन्तरफलद्वारेणोक्ता, परम्परया तु भवान्तक्रियानुपातिन्येवेति ।

[सू० ११९] दो तित्थगरा नीलुप्पलसामा वण्णेणं पन्नत्ता, तंजहा-मुणिसुव्वते चेव अरिट्ठनेमी चेव १।

दो तित्थगरा पियंगुसामा वण्णेणं पन्नत्ता, तंजहा-मल्ली चेव पासे चेव २।

दो तित्थगरा पउमगोरा वण्णेणं पन्नत्ता, तंजहा-पउमप्पहे चेव वासुपुज्जे चेव ३।

दो तित्थगरा चंदगोरा वण्णेणं पन्नत्ता, तंजहा-चंदप्पभे चेव पुप्फदंते चेव ४।

[टी०] ज्ञानाद्याराधनाऽनन्तरमुक्ता, तत्फलभूताश्च तीर्थकरास्तैर्वा सा सम्यक् कृता देशिता वेति तीर्थकरान् द्विस्थानकानुपातेनाह– **दो तित्थयरे**त्यादि सूत्रचतुष्टयं कण्ठ्यम्, नवरं **पद्मं** रक्तोत्पलम्, तद्वद् गौरौ **पद्मगौरौ**, रक्ताविवर्त्यर्थः, तथा **चन्द्रगौरौ** चन्द्रशुभ्राविवर्त्यर्थः ।

[सू० १२०] सच्चप्पवायपुव्वस्स णं दुवे वत्थू पन्नत्ता ।

[टी०] तीर्थकरस्वरूपमनन्तरमुक्तम्, तीर्थकर्तृत्वाच्च तीर्थकराः, तीर्थं च प्रवचनमतः प्रवचनैकदेशस्य पूर्वविशेषस्य द्विस्थानकावतारायाह– **सच्चप्पवाये**त्यादि, सद्भ्यो जीवेभ्यो हितः **सत्य**ः संयमः सत्यवचनं वा, स यत्र सभेदः सप्रतिपक्षश्च प्रकर्षेणोद्यते

अभिधीयते तत् **सत्यप्रवादम्**, तच्च तत् **पूर्वं** च सकलश्रुतात् पूर्वं क्रियमाणत्वादिति **सत्यप्रवादपूर्वम्**, तच्च षष्ठम्, तत्परिमाणं च एका पदकोटी षट्पदाधिका, तस्य **द्वे वस्तुनी**, **वस्तु** च तद्विभागविशेषोऽध्ययनादिवदिति ।

[सू० १२१] पुव्वाभद्दवयाणक्खत्ते दुतारे पन्नत्ते । उत्तराभद्दवयाणक्खत्ते दुतारे पण्णत्ते । एवं पुव्वा फग्गुणी उत्तरा फग्गुणी ।

[टी०] अनन्तरं षष्ठपूर्वस्वरूपमुक्तमधुना पूर्वशब्दसाम्यात् पूर्वभद्रपदानक्षत्रस्वरूपमाह– **पुव्वे**त्यादि कण्ठ्यं । **उत्तरे**त्यादि कण्ठ्यम् ।

[सू० १२२] अंतो णं मणुस्सखेत्तस्स दो समुद्दा पन्नत्ता, तंजहा-लवणे चेव कालोदे चेव ।

[टी०] नक्षत्रवन्तश्च द्वीपाः समुद्राश्चेति समुद्रद्विस्थानकमाह– **अंतो ण**मित्यादि, **अन्तः** मध्ये **मनुष्यक्षेत्रस्य** मनुष्योत्पत्त्यादिविशिष्टाकाशखण्डस्य पञ्चचत्वारिंश-द्योजनलक्षप्रमाणस्य, शेषं कण्ठ्यमिति ।

[सू० १२३] दो चक्कवट्टी अपरिचत्तकामभोगा कालमासे कालं किच्चा अहेसत्तमाए पुढवीए अप्पतिट्ठाणे णरए णेरइयत्ताए उववन्ना, तंजहा-सुभूमे चेव बंभदत्ते चेव ।

[टी०] मनुष्यक्षेत्रप्रस्तावाद्भरतक्षेत्रोत्पन्नोत्तमपुरुषाणां नरकगामितया द्विस्थानका-वतारमाह– **दो चक्कवट्टी**त्यादि, द्वौ **चक्रेण** रत्नभूतप्रहरणविशेषेण वर्त्तितुं शीलं ययोस्तौ चक्रवर्त्तिनौ, **कामभोग** त्ति **कामौ** च शब्द-रूपे **भोगाश्च** गन्ध-रस-स्पर्शाः कामभोगाः, न परित्यक्तास्ते यकाभ्यां तौ तथा, **कालमासे** त्ति **कालस्य** मरणस्य **मासः**, उपलक्षणं चैतत् पक्षा-ऽहोरात्रादेः, ततश्च **कालमासे**, मरणावसर इति भावः, **कालं** मरणं **कृत्वा अधःसप्तम्यां पृथिव्याम्**, तमस्तमायामित्यर्थः, **अधो**ग्रहणं विना सप्तमी उपरिष्टाच्चिन्त्यमाना रत्नप्रभाऽपि स्यादित्यधोग्रहणम्, **अप्रतिष्ठाने नरके** पञ्चानां मध्यमे **नैरयिकत्वेनोत्पन्नौ**, **सुभूमो**ऽष्टमो **ब्रह्मदत्तश्च** द्वादशः, तत्र च तयोस्त्रयस्त्रिंशत् सागरोपमाणि स्थितिरिति ।

[सू० १२४] असुरिंदवज्जियाणं भवणवासीणं देवाणं देसूणाइं दो

पलिओवमाइं ठिती पन्नत्ता १। सोहम्मे कप्पे देवाणं उक्कोसेणं दो सागरोवमाइं ठिती पन्नत्ता २। ईसाणे कप्पे देवाणं उक्कोसेणं सातिरेगाइं दो सागरोवमाइं ठिती पन्नत्ता ३। सणंकुमारे कप्पे देवाणं जहन्नेणं दो सागरोवमाइं ठिती पन्नत्ता ४। माहिंदे कप्पे देवाणं जहन्नेणं साइरेगाइं दो सागरोवमाइं ठिती पन्नत्ता ५।

दोसु कप्पेसु कप्पित्थियाओ पन्नत्ताओ, तंजहा-सोहम्मे चेव ईसाणे चेव १।

दोसु कप्पेसु देवा तेउलेस्सा पन्नत्ता, तंजहा-सोहम्मे चेव ईसाणे चेव २।

दोसु कप्पेसु देवा कायपरियारगा पन्नत्ता, तंजहा-सोहम्मे चेव ईसाणे चेव ३। दोसु कप्पेसु देवा फासपरियारगा पन्नत्ता, तंजहा-सणंकुमारे चेव माहिंदे चेव ४। दोसु कप्पेसु देवा रूवपरियारगा पन्नत्ता, तंजहा-बंभलोगे चेव लंतगे चेव ५। दोसु कप्पेसु देवा सद्दपरियारगा पन्नत्ता, तंजहा-महासुक्के चेव सहस्सारे चेव ६। दो इंदा मणपरियारगा पन्नत्ता, तंजहा-पाणते चेव अच्चुते चेव ७।

[टी०] नारकाणां चासङ्ख्येयकालाऽपि स्थितिर्भवतीति भवनपत्यादीनामपि तां दर्शयन् पञ्चसूत्रीमाह- **असुरेत्यादि, असुरेन्द्रौ** चमर-बली, **तद्वर्जितानां** तत्सामानिक-वर्जितानां च, सूत्रे **इन्द्रग्रहणेन** सामानिकानामपि ग्रहणाद्, अन्यथा सामानिकत्वमेव तेषां न स्यादिति, शेषाणां त्रायस्त्रिंशादीनामसुराणां तदन्येषां च **भवनवासिनां देवनामित्यसुरेन्द्रवर्जं** तन्नागकुमारादीन्द्राणामित्यर्थः, उत्कर्षतो **द्वे पल्योपमे किञ्चिदूने स्थितिः प्रज्ञप्ता**, उत्कर्षत एवैतत्, जघन्यतस्तु दश वर्षसहस्राणीति, शेषं सुगमम्, नवरं सौधर्मादिष्वियं स्थितिः—

दो १ साहि २ सत्त ३ साहिय ४ दस ५ चोद्दस ६ सत्तर चैव ७ अयराइं ।
सोहम्मा जा सुक्को तदुवरि एक्केक्कमारोवे ॥ [बृहत्सं० १२] इति । इयमुत्कृष्टा, जघन्या तु

पलियं १ अहियं २ दो सार ३ साहिया ४ सत्त ५ दस य ६ चोद्दस य ७ ।
सत्तरस सहस्सारे ८ तदुवरि एक्केक्कमारोवे ॥ [बृहत्सं० १४] इति ।

देवलोकप्रस्तावात् स्त्र्यादिद्वारेण देवलोकद्विस्थानकावतारं सप्तसूत्र्याऽऽह– **दोसु** इत्यादि, **कल्पयोः** देवलोकयोः स्त्रियः **कल्पस्त्रियो** देव्यः, परतो न सन्ति, शेषं कण्ठ्यमिति १, नवरं **तेउलेस** त्ति तेजोरूपा लेश्या येषां ते तेजोलेश्याः, ते च सौधर्मेशानयोरेव, न परतः, तयोस्तेजोलेश्या एव, नेतरे, आह च–

किण्हा नीला काऊ तेऊलेसा य भवण-वंतरिया ।
जोइस सोहम्मीसाणे तेऊलेसा मुणेयव्वा ॥ [बृहत्सं० १९३] इति २ ।

कायपरियारग त्ति परिचरन्ति सेवन्ते स्त्रियमिति परिचारकाः, कायतः परिचारकाः **कायपरिचारकाः** ३, एवमुत्तरत्रापि, नवरं स्पर्शादिपरिचारकाः स्पर्शादेरेवोपशान्त-वेदोपतापा भवन्तीत्यभिप्रायः । आनतादिषु चतुर्षु कल्पेषु मनःपरिचारका देवा भवन्तीति वक्तव्ये द्विस्थानकानुरोधाद् **दो इंदा** इत्युक्तम्, आनतादिषु हि द्वाविन्द्राविति, गाथाऽत्र–

दो कायप्पवियारा कप्पा फरिसेण दोन्नि दो रूवे ।
सद्दे दो चउर मणे उवरिं परियारणा नत्थि ॥ [बृहत्सं० १८१] त्ति ।

[सू० १२५] जीवा णं दुट्ठाणणिव्वत्तिते पोग्गले पावकम्मत्ताए चिणिंसु वा चिणंति वा चिणिस्संति वा, तंजहा-तसकायनिव्वत्तिते चेव थावरकायनिव्वत्तिते चेव १। एवं उवचिणिंसु वा उवचिणंति वा उवचिणिस्संति वा २, बंधिंसु वा बंधंति वा बंधिस्संति वा ३, उदीरिंसु वा उदीरेंति वा उदीरिस्संति वा ४, वेदेंसु वा वेदेंति वा वेदिस्संति वा ५, णिज्जरिंसु वा णिज्जरिंति वा णिज्जरिस्संति वा ६।

[टी०] इयं च परिचारणा कर्मतः, कर्म च जीवाः स्वहेतुभिः कालत्रयेऽपि चिताद्यवस्थं कुर्वन्तीत्याह– **जीवा ण**मित्यादिसूत्राणि षट् सुगमानि च, नवरं **जीवा** जन्तवः, **णं** वाक्यालङ्कारे, द्वयोः **स्थानयोः** त्रस-स्थावरकायलक्षणयोः समाहारो **द्विस्थानम्**, तत्र मिथ्यात्वादिभिर्ये निर्वर्त्तिताः सामान्येनोपार्जिताः वक्ष्यमाणावस्थाषट्क-योग्यीकृताः द्वयोर्वा स्थानयोः निर्वृत्तिर्येषां ते **द्विस्थाननिर्वृत्तिका**स्तान् पुद्गलान् कार्मणान्, **पापकर्म** घातिकर्म सर्वमेव वा ज्ञानावरणादि, तद्भावस्तत्ता, तया **पापकर्मतया**,

तद्रूपतयेत्यर्थः, **चितवन्तो वा** अतीतकाले, **चिन्वन्ति वा** सम्प्रति, **चेष्यन्ति वा** अनागतकाले केचिदिति गम्यते, चयनं च कषायादिपरिणतस्य कर्मपुद्गलोपादानमात्रम्, उपचयनं तु चितस्याबाधाकालं मुक्त्वा ज्ञानावरणीयादितया निषेकः, स चैवम्– प्रथमस्थितौ बहुतरं कर्मदलिकं निषिञ्चति ततो द्वितीयायां विशेषहीनमेवं **जावुक्कोसियाए विसेसहीणं णिसिंचइ** [ ] त्ति, बन्धनं तु तस्यैव ज्ञानावरणादितया निषिक्तस्य पुनरपि कषायपरिणतिविशेषान्निकाचनमिति, उदीरणं त्वनुदयप्राप्तस्य करणेनाकृष्योदये क्षेपणमिति, **वेदनम्** अनुभवः, **निर्जरा** कर्मणोऽकर्मताभवनमिति ।

[सू० १२६] दुपएसिता खंधा अणंता पण्णत्ता । दुपदेसोगाढा पोग्गला अणंता पन्नत्ता। एवं जाव दुगुणलुक्खा पोग्गला अणंता पण्णत्ता ।

दुट्ठाणं सम्मत्तं ।

[टी०] कर्म च पुद्गलात्मकमिति पुद्गलान् द्रव्य-क्षेत्र-काल-भावैर्द्विस्थानकावतारेण निरूपयन्नाह– **दुपएसी**त्यादिसूत्राणि त्रयोविंशतिः, सुगमा चेयम्, नवरम् **एवं यावत्**करणात् **दुसमयट्ठिइए**त्यादिसूत्राण्येकविंशतिर्वाच्यानि, कालं पञ्च-द्वि-पञ्चाऽष्टभेदान् वर्ण-गन्ध-रस-स्पर्शांश्चाश्रित्येति, वाचना चैवं 'दुसमयट्ठितिया पोग्गले'त्यादि ।

॥ द्विस्थानकस्य चतुर्थ उद्देशकः समाप्तः ॥

इति श्रीमत्तपागच्छाधिराजभट्टारकपुरन्दरसूरीश्वर**श्रीविजयसेनसूरि**राज्ये
श्रीमत्तपागच्छशृंगारहारसूरीश्वर**श्रीविजयदेवसूरि**यौवराज्ये
पण्डित**श्रीकुशलवर्धनगणि**शिष्यनगर्षिगणिना स्ववाचनपरोपकारकृते
कृतोद्धाररूपयां श्रीसकलवाचकशिरोमणिमहोपाध्यायश्रीविमलहर्षगणिभिः
संशोधितायां सुखावबोधायां श्रीस्थानाङ्गदीपिकायां
द्विस्थानकाख्यं द्वितीयमध्ययनं
समाप्तम्।

अथ तृतीयमध्ययनं त्रिस्थानकम् ।

प्रथम उद्देशकः ।

[सू० १२७] तओ इंदा पण्णत्ता, तंजहा-णामिंदे, ठवणिंदे, दव्विंदे ।
तओ इंदा पन्नत्ता, तंजहा-णाणिंदे, दंसणिंदे, चरित्तिंदे ।
तओ इंदा पन्नत्ता, तंजहा-देविंदे, असुरिंदे, मणुस्सिंदे ।

[टी०] द्विस्थानकानन्तरं त्रिस्थानकमेव भवति सङ्ख्याक्रमप्रामाण्यादित्यनेन सम्बन्धेनायातस्य चतुरनुयोगद्वारस्य चतुरुद्देशकस्यास्य तत्रापि द्वितीयाध्ययनान्त्योद्देशके जीवादिपर्याया उक्ता अस्याप्यध्ययनस्य प्रथमोद्देशके त एवाभिधीयन्त इत्येवम्-सम्बन्धस्यैतत्प्रथमोद्देशकस्य तत्राप्यनन्तरोद्देशकान्त्यसूत्रे पुद्गलधर्मा उक्ता एतत्प्रथमसूत्रे तु जीवधर्मा उच्यन्त इत्येवंसम्बन्धस्यैतदादिसूत्रस्य **तओ इंदे**त्यादेर्व्याख्या, सा च सुकरैव, नवरमिन्दनाद् ऐश्वर्याद् **इन्द्रः**, **नाम** संज्ञा, तदेव यथार्थमिन्द्रेत्यक्षरात्मकमिन्द्रो **नामेन्द्रः**, अथवा सचेतनस्याचेतनस्य वा यस्येन्द्र इत्ययथार्थं नाम क्रियते स नाम-नामवतोरभेदोपचारान्नाम चासाविन्द्रश्चेति **नामेन्द्रः**,

अयमर्थः-**यद्वस्त्वि**त्यादिना यथार्थमिन्द्र इत्याद्युक्तम् १, **स्थित**मित्यादिना त्वयथार्थं गोपालादाविन्द्रेत्यादि २, **यादृच्छिक**मनर्थकं डित्थादीति ३ ।

तथा इन्द्राद्यभिप्रायेण स्थाप्यत इति स्थापना लेप्यादिकर्म, सैवेन्द्रः **स्थापनेन्द्रः**, इन्द्रप्रतिमा साकारस्थापनेन्द्रः, अक्षादिन्यासस्त्वितर इति । स्थापनालक्षणमिदम्-

यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च तत्करणि ।
लेप्यादिकर्म तत् स्थापनेति क्रियतेऽल्पकालं च ॥ [ ] इति ।

तथा- **लेप्पगहत्थी हत्थि त्ति एस सब्भाविया भवे ठवणा ।**
होइ असब्भावे पुण हत्थि त्ति निरागिई अक्खो ॥ [आव०नि० १४४७] त्ति।

तथा द्रवति गच्छति तांस्तान् पर्यायान्, द्रूयते वा तैस्तैः पर्यायैः, द्रोर्वा सत्ताया अवयवो विकारो वा, वर्णादिगुणानां वा द्रावः समूह इति द्रव्यम्, तच्च भूतभावं भाविभावं चेति, आह च-

दवए १ दुयए २ दोरवयवो विगारो ३ गुणाण संद्रावो ४ ।
दव्वं भव्वं भावस्स भूयभावं च जं जोग्गं ॥ [**विशेषाव० २८**] ति ।

तथा– **भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके ।**
तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं गदितम् ॥ [ ]

तथा अनुपयोगो द्रव्यमप्रधानं चेति, तत्र द्रव्यं चासाविन्द्रश्चेति **द्रव्येन्द्रः**, स च द्विधा आगमतो नोआगमतश्चेत्यादि वृत्तौ, तथा भव्यो योग्य इन्द्रशब्दार्थं ज्ञास्यति यो न तावद्विजानाति स भव्य इति, तस्य शरीरं भव्यशरीरम्, तदेव द्रव्येन्द्रो भव्यशरीरद्रव्येन्द्रः, अयमत्र भावार्थः- भाविनीं वृत्तिमङ्गीकृत्य इन्द्रोपयोगाधारत्वात् मधुघटादिन्यायेनैव तद् बालादिशरीरं भव्यशरीरद्रव्येन्द्र इति। स द्रव्येन्द्रोऽवस्थाभेदेन त्रिविधः, तद्यथा- एकभविको बद्धायुष्कोऽभिमुखनाम-गोत्रश्चेति, तत्र एकस्मिन् भवे तस्मिन्नेवातिक्रान्ते भावी एकभविको योऽनन्तर एव भवे भावेन्द्रतयोत्पत्स्यत इति, स चोत्कर्षतस्त्रीणि पल्योपमानि भवति, देवकुर्वादिमिथुनकस्य भवनपत्यादीन्द्रतयोत्पत्तिसम्भवादिति, तथा स एवेन्द्रायुर्बन्धानन्तरं बद्धमायुरनेनेति बद्धायुरुच्यते, स चोत्कर्षतः पूर्वकोटीत्रिभागं यावद्, अस्मात् परतः आयुष्कबन्धाभावात्, तथा अभिमुखे संमुखे जघन्योत्कर्षाभ्यां समयान्तर्मुहूर्त्तानन्तरभावितया नाम-गोत्रे इन्द्रसम्बन्धिनी यस्य स तथा, इति द्रव्येन्द्रः भावेन्द्रस्त्विह त्रिस्थानकानुरोधान्नोक्तः, तल्लक्षणं चेदम्– भावम् इन्दनक्रियानुभव-लक्षणपरिणाममाश्रित्येन्द्र इन्दनपरिणामेन वा भवतीति भावः, स चासाविन्द्रश्चेति भावेन्द्रः इति।

इदानीं भावेन्द्रं त्रिस्थानकावतारेणाह– **तओ इंदे**त्यादि कण्ठ्यम्, नवरं ज्ञानेन ज्ञानस्य ज्ञाने वा इन्द्रः परमेश्वरो **ज्ञानेन्द्रः** अतिशयवच्छ्रुताद्यन्यतरज्ञानवशविवेचित-वस्तुविस्तरः केवली वा, एवं **दर्शनेन्द्रः** क्षायिकसम्यग्दर्शनी, **चरित्रेन्द्रो** यथाख्यात-चारित्रः, एतेषां च भावेन सकलभावप्रधानक्षायिकलक्षणेन विवक्षितक्षायोपशमिकलक्षणेन वा भावतः परमार्थतो वेन्द्रत्वात् सकलसंसार्यप्राप्तपूर्वगुणलक्ष्मीलक्षणपरमैश्वर्ययुक्तत्वाद् भावेन्द्रताऽवसेयेति । उक्तमाध्यात्मिकैश्वर्यापेक्षया भावेन्द्रत्रैविध्यमथ बाह्यैश्वर्यापेक्षया तदेवाह– **तओ इंदे**त्यादि भावितार्थम्, नवरं **देवा** वैमानिका ज्योतिष्क-वैमानिका

वा रूढेः, **असुराः** भवनपतिविशेषा भवनपति-व्यन्तरा वा सुरपर्युदासात्, **मनुजेन्द्रः** चक्रवर्त्त्यादिरिति ।

[सू० १२८] तिविहा विकुव्वणा पन्नत्ता, तंजहा-बाहिरते पोग्गलए परियातित्ता एगा विकुव्वणा, बाहिरते पोग्गले अपरियादित्ता एगा विकुव्वणा, बाहिरए पोग्गले परियादित्ता वि अपरियादित्ता वि एगा विकुव्वणा ।

तिविहा विकुव्वणा पन्नत्ता, तंजहा-अब्भंतरए पोग्गले परियाइत्ता एगा विकुव्वणा, अब्भंतरए पोग्गले अपरियाइत्ता एगा विकुव्वणा, अब्भंतरए पोग्गले परियातित्ता वि अपरियाइत्ता वि एगा विकुव्वणा ।

तिविहा विकुव्वणा पन्नत्ता, तंजहा-बाहिरब्भंतरए पोग्गले परियाइत्ता एगा विकुव्वणा, बाहिरब्भंतरए पोग्गले अपरियादित्ता एगा विकुव्वणा, बाहिरब्भंतरए पोग्गले परियाइत्ता वि अपरियाइत्ता वि एगा विकुव्वणा ।

[टी०] त्रयाणामप्येषां वैक्रियकरणादिशक्तियुक्ततयेन्द्रत्वमिति विकुर्वणानिरूपणायाह- **तिविहे**त्यादिसूत्रत्रयी कण्ठ्या । नवरं **बाह्यान् पुद्गलान्** भवधारणीयशरीरानवगाढक्षेत्रप्रदेशवर्त्तिनो वैक्रियसमुद्घातेन **पर्यादाय** गृहीत्वै**का विकुर्वणा** 'क्रियते' इति शेषः, ता**नपर्यादाय** या तु भवधारणीयरूपैव साऽन्या, यत् पुनर्भवधारणीयस्यैव किञ्चिद्विशेषापादनं सा **पर्यादायापि अपर्यादायापि** इति तृतीया व्यपदिश्यते, अथवा **विकुर्वणा** भूषाकरणम्, तत्र बाह्यपुद्गलानादायाभरणादीन् अपर्यादाय केशनखसमारचनादिना उभयतस्तूभयथेति, अथवाऽपर्यादायेति कृकलास-सर्पादीनां रक्तत्वफणादिकरणलक्षणेति । एवं द्वितीयसूत्रमपि सुगमम्, नवर**मभ्यन्तरपुद्गला** भवधारणीयेनौदारिकेण वा शरीरेण ये क्षेत्रप्रदेशा अवगाढास्तेष्वेव ये वर्त्तन्ते तेऽवसेयाः, विभूषापक्षे तु निष्ठीवनादयोऽभ्यन्तरपुद्गला इति । तृतीयं तु सूत्रं बाह्याभ्यन्तरपुद्गलयोगेन वाच्यम्, तथाहि- उभयेषामुपादानाद् भवधारणीयनिष्पादनं तदनन्तरं तस्यैव केशादिरचनं च, अनादानाच्चिरविकुर्वितस्यैव मुखादिविकारकरणम्, उभयतस्तु बाह्याभ्यन्तराणामनभिमतानामादानतोऽन्येषां चानादानतोऽनिष्टरूपभवधारणीयेतररचनमिति ।

[सू० १२९] तिविहा नेरइया पन्नत्ता, तंजहा-कतिसंचिता, अकतिसंचिता,

अवत्तव्वगसंचिता । एवमेगिंदियवज्जा जाव वेमाणिया ।

[टी०] अनन्तरं विकुर्वणोक्ता, सा च नारकाणामप्यस्तीति नारकान्निरूपयन्नाह– **तिविहे**त्यादि कण्ठ्यम्, नवरं **कती**त्यनेन सङ्ख्यावाचिना द्व्यादयः सङ्ख्यावन्तोऽभिधीयन्ते, अयं चान्यत्र प्रश्नविशिष्टसङ्ख्यावाचकतया रूढोऽपीह सङ्ख्यामात्रे द्रष्टव्यः, तत्र नारकाः **कति** सङ्ख्याताः एकैकसमये ये उत्पन्नाः सन्तः **सञ्चिताः** कत्युत्पत्तिसाधर्म्याद् बुद्ध्या राशीकृतास्ते **कतिसञ्चिताः**, तथा **न कति** न सङ्ख्याता इत्य**कति** असङ्ख्याता अनन्ता वा, तत्र ये **अकति** असङ्ख्याताः एकैकसमये उत्पन्नाः सन्तस्तथैव **सञ्चिता**स्ते **अकतिसञ्चिताः**, तथा यः परिमाणविशेषो न कति नाप्यकतीति शक्यते वक्तुं सोऽ**वक्तव्यक**ः, स चैक इति तत्सञ्चिता **अवक्तव्यकसञ्चिताः**, समये समये एकतयोत्पन्ना इत्यर्थः, उत्पद्यन्ते हि नारका एकसमये एकादयोऽसङ्ख्येयान्ताः, उक्तं च–

एगो व दो व तिन्नि व संखमसंखा व एगसमएणं ।
उववज्जंतेवइया उव्वट्टंता वि एमेव ॥ [बृहत्सं० १५६] त्ति ।

एवमिति नारकवच्छेषाश्चतुर्विंशतिदण्डकोक्ता वाच्या एकेन्द्रियवर्जाः, यतस्तेषु प्रतिसमयमसङ्ख्याता अनन्ता वा अकतिशब्दवाच्या एवोत्पद्यन्ते, न त्वेकः सङ्ख्याता वा इति, आह च–

अणुसमयमसंखेज्जा संखेज्जाऊय तिरिय मणुया य ।
एगिंदिएसु गच्छे आरा ईसाणदेवा य ॥ [बृहत्सं० ३३५]
एगो असंखभागो वट्टइ उव्वट्टणोववायम्मि ।
एगनिगोए निच्चं एवं सेसेसु वि स एव ॥ [बृहत्सं० ३३५ प्रक्षेप०] त्ति ।

[सू० १३०] तिविहा परियारणा पन्नत्ता, तंजहा-एगे देवे अन्ने देवे अन्नेसिं देवाणं देवीओ अभिजुंजिय २ परियारेति, अप्पणिज्जियाओ देवीओ अभिजुंजिय २ परियारेति, अप्पाणमेव अप्पणा विकुव्विय २ परियारेति। एगे देवे णो अन्ने देवे णो अन्नेसिं देवाणं देवीओ अभिजुंजिय २ परियारेति, अप्पणिज्जियाओ देवीओ अभिजुंजिय २ परियारेइ, अप्पाणमेव अप्पणा विकुव्विय २ परियारेति। एगे देवे णो अन्ने देवे णो अन्नेसिं देवाणं देवीओ

णो अप्पणिज्जियाओ [देवीओ अभिजुंजिय २ परितारेति], अप्पाणमेव अप्पणा विकुव्विय २ परियारेति ।

[**टी०**] अनन्तरसूत्रे कतिसंचितादिको धर्मो वैमानिकानां देवानामुक्तः, अधुना देवानां सामान्येन परिचारणाधर्मनिरूपणायाह– **तिविहा परी**त्यादि कण्ठ्यम्, नवरं **परिचारणा** देवमैथुनसेवेति, **एकः** कश्चिद्देवो न सर्वोऽप्येवमिति, किम् ? **अण्णे देवे**त्ति अन्यान् देवान् अल्पर्द्धिकान् **तथाऽन्येषां देवानां** सत्का **देवीश्चाभियुज्याभियुज्य** आश्लिष्याश्लिष्य वशीकृत्य वा **परिचारयति** परिभुङ्क्ते वेदबाधोपशमायेति । न च न सम्भवति देवस्य देवसेवा पुंस्त्वेनेत्याशङ्कनीयम्, मनुष्येष्वपि तथा श्रवणात्, न चात्रार्थे नरा-ऽमरयोः प्रायो विशेषोऽस्तीति, एक एवायं प्रकारो देव-देवीनामन्यत्वसामान्यादत एव द्वयोरपि पदयोरेकः क्रियाभिसम्बन्ध इति । एव**मात्मीया देवीः परिचारयती**ति द्वितीयः । तथा**ऽऽत्मानमेव परिचारयति**, कथम् ? **आत्मना विकृत्य** परिचारणायोग्यं विधायेति तृतीयः । एवं प्रकारत्रयरूपाऽप्येकेयं परिचारणा, प्रभविष्णूत्कटकामैकपरिचारकवशादिति । अथा**ऽन्यो देव** आद्यप्रकारपरिहारेणाऽन्त्यप्रकारद्वयेन **परिचारयती**ति द्वितीयेयमप्रभविष्णूचितकामपरिचारकदेवविशेषात् । तथाऽन्यो देव आद्यप्रकारद्वयवर्जनेनान्त्यप्रकारेण परिचारयतीति तृतीयाऽनुत्कटकामाल्पर्द्धिकदेवविशेषस्वामिकत्वादिति ।

[**सू० १३१**] **तिविहे मेहुणे पन्नत्ते, तंजहा-दिव्वे, माणुस्सते, तिरिक्खजोणीते ।**

तओ मेहुणं गच्छंति, तंजहा-देवा, मणुस्सा, तिरिक्खजोणिता ।

तओ मेहुणं सेवंति, तंजहा-इत्थी, पुरिसा, णपुंसगा ।

[**टी०**] परिचारणेति मैथुनविशेष उक्तः, अधुना तदेव मैथुनं सामान्यतः प्ररूपयन्नाह– **तिविहे मेहुणे** इत्यादि कण्ठ्यम्, नवरं **मिथुनं** स्त्रीपुंसयुग्मम्, तत्कर्म **मैथुनम्**, नारकाणां तन्न सम्भवति द्रव्यत इति चतुर्थं नास्त्येवेति नोक्तम् । मिथुनकर्मण एव कारकानाह– **तओ** इत्यादि कण्ठ्यम् । तेषामेव भेदानाह– **तओ मेहुण**मित्यादि कण्ठ्यम्,नवरं स्त्र्यादिलक्षणमिदमाचक्षते विचक्षणाः–

योनि १ मृदुत्व २ मस्थैर्यं ३ मुग्धता ४ क्लीबता ५ स्तनौ ६ ।
पुंस्कामितेति ७ लिङ्गानि सप्त स्त्रीत्वे प्रचक्षते ॥
मेहनं १ खरता २ दाढ्यं ३ शौण्डीर्यं ४ श्मश्रु ५ धृष्टता ६ ।
स्त्रीकामितेति ७ लिङ्गानि सप्त पुंस्त्वे प्रचक्षते ॥
स्तनादि-श्मश्रु-केशादिभावाभावसमन्वितम् ।
नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम् ॥ [ ]
तथाऽन्यत्राप्युक्तम्–
स्तन-केशवती स्त्री स्याद्, रोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च, तदभावे नपुंसकम् ॥ [ ] इत्यादि ।

[सू० १३२] तिविहे जोगे पन्नत्ते, तंजहा-मणजोगे, वतिजोगे, कायजोगे। एवं णेरइयाईणं विगलिंदियवज्जाणं जाव वेमाणियाणं ।

तिविहे पओगे पन्नत्ते, तंजहा-मणपओगे, वतिपओगे, कायपओगे । जहा जोगो विगलिंदियवज्जाणं तथा पओगो वि ।

तिविहे करणे पन्नत्ते, तंजहा-मणकरणे, वतिकरणे, कायकरणे । एवं विगलिंदियवज्जं जाव वेमाणियाणं ।

तिविहे करणे पन्नत्ते, तंजहा-आरंभकरणे, संरंभकरणे, समारंभकरणे । निरंतरं जाव वेमाणियाणं ।

[टी०] एते च योगवन्तो भवन्तीति योगप्ररूपणायाह– **तिविहे जोए** इत्यादि, इह वीर्यान्तरायक्षय-क्षयोपशमसमुत्थलब्धिविशेषप्रत्ययमभिसन्ध्यनभिसन्धिपूर्वमात्मनो वीर्यं योगः ।

स च द्विधा सकरणोऽकरणश्च, तत्रालेश्यस्य केवलिनः कृत्स्नयोर्ज्ञेय-दृश्ययोरर्थयोः केवलं ज्ञानं दर्शनं चोपयुञ्जानस्य योऽसावपरिस्पन्दोऽप्रतिघो वीर्यविशेषः सोऽकरणः, स च नेहाधिक्रियते, सकरणस्यैव त्रिस्थानकावतारित्वाद्, अतस्तत्रैव व्युत्पत्तिस्तमेव चाश्रित्य सूत्रव्याख्या। युज्यते जीवः *कर्मभिर्येन* **कम्मं जोगनिमित्तं बज्झइ** *[उपदेशपद० ४७१] त्ति वचनात् युङ्क्ते वा प्रयुङ्क्ते यं पर्यायं स योगो वीर्यान्तरायक्षय-क्षयोपशमजनितो* जीवपरिणामविशेष इति ।

[मनसा करणेन युक्तस्य जीवस्य] योगो वीर्यपर्यायो दुर्बलस्य यष्टिकाद्रव्यवदुपष्टम्भकरो मनोयोग इति, स च चतुर्विधः सत्यमनोयोगो मृषामनोयोगः सत्यमृषामनोयोगो असत्यमृषामनोयोगश्चेति, एवं वाग्योगोऽपि, एवं काययोगोऽपि, नवरं स सप्तविधः औदारिकौ १ दारिकमिश्र २ वैक्रिय ३ वैक्रियमिश्रा ४ ऽऽहारका ५ ऽऽहारकमिश्र ६ कार्मणकाययोग ७ भेदादिति ।

सामान्येन योगं प्ररूप्य विशेषतो नारकादिषु चतुर्विंशतौ पदेषु तमतिदिशन्नाह– **एव**मित्यादि कण्ठ्यम्, नवरमतिप्रसङ्गपरिहारायेदमुक्तं–**विगलिंदियवज्जाणं** ति, तत्र **विकलेन्द्रियाः** अपञ्चेन्द्रियाः, तेषां ह्येकेन्द्रियाणां काययोग एव, द्वि-त्रि-चतुरिन्द्रियाणां तु काययोग-वाग्योगाविति ।

मनःप्रभृतिसम्बन्धेनैवेदमाह– **तिविहे पओगे** इत्यादि कण्ठ्यम्, नवरं मनःप्रभृतीनां व्याप्रियमाणानां जीवेन हेतुकर्तृभूतेन यद् व्यापारणं प्रयोजनं **प्रयोगः**, मनसः प्रयोगो **मनःप्रयोगः**, एवमितरावपि, **जहे**त्याद्यतिदेशसूत्रं पूर्ववद्भावनीयमिति । मनःप्रभृति-सम्बन्धेनैवेदमपरमाह–**तिविहे करणे** इत्यादि कण्ठ्यम्, नवरं क्रियते येन तत् **करणं** मननादिक्रियासु प्रवर्त्तमानस्यात्मन उपकरणभूतस्तथा-तथापरिणामवत्पुद्गलसङ्घात इति भावः, तत्र मन एव करणं **मनःकरणम्**, एवम् इतरे अपि, **एव**मित्याद्यतिदेशसूत्रं पूर्ववदेव भावनीयमिति, अथवा योग-प्रयोग-करणशब्दानां मनःप्रभृतिकमभिधेयतया योग-प्रयोग-करणसूत्रेष्वभिहितमिति नार्थभेदोऽन्वेषणीयः, त्रयाणामप्येषामेकार्थतया आगमे बहुशः प्रवृत्तिदर्शनात् ।

प्रकारान्तरेण करणत्रैविध्यमाह– **तिविहे** इत्यादि, आरम्भण**मारम्भः** पृथिव्या-द्युपमर्द्दनम्, तस्य कृतिः करणं स एव वा करणमित्य**ारम्भकरणम्**, एवमितरे अपि वाच्ये, नवरमयं विशेषः **संरम्भकरणं** पृथिव्यादिविषयमेव मनःसङ्क्लेशकरणम्, **समारम्भकरणं** तेषामेव सन्तापकरणमिति, आह च-

संकप्पो संरंभो परितावकरो भवे समारंभो ।
आरंभो उद्दवओ सुद्धनयाणं तु सव्वेसिं ॥ [व्यवहारभा० ४६] ति ॥

इदमारम्भादिकरणत्रयं नारकादीनां वैमानिकान्तानां भवतीत्यतिदिशन्नाह–

निरन्तरमित्यादि । सुगमम्, केवलं संरम्भकरणमसंज्ञिनां पूर्वभवसंस्कारानुवृत्तिमात्रतया भावनीयमिति ।

[सू० १३३] तिहिं ठाणेहिं जीवा अप्पाउयत्ताए कम्मं पगरेंति, तंजहा-पाणे अतिवातित्ता भवति, मुसं वतित्ता भवति, तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असण-पाण-खाइम-साइमेणं पडिलाभेत्ता भवति, इच्चेतेहिं तिहिं ठाणेहिं जीवा अप्पाउयत्ताए कम्मं पगरेंति ।

तिहिं ठाणेहिं जीवा दीहाउयत्ताए कम्मं पगरेंति, तंजहा-णो पाणे अतिवातित्ता भवति, णो मुसं वतित्ता भवति, तधारूवं समणं वा माहणं वा फासुएणं एसणिज्जेणं असण-पाण-खाइम-साइमेणं पडिलाभेत्ता भवति, इच्चेतेहिं तिहिं ठाणेहिं जीवा दीहाउयत्ताए कम्मं पगरेंति ।

तिहिं ठाणेहिं जीवा असुभदीहाउयत्ताए कम्मं पगरेंति, तंजधा-पाणे अतिवातित्ता भवति, मुसं वतित्ता भवति, तहारूवं समणं वा माहणं वा हीलित्ता णिंदित्ता खिंसित्ता गरहित्ता अवमाणित्ता अन्नयरेणं अमणुण्णेणं अपीतिकारतेणं असण-पाण-खाइम-साइमेणं पडिलाभित्ता भवति, इच्चेतेहिं तिहिं ठाणेहिं जीवा असुभदीहाउयत्ताए कम्मं पगरेंति ।

तिहिं ठाणेहिं जीवा सुभदीहाउयत्ताए कम्मं पगरेंति, तंजहा-णो पाणे अतिवातित्ता भवति, णो मुसं वदित्ता भवइ, तहारूवं समणं वा माहणं वा वंदित्ता नमंसित्ता सक्कारेत्ता सम्माणेत्ता कल्लाणं मंगलं देवतं चेतितं पज्जुवासेत्ता मणुण्णेणं पीतिकारएणं असण-पाण-खाइम-साइमेणं पडिलाभेत्ता भवति, इच्चेतेहिं तिहिं ठाणेहिं जीवा सुभदीहाउयत्ताए कम्मं पगरेंति ।

[टी०] आरम्भादिकरणस्य क्रियान्तरस्य च फलमुपदर्शयन्नाह– **तिहिं ठाणेही**त्यादि, त्रिभिः **स्थानैः** कारणैः **जीवाः** प्राणिनः **अप्पाउयत्ताए** त्ति **अल्पं** स्तोक**मायुः** जीवितं यस्य सोऽल्पायुस्तद्भावस्तत्ता तस्यै **अल्पायुष्टायै**, तदर्थं तन्निबन्धनमित्यर्थः, **कर्म** आयुष्कादि, अथवा अल्पमायुः जीवितं यत आयुषस्तदल्पायुः, तद्भावस्तत्ता, तया **कर्म** आयुर्लक्षणं **प्रकुर्वन्ति** बध्नन्तीत्यर्थः, तद्यथा– **प्राणान्** प्राणिनोऽतिपातयितेति

शीलार्थतृन्नन्तमिति कर्मणि द्वितीयेति, प्राणिनां विनाशनशील इत्यर्थः, एवंभूतो यो भवति, एवं मृषावादं वक्ता यश्च भवति, **तथा** तत्प्रकारं **रूपं** स्वभावो नेपथ्यादि वा यस्य स **तथारूपः** दानोचित इत्यर्थः, तम्, श्राम्यति तपस्यतीति **श्रमणः** तपोयुक्तस्तम्, मा हन इत्याचष्टे यः परं प्रति स्वयं हननिवृत्तः सन्निति स **माहनो** मूलगुणधरस्तम्, **वा**शब्दौ विशेषणसमुच्चयार्थौ, प्रगता असवः असुमन्तः प्राणिनो यस्मात् तत् प्रासुकम्, तन्निषेधा**दप्रासुकं** सचेतनमित्यर्थः, तेन, एष्यते गवेष्यते उद्गमादिदोषविकलतया साधुभिर्यत्तदेषणीयं कल्प्यं तन्निषेधा**दनेषणीयम्**, तेन, अश्यते भुज्यते इत्**यशनं** च ओदनादि, पीयत इति **पानं** च सौवीरादि, खादनं खादस्तेन निर्वृत्तं खादनार्थं तस्य निर्वर्त्त्यमानत्वादिति **खादिमं** च भक्तौषधादि, स्वादनं स्वादः तेन निर्वृत्तं **स्वादिमं** दन्तपवनादीति समाहारद्वन्द्वः, तेन, गाथाश्चात्र-

असणं ओदण-सत्तुग-मुग्ग-जगाराइ खज्जगविही य ।
खीराइ सूरणादी मंडगपभिती य विन्नेयं ॥
पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव ।
आउक्काओ सव्वो कक्कडगजलाइयं च तहा ॥
भत्तोसं दंताई खज्जूरं नालिकेर-दक्खाई ।
कक्कडिगंबग-फणसादि बहुविहं खाइमं नेयं ॥
दंतवणं तंबोलं चित्तं अज्जग-कुहेडगादीयं ।
महुपिप्पलिसुंठादी अणेगहा सादिमं होइ ॥ [पञ्चाशक० ५।२७-३०] त्ति ।

प्रतिलम्भयिता लाभवन्तं करोतीत्येवंशीलो यश्च भवति, ते **अल्पायुष्कतया कर्म कुर्वन्ती**ति प्रक्रमः, **इच्चेएहिं** ति **इत्येतैः** प्राणातिपातादिभिरुक्तप्रकारै**स्त्रिभिः स्थानैः जीवा अल्पायुष्टया कर्म कुर्वन्ती**ति निगमनमिति । इह च प्राणातिपातयित्रादि-पुरुषनिर्देशेऽपि प्राणातिपातादीनामेवाल्पायुर्बन्धनिबन्धनत्वेन तत्कारणत्वमुक्तं द्रष्टव्यमिति। इयं चास्य सूत्रस्य भावना– अध्यवसायविशेषेणैतत्त्रयं यथोक्तफलं भवतीति, अथवा यो हि जीवो जिनादिगुणपक्षपातितया तत्पूजाद्यर्थं पृथिव्याद्यारम्भेण न्यासापहारादिना च प्राणातिपातादिषु प्रवर्त्तते तस्य सरागसंयम-निरवद्यदाननिमित्तायुष्कापेक्षयेयमल्पायुष्टा समवसेया ।

अथ नैतदेवम्, निर्विशेषणत्वात् सूत्रस्य, अल्पायुष्कस्य क्षुल्लकभवग्रहणरूपस्यापि प्राणातिपातादिहेतुतो युज्यमानत्वाद्, अतः कथमभिधीयते सविशेषणप्राणातिपातादिवर्त्ती जीव आपेक्षिकी चाल्पायुष्कतेति ?, उच्यते, अविशेषणत्वेऽपि सूत्रस्य प्राणातिपातादेर्विशेषणमवश्यं वाच्यम्, यत इतस्तृतीयसूत्रे प्राणातिपातादित एव अशुभदीर्घायुष्टां वक्ष्यति, न हि समानहेतोः कार्यवैषम्यं युज्यते, सर्वत्रानाश्वासप्रसङ्गात्, तथा **समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असण-पाण-खाइम-साइमेणं पडिलाभेमाणस्स किं कज्जइ ?, गोयमा !, बहुतरिया से निज्जरा कज्जइ, अप्पतराए से पावे कम्मे कज्जइ** [भगवती० ८।६।२] त्ति **भगवती**वचनश्रवणादवसीयते नैवेयं क्षुल्लकभवग्रहणरूपाऽल्पायुष्टा, न हि स्वल्पपाप-बहुनिर्जरानिबन्धनस्यानुष्ठानस्य क्षुल्लकभवग्रहणनिमित्तता सम्भाव्यते, जिनपूजनाद्यनुष्ठानस्यापि तथाप्रसङ्गात्, अथाप्रासुकदानस्य भवतूक्ताऽल्पायुष्टा, प्राणातिपात-मृषावादयोस्तु क्षुल्लकभवग्रहणमेव फलमिति, नैतदेवम्, एकयोगप्रवृत्तत्वाद् अविरुद्धत्वाच्चेति । अथ मिथ्यादृष्टिश्रमण-ब्राह्मणानां यदप्रासुकदानं ततो निरुपचरितैवाल्पायुष्टा युज्यते, इतराभ्यां तु को विचार इति ?, नैवम्, अप्रासुकेनेति तत्र विशेषणस्यानर्थकत्वात्, प्रासुकदानस्यापि अल्पायुष्कफलत्वाविरोधाद्, उक्तं च **भगवत्याम्**– **समणोवासयस्स णं भंते ! तहारूवं असंजयअविरय-अपडिहयअपच्चक्खायपावकम्मं फासुएण वा अफासुएण वा एसणिज्जेण वा अणेसणिज्जेण वा असणं ४ पडिलाभेमाणस्स किं कज्जइ ?, गोयमा !, एगंतसो पावे कम्मे कज्जइ, नो से काइ निज्जरा कज्जइ** [भगवती० ८।६।३] त्ति, यच्च पापकर्मण एव कारणं तदल्पायुष्टाया अपि कारणमिति । नन्वेवं प्राणातिपात-मृषावादावप्रासुकदानं च कर्त्तव्यमापन्नमिति ?, उच्यते, आपद्यतां नाम भूमिकापेक्षया, को दोषः ?, यतः–

अधिकारिवशाच्छास्त्रे, धर्मसाधनसंस्थितिः ।
व्याधिप्रतिक्रियातुल्या, विज्ञेया गुणदोषयोः ॥ [हारि० अष्टक० २।५]

तथा च गृहिणं प्रति जिनभवनकारणफलमुक्तम्–

एतदिह भावयज्ञः सद्गृहिणो जन्मफलमिदं परमम् ।
अभ्युदयाव्युच्छित्त्या नियमादपवर्गबीजमिति ॥ [षोडशक० ६।१४] तथा–

भण्णइ जिणपूयाए कायवहो जइ वि होइ उ कहिंचि ।

तह वि तई परिसुद्धा गिहीण कूवाहरणजोगा ॥
असदारंभपवत्ता जं च गिही तेण तेसिं विन्नेया ।
तन्निव्वित्तिफलच्चिय एसा परिभावणीयमिदं ॥ [पञ्चाशक० ४।४२-४३] ति ।

दानाधिकारे तु श्रूयते द्विविधाः श्रमणोपासकाः संविग्नभाविता लुब्धकदृष्टान्तभाविताश्चेति, यथोक्तम्–

संविग्गभावियाणं लोद्धयदिट्ठंतभावियाणं च ।
मोत्तूण खेत्तकाले भावं च कहिंति सुद्धुञ्छं ॥ [निशीथभा० १६४९] ति ।

तत्र लुब्धकदृष्टान्तभाविता यथाकथञ्चिद्ददति, संविग्नभावितास्त्वौचित्येनेति, तच्चेदम्–

संथरणम्मि असुद्धं दोण्ह वि गेण्हन्त-देंतयाणऽहियं ।
आउरदिट्ठंतेणं तं चेव हितं असंथरणे ॥ [निशीथभा० १६५०] इति ।

तथा **णायागयाणं कप्पणिज्जाणं अन्न-पाणाईणं दव्वाणं देस-काल-सद्धा-सक्कार-कमजुयं** [आव० सू० ६] इत्यादि ।

गम्भीरार्थं चेदं सूत्रमतोऽन्यथाऽपि भावनीयमिति ।

अल्पायुष्कताकारणान्युक्तान्यधुनैतद्विपर्ययस्यैतान्येव विपर्यस्ततया कारणान्याह– **तिहिं** ति प्राग्वदवसेयम्, नवरं **दीहाउयत्ताए** त्ति शुभदीर्घायुष्टायै शुभदीर्घायुष्टया वेति प्रतिपत्तव्यम्, प्राणातिपातविरत्यादीनां दीर्घायुषः शुभस्यैव निमित्तत्वाद्, उक्तं च–

महवय - अणुव्वएहि य बालतवोऽकामनिज्जराए य ।
देवाउयं निबंधइ सम्मद्दिट्ठी य जो जीवो ॥ [बन्धशतक० २३]

तथा - **पयईए तणुकसाओ दाणरओ सील-संजमविहूणो ।**
मज्झिमगुणेहिं जुत्तो मणुयाउं बंधए जीवो ॥ [बन्धशतक० २२]

देव-मनुष्यायुषी च शुभे इति । तथा **भगवत्यां** दानमुद्दिश्योक्तम्– **समणोवासयस्स णं भंते ! तहारूवं समणं वा २ फासुएसणिज्जेणं असण ४ पडिलाभेमाणस्स किं कज्जइ?, गोयमा !, एगंतसो निज्जरा कज्जइ, णो से [केइ] पावे कम्मे कज्जइ [भगवती० ८।६।१]** इति, यच्च अतिनिर्जराकारणं तच्छुभदीर्घायुःकारणतया न विरुद्धम्, महाव्रतवदिति ।

अनन्तरमायुषो दीर्घताकारणान्युक्तानि, तच्च शुभाशुभमिति तत्रादौ तावदशुभा-

युर्दीर्घताकारणान्याह– **तिहिं** ति प्राग्वत्, नवरम् **अशुभदीर्घायुष्टायै** इति नारकायुष्कायेति भावः, तथाहि– अशुभं च तत् पापप्रकृतिरूपत्वात् दीर्घं च तस्य जघन्यतोऽपि दशवर्षसहस्रस्थितिकत्वादुत्कृष्टतस्तु त्रयस्त्रिंशत्सागरोपमरूपत्वा-**दशुभदीर्घम्**, तदेवंभूत**मायुः** जीवितं यस्मात् कर्मणस्तदशुभदीर्घायुः, तद्भावस्तत्ता, तस्यै तया वेति, **प्राणान्** प्राणिन इत्यर्थोऽ**तिपातयिता भवति मृषावादं वक्ता भवति** तथा **श्रमण-माहनादीनां** हीलनादि कृत्वा **प्रतिलम्भयिता भवती**त्यक्षरघटना, **हीलनं** तु जात्याद्युद्घट्टनतः, **निन्दनं** मनसा, **खिंसनं** जनसमक्षम्, **गर्हणं** तत्समक्षम्, **अपमानन**मनभ्युत्थानादिभिः, **अन्यतरेण** बहूनां मध्ये एकतरेण, क्वचित्त्वन्यतरेणेति न दृश्यते, **अमनोज्ञेन** स्वरूपतोऽशोभनेन कदन्नादिनाऽत एवाऽ**प्रीतिकारकेण**, भक्तिमतस्त्वमनोज्ञमपि मनोज्ञमेव, तत्फलत्वाद्, आर्य**चन्दनाया** इव, आर्य**चन्दनया** हि कुल्माषाः सूर्प्पकोणकृता भगवते **महावीराय** पञ्चदिनोनषाण्मासिकक्षपणपारणके दत्ताः, तदैव च तस्या लोहनिगडानि हेममयनूपुरौ सम्पन्नौ, केशाः पूर्ववदेव जाताः, पञ्चवर्णविविधरत्नराशिभिर्गेहं भृतम्, सेन्द्रदेव-दानव-नरनायकैरभिनन्दिता कालेनावाप्त-चरित्रा च सिद्धिसौधशिखरमुपगतेति, इह च सूत्रेऽशनादि प्रासुकाप्रासुकत्वादिना न विशेषितम्, हीलनादिकर्त्तुः प्रासुकादिविशेषणस्य फलविशेषं प्रत्यकारणत्वात्, मत्सरजनितहीलनादिविशेषणानामेव प्रधानतया तत्कारणत्वादिति । प्राणातिपात-मृषावादयोर्दानविशेषणपक्षव्याख्यानमपि घटत एव, अवज्ञादानेऽपि प्राणातिपातादेर्दृश्य-मानत्वादिति, भवति च प्राणातिपातादेर्नरकायुः, यदाह–

मिच्छादिट्ठी महारंभपरिग्गहो तिव्वलोहनिस्सीलो ।
नरयाउयं निबंधइ पावमती रोद्दपरिणामो ॥ [बन्धशतक० २०] त्ति ।

उक्तविपर्ययेणाधुनेतरदाह– **तिहि**मित्यादि पूर्ववत् । नवरं **वन्दित्वा** स्तुत्वा **नमस्यित्वा** प्रणम्य **सत्कारयित्वा** वस्त्रादिना **सन्मानयित्वा** प्रतिपत्तिविशेषेण **कल्याणं** समृद्धिः, तद्धेतुत्वात् साधुरपि कल्याणम्, एवं मंगलं विघ्नक्षयः, तद्योगान्**मङ्गलम्**, दैवतमिव देवतेव **दैवतम्**, चैत्यमिव जिनादिप्रतिमेव **चैत्यं** श्रमणं **पर्युपास्य** उपसेव्येति, *इहापि प्रासुकाप्रासुकतया दानं न विशेषितम्, पूर्वसूत्रविपर्ययत्वादस्य, पूर्वसूत्रस्य*

चाविशेषणतया प्रवृत्तत्वादिति, न च प्रासुकाप्रासुकदानयोः फलं प्रति न विशेषोऽस्ति, पूर्वसूत्रयोस्तस्य प्रतिपादितत्वात्, तस्मादिह प्रासुकैषणीयस्य कल्पा(ल्प्या?)प्राप्तावितरस्य चेदं फलमवसेयम्, अथवा भावप्रकर्षविशेषादनेषणीयस्यापीदं फलं न विरुध्यते, अचिन्त्यत्वाच्चित्तपरिणतेः, सा हि बाह्यस्यानुगुणतयैव न फलानि साधयति, **भरता**दीनामिवेति, इह च प्रथममल्पायुःसूत्रं द्वितीयं तद्विपक्षः तृतीयमशुभदीर्घायुःसूत्रं चतुर्थं तद्विपक्ष इति न पुनरुक्ततेति ।

[सू० १३४] ततो गुत्तीतो पन्नत्ताओ, तंजहा-मणगुत्ती, वतिगुत्ती, कायगुत्ती। संजतमणुस्साणं ततो गुत्तीओ पण्णत्ताओ, तंजहा-मणगुत्ती, वइगुत्ती, कायगुत्ती।

तओ अगुत्तीओ पन्नत्ताओ, तंजहा-मणअगुत्ती, वइअगुत्ती, कायअगुत्ती। एवं नेरइताणं जाव थणियकुमाराणं, पंचिंदियतिरिक्खजोणियाणं असंजतमणुस्साणं वाणमंतराणं जोइसियाणं वेमाणियाणं ।

ततो दंडा पन्नत्ता, तंजहा-मणदंडे, वइदंडे, कायदंडे । [नेरइयाणं तओ दंडा पण्णत्ता, तंजहा-मणदंडे, वइदंडे, कायदंडे ।] विगलिंदियवज्जं जाव वेमाणियाणं ।

[टी०] प्राणानतिपातनादि च गुप्तिसद्भावे भवतीति गुप्तीराह– **तओ** इत्यादि कण्ठ्यम्। नवरं गोपनं **गुप्तिः** मनःप्रभृतीनां कुशलानां प्रवर्त्तनमकुशलानां च निवर्त्तनमिति, आह च–

मणगुत्तिमाइयाओ गुत्तीओ तिन्नि समयकेऊहिं ।
पवियारेयररूवा णिद्दिट्ठाओ जओ भणियं ॥
समिओ णियमा गुत्तो गुत्तो समियत्तणम्मि भइयव्वो ।
कुसलवइमुईरंतो जं वइगुत्तो वि समिओ वि ॥

[निशीथभा० ३७, बृहत्कल्प० ४४५१, उपदेशपद ६०४-५] त्ति ।

एताश्चतुर्विंशतिदण्डके चिन्त्यमाना मनुष्याणामेव, तत्रापि संयतानाम्, न तु नारकादीनामित्यत आह– **संजयमणुस्साण**मित्यादि कण्ठ्यम् ।

उक्ता गुप्तयस्तद्विपर्ययभूता अथागुप्तीराह– **तओ** इत्यादि कण्ठ्यम् । विशेषतश्चतुर्विंशतिदण्डके एता अतिदिशन्नाह– **एव**मित्यादि, **एव**मिति सामान्यसूत्रवन्नारकादीनां

तिस्रोऽगुप्तयो वाच्याः, शेषं कण्ठ्यम्, नवरमिहैकेन्द्रिय-विकलेन्द्रिया नोक्ताः, वाङ्-मनसयोस्तेषां यथायोगमसम्भवात्, संयतमनुष्या अपि नोक्ताः, तेषां गुप्तिप्रतिपादनादिति ।

अगुप्तयश्चात्मनः परेषां च दण्डनानि भवन्तीति दण्डान्निरूपयन्नाह– **तओ दण्डे**त्यादि कण्ठ्यम्, नवरं मनसा दण्डनमात्मनः परेषां चेति मनोदण्डः, अथवा दण्ड्यते अनेनेति दण्डः, मन एव दण्डो **मनोदण्ड** इति, एवमितरावपि, विशेषचिन्तायां चतुर्विंशतिदण्डके **नेरइयाणं तओ दंडा** इत्यादि **यावद्वैमानिकाना**मिति सूत्रं वाच्यम्, नवरं **विगलिंदियवज्जं** ति एक-द्वि-त्रि-चतुरिन्द्रियान् वर्जयित्वेत्यर्थः, तेषां हि दण्डत्रयं न सम्भवति, यथायोगं वाङ्-मनसयोरभावादिति ।

[सू० १३५] तिविहा गरहा पन्नत्ता, तंजहा-मणसा वेगे गरहति, वयसा वेगे गरहति, कायसा वेगे गरहति पावाणं कम्माणं अकरणयाए ।

अहवा गरहा तिविहा पन्नत्ता, तंजहा-दीहं पेगे अद्धं गरहति, रहस्सं पेगे अद्धं गरहति, कायं पेगे पडिसाहरति पावाणं कम्माणं अकरणयाए ।

[टी०] दण्डश्च गर्हणीयो भवतीति गर्हां सूत्राभ्यामाह– **तिविहे**त्यादि सूत्रद्वयं गतार्थम्, नवरं **गर्हते** जुगुप्सते दण्डं स्वकीयं परकीयम् आत्मानं वा **कायसा वि** त्ति सकारस्यागमिकत्वात् कायेनाप्येकः, कथमित्याह– **पापानां कर्म्मणामकरणतया** हेतुभूतया, हिंसाद्यकरणेनेत्यर्थः, कायगर्हा हि पापकर्माप्रवृत्त्यैव भवतीति भावः, उक्तं च–

पापजुगुप्सा तु तथा सम्यक् परिशुद्धचेतसा सततम् ।
पापोद्वेगोऽकरणं तदचिन्ता चेत्यनुक्रमतः ॥ [षोडशक० ४।५] इति ।

अथवा पापकर्मणामकरणतायै तदकरणार्थं त्रिधाऽपि गर्हते, अथवा चतुर्थ्यर्थे षष्ठी, ततः पापेभ्यः कर्म्मभ्यो गर्हते, तानि जुगुप्सत इत्यर्थः, किमर्थम् ? **अकरणतायै** 'मा कार्षमहमेतानि' इति ।

दीहं पेगे अद्धं ति दीर्घं कालं यावत्, तथा **कायमप्येकः प्रतिसंहरति** निरुणद्धि, कया ? **पापानां कर्म्मणामकरणतया** हेतुभूतया, तदकरणेन तदकरणतायै वा तेभ्यो वा गर्हते, कायं वा प्रतिसंहरति तेभ्यः, अकरणतायै तेषामेवेति ।

[सू० १३६] तिविहे पच्चक्खाणे पन्नत्ते, तंजहा-मणसा वेगे पच्चक्खाति, वयसा वेगे पच्चक्खाति, कायसा वेगे पच्चक्खाति । एवं जधा गरहा तधा पच्चक्खाणे वि दो आलावगा भाणितव्वा ।

[टी०] अतीते दण्डे गर्हा भवति, सा चोक्ता, भविष्यति च प्रत्याख्यानमिति सूत्रद्वयेन तदाह– **तिविहे**त्यादि गतार्थम्, नवरं **गरिह** त्ति गर्हायाम्, आलापकौ चेमौ 'मणसे'त्यादिः 'कायसा वेगे पच्चक्खाइ पावाणं कम्माणं अकरणयाए' इत्येतदन्त एकः, 'अहवा पच्चक्खाणे तिविहे पं० तं०–दीहं पेगे अद्धं पच्चक्खाइ, हस्सं पेगे अद्धं पच्चक्खाइ, कायं पेगे पडिसाहरति पावाणं कम्माणं अकरणयाए' इति द्वितीयः, तत्र कायमप्येकः प्रतिसंहरति पापकर्म्माकरणाय अथवा कायं प्रतिसंहरति पापकर्म्मभ्योऽकरणाय तेषामेवेति ।

[सू० १३७] ततो रुक्खा पन्नत्ता, तंजहा-पत्तोवते, पुप्फोवते, फलोवते १। एवामेव ततो पुरिसजाता पन्नत्ता, तंजहा-पत्तोवारुक्खसामाणे, पुप्फोवारुक्खसामाणे, फलोवारुक्खसामाणे २।

ततो पुरिसजाता पन्नत्ता, तंजहा-नामपुरिसे, ठवणपुरिसे, दव्वपुरिसे १।

ततो पुरिसजाया पन्नत्ता, तंजहा-नाणपुरिसे, दंसणपुरिसे, चरित्तपुरिसे २।

तओ पुरिसजाता पन्नत्ता, तंजहा-वेदपुरिसे, चिंधपुरिसे, अभिलावपुरिसे ३।

तिविहा पुरिसा पन्नत्ता, तंजहा-उत्तमपुरिसा, मज्झिमपुरिसा, जहन्नपुरिसा ४।

[१] उत्तमपुरिसा तिविहा पन्नत्ता, तंजहा-धम्मपुरिसा, भोगपुरिसा, कम्मपुरिसा । धम्मपुरिसा अरहंता, भोगपुरिसा चक्कवट्टी, कम्मपुरिसा वासुदेवा ५।

[२] मज्झिमपुरिसा तिविधा पन्नत्ता, तंजहा-उग्गा, भोगा, राइन्ना ६।

[३] जहन्नपुरिसा तिविहा पन्नत्ता, तंजहा-दासा, भयगा, भातिल्लगा ७।

[टी०] पापकर्मप्रत्याख्यातारश्च परोपकारिणो भवन्तीति तदुपदर्शनाय दृष्टान्तभूतवृक्षाणां तद्दार्ष्टान्तिकानां च पुरुषाणां प्ररूपणार्थमाह– **तओ रुक्खे**त्यादि सूत्रद्वयम्, पत्राण्युपगच्छति प्राप्नोति **पत्रोपगः**, एवमितरौ । **एवमेवे**ति दार्ष्टान्तिकोपनयनार्थः, **पुरुषजातानि** पुरुषप्रकारा यथा पत्रादियुक्तत्वेनोपकारमात्र-विशिष्ट-विशिष्टतर-विशिष्टतमोपकार-

कारिणोऽर्थिषु वृक्षाः तथा लोकोत्तरपुरुषाः सूत्रार्थोभयदानादिना यथोत्तरमुपकारविशेष-कारित्वात् तत्समाना मन्तव्याः, एवं लौकिका अपीति, इह च 'पत्तोवग' इत्यादौ वाच्ये **पत्तोवा** इत्यादि प्राकृतलक्षणवशादुक्तम्, 'समाण' इत्यत्रापि '**सामाण**' इति।

अथ पुरुषप्रस्तावात् पुरुषान् सप्तसूत्र्या निरूपयन्नाह– **तओ** इत्यादि कण्ठ्यम्, नवरं **नामपुरुषः** पुरुष इति नामैव, **स्थापनापुरुषः** पुरुषप्रतिमादि, **द्रव्यपुरुषः** पुरुषत्वेन य उत्पत्स्यते उत्पन्नपूर्वो वेति, विशेषोऽत्रेन्द्रसूत्राद् द्रष्टव्यो भवति। भावपुरुषभेदाः पुनर्ज्ञानपुरुषादयः । ज्ञानलक्षणभावप्रधानः पुरुषो **ज्ञानपुरुषः**, एवमितरावपि। **वेदः** पुरुषवेदः, तदनुभवनप्रधानः पुरुषो **वेदपुरुषः**, स च स्त्री-पुं-नपुंसकसम्बन्धिषु त्रिष्वपि लिङ्गेषु भवतीति । तथा पुरुषचिह्नैः श्मश्रुप्रभृतिभिरुपलक्षितः पुरुष**श्चिह्नपुरुषः**, यथा नपुंसकं श्मश्रुचिह्नमिति, पुरुषवेदो वा चिह्नपुरुषस्तेन चिह्नयते पुरुष इति कृत्वेति, पुरुषवेषधारी वा स्त्र्यादिरिति । अभिलप्यतेऽनेनेति **अभिलापः** शब्दः, स एव **पुरुषः** पुल्लिँङ्गतया अभिधानात् यथा घटः कुटो वेति ।

धम्मपुरिस त्ति **धर्म्मः** क्षायिकचारित्रादिः, तदर्जनपराः पुरुषाः धर्म्मपुरुषाः, उक्तं च–

धम्मपुरिसो तयज्जणवावारपरो जहा साहु ॥ [विशेषाव० २०९३] त्ति ।

भोगाः मनोज्ञाः शब्दादयः, तत्पराः पुरुषा **भोगपुरुषाः** । **कम्म** त्ति **कर्माणि** महारम्भादिसम्पाद्यानि नरकायुष्कादीनीति। **उग्रा** भगवतो नाभेयस्य राज्यकाले ये आरक्षका आसन्, **भोगा**स्तत्रैव गुरवः, **राजन्या**स्तत्रैव वयस्याः ।

[तद्वंशजा अपि तत्तद्व्यपदेशा इति।] एषां च मध्यमत्वमनुत्कृष्टत्वा-जघन्यत्वाभ्यामिति। **दासा** दासीपुत्रादयः, **भृतकाः** मूल्यतः कर्मकराः, **भाइल्लग** त्ति भागो विद्यते येषां ते भागवन्तः शुद्ध-चातुर्थिकादय इति ।

[सू० १३८] तिविधा मच्छा पन्नत्ता, तंजहा-अंडया, पोतया, संमुच्छिमा १। अंडया मच्छा तिविहा पन्नत्ता, तंजहा-इत्थी, पुरिसा, णपुंसगा २। पोतया मच्छा तिविहा पन्नत्ता, तंजहा-इत्थी, पुरिसा, णपुंसगा ३।

तिविधा पक्खी पन्नत्ता, तंजहा-अंडया पोतया, संमुच्छिमा १। अंडया

पक्खी तिविधा पन्नत्ता, तंजहा-इत्थी, पुरिसा, णपुंसगा २। पोतजा पक्खी तिविहा पन्नत्ता, तंजहा-इत्थी, पुरिसा, णपुंसगा ३।

एवमेतेणं अभिलावेणं उरपरिसप्पा वि भाणियव्वा ३, भुजपरिसप्पा वि भाणियव्वा एवं चेव ३[=१२] ।

[टी०] उक्तं मनुष्यपुरुषाणां त्रैविध्यमधुना सामान्यतस्तिरश्चां जलचर-खचर-स्थलचरविशेषाणां **तिविहा मच्छे**त्यादिसूत्रैर्द्वादशभिस्तदाह, सुगमानि चैतानि, नवरम् अण्डाज्जाता **अण्डजाः**, पोतं वस्त्रं तद्वज्जरायुवर्ज्जितत्वाज्जाताः, **पोतजाः** हस्त्यादयः, **सम्मूर्च्छिमा** अगर्भजा इत्यर्थः, सम्मूर्च्छिमानां स्त्र्यादिभेदो नास्ति नपुंसकत्वात्तेषामिति स सूत्रे न दर्शित इति ।

पक्षिणोऽण्डजाः हंसादयः, **पोतजा** वल्गुलीप्रभृतयः, **सम्मूर्च्छिमाः** खञ्जनकादयः, उद्भिज्जत्वेऽपि तेषां सम्मूर्छजत्वव्यपदेशो भवत्येव, उद्भिज्जादीनां सम्मूर्च्छनज-विशेषत्वादिति ।

एवमिति पक्षिवत्, **एतेन** प्रत्यक्षेणा**भिलापेन** 'तिविहा उरपरिसप्पे'त्यादि-सूत्रत्रयलक्षणेन, **उरसा** वक्षसा परिसर्प्पन्तीति **उरःपरिसर्प्पाः** सर्प्पादयस्तेऽपि **भणितव्याः**, तथा **भुजाभ्यां** बाहुभ्यां परिसर्प्पन्ति ये ते तथा नकुलादयस्तेऽपि भणितव्याः । **एवं चेव** त्ति, एवमेव यथा पक्षिणस्तथैवेत्यर्थः, इहापि सूत्रत्रयमध्येतव्यमिति भावः ।

[सू० १३९] [१] **तिविहाओ इत्थीओ पन्नत्ताओ, तंजहा-तिरिक्खजोणियाओ, मणुस्सित्थीओ, देवित्थीओ १। तिरिक्खजोणित्थीओ तिविधातो पन्नत्ताओ, तंजहा-जलचरीओ, थलचरीओ, खहचरीओ २। मणुस्सित्थीओ तिविधाओ पन्नत्ताओ, तंजहा-कम्मभूमियाओ, अकम्मभूमियाओ, अंतरदीविगाओ ३।**

[२] तिविधा पुरिसा पन्नत्ता, तंजहा-तिरिक्खजोणियपुरिसा, मणुस्सपुरिसा, देवपुरिसा १। तिरिक्खजोणियपुरिसा तिविधा पन्नत्ता, तंजहा-जलचरा, थलचरा, खहचरा २। मणुस्सपुरिसा तिविधा पन्नत्ता, तंजहा-कम्मभूमया,

अकम्मभूमया, अंतरदीवगा ३।

[३] तिविधा नपुंसगा पन्नत्ता, तंजहा-णेरतियनपुंसगा, तिरिक्खजोणियनपुंसगा, मणुस्सनपुंसगा १। तिरिक्खजोणियनपुंसगा तिविधा पन्नत्ता, तंजहा-जलचरा, थलचरा, खहचरा २। मणुस्सनपुंसगा तिविधा पन्नत्ता, तंजहा-कम्मभूमगा, अकम्मभूमगा, अंतरदीवगा ३।

[४] तिविहा तिरिक्खजोणिया पन्नत्ता, तंजहा-इत्थी, पुरिसा, नपुंसगा।

[टी०] उक्तं तिर्यग्विशेषाणां त्रैविध्यमिदानीं स्त्री-पुरुष-नपुंसकानां तदाह– **तिविहे**त्यादि नवसूत्री सुगमा, नवरं **खहं** ति प्राकृतत्वेन **खम्** आकाशमिति । कृष्यादिकर्म्मप्रधाना भूमिः **कर्म्मभूमि**ः भरतादिका पञ्चदशधा, तत्र जाताः **कर्मभूमिजा**ः, एव**मकर्मभूमिजा**ः, नवरमकर्मभूमिः भोगभूमिरित्यर्थः देवकुर्वादिका त्रिंशद्विधा, अन्तरे मध्ये समुद्रस्य द्वीपा ये ते तथा, तेषु जाता आन्तरद्वीप्यस्ता एवाऽऽन्तरद्वीपिकाः ।

विशेषत्रैविध्यमुक्त्वा सामान्यतस्तिरश्चां तदाह– **तिविहे**त्यादि कण्ठ्यम् ।

[सू० १४०] नेरइयाणं तओ लेस्सातो पन्नत्ताओ, तंजहा-कण्हलेसा, नीललेसा, काउलेसा। असुरकुमाराणं ततो लेस्साओ संकिलिट्ठाओ पन्नत्ताओ, तंजहा-कण्हलेसा, नीललेसा, काउलेसा, एवं जाव थणियकुमाराणं, एवं पुढविकाइयाणं, आउ-वणस्सतिकाइयाण वि । तेउकाइयाणं वाउकाइयाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं तओ लेस्सा जधा नेरइयाणं । पंचेंदियतिरिक्खजोणियाणं तओ लेस्साओ संकिलिट्ठाओ पन्नत्ताओ, तंजहा-कण्हलेसा, नीललेसा, काउलेसा। पंचेंदियतिरिक्खजोणियाणं तओ लेसाओ असंकिलिट्ठाओ पन्नत्ताओ, तंजहा-तेउलेसा, पम्हलेसा, सुक्कलेसा, एवं मणुस्साण वि । वाणमंतराणं जधा असुरकुमाराणं । वेमाणियाणं तओ लेस्साओ पन्नत्ताओ, तंजहा-तेउलेसा, पम्हलेसा, सुक्कलेसा ।

[टी०] स्त्र्यादिपरिणतिश्च जीवानां लेश्यावशतो भवतीति तन्निबन्धनकर्म्मकारणत्वात् तासामिति नारकादिपदेषु लेश्याः त्रिस्थानकावतारेण निरूपयन्नाह– **नेरइयाण**मित्यादि दण्डकसूत्रं कण्ठ्यम्, नवरं **नेरइयाणं तओ लेस्साओ** त्ति एतासामेव तिसृणां

सद्भावादविशेषणो निर्देशः, असुरकुमाराणां तु चतसृणां भावात् संक्लिष्टा इति विशेषितम्, चतुर्थी हि तेषां तेजोलेश्याऽस्ति, किन्तु सा न संक्लिष्टेति, पृथिव्यादिष्वसुरकुमार-सूत्रार्थमतिदिशन्नाह– **एवं पुढवी**त्यादि, पृथिव्यब्वनस्पतिषु देवोत्पादसम्भवाच्चतुर्थी तेजोलेश्याऽस्तीति सविशेषणो लेश्यानिर्देशोऽतिदिष्टः । तेजो-वायु-द्वि-त्रि-चतुरिन्द्रियेषु तु देवानुत्पत्त्या तदभावान्निर्विशेषण इत्यत एवाह– **तओ** इत्यादि । पञ्चेन्द्रियतिरश्चां मनुष्याणां च षडपीति संक्लिष्टासंक्लिष्टविशेषणतश्चतुःसूत्री, नवरं मनुष्यसूत्रे अतिदेशेनोक्ते इति व्यन्तरसूत्रे संक्लिष्टा वाच्याः, अत एवोक्तं **वाणमंतरे**त्यादि । वैमानिकसूत्रं निर्विशेषणमेव, असंक्लिष्टस्यैव त्रयस्य सद्भावात्, व्यवच्छेद्याभावेन विशेषणायोगादिति। ज्योतिष्कसूत्रं नोक्तम्, तेषां तेजोलेश्याया एव भावेन त्रिस्थानकानवतारादिति ।

[सू० १४१] तिहिं ठाणेहिं तारारूवे चलेज्जा, तंजहा-विकुव्वमाणे वा, परियारेमाणे वा, ठाणातो वा ठाणं संकममाणे तारारूवे चलेज्जा ।

तिहिं ठाणेहिं देवे विज्जुतारं करेज्जा, तंजहा-विकुव्वमाणे वा, परियारेमाणे वा, तहारूवस्स समणस्स वा माहणस्स वा इड्ढिं जुतिं जसं बलं वीरियं पुरिसगारपरक्कमं उवदंसेमाणे देवे विज्जुतारं करेज्जा ।

तिहिं ठाणेहिं देवे थणियसद्दं करेज्जा, तंजहा-विकुव्वमाणे, एवं जहा विज्जुतारं तहेव थणितसद्दं पि ।

[टी०] अनन्तरं वैमानिकानां लेश्याद्वारेणेहावतार उक्तः, ज्योतिष्काणां तु तथा तदसम्भवाच्चलनधर्म्मेण तमाह– **तारारूवे** त्ति तारकमात्रं **चलेज्जा** स्वस्थानं त्यजेत्, **वैक्रियं कुर्वद्वा, परिचारयमाणं वा** मैथुनार्थं संरम्भयुक्तमित्यर्थः, **स्थानाद्**वैकस्मात् **स्थानान्तरं सङ्क्रामत्** गच्छदित्यर्थः, यथा धातकीखण्डादिमेरुं परिहरदिति, अथवा क्वचिन्महर्द्धिके देवादौ चमरवद्वैक्रियादि कुर्वति सति तन्मार्गदानार्थं चलेदिति, उक्तं च– **तत्थ णं जे से वाघाइए अंतरे से जहन्नेणं दोन्नि छावट्ठे जोयणसए, उक्कोसेणं बारस जोयणसहस्साइं** [जम्बूद्वीपप्र० ७।३५०] ति, तत्र व्याघातिकमन्तरं महर्द्धिकदेवस्य मार्गदानादिति ।

अनन्तरं तारकदेवचलनक्रियाकारणान्युक्तानि, अथ देवस्यैव विद्युत्स्तनितक्रिययोः

कारणानि सूत्रद्वयेनाह– **तिहीत्यादि**, कण्ठ्यम्, नवरं **विज्जुयारं** ति **विद्युत्** तडित् सैव क्रियत इति **कारः** कार्यम्, विद्युतो वा करणं कारः क्रिया **विद्युत्कारः**, तम्, विद्युतं कुर्यादित्यर्थः, वैक्रियकरणादीनि हि सदर्प्पस्य भवन्ति, तत्प्रवृत्तस्य च दर्प्पोल्लासवतश्चलन-विद्युद्गर्जनादीन्यपि भवन्तीति चलन-विद्युत्कारादीनां वैक्रियादिकं कारणतयोक्तमिति, **ऋद्धिं** विमानपरिवारादिकां **द्युतिं** शरीराभरणादीनां **यशः** प्रख्यातिं **बलं** शारीरं **वीर्यं** जीवप्रभवम्, **पुरुषकारश्च** अभिमानविशेषः, स एव निष्पादितस्वविषयः **पराक्रमश्चेति पुरुषकारपराक्रमं** समाहारद्वन्द्वः, तदेतत् सर्व**मुपदर्शयमान** इति। तथा **स्तनितशब्दो** मेघगर्जितम्। **एव**मित्यादि वचनं 'परियारेमाणे वा तहारूवस्से'त्याद्यालापकसूचनार्थ-मिति।

[सू० १४२] तिहिं ठाणेहिं लोगंधयारे सिया, तंजहा-अरहंतेहिं वोच्छिज्जमाणेहिं, अरहंतपण्णत्ते धम्मे वोच्छिज्जमाणे, पुव्वगते वोच्छिज्जमाणे १।

तिहिं ठाणेहिं लोगुज्जोते सिया, तंजहा-अरहंतेहिं जायमाणेहिं, अरहंतेसु पव्वयमाणेसु, अरहंताणं णाणुप्पयमहिमासु २।

तिहिं ठाणेहिं देवंधगारे सिया, तंजहा-अरहंतेहिं वोच्छिज्जमाणेहिं, अरहंतपण्णत्ते धम्मे वोच्छिज्जमाणे, पुव्वगते वोच्छिज्जमाणे ३।

तिहिं ठाणेहिं देवुज्जोते सिया, तंजहा-अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वयमाणेहिं, अरहंताणं णाणुप्पयमहिमासु ४।

तिहिं ठाणेहिं देवसंनिवाए सिया, तंजहा-अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वयमाणेहिं, अरहंताणं नाणुप्पयमहिमासु ५, एवं देवुक्कलिता ६, देवकहकहए ७।

तिहिं ठाणेहिं देविंदा माणुसं लोगं हव्वमागच्छंति, तंजहा-अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वयमाणेहिं, अरहंताणं णाणुप्पयमहिमासु ८। एवं सामाणिया ९, तायत्तीसगा १०, लोगपाला देवा ११, अग्गमहिसीओ देवीओ १२, परिसोववन्नगा देवा १३, अणियाधिपती देवा १४, आतरक्खा

देवा १५ माणुसं लोगं हव्वमागच्छंति ।

तिहिं ठाणेहिं देवा अब्भुट्ठेज्जा, तंजहा-अरहंतेहिं जायमाणेहिं जाव तं चेव १, एवमासणाइं चलेज्जा २, सीहणातं करेज्जा ३, चेलुक्खेवं करेज्जा ४। तिहिं ठाणेहिं देवाणं चेतितरुक्खा चलेज्जा, तंजहा-अरहंतेहिं तं चेव ५।

तिहिं ठाणेहिं लोगंतिया देवा माणुसं लोगं हव्वमागच्छेज्जा, तंजहा-अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वयमाणेहिं, अरहंताणं णाणुप्पयमहिमासु।

[टी०] विद्युत्कार-स्तनितशब्दावुत्पातरूपावनन्तरमुक्तौ, अथोत्पातरूपाण्येव लोकान्धकारादीनि पञ्चदशसूत्र्या **तिहिं ठाणेही**त्यादिकया प्राह, कण्ठ्या चेयम्, नवरं **लोके** क्षेत्रलोकेऽ**न्धकारं** तमो लोकान्धकारं **स्याद्** भवेत् द्रव्यतो लोकानुभावाद्भावतो वा प्रकाशकस्वभावज्ञानाभावादिति, **तद्यथा**, अर्हन्ति अशोकाद्यष्टप्रकारां परमभक्ति-परसुरासुरविसरविरचितां जन्मान्तरमहालवालविरूढा-नवद्यवासना-जलाभिषिक्त-पुण्यमहातरुकल्याणफलकल्पां महाप्रातिहार्यरूपां पूजां निखिलप्रतिपन्थिप्रक्षयात् सिद्धिसौधशिखरारोहणं चे**त्यर्हन्तः** । तेषु **व्यवच्छिद्यमानेषु** निर्वाणं गच्छत्सु, तथाऽ**र्हत्प्रज्ञप्ते धर्म्मे व्यवच्छिद्यमाने** तीर्थव्यवच्छेदकाले, तथा **पूर्वाणि** दृष्टिवादाङ्गभागभूतानि **गतं** प्रविष्टं तदभ्यन्तरीभूतं तत्स्वरूपं यच्छ्रुतं तत् **पूर्वगतम्** तत्र **व्यवच्छिद्यमाने**, इह च राजमरणदेशनगरभङ्गादावपि दृश्यते दिशामन्धकारमात्रं रजस्वलतयेति, यत् पुनर्भगवत्स्वर्हदादिषु निखिलभुवनजनानवद्यनयनसमानेषु विगच्छत्सु लोकान्धकारं भवति तत् किमद्भुतमिति?।

लोकोद्द्योतो लोकानुभावान्मनुष्यलोके देवागमाद्वा, **नाणुप्पयमहिमासु** केवलज्ञानोत्पादे देवकृतमहोत्सवेष्विति ।

तिहीत्यादि **देवानां** भवनादिष्वन्धकारं **देवान्धकारं** लोकानुभावादेवेति । लोकान्धकारे उक्तेऽपि यद्देवान्धकारमुक्तम्, तत् सर्वत्रान्धकारसद्भावप्रतिपादनार्थमिति।

एवं **देवोद्द्योतो**ऽपि **देवसन्निपातो** भुवि तत्समवतारो, **देवोत्कलिका** तत्समवायविशेषः, **एव**मिति त्रिभिरेव स्थानैः, **देवकहकहे** त्ति देवकृतः

प्रमोदकलकलस्त्रिभिरेवेति ।

हव्वं ति शीघ्रम्, **सामाणिय** त्ति इन्द्रसमानर्द्धयः, **तायत्तिंसग** त्ति महत्तरकल्पाः पूज्याः, **लोकपालाः** सोमादयो दिग्नियुक्तकाः, **अग्रमहिष्यः** प्रधानभार्याः, **परिषत्** परिवारः, तत्रो**पपन्नका** ये ते तथा, **अनीकाधिपतयो** गजादिसैन्यप्रधाना ऐरावतादयः, **आत्मरक्षा** अङ्गरक्षा राज्ञामिवेति, **माणुस्सं लोयं हव्वमागच्छन्ती**ति प्रतिपदं सम्बन्धनीयम् १५ ।

मनुष्यलोकागमने देवानां यानि कारणान्युक्तानि तान्येव देवाभ्युत्थानादीनां कारणतया सूत्रपञ्चकेनाह– **तिहीत्यादि** कण्ठ्यम्, नवरम् **अब्भुट्ठिज्ज** त्ति सिंहासनादभ्युत्तिष्ठेयुरिति, **आसनानि** शक्रादीनां सिंहासनानि, **तच्चलनं** लोकानुभावादेवेति, **सिंहनाद-चेलोत्क्षेपौ** प्रमोदकार्यौ जनप्रतीतौ, **चैत्यवृक्षा** ये सुधर्मादिसभानां प्रतिद्वारं पुरतो मुखमण्डप-प्रेक्षामण्डप-चैत्यस्तूप-चैत्यवृक्ष-महाध्वजादिक्रमतः श्रूयन्ते। लोकान्तिकानां प्रधानतरत्वेन भेदेन मनुष्यक्षेत्रागमनकारणान्याह– **तिहीत्यादि** कण्ठ्यम्, नवरं **लोकस्य** ब्रह्मलोकस्याऽन्तः समीपं कृष्णराजीलक्षणं क्षेत्रं निवासो येषां ते, **लोकान्ते** वा औदयिकभावलोकावसाने भवा अनन्तरभवे मुक्तिगमनादिति **लोकान्तिकाः** सारस्वतादयोऽष्टधा वक्ष्यमाणरूपा इति।

[सू० १४३] तिण्हं दुप्पडियारं समणाउसो, तंजहा-अम्मापिउणो, भट्टिस्स, धम्मायरियस्स।

[१] संपातो वि य णं केति पुरिसे अम्मापियरं सयपाग-सहस्सपागेहिं तेल्लेहिं अब्भंगेत्ता, सुरभिणा गंधट्टएणं उव्वट्टित्ता, तिहिं उदगेहिं मज्जावित्ता, सव्वालंकारविभूसियं करेत्ता, मणुण्णं थालीपागसुद्धं अट्ठारसवंजणाउलं भोयणं भोयावेत्ता जावज्जीवं पिट्ठिवडेंसियाए परिवहेज्जा, तेणावि तस्स अम्मापिउस्स दुप्पडियारं भवइ। अहे णं से तं अम्मापियरं केवलिपण्णत्ते धम्मे आघवइत्ता पन्नवइत्ता परूवइत्ता ठावइत्ता भवति, तेणामेव तस्स अम्मापिउस्स सुप्पडितारं भवति समणाउसो !

[२] केति महच्चे दरिद्दं समुक्कसेज्जा, तते णं से दरिद्दे समुक्किट्ठे समाणे

पच्छा पुरं च णं विउलभोगसमितिसमन्नागते यावि विहरेज्जा, तते णं से महच्चे अन्नदा कयाइ दरिद्दीहूते समाणे तस्स दरिद्दस्स अंतिए हव्वमागच्छेज्जा, तते णं से दरिद्दे तस्स भट्टिस्स सव्वस्समवि दलयमाणे तेणावि तस्स भट्टिस्स दुप्पडियारं भवति । अहे णं से तं भट्टिं केवलिपण्णत्ते धम्मे आघवइत्ता पन्नवइत्ता परूवइत्ता ठावइत्ता भवति, तेणामेव तस्स भट्टिस्स सुप्पडियारं भवति ।

[३] केति तहारूवस्स समणस्स वा माहणस्स वा अंतियं एगमवि आरियं धम्मियं सुवयणं सोच्चा निस्सम्म कालमासे कालं किच्चा अन्नयरेसु देवलोगेसु देवत्ताए उववन्ने, तते णं से देवे तं धम्मायरियं दुब्भिक्खातो वा देसातो सुभिक्खं देसं साहरेज्जा, कंतारातो वा णिक्कंतारं करेज्जा, दीहकालिएणं वा रोगातंकेण अभिभूतं समाणं विमोएज्जा, तेणावि तस्स धम्मायरियस्स दुप्पडियारं भवति । अधे णं से तं धम्मायरियं केवलिपण्णत्ताओ धम्मातो भट्ठं समाणं भुज्जो वि केवलिपण्णत्ते धम्मे आघवतित्ता जाव ठावतित्ता भवति, तेणामेव तस्स धम्मायरियस्स सुप्पडियारं भवति ।

[**टी०**] अथ किमर्थं भदन्त ! ते इहागच्छन्तीति ? उच्यते, अर्हतां धर्माचार्यतया महोपकारित्वात् पूजाद्यर्थम्, अशक्यप्रत्युपकाराश्च भगवन्तो धर्म्माचार्याः, यतः– **तिण्हं** त्रयाणां **दुःखे**न कृच्छ्रेण **प्रतिक्रियते** कृतोपकारेण पुंसा प्रत्युपक्रियत इति खल्प्रत्यये सति **दुष्प्रतिकरं** प्रत्युपकर्त्तुमशक्यमिति यावत्, हे **श्रमण** ! हे **आयुष्मन्** ! समस्तनिर्द्देशो वा हे **श्रमणायुष्म**न्निति भगवता शिष्यः सम्बोधितः । **अम्बया** मात्रा सह **पिता** जनकः **अम्बापिता,** तस्येत्येकं स्थानम्, जनकत्वेनैकत्वविवक्षणात् । तथा **भट्टिस्स** त्ति भर्त्तुः पोषकस्य स्वामिन इत्यर्थ इति द्वितीयम् । धर्म्मदाता आचार्यो **धर्म्माचार्यः,** तस्येति तृतीयम् । आह च–

दुष्प्रतिकारौ मातापितरौ स्वामी गुरुश्च लोकेऽस्मिन् ।
तत्र गुरुरिहाऽमुत्र च सुदुष्करतरप्रतीकारः ॥ [प्रशम० ७१] इति ।

तत्र जनकदुष्प्रतिकार्यतामाह– **संपाओ** त्ति **प्रातः** प्रभातम्, तेन समं सम्प्रातः

सम्प्रातरपि च प्रभातसमकालमपि च, यदैव प्रातः संवृत्तं तदैवेत्यर्थः, अनेन कार्यान्तराव्यग्रतां दर्शयति, **सं**शब्दस्यातिशयार्थत्वाद्वा अतिप्रभाते, प्रतिशब्दार्थत्वाद्वाऽस्य प्रतिप्रभातमित्यर्थः, **कश्चिदि**ति कुलीन एव, न तु सर्वोऽपि **पुरुषो** मानवो देव-तिरश्चोरेवंविधव्यतिकरासम्भवात्, शतं पाकानाम् ओषधिक्काथानां पाके यस्य १, ओषधिशतेन वा सह पच्यते यत् २, शतकृत्वो वा पाको यस्य ३, शतेन वा रूपकाणां मूल्यतः पच्यते ४ यत्तच्छ**तपाकम्**, एवं **सहस्रपाक**मपि, ताभ्यां **तैलाभ्याम्**, **अब्भंगेत्ता** अभ्यङ्गं कृत्वा **गन्धट्टएणं** ति गन्धाट्टकेन गन्धद्रव्यक्षोदेन **उद्वर्त्य** उद्वलनं कृत्वा **त्रिभिरुदकै**: गन्धोदकोष्णोदकशीतोदकैः **मज्जयित्वा** स्नापयित्वा, **मनोज्ञं** कलमौदनादि, **स्थाली** पिठरी तस्यां पाको यस्य तत्तथा, अन्यत्र हि पक्कमपक्कं वा न तथाविधं स्यादितीदं विशेषणमिति, **शुद्धं** भक्तदोषवर्जितम्, स्थालीपाकं च तच्छुद्धं च स्थालीपाकेन वा शुद्धमिति विग्रहः, **अष्टादशभि**र्लोकप्रतीतै**र्व्यञ्जनै**: शालनकैस्त-क्रादिभिर्वा **आकुलं** सङ्कीर्णं यत्तत्तथा, **भोजनं भोजयित्वा**, एते चाष्टादश भेदाः–

सूओ १ दणो २ जवन्नं ३ तिन्नि य मंसाइं ६ गोरसो ७ जूसो ८ ।
भक्खा ९ गुललावणिया १० मूलफला ११ हरियगं १२ डागो १३ ॥
होइ रसालू व तहा १४ पाणं १५ पाणीय १६ पाणगं चेव १७ ।
अट्ठारसमो सागो १८ निरुवहओ लोइओ पिंडो ॥ [ ]

मांसत्रयं जलजादिसत्कं, **जूषो** मुद्ग-तन्दुल-जीरक-कटुभाण्डादिरसः, **भक्ष्याणि** खण्डखाद्यादीनि, **गुललावणिका** गुडपर्पटिका लोकप्रसिद्धा गुडधाना वा, **मूलफलान्येक** एव पदम्, **हरितकं** जीरकादेः, **डाको** वस्तुलादिभर्जिका, **रसालू** मज्जिका, तल्लक्षणमिदम्–

दो घयपला महुपलं दहिस्स अद्धाढयं मिरिय वीसा ।
दस खण्डगुलपलाइं एस रसालू णिवइजोग ॥ [ ] त्ति ।

पानं सुरादि, **पानीयं** जलम्, **पानकं** द्राक्षापानकादि, **शाकः** तक्रसिद्ध इति । यावान् जीवो **यावज्जीवं** यावत्प्राणधारणं **पृष्ठौ** स्कन्धे अवतंस इवाऽ**वतंसः** शेखरस्तस्य करणमवतंसिका पृष्ठ्यवतंसिका, तया **पृष्ठ्यवतंसिकया परिवहेत्**, पृष्ठ्यारोपितमित्यर्थः, **तेनापि** परिवाहकेन परिवहनेन वा **तस्य अम्बापितुर्दुःप्रतिकरम्**,

अशक्यः प्रतीकार इत्यर्थः, अनुभूतोपकारतया तस्य प्रत्युपकारकारित्वाद्, आह च–

कयउवयारो जो होइ सज्जणो होइ को गुणो तस्स ? ।
उवयारबाहिरा जे हवंति ते सुंदरा सुयणा ॥ [ ] इति ।

अहे णं से त्ति **अथ** चेत् **ण**मित्यलङ्कारे स पुरुषस्**तम् अम्बापितरं धर्म्मे स्थापयिता** स्थापनशीलो **भवति,** अनुष्ठानतः स्थापयतीत्यर्थः, किं कृत्वेत्याह– **आघवइत्ता** धर्म्ममाख्याय **प्रज्ञाप्य** बोधयित्वा **प्ररूप्य** प्रभेदत इति, **तेणामेव** त्ति ततस्तेनैव धर्मस्थापनेनैव न परिवहनेन, **तस्य अम्बापितुः सुपडियरं** ति सुखेन प्रतिक्रियते इति **सुप्रतिकरम्,** भावसाधनोऽयम्, तद्भवति, प्रत्युपकारः कृतो भवतीत्यर्थः, धर्मस्थापनस्य महोपकारत्वाद्, आह च–

सम्मत्तदायगाणं दुप्पडियारं भवेसु बहुएसुं ।
सव्वगुणमेलियाहि वि उवगारसहस्सकोडीहिं ॥ [उपदेशमाला० २६९] ति ।

अथ भर्त्तुः दुष्प्रतिकार्यतामाह– **केइ** त्ति **कश्चित्** कोऽपि **महती** ऐश्वर्यलक्षणाऽर्च्चा ज्वाला पूजा वा यस्य, अथवा महांश्चासावर्थपतितया अर्च्यश्च पूज्य इति **महार्च्चो महार्च्यो** वा, **माहत्यं** महत्त्वं तद्योगान्**माहत्यो** वा, ईश्वर इत्यर्थः, **दरिद्रम्** अनीश्वरं कञ्चन पुरुषमतिदुःस्थं **समुत्कर्षयेत्** धनदानादिनोत्कृष्टं कुर्यात्, ततः समुत्कर्षणानन्तरं स दरिद्रः समुत्कृष्टो धनादिभिः **समाणे** त्ति सन् **पच्छ** त्ति पश्चात्काले **पुरं च णं** ति पूर्वकाले च, समुत्कर्षणकाल एवेत्यर्थः, अथवा पश्चाद् भर्त्तुरसमक्षं पुरश्च भर्त्तुः समक्षं च, **विपुलया भोगसमित्या** भोगसमुदयेन **समन्वागतो** युक्तो यः स तथा स **चापि विहरेत्** वर्त्तेत, **ततो**ऽनन्तरं **स** महार्च्चो भर्त्ता । **सव्वस्सं** ति सर्व्वं च तत् स्वं च द्रव्यं चेति **सर्वस्वं** त**दपि,** आस्तामल्पमिति, **दलमाणे** त्ति ददत्, न कृतप्रत्युपकारो भवेदिति शेषः, अत**स्तेनापि** सर्वस्वदानेन सर्वस्वदायकेनापि वा दुष्**प्रतिकार**मेवेति २।

अथ धर्माचार्यदुष्प्रतिकार्यतामाह– **के**इत्यादि, **आरियं** ति पापकर्मभ्य आराद्यातमित्**यार्य**मत एव **धार्मिक**मत एव **सुवचनं श्रुत्वा** श्रोत्रेण **निशम्य** मनसाऽवधार्य **अन्यतरेषु देवलोकेष्वन्यतरदेवानां** मध्ये इत्यर्थो **देवत्वेनोत्पन्न** इति, दुर्लभा भिक्षा

यस्मिन् देशे स **दुर्भिक्षस्तस्मात्, संहरेत्** नयेत्, **कान्तारम्** अरण्यम्, निर्गतः कान्तारा**न्निष्कान्तार**स्तं **निष्क्रमितारं** वा, दीर्घः कालो विद्यते यस्य स **दीर्घकालिक**स्तेन, **रोगः** कालसहः कुष्ठादिः, **आतङ्कः** कृच्छ्रजीवितकारी सद्योघातीत्यर्थः शूलादिः, अनयोर्द्वन्द्वैकत्वे **रोगातङ्क** तेनेति, धर्मस्थापनेन तु भवति कृतोपकारः, यदाह–

जो जेण जम्मि ठाणम्मि ठाविओ दंसणे व चरणे वा ।
सो तं तओ चुयं तम्मि चेव काउं भवे निरिणो ॥ [निशीथभा० ५५९३] त्ति ।

शेषं सुगमत्वान्न स्पृष्टमिति ।

[सू० १४४] तिहिं ठाणेहिं संपन्ने अणगारे अणादीयं अणवदग्गं दीहमद्धं चाउरंतं संसारकंतारं वीतीवतेज्जा, तंजहा-अणिदाणयाए, दिट्ठिसंपन्नयाए, जोगवाहियाए ।

[टी०] धर्म्मस्थापनेन चास्य भवच्छेदलक्षणः प्रत्युपकारः कृतः स्यादिति धर्मस्य स्थानत्रयावतारणेन भवच्छेदकारणतामाह- **तिही**त्यादि कण्ठ्यम्, नवरम् **अनादिकम्** आदिरहित**मनवदग्रम्** अनन्तं **दीर्घाध्वं** दीर्घमार्गं चत्वारोऽन्ता विभागा नरकगत्यादयो यस्य त**च्चतुरन्तम्**, दीर्घत्वं प्राकृतत्वात्, **संसार** एव **कान्तारम्** अरण्यं **संसारकान्तारं** तद् **व्यतिव्रजेत्** व्यतिक्रामेदिति, अनादिकत्वादीनि विशेषणानि कान्तारपक्षेऽपि विवक्षया योजनीयानि, तथाहि– अनाद्यनन्तमरण्यमतिमहत्त्वाच्चतुरन्तं दिग्भेदादिति । निदानं भोगर्द्धिप्रार्थनास्वभावमार्त्तध्यानम्, तद्विवर्जितता **अनिदानता**, तया, **दृष्टिसम्पन्नता** सम्यग्दृष्टिता, तया, **योगवाहिता** श्रुतोपधानकारित्वं समाधिस्थायिता वा, तयेति ।

[सू० १४५] तिविहा ओसप्पिणी पन्नत्ता, तंजहा-उक्कस्सा, मज्झिमा, जहन्ना १, एवं छप्पि समाओ भाणियव्वाओ जाव दूसमदूसमा ७।

तिविहा उस्सप्पिणी पन्नत्ता, तंजहा-उक्कस्सा, मज्झिमा, जहन्ना ८, एवं छप्पि समाओ भाणियव्वाओ जाव सुसमसुसमा १४।

[टी०] भवव्यतिव्रजनं च कालविशेष एव स्यादिति कालविशेषनिरूपणायाह– **तिविहे**त्यादिसूत्राणि चतुर्दश कण्ठ्यानि, नवरम् **अवसर्पिणी** प्रथमेऽरके **उत्कृष्टा**, चतुर्षु

मध्यमा, पश्चिमे **जघन्या**, एवं सुषमसुषमादिषु प्रत्येकं त्रयं त्रयं कल्पनीयम्, तथा उत्सर्प्पिण्याः दुःषमदुःषमादि तद्भेदानां चोक्तविपर्ययेणोत्कृष्टत्वं प्राग्वद्योज्यमिति ।

[सू० १४६] तिहिं ठाणेहिं अच्छिन्ने पोग्गले चलेज्जा, तंजहा-आहारिज्जमाणे वा पोग्गले चलेज्जा, विकुव्वमाणे वा पोग्गले चलेज्जा, ठाणातो वा ठाणं संकामिज्जमाणे पोग्गले चलेज्जा १।

तिविधे उवधी पन्नत्ते, तंजहा-कम्मोवही, सरीरोवही, बाहिरभंडमत्तोवही। एवं असुरकुमाराणं भाणियव्वं, एवं एगिंदिय-नेरइयवज्जं जाव वेमाणियाणं २।

अहवा तिविधे उवधी पन्नत्ते, तंजहा-सचित्ते, अचित्ते, मीसए । एवं णेरइयाणं निरंतरं जाव वेमाणियाणं ३।

तिविधे परिग्गहे पन्नत्ते, तंजहा-कम्मपरिग्गहे, सरीरपरिग्गहे, बाहिरभंडमत्तपरिग्गहे । एवं असुरकुमाराणं, एवं एगिंदियनेरतियवज्जं जाव वेमाणियाणं ४।

अहवा तिविहे परिग्गहे पन्नत्ते, तंजहा-सचित्ते, अचित्ते, मीसए । एवं नेरतियाणं निरंतरं जाव वेमाणियाणं ५।

[टी०] काललक्षणा अचेतनद्रव्यधर्म्मा अनन्तरमुक्ताः, तत्साधर्म्यात् पुद्गलधर्म्मान्निरूपयन् सूत्राणि पञ्च चतुरश्च दण्डकानाह– **तिहीत्यादि**, छिन्नः खड्गादिना पुद्गलः समुदायाच्चलत्येवेत्यत आह– **अच्छिन्नपुद्गल** इति, **आहारेज्जमाणे** त्ति आहारतया जीवेन गृह्यमाणः स्वस्थानाच्चलति, जीवेनाकर्षणात्, एवं **विक्रियमाणो** वैक्रियकरणवशवर्त्तितयेति, **स्थानात् स्थानान्तरं सङ्क्रम्यमाणो** हस्तादिनेति ।

उपधीयते पोष्यते जीवोऽनेनेत्**युपधिः**, कर्म्मैवोपधिः **कर्म्मोपधिः**, एवं **शरीरोपधिः**, **बाह्याः** शरीरबहिर्वर्त्ती, **भाण्डानि** च भाजनानि मृन्मयानि, **मात्राणि** च मात्रायुक्तानि कांस्यादिभाजनानि, भोजनोपकरणमित्यर्थः, **भाण्डमात्राणि**, तान्येवोपधिः **भाण्डमात्रोपधिः**, अथवा **भाण्डं** वस्त्राभरणादि, तदेव **मात्रा** परिच्छदः, सैवो**पधि**रिति, ततो **बाह्य**शब्दस्य कर्म्मधारय इति । चतुर्विंशतिदण्डकचिन्तायामसुरादीनां त्रयोऽपि

वाच्याः नारकैकेन्द्रियवर्जाः, तेषामुपकरणस्याभावाद्, द्वीन्द्रियादीनां तूपकरणं दृश्यते एव केषाञ्चिदित्यत एवाह– **एव**मित्यादि ।

अहवेत्यादि, **सचित्तो**पधिर्यथा शैलं भाजनम्, **अचित्तो** वस्त्रादिः, **मिश्रः** परिणतप्रायं शैलभाजनमेवेति, दण्डकचिन्ता सुगमा, नवरं सचित्तोपधिर्नारकाणां शरीरम्, अचेतनः उत्पत्तिस्थानम्, मिश्रः शरीरमेवोच्छ्वासादिपुद्गलयुक्तं तेषां सचेतनाचेतनत्वेन मिश्रत्वस्य विवक्षणादिति, एवमेव शेषाणामप्ययमूह्य इति ।

तिविहे परिग्गहेत्यादिसूत्राणि उपधिवन्नेयानि, नवरं परिगृह्यते स्वीक्रियते इति **परिग्रहो** मूर्च्छाविषय इति, इह च एषामयमिति व्यपदेशभागेव ग्राह्यः, स च नारकैकेन्द्रियाणां कर्म्मादिरेव सम्भवति, न भाण्डादिरिति ।

[सू० १४७] तिविहे पणिधाणे पन्नत्ते, तंजहा-मणपणिहाणे, वइपणिहाणे, कायपणिहाणे। एवं पंचेंदियाणं जाव वेमाणियाणं ।

तिविधे सुप्पणिधाणे पन्नत्ते, तंजहा-मणसुप्पणिहाणे, वइसुप्पणिहाणे, कायसुप्पणिहाणे । संजतमणुस्साणं तिविधे सुप्पणिहाणे पन्नत्ते, तंजहा-मणसुप्पणिहाणे, वइसुप्पणिहाणे, कायसुप्पणिहाणे ।

तिविधे दुप्पणिहाणे पन्नत्ते, तंजहा-मणदुप्पणिहाणे, वइदुप्पणिहाणे, कायदुप्पणिहाणे । एवं पंचेंदियाणं जाव वेमाणियाणं ।

[टी०] पुद्गलधर्म्माणां त्रित्वं निरूप्य जीवधर्म्माणां **तिविहे** इत्यादिभिस्त्रिभिः सदण्डकैः सूत्रैस्तदाह, कण्ठ्यानि चैतानि, नवरं प्रणिहितिः **प्रणिधानम्** एकाग्रता, तच्च मनःप्रभृतिकभेदात् त्रिधेति, तत्र मनसः प्रणिधानं **मनःप्रणिधान**मेवमितरे, तच्च चतुर्विंशतिदण्डके सर्वेषां पञ्चेन्द्रियाणां भवति, तदन्येषां तु नास्ति, योगानां सामस्त्येनाभावादित्यत एवोक्तम्– **एवं पचेंदिये**त्यादीति । प्रणिधानं हि शुभाशुभभेदम्, अथ शुभमाह– **तिविहे**त्यादि सामान्यसूत्रम् १ । विशेषमाश्रित्य तु चतुर्विंशति-दण्डकचिन्तायां मनुष्याणामेव तत्रापि संयतानामेवेदं भवति, चारित्रपरिणामरूपत्वादस्येति, अत एवाह– **संजये**त्यादि २ । **दुष्प्रणिधानम**शुभमनःप्रवृत्त्यादिरूपं सामान्यप्रणिधानवत् व्याख्येयमिति ३।

[सू० १४८] तिविधा जोणी पन्नत्ता, तंजहा-सीता, उसिणा, सीओसिणा। एवं एगिंदियाणं विगलिंदियाणं तेउकाइयवज्जाणं संमुच्छिमपंचेंदियतिरिक्ख-जोणियाणं संमुच्छिममणुस्साण य ।

तिविहा जोणी पन्नत्ता, तंजहा-सचित्ता, अचित्ता, मीसिता। एवं एगेंदियाणं विगलिंदियाणं संमुच्छिमपंचेंदियतिरिक्खजोणियाणं संमुच्छिममणुस्साण य ।

तिविधा जोणी पन्नत्ता, तंजहा-संवुडा, वियडा, संवुडवियडा ।

तिविधा जोणी पन्नत्ता, तंजहा-कुम्मुन्नत्ता, संखावत्ता, वंसीवत्तिया । कुम्मुन्नता णं जोणी उत्तमपुरिसमाऊणं, कुम्मुन्नताते णं जोणीते तिविहा उत्तमपुरिसा गब्भं वक्कमंति, तंजहा-अरहंता, चक्कवट्टी, बलदेव-वासुदेवा । संखावत्ता णं जोणी इत्थीरयणस्स, संखावत्ताते णं जोणीते बहवे जीवा य पोग्गला य वक्कमंति विउक्कमंति चयंति उववज्जंति, नो चेव णं निप्फज्जंति। वंसीवत्तिता णं जोणी पिहज्जणस्स, वंसीवत्तिताते णं जोणीते बहवे पिहज्जणे गब्भं वक्कमंति ।

[टी०] जीवपर्यायाधिकारात् **तिविहे**त्यादिना **गब्भं वक्कमंती**त्येतदन्तेन ग्रन्थेन योनिस्वरूपमाह । तत्र युवन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकादिशरीरेण मिश्रीभवन्त्यस्यामिति **योनिः** जीवस्योत्पत्तिस्थानं शीतादिस्पर्शवदिति । **एवं** ति यथा सामान्यतस्त्रिविधा तथा चतुर्विंशतिदण्डकचिन्तायामेकेन्द्रिय-विकलेन्द्रियाणां तेजोवर्जानाम्, तेजसामुष्णयोनित्वात्, पञ्चेन्द्रियतिर्यक्पदे मनुष्यपदे च सम्मूर्च्छनजानां त्रिविधा, शेषाणां त्वन्यथेति, यत आह–

सीओसिणजोणीया सव्वे देवा य गब्भवक्कंती ।
उसिणा य तेउकाए दुह णिरए तिविह सेसाणं ॥ [जीवस० ४७, बृहत्सं० ३६०] ति ।

अन्यथा योनित्रैविध्यमाह– **तिविहे**त्यादि कण्ठ्यम्, नवरं दण्डकचिन्तायामे-केन्द्रियादीनां सचित्तादिस्त्रिविधा योनिरन्येषां त्वन्यथा, यत उक्तम्–

अच्चित्ता खलु जोणी नेरइयाणं तहेव देवाणं ।
मीसा य गब्भवसही तिविहा जोणी य सेसाणं ॥ [जीवस० ४६, बृहत्सं० ३५९] ति ।

पुनरन्यथा तामाह– **तिविहेत्यादि, संवृता** सङ्कटा घटिकालयवत्, **विवृता** विपरीता, **संवृतविवृता** तूभयरूपेति, एतद्विभागोऽयम्–

एगिंदिय-नेरइया संवुडजोणी हवंति देवा य ।

विगलिंदियाण वियडा संवुडवियडा य गब्भम्मि ॥ [**जीवस०** ४५, बृहत्सं० ३५८] त्ति।

कुम्मुन्नयेत्यादि कण्ठ्यम्, नवरं **कूर्म्मः** कच्छपः, तद्वदुन्नता **कूर्म्मोन्नता,** शङ्खस्येवावर्त्तो यस्यां सा **शङ्खावर्त्ता,** वंश्या वंशजाल्याः पत्रकमिव या सा **वंशीपत्रिका।** **गब्भं वक्कमंति** त्ति गर्भे उत्पद्यन्ते, बलदेव-वासुदेवानां सहचरत्वेनैकत्वविवक्षयोत्तमपुरुषत्रैविध्यमिति । **बहवे** इत्यादि, योनित्वाज्**जीवाः पुद्गलाश्च** तद्ग्रहणप्रायोग्याः, किम् ? **व्युत्क्रामन्ति** उत्पद्यन्ते, **व्यवक्रामन्ति** विनश्यन्ति, एतदेव व्याख्याति– **विउक्कमंति** त्ति, कोऽर्थः ? **च्यवन्ते, वक्कमंति** त्ति किमुक्तं भवति ? **उत्पद्यन्ते** इति। **पिहज्जणस्स** त्ति **पृथग्जनस्य** सामान्यजनस्योत्पत्तिकारणं भवतीति ।

[सू० १४९] तिविहा तणवणस्सतिकाइया पन्नत्ता, तंजहा-संखेज्जजीविता असंखेज्जजीविता अणंतजीविता ।

[टी०] अनन्तरं योनितो मनुष्याः प्ररूपिताः, अधुना मनुष्यसधर्मणो बादरवनस्पतिकायिकान् प्ररूपयन्नाह– **तिविहेत्यादि, तृणवनस्पतयो** बादरा इत्यर्थः, **सङ्ख्यातजीविकाः** सङ्ख्यातजीवाः, यथा नालिकाबद्धकुसुमानि जात्यादीनीत्यर्थः, **असङ्ख्यातजीविका** यथा निम्बाम्रादीनां मूल-कन्द-स्कन्ध-त्वक्-छाखा-प्रवालाः, **अनन्तजीविकाः** पनकादय इति, इह **प्रज्ञापनासूत्राणी**त्थम्-

जे के वि नालियाबद्धा, पुप्फा संखेज्जजीविया । इत्यादि ।

[सू० १५०] जंबूदीवे दीवे भारहे वासे तओ तित्था पन्नत्ता, तंजहा-मागहे, वरदामे, पभासे, एवं एरवए वि । जंबुद्दीवे दीवे महाविदेहे वासे एगमेगे चक्कवट्टिविजये ततो तित्था पन्नत्ता, तंजहा-मागधे, वरदामे, पभासे ३। एवं धायइसंडे दीवे पुरत्थिमद्धे वि ३, पच्चत्थिमद्धे वि ३, पुक्खरवरदीवड्ढपुरत्थिमद्धे वि ३, पच्चत्थिमद्धे वि ३।

[टी०] अनन्तरं वनस्पतय उक्तास्ते च जलाश्रया बहवो भवन्तीति सम्बन्धाज्जला-

श्रयाणां तीर्थानां निरूपणायाह– **जंबूदीवे**त्यादि पञ्चदशसूत्री साक्षादतिदेशतश्च, सुगमा च, केवलं तीर्थानि चक्रवर्त्तिनः समुद्र-शीतादिमहानद्यवतारलक्षणानि तन्नामकदेवनिवासभूतानि, तत्र भरतैरावतयोस्तानि पूर्व-दक्षिणा-ऽपरसमुद्रेषु क्रमेणेति, विजयेषु तु शीता-शीतोदामहानद्योः पूर्वादिक्रमेणैवेति।

[सू० १५१] जंबुद्दीवे दीवे भरहेरवतेसु वासेसु तीताते उस्सप्पिणीते सुसमाए समाते तिन्नि सागरोवमकोडाकोडीओ कालो होत्था १। एवं ओसप्पिणीते, नवरं पण्णत्ते २। आगमेस्साते उस्सप्पिणीते भविस्सति ३। एवं धायइसंडे पुरत्थिमद्धे पच्चत्थिमद्धे वि ९, एवं पुक्खरवरदीवड्ढपुरत्थिमद्धे पच्चत्थिमद्धे वि कालो भाणियव्वो १५।

[टी०] जम्बूद्वीपादौ मनुष्यक्षेत्रे सन्ति तीर्थानि प्ररूपितानि, अधुना तत्रैव सन्तं कालं त्रिस्थानोपयोगिनं सूत्रपञ्चदशकेन साक्षादतिदेशाभ्यां निरूपयन्नाह– **जंबुद्दीवे**त्यादि सुबोधम्, किन्तु **पन्नत्ते** त्ति अवसर्पिणीकालस्य वर्त्तमानत्वेनाऽतीतोत्सर्पिणीवत् 'होत्थ'त्ति न व्यपदेशः कार्यः, अपि तु **पन्नत्ते** त्ति कार्य इत्यर्थः ।

[सू० १५२] जंबूदीवे दीवे भरहेरवतेसु वासेसु तीताते उस्सप्पिणीते सुसमसुसमाते समाए मणुया तिन्नि गाउयाइं उड्ढंउच्चत्तेणं तिन्नि पलिओवमाइं परमाउं पालयित्था, एवं इमीसे ओसप्पिणीते, आगमेस्साते उस्सप्पिणीते। जंबूदीवे दीवे देवकुरु-उत्तरकुरासु मणुया तिन्नि गाउयाइं उड्ढंउच्चत्तेणं पन्नत्ता, तिन्नि पलिओवमाइं परमाउं पालयंति, एवं जाव पुक्खरवरदीवड्ढपच्चत्थिमद्धे।

जंबूदीवे दीवे भरहेरवतेसु वासेसु एगमेगाते ओसप्पिणीउस्सप्पिणीते तओ वंसा उप्पज्जिंसु वा उप्पज्जंति वा उप्पज्जिस्संति वा, तंजहा-अरहंतवंसे चक्कवट्टिवंसे दसारवंसे, एवं जाव पुक्खरवरदीवड्ढपच्चत्थिमद्धे ।

जंबूदीवे दीवे भरहेरवतेसु वासेसु एगमेगाते ओसप्पिणी-उस्सप्पिणीए तओ उत्तमपुरिसा उप्पज्जिंसु वा उप्पज्जंति वा उप्पज्जिस्संति वा, तंजहा-अरहंता चक्कवट्टी बलदेव-वासुदेवा, एवं पुक्खरवरदीवड्ढपच्चत्थिमद्धे । तओ अहाउयं पालयंति, तंजहा-अरहंता चक्कवट्टी बलदेव-वासुदेवा । तओ

मज्झिममाउयं पालयंति, तंजहा-अरहंता चक्कवट्टी बलदेव-वासुदेवा ।

[टी०] **जंबूदीवे**त्यादिना **वासुदेवे**त्येतदन्तेन ग्रन्थेन कालधर्म्मानिवाह, सुगमश्चायम्, किन्तु **अहाउयं पालयंति** त्ति निरुपक्रमायुष्कत्वात्, **मध्यमायुः पालयन्ति** वृद्धत्वाभावात्।

[सू० १५३] बादरतेउकाइयाणं उक्कोसेणं तिन्नि राइंदियाइं ठिती पन्नत्ता १। बादरवाउकाइयाणं उक्कोसेणं तिन्नि वाससहस्साइं ठिती पन्नत्ता २।

[टी०] आयुष्काधिकारादिदं सूत्रद्वयमाह– स्पष्टम् ।

[सू० १५४] अह भंते ! सालीणं वीहीणं गोधूमाणं जवाणं जवजवाणं एतेसि णं धन्नाणं कोट्ठाउत्ताणं पल्लाउत्ताणं मंचाउत्ताणं मालाउत्ताणं ओलित्ताणं लित्ताणं लंछियाणं मुद्दियाणं पिहिताणं केवतितं कालं जोणी संचिट्ठति ? गोयमा! जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिण्णि संवच्छराइं, तेण परं जोणी पमिलायति, तेण परं जोणी पविद्धंसति, तेण परं जोणी विद्धंसति, तेण परं बीए अबीए भवति, तेण परं जोणीवोच्छेदे पन्नत्ते ।

[टी०] स्थित्यधिकारादेवेदमपरमाह– **अह भंते** त्ति **अथ** परिप्रश्नार्थः, **भदन्त** इति भदन्तः कल्याणस्य सुखस्य च हेतुत्वात् कल्याणः सुखश्चेति ।

अथवा भज्यते सेव्यते शिवार्थिभिरिति भजन्तः, अत्र बह्वर्थयुक्तः,

अतो **भंते** त्ति **महावीर**मामन्त्रयन्नुक्तवान् **गौतमा**दिः । **शालीनां** कलमादिकानामिति विशेषः, **व्रीहीणा**मिति सामान्यम्, **यवयवा** यवविशेषा एव, **एतेषाम्** अभिहितत्वेन प्रत्यक्षाणां **कोष्ठे** कुशूले **आगुप्तानि** प्रक्षेपणेन संरक्षितानि **कोष्ठागुप्तानि**, तेषाम्, एवं सर्वत्र, नवरं **पल्यं** वंशकटकादिकृतो धान्याधारविशेषः, **मञ्चः** स्थूणानामुपरि स्थापितवंशकटकादिमयो जनप्रतीतः, **मालको** गृहस्योपरितनभागः, अभिहितं च–

अकुड्डो होइ मंचो मालो य घरोवरिं होइ [ ] त्ति ।

ओलित्ताणं ति द्वारदेशे पिधानेन सह गोमयादिना अवलिप्तानाम्, **लित्ताणं** ति सर्वतः, **लंछियाणं** ति रेखादिभिः कृतलाञ्छनानाम्, **मुद्दियाणं** ति मृत्तिकादिमुद्रावताम्, **पिहियाणं** ति स्थगितानाम्, **केवतियं** ति कियन्तं कालं **योनि**र्यस्यामङ्कुर उत्पद्यते?,

ततः परं **योनिः प्रम्लायति** वर्णादिना हीयते, **प्रविध्वस्यते** विध्वंसाभिमुखा भवति, **विध्वस्यते** क्षीयते, एवं च तद् **बीजमबीजं भवति** उप्तमपि नाङ्कुरमुत्पादयति, किमुक्तं भवति ? **ततः परं योनिव्यवच्छेदः प्रज्ञप्तो** मयाऽन्यैश्च केवलिभिरिति, शेषं स्पष्टम्।

[सू० १५५] दोच्चाते णं सक्करप्पभाते पुढवीते णेरइयाणं उक्कोसेणं तिण्णि सागरोवमाइं ठिती पन्नत्ता १। तच्चाते णं वालुयप्पभाते पुढवीते जहन्नेणं णेरइयाणं तिन्नि सागरोवमाइं ठिती पण्णत्ता २।

पंचमाए णं धूमप्पभाए पुढवीए तिन्नि निरयावाससतसहस्सा पन्नत्ता १।

तिसु णं पुढवीसु नेरइया उसिणवेयणा पन्नत्ता, तंजहा-पढमाते, दोच्चाते, तच्चाते २।

तिसु णं पुढवीसु णेरतिया उसिणं वेयणं पच्चणुभवमाणा विहरंति, तंजहा-पढमाते, दोच्चाते, तच्चाते ३।

[टी०] स्थित्यधिकारादेवेदमपरं सूत्रद्वयमाह– **दोच्चे**त्यादि स्फुटम्, नवरं **द्वितीयायां पृथिव्याम्**, किंनामिकायामित्याह– **शर्कराप्रभाया**मित्येवं योजनीयम् ।

नरकपृथिव्यधिकारान्नरक-नारकविशेषस्वरूपप्ररूपणाय सूत्रत्रयमाह– **पंचमाए** इत्यादि सुबोधम्, केवलम् **उसिणवेयण** त्ति तिसृणामुष्णस्वभावत्वात् । **तिसृषु नारका उष्णवेदना** इत्युक्त्वापि यदुच्यते **नैरयिका उष्णवेदनां प्रत्यनुभवन्तो विहरन्ती**ति तत्तद्वेदनासातत्यप्रदर्शनार्थम् ।

[सू० १५६] तओ लोगे समा सपक्खिं सपडिदिसिं पन्नत्ता, तंजहा-अप्पतिट्ठाणे णरए, जंबूदीवे दीवे, सव्वट्ठसिद्धे महाविमाणे १।

तओ लोगे समा सपक्खिं सपडिदिसिं पन्नत्ता, तंजहा-सीमंतए णरए, समयक्खेत्ते, ईसिपब्भारा पुढवी २।

[सू० १५७] तओ समुद्दा पगतीते उदगरसेणं पन्नत्ता, तंजहा-कालोदे, पुक्खरोदे, सयंभुरमणे ३।

तओ समुद्दा बहुमच्छ-कच्छभाइण्णा पन्नत्ता, तंजहा-लवणे, कालोदे, सयंभुरमणे ४।

[टी०] नरकपृथिवीनां क्षेत्रस्वभावानां प्राक् स्वरूपमुक्तम्, अथ क्षेत्राधिकारात् क्षेत्रविशेषस्वरूपस्य त्रिस्थानकावतारिणो निरूपणाय सूत्रचतुष्टयमाह–**तओ** इत्यादि, **त्रीणि लोके समानि** तुल्यानि योजनलक्षप्रमाणत्वात्, न च प्रमाणत एवात्र समत्वमपि तु औत्तराधर्यव्यवस्थिततया समश्रेणितयाऽपीत्यत आह– **सपक्खि**मित्यादि, पक्षाणां दक्षिण-वामादिपार्श्वानां सदृशता समता **सपक्ष**मित्यव्ययीभावः, तेन समपार्श्वतया समानीत्यर्थः, **इ**कारस्तु प्राकृतत्वात्, तथा प्रतिदिशां विदिशां सदृशता **सप्रतिदिक्** तेन, समप्रतिदिक्तयेत्यर्थः, **अप्रतिष्ठानः** सप्तम्यां पञ्चानां नरकावासानां मध्यमः, तथा **जम्बूद्वीपः** सकलद्वीपमध्यमः, **सर्वार्थसिद्धं विमानं** पञ्चानामनुत्तराणां मध्यममिति ।

सीमन्तकः प्रथमपृथिव्यां प्रथमप्रस्तटे नरकेन्द्रकः पञ्चचत्वारिंशद्योजनलक्षाणि, समयः कालः तत्सत्तोपलक्षितं क्षेत्रं **समयक्षेत्रं** मनुष्यलोक इत्यर्थः, **ईषद्** अल्पो योजनाष्टकबाहल्यपञ्चचत्वारिंशल्लक्षविष्कम्भात् **प्राग्भारः** पुद्गलनिचयो यस्याः **सेषत्प्राग्भाराऽष्टमपृथिवी**, शेषपृथिव्यो हि रत्नप्रभाद्या महाप्राग्भाराः, अशीत्यादि-सहस्राधिकयोजनलक्षबाहल्यत्वात्, तथाहि–

पढमाऽसीइसहस्सा बत्तीसा अट्ठवीस वीसा य ।
अट्ठार सोलस य अट्ठ सहस्स लक्खोवरिं कुज्जा ॥ [बृहत्सं० २४१] इति ।

विष्कम्भस्तु तासां क्रमेणैकाद्याः सप्तान्ता रज्जव इति । अथवेषत्प्राग्भारा मनागवनतत्वादिति ।

प्रकृत्या स्वभावेनो**दकरसेन** युक्ता इति, क्रमेण चैते द्वितीय-तृतीया-ऽन्तिमाः। प्रथम-द्वितीया-ऽन्तिमाः समुद्रा बहुजलचराः, अन्ये त्वल्पजलचरा इति, उक्तं च–

लवणे उदगरसेसु य महोरया मच्छ-कच्छहा भणिया ।
अप्पा सेसेसु भवे न य ते णिम्मच्छया भणिया ॥ [ ]

अन्यच्च–

लवणे कालसमुद्दे सयंभुरमणे य होंति मच्छा उ ।
अवसेससमुद्देसुं न हुंति मच्छा न मयरा वा ॥
नत्थि त्ति पउरभावं पडुच्च न उ सव्वमच्छपडिसेहो । [बृहत्सं० ९०-९१] इति ॥

[सू० १५८] तओ लोगे णिस्सीला णिव्वता निग्गुणा निम्मेरा णिप्पच्चक्खाणपोसहोववासा कालमासे कालं किच्चा अहे सत्तमाए पुढवीए अप्पतिट्ठाणे णरए णेरइयत्ताए उववज्जंति, तंजहा-रायाणो, मंडलिया, जे य महारंभा कोडुंबी ।

तओ लोए ससीला सव्वता सगुणा समेरा सपच्चक्खाणपोसहोववासा कालमासे कालं किच्चा सव्वट्ठसिद्धे महाविमाणे देवत्ताए उववत्तारो भवंति, तंजहा-रायाणो परिचत्तकामभोगा, सेणावती, पसत्थारो ।

[टी०] क्षेत्राधिकारादेवाप्रतिष्ठाने नरकक्षेत्रे ये उत्पद्यन्ते तानाह– **तओ** इत्यादि, **निःशीला** निर्गतशुभस्वभावाः, दुःशीला इत्यर्थः, एतदेव प्रपञ्च्यते– **निर्व्रताः** अविरताः प्राणातिपातादिभ्यः, **निर्गुणा** उत्तरगुणाभावात्, **निम्मेर** त्ति निर्मर्यादाः प्रतिपन्नापरिपालनादिना, तथा **प्रत्याख्यानं** च नमस्कारसहितादि, **पौषधः** पर्वदिनमष्टम्यादि तत्रोपवासः अभक्तार्थकरणं स च, तौ निर्गतौ येषां ते **निष्प्रत्याख्यानपौषधोपवासाः कालमासे** मरणमासे **कालं** मरणमिति । **णेरइयत्ताए** त्ति पृथिव्यादित्वव्यवच्छेदार्थम्, तत्र ह्येकेन्द्रियतया तदन्येऽप्युत्पद्यन्त इति, तत्र **राजानः** चक्रवर्त्ति-वासुदेवाः, **माण्डलिकाः** शेषा राजानः, **ये च महारम्भाः** पञ्चेन्द्रियादिव्यपरोपणप्रधानकर्म्मकारिणः **कुटुम्बिन** इति, शेषं कण्ठ्यम् ।

अप्रतिष्ठानस्य स्थित्यादिभिः समाने **सर्वार्थे** ये उत्पद्यन्ते तानाह– **तओ** इत्यादि सुगमम्, केवलं **राजानः** प्रतीताः **परित्यक्तकामभोगाः** सर्व्वविरताः, एतच्चोत्तरपदयोरपि सम्बन्धनीयम्, **सेनापतयः** सैन्यनायकाः, **प्रशास्तारो** लेखाचार्यादयः, धर्मशास्त्रपाठकाः इति क्वचित् ।

[सू० १५९] बंभलोग-लंतएसु णं कप्पेसु विमाणा तिवण्णा पन्नत्ता, तंजहा-किण्हा, नीला, लोहिता ।

आणय-पाणया-ऽऽरण-ऽच्चुतेसु णं कप्पेसु देवाणं भवधारणिज्जसरीरगा उक्कोसेणं तिण्णि रयणीओ उड्ढंउच्चत्तेणं पण्णत्ता ।

[टी०] अनन्तरोक्तसर्वार्थसिद्धविमानसाधर्म्याद्विमानान्तरनिरूपणायाह– **बंभे**त्यादि, इह च **किण्हा नीला लोहिय** त्ति पुस्तकेष्वेवं त्रैविध्यं दृश्यते, स्थानान्तरे च लोहित-पीत-शुक्लत्वेनेति, यत उक्तम्–

सोहम्मे पंचवन्ना एक्कगहाणी य जा सहस्सारो ।

दो दो तुल्ला कप्पा तेण परं पुंडरीयाइं ॥ [बृहत्सं० १३२] ति ।

अनन्तरं विमानान्युक्तानि, तानि च देवशरीराश्रया इति देवशरीरमानं त्रिस्थानकानुपात्याह– **आणये**त्यादि, **भवं** जन्मापि यावद्धार्यन्ते **भवं** वा देवगतिलक्षणं **धारयन्ती**ति **भवधारणीयानि** तानि च तानि शरीराणि चेति **भवधारणीयशरीराणी**ति, उत्तरवैक्रियव्यवच्छेदार्थं चेदम्, तस्य लक्षप्रमाणत्वात्, **उक्कोसेणं** ति उत्कर्षेण, न तु जघन्यत्वादिना, जघन्येन तस्योत्पत्तिसमयेऽङ्गुलासङ्ख्येयभागमात्रत्वादिति, शेषं कण्ठ्यमिति ।

[सू० १६०] तओ पन्नत्तीओ कालेणं अधिज्जंति, तंजहा-चंदपन्नत्ती, सूरपन्नत्ती, दीवसागरपन्नत्ती ।

॥ तिट्ठाणस्स पढमओ उद्देसओ समत्तो ॥

[टी०] अनन्तरं देवशरीराश्रयवक्तव्यतोक्ता, तत्प्रतिबद्धाश्च प्रायस्त्रयो ग्रन्था इति तत्स्वरूपाभिधानायाह– **तओ** इत्यादि, **कालेन** प्रथम-पश्चिमपौरुषीलक्षणेन हेतुभूतेनाऽ**धीयन्ते**, **व्याख्याप्रज्ञप्तिर्जम्बूद्वीपप्रज्ञप्तिश्च** न विवक्षिता, त्रिस्थान-कानुरोधादिति, शेषं स्पष्टम् ।

॥ इति त्रिस्थानकस्य प्रथम उद्देशको समाप्तः ॥

[अथ द्वितीय उद्देशकः]

[सू० १६१] तिविहे लोगे पन्नत्ते, तंजहा-णामलोगे, ठवणालोगे, दव्वलोगे।
तिविधे लोगे पन्नत्ते, तंजहा-णाणलोगे, दंसणलोगे, चरित्तलोगे ।
तिविधे लोगे पन्नत्ते, तंजहा-उड्ढलोगे, अहोलोगे, तिरियलोगे ।

[टी०] व्याख्यातः प्रथम उद्देशकः, तदनन्तरं द्वितीय आरभ्यते, अस्य

चायमभिसम्बन्धः– अनन्तरसूत्रेण **चन्द्रप्रज्ञप्त्यादि**ग्रन्थस्वरूपमुक्तमिह तु चन्द्रादीनामेवार्थानामाधारभूतस्य लोकस्य स्वरूपमभिधीयत इत्येवंसम्बन्धवतोऽस्य सूत्रस्य व्याख्या– लोक्यते केवलालोकेनेति **लोकः**, **नाम-स्थापने** इन्द्रसूत्रवत्, **द्रव्यलोको**ऽपि तथैव, नवरं ज्ञशरीर-भव्यशरीरव्यतिरिक्तद्रव्यलोको धर्मास्तिकायादीनि जीवाजीवरूपाणि रूप्यरूपीणि सप्रदेशाप्रदेशानि द्रव्याण्येव, द्रव्याणि च तानि लोकश्चेति विग्रहः ।

भावलोकं त्रिधाऽऽह– तत्र ज्ञानं चासौ लोकश्चेति **ज्ञानलोकः**, भावलोकता चास्य क्षायिक-क्षायोपशमिकभावरूपत्वात्, क्षायिकादिभावानां च भावलोकत्वेनाभिहितत्वाद्, उक्तं च–

ओदइय उवसमिए य खइए य तहा खओवसमिए य ।
परिणाम सन्निवाए य छव्विहो भावलोगो उ ॥ [आव० भा० २००] त्ति ।

एवं **दर्शन-चारित्रलोका**वपीति ।

अथ क्षेत्रलोकं त्रिधाऽऽह– **तिविहे** इत्यादि, इह च बहुसमभूमिभागे रत्नप्रभाभागे मेरुमध्ये अष्टप्रदेशो रुचको भवति, तस्योपरितनप्रतरस्योपरिष्टान्नव योजनशतानि यावज्ज्योतिश्चक्रस्योपरितलस्तावत् तिर्यग्लोकः, ततः परत ऊर्ध्वभागस्थितत्वात् ऊर्ध्वलोको देशोनसप्तरज्जुप्रमाणः, रुचकस्याधस्तनप्रतरस्याधो नव योजनशतानि यावत्तावत्तिर्यग्लोकः, ततः परतोऽधोभागस्थितत्वादधोलोकः सातिरेकसप्तरज्जुप्रमाणः, अधोलोकोर्ध्वलोकयोर्मध्ये अष्टादशयोजनशतप्रमाणस्तिर्यग्भागस्थितत्वात् तिर्यग्लोक इति, प्रकारान्तरेण चायं गाथाभिर्व्याख्यायते–

अहवा अहपरिणामो खेत्तणुभावेण जेण ओसन्नं ।
असुहो अहो त्ति भणिओ दव्वाणं तेणऽहोलोगो ॥१॥
उड्ढं उवरिं जं ठिय सुहखेत्तं खेत्तओ य दव्वगुणा ।
उप्पज्जंति सुभा वा तेण तओ उड्ढलोगो त्ति ॥२॥
मज्झणुभावं खेत्तं जं तं तिरियं ति वयणपज्जवओ ।
भण्णइ तिरिय विसालं अओ य तं तिरियलोगो त्ति ॥३॥ [ ]

[सू० १६२] चमरस्स णं असुरिंदस्स असुरकुमाररन्नो ततो परिसातो

पन्नत्ताओ, तंजहा-समिता, चंडा, जाया । अब्भिंतरिता समिता, मज्झिमिता चंडा, बाहिरिता जाया । चमरस्स णं असुरिंदस्स असुरकुमाररन्नो सामाणियाणं देवाणं ततो परिसातो पन्नत्ताओ, तंजहा-समिता जहेव चमरस्स, एवं तायत्तीसगाण वि । लोगपालाणं तुंबा, तुडिया, पव्वा, एवं अग्गमहिसीण वि । बलिस्स वि एवं चेव जाव अग्गमहिसीणं ।

धरणस्स य सामाणिय-तायत्तीसगाणं च समिता, चंडा, जाता, लोगपालग्गमहिसीणं ईसा, तुडिया, दढरधा, जहा धरणस्स तहा सेसाणं भवणवासीणं ।

कालस्स णं पिसाइंदस्स पिसायरण्णो तओ परिसाओ पन्नत्ताओ, तंजहा-ईसा, तुडिया, दढरधा, एवं सामाणियअग्गमहिसीणं, एवं जाव गीयरति-गीयजसाणं।

चंदस्स णं जोतिसिंदस्स जोतिसरन्नो ततो परिसातो पन्नत्ताओ, तंजहा-तुंबा, तुडिया, पव्वा । एवं सामाणियअग्गमहिसीणं । एवं सूरस्स वि ।

सक्कस्स णं देविंदस्स देवरन्नो ततो परिसातो पन्नत्ताओ, तंजहा-समिता, चंडा, जाया । जहा चमरस्स एवं जाव अग्गमहिसीणं । एवं जाव अच्चुतस्स लोगपालाणं ।

[टी०] लोकस्वरूपनिरूपणानन्तरं तदाधेयानां चमरादीनां **चमरस्से**त्यादिना **अच्चुयलोगवालाण**मित्येतदन्तेन ग्रन्थेन पर्षदो निरूपयति, सुगमश्चायम्, नवरम् **असुरिंदस्से**त्यादौ **इन्द्र** ऐश्वर्ययोगात् **राजा** तु राजनादिति, **परिषत्** परिवारः, सा च त्रिधा प्रत्यासत्तिभेदेन, तत्र ये परिवारभूता देवा देव्यश्चातिगौरव्यत्वात् प्रयोजनेष्वाहूता एवागच्छन्ति साभ्यन्तरा पर्षत्, ये त्वाहूता अनाहूताश्चागच्छन्ति सा मध्यमा, ये त्वनाहूता अप्यागच्छन्ति सा बाह्येति, तथा यया सह प्रयोजनं पर्यालोचयति साऽऽद्या, यया तु तदेव पर्यालोचितं सत् प्रपञ्चयति सा द्वितीया, यस्यास्तु तत् प्रवर्णयति साऽन्त्येति।

[सू० १६३] ततो जामा पन्नत्ता, तंजहा-पढमे जामे, मज्झिमे जामे, पच्छिमे जामे । तिहिं जामेहिं आता केवलिपन्नत्तं धम्मं लभेज्ज सवणताते, तंजहा-पढमे जामे, मज्झिमे जामे, पच्छिमे जामे । एवं जाव केवलनाणं उप्पाडेज्जा पढमे जामे, मज्झिमे जामे, पच्छिमे जामे ।

ततो वया पन्नत्ता, तंजहा-पढमे वते, मज्झिमे वते, पच्छिमे वते । तिहिं वतेहिं आता केवलिपन्नत्तं धम्मं लभेज्ज सवणयाए, तंजहा-पढमे वते, मज्झिमे वते, पच्छिमे वते, एसो चेव गमो णेयव्वो जाव केवलनाणं ति।

[टी०] अनन्तरं पर्षदुपपन्नदेवाः प्ररूपिताः, देवत्वं च कुतोऽपि धर्म्मात्, तत्प्रतिपत्तिश्च कालविशेषे भवतीति कालविशेषनिरूपणपूर्वं तत्रैव धर्मविशेषाणां प्रतिपत्तीराह– **तओ जामे**त्यादि स्पष्टम्, केवलं यामो रात्रेर्दिनस्य च चतुर्थभागो यद्यपि प्रसिद्धस्तथाऽपीह त्रिभाग एव विवक्षितः पूर्वरात्र-मध्यरात्रा-ऽपररात्रलक्षणो यमाश्रित्य रात्रिस्त्रियामेत्युच्यते, एवं दिनस्यापि, अथवा चतुर्थभाग एव सः, किन्त्विह चतुर्थो न विवक्षितः, त्रिस्थानकानुरोधादित्येवमपि त्रयो यामा इत्यभिहितम्, [**तिहि**मित्यादि]- सुगमं, नवरं **एवं जाव** त्ति करणादिदं दृश्यम्– 'केवलं बोहिं बुज्झेज्जा, मुंडे भवित्ता अगाराओ अणगारियं पव्वएज्जा, केवलं बंभचेरवासमावसेज्जा, एवं संजमेणं संजमेज्जा, संवरेणं संवरेज्जा, आभिणिबोहियनाणं उप्पाडेज्जा' इत्यादि। यथा कालविशेषे धर्मप्रतिपत्तिरेवं वयोविशेषेऽपीति तन्निरूपणतस्तत्र धर्मविशेषप्रतिपत्तीराह– **तओ वये**त्यादि स्फुटम्, किन्तु प्राणिनां कालकृतावस्था **वय** उच्यते, तत् त्रिधा बाल-मध्यम-वृद्धत्वभेदादिति, वयोलक्षणं चेदम्–

आ षोडशाद्भवेद्बालो यावत् क्षीरान्नवर्त्तकः ।
मध्यमः सप्ततिं यावत् परतो वृद्ध उच्यते ॥ [ ] शेषं प्राग्वत् ।

[सू० १६४] तिविधा बोधी पन्नत्ता, तंजहा-णाणबोधी, दंसणबोधी, चरित्तबोधी १। तिविहा बुद्धा पन्नत्ता, तंजहा-णाणबुद्धा, दंसणबुद्धा, चरित्तबुद्धा २। एवं मोहे ३ मूढा ४।

[टी०] उक्तानेव धर्मविशेषांस्त्रिधा बोधिशब्दाभिधेयान् १ बोधिमतो २ बोधिविपक्षभूतं मोहं ३ तद्वतश्च ४ सूत्रचतुष्टयेनाह- **तिविहे**त्यादि सुबोधम्, किन्तु **बोधिः** सम्यग्बोधः, इह च चारित्रं बोधिफलत्वात् बोधिरुच्यते, जीवोपयोगरूपत्वाद्वा । बोधिविशिष्टाः पुरुषास्त्रिधा **ज्ञानबुद्धा**दय इति, **एवं मोहे मूढ** त्ति बोधिवद् बुद्धवच्च मोहो मूढाश्च त्रिविधा वाच्याः, तथाहि– 'तिविहे मोहे पण्णत्ते, तंजहा-नाणमोहे' इत्यादि, 'तिविहा मूढा पन्नत्ता, तंजहा-णाणमूढे'त्यादि ।

[सू० १६५] तिविहा पव्वज्जा पन्नत्ता, तंजहा-इहलोगपडिबद्धा, परलोग-पडिबद्धा, दुहतो पडिबद्धा १।

तिविहा पव्वज्जा पन्नत्ता, तंजहा-पुरतो पडिबद्धा, मग्गतो पडिबद्धा, दुहओ पडिबद्धा २।

तिविधा पव्वज्जा पन्नत्ता, तंजहा-तुयावइत्ता, पुयावइत्ता, बुआवइत्ता ३।

तिविहा पव्वज्जा पन्नत्ता, तंजहा-ओवातपव्वज्जा, अक्खातपव्वज्जा, संगारपव्वज्जा ४।

[टी०] चारित्रबुद्धाः प्रागभिहिताः, ते च प्रव्रज्यायां सत्याम्, अतस्तां भेदतो निरूपयन्नाह– **तिविहे**त्यादि सूत्रचतुष्टयं सुगमम्, केवलं प्रव्रजनं गमनं पापाच्चरण-व्यापारेष्विति **प्रव्रज्या**, एतच्च चरणयोगगमनं मोक्षगमनमेव, कारणे कार्योपचारात्, तन्दुलान् वर्षति पर्जन्य इत्यादिवदिति ।

इहलोकप्रतिबद्धा ऐहलौकिकभोजनादिकार्यार्थिनाम्, **परलोकप्रतिबद्धा** जन्मा-न्तरकामाद्यर्थिनाम्, **द्विधाप्रतिबद्धा** इहलोक-परलोकप्रतिबद्धा सा चोभयार्थिनामिति, **पुरतः** अग्रतः **प्रतिबद्धा** प्रव्रज्यापर्यायभाविषु शिष्यादिष्वाशंसनतः प्रतिबन्धात्, **मार्गतः** पृष्ठतः स्वजनादिषु स्नेहाच्छेदात्, तृतीया द्विधाऽपीति । **तुयावइत्त** त्ति *तुद व्यथने [पा०धा० १२८२] इति वचनात् **तोदयित्वा** तोदं कृत्वा व्यथामुत्पाद्य या प्रव्रज्या दीयते मुनिचन्द्रपुत्रस्य सागरचन्द्रेणेव सा तथोच्यते, **पुयावइत्त** त्ति, प्लुङ् गतौ [पा०धा० ९५८]* इति वचनात् **प्लावयित्वा** अन्यत्र नीत्वा **आर्यरक्षित**वद् या दीयते सा तथेति,

बुयावइत्ता संभाष्य **गौतमेन** कर्षकवदिति । **अवपातः** सेवा सद्गुरूणाम्, ततो या सा **अवपातप्रव्रज्या**, तथा **आख्यातेन** धर्मदेशनेन **आख्यातस्य** वा प्रव्रजेत्यभिहितस्य गुरुभिर्या साऽऽ**ख्यातप्रव्रज्या फल्गुरक्षितस्ये**वेति, **संगार** त्ति सङ्केतः, तस्माद् या सा सङ्गारप्रव्रज्या **मेतार्या**दीनामिवेति, अथवा यदि त्वं प्रव्रजसि तदा मया प्रव्रजितव्यमित्येवं या सा यथा ।

[सू० १६६] तओ णियंठा णोसण्णोवउत्ता पन्नत्ता, तंजहा-पुलाए, णियंठे, सिणाते १। ततो णियंठा सन्न-णोसण्णोवउत्ता पन्नत्ता, तंजहा-बउसे, पडिसेवणाकुसीले, कसायकुसीले २।

[टी०] उक्तप्रव्रज्यावन्तो निर्ग्रन्था भवन्तीति निर्ग्रन्थस्वरूपं सूत्रद्वयेनाह– **तओ** इत्यादि, निर्गता ग्रन्थात् सबाह्याभ्यन्तरादिति **निर्ग्रन्थाः** संयताः, **नो** नैव **संज्ञायाम्** आहाराद्यभिलाषरूपायां पूर्वानुभूतस्मरणा-ऽनागतचिन्ताद्वारेणोपयुक्ता ये ते **नोसंज्ञोपयुक्ताः**, तत्र **पुलाको** लब्ध्युपजीवनादिना संयमासारताकारको वक्ष्यमाणलक्षणः, **निर्ग्रन्थः** उपशान्तमोहः क्षीणमोहो वेति, **स्नातको** घातिकर्ममलक्षालनावाप्तशुद्धज्ञानस्वरूपः ।

तथा त्रय एव संज्ञोपयुक्ता नोसंज्ञोपयुक्ताश्चेति सङ्कीर्णस्वरूपाः, तथास्वरूपत्वात्, तथा चाह– **सन्न-नोसण्णोवउत्त** त्ति, **संज्ञा** च आहारादिविषया **नोसंज्ञा** च तदभावलक्षणा संज्ञानोसंज्ञे, तयोरुपयुक्ता इति विग्रहः, पूर्वह्रस्वता प्राकृतत्वादिति, तत्र **बकुशः** शरीरोपकरणविभूषादिना शबलचारित्रपटः, **प्रतिषेवणया** मूलगुणादिविषयया **कुत्सितं शीलं** यस्य स तथा, एवं **कषायकुशील** इति ।

[सू० १६७] तओ सेहभूमीओ पन्नत्ताओ, तंजहा-उक्कोसा, मज्झिमा, जहन्ना। उक्कोसा छम्मासा, मज्झिमा चउमासा, जहन्ना सत्तरातिंदिया ।

ततो थेरभूमीओ पन्नत्ताओ, तंजहा-जातिथेरे, सुतथेरे, परियायथेरे। सट्ठिवासजाए समणे णिग्गंथे जातिथेरे, ठाण-समवायधरे णं समणे णिग्गंथे सुयथेरे, वीसवासपरियाए णं समणे णिग्गंथे परियायथेरे ।

[टी०] निर्ग्रन्थाश्चारोपितव्रताः केचिद् भवन्तीति व्रतारोपणकालविशेषानाह- **तओ सेहे**त्यादि सुगमम्, किन्तु **सेह** त्ति **षिधू संराद्धौ** [पा०धा० ११९२] इति वचनात् सेध्यते निष्पाद्यते यः स **सेधः**, शिक्षां वाऽधीत इति **शैक्षः**, तस्य भूमयो महाव्रतानारोपण-काललक्षणाः अवस्थापदव्य इति सेधभूमयः शैक्षभूमयो वेति, अयमभिप्रायः-उत्कर्षतः षड्भिर्मासैरुपस्थाप्यते न तानतिक्राम्यते, जघन्यतः सप्तभिरेव रात्रिन्दिवैर्गृहीत-शिक्षत्वादिति, उक्तं च–

सेहस्स तिन्नि भूमी जहन्न तह मज्झिमा य उक्कोसा ।
राइंदि सत्त चउमासिगा य छम्मासिआ चेव ॥ [व्यव० १०।४६०४] इति ।

आसु चायं **व्यवहारो**क्तो विभागः–

पुव्वोवट्ठपुराणे करणजयट्ठा जहन्निया भूमी ।
उक्कोसा दुम्मेहं पडुच्च अस्सद्दहाणं च ॥
एमेव य मज्झिमगा अणहिज्जंते असद्दहंते य ।
भावियमेहाविस्स वि, करणजयट्ठा य मज्झिमगा ॥ [व्यव० १०।४६०५-६] इति ॥

शैक्षस्य च विपर्यस्तः स्थविरो भवतीति तद्भूमिनिरूपणायाह– **तओ थेर** इत्यादि कण्ठ्यम्, नवरं **स्थविरो** वृद्धः, तस्य **भूमयः** पदव्यः **स्थविरभूमय** इति, **जातिः** जन्म, **श्रुतम्** आगमः, **पर्यायः** प्रव्रज्या, तैः **स्थविरा** वृद्धा ये ते तथोक्ता इति, इह च भूमिका-भूमिकावतोरभेदादेवमुपन्यासः, अन्यथा भूमिका उद्दिष्टा इति ता एव वाच्याः स्युरिति, एतेषां च त्रयाणां क्रमेणानुकम्पा-पूजा-वन्दनानि विधेयानि, यत उक्तं **व्यवहारे**–

आहारे उवही सेज्जा, संथारे खेत्तसंकमे ।
किइच्छंदाणुवत्तीहि अणुकंपइ थेरगं ॥
उट्ठाणासणदाणाई जोगाहारप्पसंसणा ।
नीयसेज्जाइ निद्देसवत्तित्ते पूयए सुयं ॥
उट्ठाणं वंदणं चेव गहणं दंडगस्स य ।
अगुरुणो वि य निद्देसे तइयाए पवत्तए ॥ [व्यव० १०।४५९९-४६०१] त्ति ।

[सू० १६८] ततो पुरिसजाता पन्नत्ता, तंजहा-सुमणे, दुम्मणे, णोसुमणे

णोदुम्मणे ।

ततो पुरिसजाता पन्नत्ता, तंजहा-गंता णामेगे सुमणे भवति, गंता णामेगे दुम्मणे भवति, गंता णामेगे णोसुमणे णोदुम्मणे भवति ।

ततो पुरिसजाता पन्नत्ता, तंजहा-जामीतेगे सुमणे भवति, जामीतेगे दुम्मणे भवति, जामीतेगे णोसुमणे णोदुम्मणे भवति । एवं जाइस्सामीतेगे सुमणे भवति ३।

ततो पुरिसजाता पन्नत्ता, तंजहा-अगंता णामेगे सुमणे भवति ३।

ततो पुरिसजाता पन्नत्ता, तंजहा-ण जामि एगे सुमणे भवति ३।

ततो पुरिसजाता पन्नत्ता, तंजहा-ण जाइस्सामि एगे सुमणे भवति ३।

एवं आगंता णामेगे सुमणे भवति ३, एमीतेगे सुमणे भवति ३, एस्सामीति एगे सुमणे भवति ३। एवं एतेणं अभिलावेणं —

गंता य अगंता य, आगंता खलु तथा अणागंता ।
चिट्ठित्तमचिट्ठित्ता, णिसितित्ता चेव नो चेव ॥८॥

हंता य अहंता य, छिंदित्ता खलु तहा अछिंदित्ता ।
बुतित्ता अबुतित्ता, भासित्ता चेव णो चेव ॥९॥

दच्चा य अदच्चा य, भुंजित्ता खलु तथा अभुंजित्ता ।
लभित्ता अलभित्ता य, पिवइत्ता चेव नो चेव ॥१०॥

सुतित्ता असुतित्ता य, जुज्झित्ता खलु तथा अजुज्झित्ता ।
जइत्ता अजइत्ता य, पराजिणित्ता चेव नो चेव ॥११॥

सद्दा रूवा गंधा, रसा य फासा तहेव ठाणा य ।
निस्सीलस्स गरहिता पसत्था पुण सीलवंतस्स ॥१२॥

एवमेक्केक्के तिन्नि तिन्नि उ आलावगा भाणितव्वा ।

सद्दं सुणेत्ता णामेगे सुमणे भवति ३, एवं सुणेमीति ३, सुणेस्सामीति ३। एवं असुणेत्ता णामेगे सुमणे भवति ३, न सुणेमीति ३, ण सुणेस्सामीति ३।

एवं रूवाइं गंधाइं रसाइं फासाइं, एक्केक्के छ छ आलावगा भाणियव्वा।

[टी०] स्थविरा इति पुरुषप्रकारा उक्ताः, तदधिकारात् पुरुषप्रकारानेवाह– **तओ पुरिसे**त्यादि। **पुरुषजातानि** पुरुषप्रकाराः, सुष्ठु मनो यस्यासौ **सुमनाः** हर्षवान्, रक्त इत्यर्थः, एवं **दुर्म्मना** दैन्यादिमान्, द्विष्ट इत्यर्थः, **नोसुमना नोदुर्म्मनाः** मध्यस्थः, सामायिकवानित्यर्थः।

सामान्यतः पुरुषप्रकारा उक्ताः, एतानेव विशेषतो गत्यादिक्रियापेक्षया **तओ** इत्यादिभिः सूत्रैराह, तत्र **गत्वा** यात्वा क्वचिद्विहारक्षेत्रादौ **नामे**ति सम्भावनाया**मेकः** कश्चित् **सुमना भवति** हृष्यति, तथैवान्यो **दुर्म्मनाः** शोचति, अन्यः सम एवेति। अतीतकालसूत्रमिव वर्त्तमान-भविष्यत्कालसूत्रे, नवरं **जामीतेगे** इत्यादिषु **इति**शब्दो हेत्वर्थः। **एवम-गंते**त्यादिप्रतिषेधसूत्राणि आगमनसूत्राणि च सुगमानि, **एवम्** एतेनानन्तरोक्तेनाभिलापेन शेषसूत्राण्यपि वक्तव्यानि। अथोक्तान्यनुक्तानि च सूत्राणि संगृह्णन् गाथापञ्चकमाह– **गंते**त्यादि, **गंता अगंता आगन्ते**त्युक्तम्, **अणागंत** त्ति 'अणागंता नामेगे सुमणे भवइ, अणागंता नामेगे दुम्मणे भवइ, अणागंता नामेगे नोसुमणे नोदुम्मणे भवइ ३, एवं न आगच्छामीति ३, एवं न आगमिस्सामीति ३', **चिट्ठित्त** त्ति स्थित्वा उर्ध्वस्थानेन सुमना दुर्म्मना अनुभयं च भवति, 'एवं चिट्ठामीति, चिट्ठिस्सामीति'। **अचिट्ठित्ता** इहापि कालतः सूत्रत्रयम्, एवं सर्वत्र, नवरं **निषद्य** उपविश्य ३, **नो चेव** त्ति **अनिषद्य** अनुपविश्य ३, **हत्वा** विनाश्य किञ्चित् ३, **अहत्वा** अविनाश्य ३, **छित्त्वा** द्विधा कृत्वा ३, **अच्छित्त्वा** प्रतीतम् ३, **वुइत्त** त्ति उक्त्वा भणित्वा पद-वाक्यादिकम् ३, **अवुइत्त** त्ति अनुक्त्वा ३, **भासित्त** त्ति भाषित्वा संभाष्य कञ्चन सम्भाषणीयम् ३, **नो चेव** त्ति **अभासित्ता** असंभाष्य कञ्चन ३, **दच्च** त्ति दत्त्वा ३, **अदत्त्वा** ३, **भुक्त्वा** ३, **अभुक्त्वा** ३, **लब्ध्वा** ३, **अलब्ध्वा** ३, **पीत्वा** ३, **नो चेव** त्ति अपीत्वा ३, **सुप्त्वा** ३, **असुप्त्वा** ३, **युद्ध्वा** ३, **अयुद्ध्वा** ३, **जइत्त** त्ति जित्वा परम् ३, **अजित्वा** परमेव ३, **पराजिणित्ता** भृशं जित्वा ३ परिभङ्गं वा प्राप्य सुमना भवति, वर्द्धनकभाविमहावित्तव्ययविनिर्मुक्तत्वात्, पराजितात् प्रतिवादिनः सम्भावितानर्थ-विनिर्मुक्तत्वाद्वा, **नो चेव** त्ति अपराजित्य ३। **सद्दे**त्यादि गाथा सूत्रत एव बोद्धव्या,

प्रपञ्चितत्वात् तत्रैवास्या इति। **एवमेक्केक्के**त्यादि, **एव**मिति गत्वादिसूत्रोक्तक्रमेण एकैकस्मिन् शब्दादौ विषये विधि-प्रतिषेधाभ्यां प्रत्येकं त्रयस्त्रय **आलापकाः** सूत्राणि कालविशेषाश्रयाः सुमनाः दुर्म्मना नोसुमना नोदुर्म्मना इत्येतत्पदत्रयवन्तो **भणितव्याः**, एतदेव दर्शयन्नाह– **सद्दमि**त्यादि भावितार्थम्, **एवं रूवाइं गंधाइं** - इत्यादि, यथा शब्दे विधि-निषेधाभ्यां त्रयस्त्रय आलापका भणिता एवं 'रूवाइं पासित्ते'त्यादयः त्रयस्त्रय एव दर्शनीयाः, एवं च यद्भवति तदाह– **एक्केक्के**त्यादि, एकैकस्मिन् विषये षडालापका भणितव्या भवन्तीति, तत्र शब्दे दर्शिता एव, रूपादिषु पुनरेवम्– रूपाणि दृष्ट्वा सुमना दुर्म्मना अनुभयम् १, एवं पश्यामीति २, एवं द्रक्ष्यामीति ३, एवम् अदृष्ट्वा ४, न पश्यामीति ५, न द्रक्ष्यामीति ६ षट्, एवं गन्धान् घ्रात्वा ६ रसानास्वाद्य ६ स्पर्शान् स्पृष्ट्वेति ६ ।

[सू० १६९] ततो ठाणा णिस्सीलस्स निव्वयस्स णिग्गुणस्स णिम्मेरस्स णिप्पच्चक्खाणपोसहोववासस्स गरहिता भवंति, तंजहा-अस्सिं लोगे गरहिते भवति, उववाते गरहिते भवति, आयाती गरहिता भवति ।

ततो ठाणा ससीलस्स सव्वयस्स सगुणस्स समेरस्स सपच्चक्खाणपोसहोववासस्स पसत्था भवंति, तजंहा-अस्सिं लोगे पसत्थे भवति, उववाते पसत्थे भवति, आयाती पसत्था भवति ।

[टी०] तहेव ठाणा य त्ति यत् सङ्ग्रहगाथायामुक्तं तद् भावयन्नाह– **[तओ ठाणे**त्यादि,] त्रीणि स्थानानि **निःशीलस्य** सामान्येन शुभस्वभाववर्जितस्य, विशेषतः पुनः **निर्व्रतस्य** प्राणातिपाताद्यनिवृत्तस्य, **निर्गुणस्योत्त**रगुणापेक्षया, **निर्म्मर्यादस्य** लोक-कुलाद्यपेक्षया, **निष्प्रत्याख्यान-पौषधोपवासस्य** पौरुष्यादिनियम-पर्वोपवासरहितस्य, **गर्हितानि** जुगुप्सितानि **भवन्ति**, **तद्यथा–अस्सिं** ति विभक्तिपरिणामादयं **लोकः** इदं जन्म **गर्हितो** भवति, पापप्रवृत्त्या विद्वज्जनजुगुप्सितत्वात्, तथा **उपपातः** अकामनिर्जरादिजनितः किल्बिषिकादिदेवभवो नारकभवो वा, **उपपातो देव-नारकाणाम्** [तत्त्वार्थ० २/३५] इति वचनात्, स गर्हितो भवति किल्बिषिका-ऽऽभियोग्यादिरूपतयेति, **आजातिः** तस्माच्च्युतस्योद्वृत्तस्य वा कुमानुषत्व-तिर्यक्त्वरूपा गर्हिता,

कुमानुषादित्वादेवेति । उक्तविपर्ययमाह– **तओ** इत्यादि निगदसिद्धम् ।

[सू० १७०] तिविधा संसारसमावन्नगा जीवा पन्नत्ता, तंजहा-इत्थी, पुरिसा, नपुंसगा ।

तिविधा सव्वजीवा पन्नत्ता, तंजहा-सम्मद्दिट्ठी, मिच्छद्दिट्ठी, सम्मामिच्छद्दिट्ठी।

अहवा तिविधा सव्वजीवा पन्नत्ता, तंजहा-पज्जत्तगा, अपज्जत्तगा, णो-पज्जत्तगा णोअपज्जत्तगा । एवं–

सम्मद्दिट्ठि परित्ता, पज्जत्तगा सुहुम सन्नि भविया य ।

एतानि च गर्हित-प्रशस्तस्थानानि संसारिणामेव भवन्तीति संसारिजीवनिरूपणायाह- **तिविहे**त्यादि सूत्रसिद्धम् ।

जीवाधिकारात् सर्वजीवांस्त्रिस्थानकावतारेण षड्भिः सूत्रैराह– **तिविहे**त्यादि सुगमम्, नवरं **नोपज्जत्त** त्ति नोपर्याप्तका नोअपर्याप्तकाः सिद्धाः । **एव**मिति पूर्वक्रमेण **सम्मद्दिट्ठी**त्यादिगाथार्द्धमुक्तानुक्तसूत्रसङ्ग्रहार्थमिति। 'तिविहा सव्वजीवा पं० तं० परित्ता १ अपरित्ता २ नोपरित्ता नोअपरित्ता ३' । तत्र परीत्ताः प्रत्येकशरीराः, अपरीत्ताः साधारणशरीराः, परीत्तशब्दस्य छन्दोऽर्थं व्यत्यय इति, **सुहुम** त्ति 'तिविहा सव्वजीवा पं० तं०–सुहुमा बायरा नोसुहुमा नोबायरा', एवं संज्ञिनो भव्याश्च भावनीयाः, सर्वत्र च तृतीयपदे सिद्धा वाच्या इति ।

[सू० १७१] तिविधा लोगट्ठिती पन्नत्ता, तंजहा-आगासपतिट्ठिते वाते, वातपतिट्ठिए उदही, उदहिपतिट्ठिता पुढवी ।

तओ दिसाओ पन्नत्ताओ, तंजहा-उड्ढा, अहा, तिरिया १। तिहिं दिसाहिं जीवाणं गती पवत्तति, तंजहा-उड्ढाते, अहाते, तिरियाते २। एवं आगती ३, वक्कंती ४, आहारे ५, वुड्ढी ६, णिवुड्ढी ७, गतिपरियाते ८, समुग्घाते ९, कालसंजोगे १०, दंसणाभिगमे ११, णाणाभिगमे १२, जीवाभिगमे १३। तिहिं दिसाहिं जीवाणं अजीवाभिगमे पन्नत्ते, तंजहा-उड्ढाते अहाते तिरियाते १४। एवं पंचेंदियतिरिक्खजोणियाणं, एवं मणुस्साण वि ।

[टी०] सर्व एव चैते लोके व्यवस्थिता इति लोकस्थितिनिरूपणायाह– **तिविहे**त्यादि कण्ठ्यम्, किन्तु **लोकस्थितिः** लोकव्यवस्था, **आकाशं** व्योम, तत्र **प्रतिष्ठितो** व्यवस्थित **आकाशप्रतिष्ठितो वातो** घनवात-तनुवातलक्षणः सर्वद्रव्याणामाकाश-प्रतिष्ठितत्वात्, **उदधिः** घनोदधिः, **पृथिवी** तमस्तमःप्रभादिकेति ।

उक्तस्थितिके च लोके जीवानां दिशोऽधिकृत्य गत्यादि भवतीति दिग्निरूपणपूर्वकं तासु गत्यादि निरूपयन् **तओ दिसे**त्यादि सूत्राणि चतुर्दश सुगमानि, नवरं दिश्यते व्यपदिश्यते पूर्वादितया वस्त्वनयेति **दिक्**, सा च नामादिभेदेन सप्तधा, आह च–

नामं १ ठवणा २ दविए ३ खेत्तदिसा ४ तावखेत्त ५ पन्नवए ६ ।
सत्तमिया भावदिसा ७ सा होअट्ठारसविहा उ ॥ [आव०नि० ८०९]

तत्र द्रव्यस्य पुद्गलस्कन्धादेर्दिक् **द्रव्यदिक्**, क्षेत्रस्य आकाशस्य दिक् **क्षेत्रदिक्**, सा चैवम्–

अट्ठपएसो रुयगो तिरियंलोयस्स मज्झयारम्मि ।
एस पभवो दिसाणं एसेव भवे अणुदिसाणं ॥ [आचाराङ्गनि० ४२]

तत्र पूर्व्वाद्या महादिशश्चतस्रोऽपि द्विप्रदेशादिका द्व्युत्तराः, अनुदिशस्तु एकप्रदेशा अनुत्तराः, ऊर्ध्वाधोदिशौ तु चतुरादी अनुत्तरे, यतोऽवाचि-

दुपएसादि दुरुत्तर एगपएसा अणुत्तरा चेव ।
चउरो ४ चउरो य दिसा चउरादि अणुत्तरा दुन्नि २ ॥१॥
सगडुद्धिसंठियाओ महादिसाओ हवंति चत्तारि ।
मुत्तावली उ चउरो दो चेव य हुंति रुयगनिभा ॥२॥ [आचाराङ्गनि० ४४,४६]

नामानि चासाम्–

इंद १ गेयी २ जम्मा य ३ नेरई ४ वारुणी य ५ वायव्वा ६ ।
सोमा ७ ईसाणा वि य ८ विमला य ९ तमा १० य बोद्धव्वा ॥ [आचाराङ्गनि० ४३]

तापः सविता, तदुपलक्षिता क्षेत्रदिक् **तापक्षेत्रदिक्**, सा च अनियता, यत उक्तम्–

जेसिं जत्तो सूरो उदेइ तेसिं तई हवइ पुव्वा ।
तावक्खेत्तदिसाओ पयाहिणं सेसियाओ सिं ॥ [विशेषाव० २७०१]

तथा **प्रज्ञापक**स्य आचार्यादेर्दिक् **प्रज्ञापकदिक्**, सा चैवम्–

पन्नवओ जयभिमुहो सा पुव्वा सेसिया पयाहिणओ ।

तस्सेवऽणुगंतव्वा अग्गेयाई दिसा नियमा ॥ [ ]

भावदिक् चाष्टादशविधा–

पुढवि १ जल २ जलण ३ वाया ४ मूला ५ खंध ६ ऽग्ग ७ पोरबीया य ८ ।
बि ९ ति १० चउ ११ पंचिंदियतिरिय १२ नारगा १३ देवसंघाया १४ ॥
संमुच्छिम १५ कम्मा १६ ऽकम्मभूमगनरा १७ तहंतरद्दीवा १८ ।
भावदिसा दिस्सइ जं संसारी नियमेयाहिं ॥ [विशेषाव० २७०३-४] इति ।

इह च क्षेत्र-ताप-प्रज्ञापकदिग्भिरेवाधिकारः, तत्र च तिर्यग्ग्रहणेन पूर्वाद्याश्चतस्र एव दिशो गृह्यन्ते, विदिक्षु जीवानामनुश्रेणिगामितया वक्ष्यमाणगत्यागतिव्युत्क्रान्तीनामयुज्यमानत्वात्, शेषेषु पदेषु च विदिशामविवक्षितत्वात्, यतोऽत्रैव वक्ष्यति– **छहिं दिसाहिं जीवाणं गई पवत्तई** [**सू०४९९**]त्यादि, तथा ग्रन्थान्तरेऽप्याहारमाश्रित्योक्तम्– **निव्वाघाएणं नियमा छद्दिसिं** [**प्रज्ञापना० २८।१८०९**] ति, तत्र **तिहिं दिसाहिं** ति सप्तमी तृतीया पञ्चमी वा यथायोगं व्याख्येयेति, **गतिः** प्रज्ञापकस्थानापेक्षया मृत्वाऽन्यत्र गमनम्, **एव**मिति पूर्वोक्ताभिलापसूचनार्थः, **आगतिः** प्रज्ञापकप्रत्यासन्नस्थाने आगमनमिति, **व्युत्क्रान्तिः** उत्पत्तिः, **आहारः** प्रतीतः, **वृद्धिः** शरीरस्य वर्द्धनम्, **निवृद्धिः** शरीरस्यैव हानिः, **गतिपर्याय**श्चलनं जीवत एव, **समुद्घातो** वेदनादिलक्षणः, **कालसंयोगो** वर्त्तनादिकाललक्षणानुभूतिः मरणयोगो वा, दर्शनेन अवध्यादिना प्रत्यक्षप्रमाणभूतेनाभिगमो बोधो **दर्शनाभिगमः**, एवं **ज्ञानाभिगमः**, जीवानां ज्ञेयानाम् अवध्यादिनैवाभिगमो **जीवाभिगम** इति । **तिहिं दिसाहिं जीवाणं अजीवाभिगमे पन्नत्ते, तं०–उड्ढाए ३** एवं पंचिंदियतिरिक्खजोणियाणं एवं मणुस्साण वि, एवं सर्वत्राभिलपनीयमिति दर्शनार्थं परिपूर्णान्त्यसूत्राभिधानमिति। एतान्यपि जीवाभिगमान्तानि सामान्यजीवसूत्राणि चतुर्विंशतिदण्डकचिन्तायां तु नारकादिपदेषु दिक्त्रये गत्यादीनां *त्रयोदशानामपि पदानां सामस्त्येनासम्भवात् पञ्चेन्द्रियतिर्यग्मनुष्येषु च तत्सम्भवात्* तदतिदेशमाह– **एव**मित्यादि, यथा सामान्यसूत्रेषु गत्यादीनि त्रयोदश पदानि दिक्त्रये अभिहितान्येवं पञ्चेन्द्रियतिर्यङ्-मनुष्येष्विति भावः, एवं चैतानि षड्विंशतिः सूत्राणि भवन्तीति । अथैषां नारकादिषु कथमसम्भव इति?, उच्यते, नारकादीनां द्वाविंशतेर्जीवविशेषाणां नारक-देवेषूत्पादाभावादूर्ध्वाधोदिशोर्विवक्षया गत्यागत्योरभावः,

तथा दर्शन-ज्ञान-जीवा-ऽजीवाभिगमा गुणप्रत्यया अवध्यादिप्रत्यक्षरूपा दिक्त्रये न सन्त्येव, भवप्रत्ययावधिपक्षे तु नारक-ज्योतिष्कास्तिर्यगवधयो भवनपति-व्यन्तरा ऊर्ध्वावधयः वैमानिका अधोऽवधय एकेन्द्रिय-विकलेन्द्रियाणां त्ववधिर्नास्त्येवेति ।

[सू० १७२] तिविधा तसा पन्नत्ता, तंजहा-तेउकाइया, वाउकाइया, उराला तसा पाणा ।

तिविधा थावरा पन्नत्ता, तंजहा-पुढविकाइया, आउकाइया, वणस्सति-काइया ।

[टी०] यथोक्तानि च गत्यादिपदानि त्रसानामेव सम्भवन्तीति सम्बन्धात् त्रसान्निरूपयन्नाह– **तिविहे**त्यादि स्पष्टम्, किन्तु त्रस्यन्तीति **त्रसाः** चलनधर्म्माणः । तत्र तेजो-वायवो गतियोगात् **त्रसाः** । **उदाराः** स्थूलाः, **त्रसा** इति त्रसनाम-कर्मोदयवर्त्तित्वात्, **प्राणा** इति व्यक्तोच्छ्वासादिप्राणयोगात् द्वीन्द्रियादयस्तेऽपि गतियोगादेव त्रसा इति । उक्तास्त्रसाः, तद्विपर्ययमाह **तिविहे**त्यादि, स्थानशीलत्वात् स्थावरनाम-कर्मोदयाच्च स्थावराः, शेषं व्यक्तमेवेति ।

[सू० १७३] ततो अच्छेज्जा पन्नत्ता, तंजहा-समये, पदेसे, परमाणू १। एवमभेज्जा २, अडज्झा ३, अगिज्झा ४, अणद्धा ५, अमज्झा ६, अपएसा ७। ततो अविभातिमा पन्नत्ता, तंजहा-समते, पएसे, परमाणू ८।

[टी०] इह च पृथिव्यादयः प्रायोऽङ्गुलासङ्ख्येयभागमात्रावगाहनत्वात् अच्छेद्यादिस्वभावा व्यवहारतो भवन्तीति तत्प्रस्तावान्निश्चयाच्छेद्यादीनष्टभिः सूत्रैराह– **तओ अच्छेज्जे**त्यादि, छेत्तुमशक्या बुद्ध्या क्षुरिकादिशस्त्रेण वेत्यच्छेद्याः, छेद्यत्वे समयादित्वायोगादिति, **समयः** कालविशेषः, **प्रदेशो** धर्म्मा-ऽधर्म्मा-ऽऽकाश-जीव-पुद्गलानां निरवयवोंऽशः, **परमाणुः** अस्कन्धः पुद्गल इति, उक्तं च–

सत्थेण सुतिक्खेण वि छेत्तुं भेत्तुं च जं किर न सक्का ।
तं परमाणुं सिद्धा वयंति आइं पमाणाणं ॥ [जम्बूद्वीपप्र० २।२८] ति ।

एवमिति पूर्वसूत्राभिलापसूचनार्थ इति, **अभेद्याः** सूच्यादिना, **अदाह्या**

अग्निक्षारादिना, **अग्राह्या** हस्तादिना, न विद्यतेऽर्द्धं येषामित्**यनर्द्धा** विभागद्वयाभावात्, **अमध्या** विभागत्रयाभावात्, अत एवाह– **अप्रदेशा** निरवयवाः, अत एवाऽ**विभाज्या** विभक्तुमशक्या, अथवा विभागेन निर्वृत्ता विभागिमास्तन्निषेधा**दविभागिमाः** ।

[सू० १७४] अज्जो त्ति समणे भगवं महावीरे गोतमादी समणे णिग्गंथे आमंतेत्ता एवं वयासी-किंभया पाणा समणाउसो !, गोयमादी समणा णिग्गंथा समणं भगवं महावीरं उवसंकमंति, उवसंकमित्ता वंदंति नमंसंति, वंदित्ता नमंसित्ता एवं वयासी-णो खलु वयं देवाणुप्पिया ! एतमट्ठं जाणामो वा पासामो वा, तं जदि णं देवाणुप्पिया एतमट्ठं णो गिलायंति परिकहित्तत्ते तमिच्छामो णं देवाणुप्पियाणं अंतिए एयमट्ठं जाणित्तए । अज्जो त्ति समणे भगवं महावीरे गोतमाती समणे निग्गंथे आमंतेत्ता एवं वयासी-दुक्खभया पाणा समणाउसो !। से णं भंते ! दुक्खे केण कडे ? जीवेणं कडे पमादेण। से णं भंते ! दुक्खे कहं वेइज्जति ? अप्पमादेण ।

[टी०] ते च पूर्वतरसूत्रोक्ताः त्रस-स्थावराख्याः प्राणिनो दुःखभीरव इत्येतत् संविधानकद्वारेणाह **अज्जो** इत्यादि सुगमम्, केवलम् **अज्जो त्ति** त्ति आरात् पापकर्मभ्यो याता आर्यास्तदामन्त्रणं हे **आर्याः** ! **इत्ये**वमभिलापेनाऽऽ**मन्त्ये**ति सम्बन्धः, **श्रमणो भगवान् महावीरः गौतमादीन् श्रमणान् निर्ग्रन्थानेवं** वक्ष्यमाणन्यायेनाऽ**वादी**दिति, कस्माद् भयं येषां ते **किंभयाः**, कुतो बिभ्यतीत्यर्थः, **प्राणाः** प्राणिनः **समणाउसो** त्ति हे श्रमणाः ! हे आयुष्मन्त इति **गौतमा**दीनामेवामन्त्रणमिति, अयं च भगवतः प्रश्नः शिष्याणां व्युत्पादनार्थ एव, अनेन चाऽपृच्छतोऽपि शिष्यस्य हिताय तत्त्वमाख्येयमिति ज्ञापयति, उच्यते च–

कत्थइ पुच्छइ सीसो कहिंचऽपुट्ठा वयंति आयरिया ।
सीसाणं तु हियट्ठा विउलतरागं तु पुच्छाए ॥ [दशवै०नि० ३८] त्ति ।

ततश्च **उवसंकमंति** त्ति उपसङ्क्रामन्ति उपगच्छन्ति, तस्य समीपवर्त्तिनो भवन्ति, इह च तत्कालापेक्षया वर्त्तमाननिर्देशो न दुष्टः, **उपसङ्क्रम्य वन्दन्ते** स्तुत्या, **नमस्यन्ति**

प्रणामतः । **एवम्** अनेन प्रकारेण **वयासि** त्ति छान्दसत्वात् बहुवचनार्थे एकवचनमिति अवादिषुः उक्तवन्तो **नो जानीमो** विशेषतः **नो पश्यामः** सामान्यतः, **वा**शब्दौ विकल्पार्थौ । **तदि**ति तस्मा**देतमर्थं** किंभयाः प्राणा इत्येवंलक्षणम्, **नो गिलायंति** त्ति न ग्लायन्ति न श्राम्यन्ति **परिकथयितुं** परिकथनेन, **तं** ति ततः। **दुक्खभय** त्ति दुःखात् मरणादिरूपात् भयमेषामिति **दुःखभयाः** । **से णं** ति तद् दुःखम्। **जीवेणं कडे** त्ति दुःखकारणकर्मकरणात् **जीवेन कृत**मित्युच्यते, कथमित्याह–**पमाएणं** ति प्रमादेनाऽज्ञानादिना बन्धहेतुना कारणभूतेनेति, उक्तं च–

पमाओ य मुणिंदेहिं भणिओ अट्ठभेयओ ।
अन्नाणं संसओ चेव, मिच्छाणाणं तहेव य ॥
रागो दोसो मइब्भंसो, धम्मम्मि य अणायरो।
जोगाणं दुप्पणीहाणं, अट्ठहा वज्जियव्वओ ॥ [ ] इति ।

तच्च **वेद्यते** क्षिप्यते **अप्रमादेन**, बन्धहेतुप्रतिपक्षभूतत्वादिति । अस्य च सूत्रस्य दुक्खभया पाणा १, जीवेणं कडे दुक्खे पमाएणं २ अपमाएणं वेइज्जइ ३ इत्येवंरूपप्रश्नोत्तरत्रयोपेतत्वात् त्रिस्थानकावतारो द्रष्टव्य इति ।

[सू० १७५] अन्नउत्थिता णं भंते ! एवं आतिक्खंति एवं भासंति एवं पन्नवेंति एवं परूवेंति-कहन्नं समणाणं निग्गंथाणं किरिया कज्जति ? तत्थ जा सा कडा कज्जति नो तं पुच्छंति, तत्थ जा सा कडा नो कज्जति नो तं पुच्छंति, तत्थ जा सा अकडा नो कज्जति नो तं पुच्छंति, तत्थ जा सा अकडा कज्जति तं पुच्छंति, से एवं वत्तव्वं सिया-अकिच्चं दुक्खं अफुसं दुक्खं अकज्जमाणकडं दुक्खं अकट्टु अकट्टु पाणा भूता जीवा सत्ता वेयणं वेदेंति त्ति वत्तव्वं । जेते एवमाहंसु मिच्छा ते एवमाहंसु, अहं पुण एवमाइक्खामि एवं भासामि एवं पन्नवेमि एवं परूवेमि-किच्चं दुक्खं फुसं दुक्खं कज्जमाणकडं दुक्खं कट्टु कट्टु पाणा भूया जीवा सत्ता वेयणं वेयंति त्ति वत्तव्वं सिया।

॥ तइयट्ठाणस्स बीओ उद्देसओ समत्तो ॥

[टी०] जीवेन कृतं दुःखमित्युक्तम्, अधुना परमतं निरस्यैतदेव समर्थयन्नाह- **अन्नउत्थी**त्यादि प्रायः स्पष्टम्, किन्तु **अन्ययूथिकाः** इह तापसा विभङ्गज्ञानवन्तः, **एवं** वक्ष्यमाणप्रकार**माख्यान्ति** सामान्यतो **भाषन्ते** विशेषतः, क्रमेणैतदेव **प्रज्ञापयन्ति प्ररूपयन्ती**ति पर्यायरूपपदद्वयेन उक्तमिति, किं तदित्याह **कथं** केन प्रकारेण **श्रमणानां निर्ग्रन्थानां** 'मते' इति शेषः, क्रियत इति **क्रिया** कर्म, सा **क्रियते** भवति दुःखायेति विवक्षेति प्रश्नः, इह तु चत्वारो भङ्गाः, तद्यथा-**कृता क्रियते** विहितं सत् कर्म दुःखाय भवतीत्यर्थः १, एवं **कृता न क्रियते** २, **अकृता क्रियते** ३, **अकृता न क्रियते** ४ इति, एतेष्वनेन प्रश्नेन यो भङ्गः प्रष्टुमिष्टस्तं शेषभङ्गनिराकरणपूर्वकमभिधातुमाह-**तत्थ** त्ति तेषु चतुर्षु भङ्गकेषु मध्ये प्रथमं द्वितीयं चतुर्थं च न पृच्छन्ति, एतत्त्रयस्यात्यन्तं रुचेरविषयतया तत्प्रश्नस्याप्यप्रवृत्तेरिति, तथाहि– **याऽसौ कृता क्रियते** यत्तत् कर्म कृतं सद्भवति **नो तां** ते **पृच्छन्ति**, पूर्वकालकृतत्वस्याप्रत्यक्षतया असत्त्वेन निर्ग्रन्थमतत्वेन चासंमतत्वादिति, **तत्र याऽसौ कृता नो क्रियते** इति तेषु भङ्गकेषु मध्ये यत्तत् कर्म कृतं न भवति **नो तां पृच्छन्ति**, अत्यन्तविरोधेनासम्भवात्, तथाहि- कृतं चेत् कर्म्म कथं न भवतीत्युच्यते ?, न भवति चेत् कथं कृतं तदिति, कृतस्य कर्मणोऽभवनाभावात्, **तत्र** तेषु **याऽसावकृता** यत्तदकृतं कर्म्म **नो क्रियते** न भवति **नो तां पृच्छन्ति**, अकृतस्यासतश्च कर्म्मणः खरविषाणकल्पत्वादिति, अमुमेव च भङ्गकत्रयनिषेधमाश्रित्यास्य सूत्रस्य त्रिस्थानकेऽवतार इति सम्भाव्यते, तृतीयभङ्गकस्तु तत्संमत इति तं पृच्छन्ति, अत एवाह– **तत्र याऽसावकृता क्रियते** यत्तदकृतं पूर्वमविहितं कर्म्म भवति दुःखाय सम्पद्यते **तां पृच्छन्ति**, पूर्वकालकृतत्वस्याप्रत्यक्षतया असत्त्वेन दुःखानुभूतेश्च प्रत्यक्षतया सत्त्वेनाकृतकर्मभवनपक्षस्य सम्मतत्वादिति, पृच्छतां चायमभिप्रायः- यदि निर्ग्रन्था अपि अकृतमेव कर्म्म दुःखाय देहिनां भवतीति प्रतिपद्यन्ते ततः सुष्ठु शोभनं अस्मत्समानबोधत्वादिति शेषानपृच्छन्तः तृतीयमेव पृच्छन्तीति भावः । **से** त्ति अथ तेषामकृतकर्म्माभ्युपगमवता**मेवं** वक्ष्यमाणप्रकारं **वक्तव्यम्** उल्लापः **स्यात्**, त एव वा एवमाख्यान्ति परान् प्रति यदुत-**अथैवं वक्तव्यं** प्ररूपणीयं तत्त्ववादिनां **स्यात्** भवेद्,

अकृते सति कर्म्मणि दुःखभावात् **अकृत्यम्** अकरणीयमबन्धनीयम् अप्राप्तव्यमनागते काले जीवानामित्यर्थः, किम् ? **दुक्खं** दुःखहेतुत्वात् कर्म, **अफुसं** ति अस्पृश्यं कर्म अकृतत्वादेव, तथा **क्रियमाणं** च वर्त्तमानकाले बध्यमानं **कृतं** चातीतकाले बद्धं **क्रियमाणकृतं** द्वन्द्वैकत्वं कर्म्मधारयो वा, न क्रियमाणकृत**मक्रियमाणकृतम्**, किं तत् ? **दुःखं** कर्म्म । **अकिच्चं दुक्ख**मित्यादिपदत्रयं **तत्थ जा सा अकडा कज्जइ तं पुच्छंती**त्यन्यतीर्थिकमताश्रितं कालत्रयालम्बनमाश्रित्य त्रिस्थानकावतारोऽस्य द्रष्टव्यः, किमुक्तं भवतीत्याह-**अकृत्वा अकृत्वा** कर्म्म **प्राणा** द्वीन्द्रियादयः **भूताः** तरवो **जीवाः** पञ्चेन्द्रियाः **सत्त्वाः** पृथिव्यादयः, यथोक्तम्–

प्राणा द्वित्रिचतुः प्रोक्ता भूतास्तु तरवः स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः शेषाः सत्त्वाः प्रकीर्त्तिताः ॥ [ ] इति ।

वेदनां पीडां वेदयन्ती**ति वक्तव्य**मित्ययं तेषामुल्लापः, एतद्वा ते अज्ञानोपहतबुद्धयो भाषन्ते परान् प्रति यदुत एवं वक्तव्यं स्यादिति प्रक्रमः ।

एवमन्यतीर्थिकमतमुपदर्श्य निराकुर्वन्नाह– **जेते** इत्यादि, य एते अन्यतीर्थिका **एवम्** उक्तप्रकार**माहंसु** त्ति उक्तवन्तः **मिथ्या** असम्यक् **ते** अन्यतीर्थिका **एव**मुक्तवन्तः, अकृतायाः क्रियायाः क्रियात्वानुपपत्तेः, क्रियत इति हि क्रिया, यस्यास्तु कथञ्चनापि करणं नास्ति सा कथं क्रियते, अकृतकर्मानुभवने हि बद्धमुक्तसुखितदुःखितादिनियत-व्यवहाराभावप्रसङ्ग इति । स्वमतमाविष्कुर्वन्नाह– **अह**मित्यादि, **अहं** ति अहमेव नान्यतीर्थिकाः, **पुनः**शब्दो विशेषणार्थः, स च पूर्ववाक्यादुत्तरवाक्यार्थस्य विलक्षण-तामाह, **एवमाइक्खामी**त्यादि पूर्ववत्, **कृत्यं** करणीयमनागतकाले, दुःखं तद्धेतुत्वात् कर्म्म, **स्पृश्यं** स्पृष्टलक्षणबन्धावस्थायोग्यम्, **क्रियमाणं** वर्त्तमाने काले, **कृत**मतीते, अकरणं नास्ति कर्म्मणः कथञ्चनापीति भावः, स्वमतसर्वस्वमाह-**कृत्वा कृत्वा** कर्म्मेति गम्यते, प्राणादयो **वेदनां** कर्म्मकृतशुभाशुभानुभूतिं **वेदयन्ति** अनुभवन्ती**ति वक्तव्यं स्यात्** सम्यग्वादिनामिति।

॥ त्रिस्थानकस्य द्वितीय उद्देशको समाप्तः ॥

[अथ तृतीय उद्देशकः]

[सू० १७६] तिहिं ठाणेहिं मायी मायं कट्टु णो आलोएज्जा णो पडिक्कमेज्जा णो णिंदेज्जा णो गरहेज्जा णो विउट्टेज्जा णो विसोहेज्जा णो अकरणताते अब्भुट्ठेज्जा णो अहारिहं पायच्छित्तं तवोकम्मं पडिवज्जेज्जा, तंजहा-अकरिंसु चाहं, करेमि चाहं, करिस्सामि चाहं १।

तिहिं ठाणेहिं मायी मायं कट्टु णो आलोएज्जा णो पडिक्कमिज्जा जाव णो पडिवज्जेज्जा, तंजहा-अकित्ती वा मे सिया, अवण्णे वा मे सिया, अविणए वा मे सिया २।

तिहिं ठाणेहिं मायी मायं कट्टु णो आलोएज्जा जाव नो पडिवज्जेज्जा, तंजहा-कित्ती वा मे परिहायिस्सति, जसे वा मे परिहायिस्सति, पूयासक्कारे वा मे परिहायिस्सति ३।

तिहिं ठाणेहिं मायी मायं कट्टु आलोएज्जा पडिक्कमेज्जा निंदेज्जा जाव पडिवज्जेज्जा, तंजहा-मायिस्स णं अस्सिं लोगे गरहिते भवति, उववाते गरहिए भवति, आयाती गरहिता भवति १।

तिहिं ठाणेहिं मायी मायं कट्टु आलोएज्जा जाव पडिवज्जेज्जा, तंजहा-अमायिस्स णं अस्सिं लोगे पसत्थे भवति, उववाते पसत्थे भवति, आयाई पसत्था भवति २।

तिहिं ठाणेहिं मायी मायं कट्टु आलोएज्जा जाव पडिवज्जेज्जा, तंजहा-णाणट्ठताते, दंसणट्ठताते, चरित्तट्ठताते ३।

[टी०] उक्तो द्वितीय उद्देशकः, साम्प्रतं तृतीय आरभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरोद्देशके विचित्रा जीवधर्म्माः प्ररूपिताः, इहापि त एव प्ररूप्यन्त इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रत्रयम्– **तिहिं ठाणेही**त्यादि, अस्य च पूर्वसूत्रेण सहायं सम्बन्धः-पूर्वसूत्रे मिथ्यादर्शनवतामसमञ्जसतोक्ता, इह तु कषायवतां तामाहेत्येवंसम्बन्धस्यास्य व्याख्या– **मायी** मायावान् **मायां** मायाविषयं गोपनीयं प्रच्छन्नमकार्यं **कृत्वा नो आलोचयेत्** मायामेवेति, शेषं सुगमम्, नवरम् **आलोचनं**

गुरुनिवेदनम्, **प्रतिक्रमणं** मिथ्यादुष्कृतदानम्, **निन्दा** आत्मसाक्षिका, **गर्हा** गुरुसाक्षिका, **वित्रोटनं** तदध्यवसायविच्छेदनम्, **विशोधनम्** आत्मनः चारित्रस्य वा अतीचार-मलक्षालनम्, **अकरणताभ्युत्थानं** पुनर्नैतत् करिष्यामीत्यभ्युपगमः, **अहारिहं** यथोचितं **पायच्छित्तं** ति पापच्छेदकं प्रायश्चित्तविशोधकं वा **तपःकर्म्म** निर्विकृतिकादि **प्रतिपद्येत, तद्यथा– अकार्षमह**मिदमतः कथं निन्द्यमित्यालोचयिष्यामि स्वमाहात्म्यहानि-प्राप्तेरित्येवमभिमानात् १, तथा **करोमि चाह**मिदानीमेव कथमसाध्विति भणामि २, **करिष्यामी**ति **चाह**मेतदकृत्यमनागतकालेऽपि कथं प्रायश्चित्तं प्रतिपद्य इति ३। **कीर्त्तिः** एकदिग्गामिनी प्रसिद्धिः, सर्वदिग्गामिनी सैव **वर्णो** यशःपर्यायत्वादस्य, अथवा **दानपुण्यफला कीर्त्तिः, पराक्रमकृतं यशः** [ ], तच्च वर्ण इति, तयोः प्रतिषेधोऽ**कीर्त्तिः अवर्ण**श्चेति, **अविनयः** साधुकृतो मे स्यादिति, इदं च सूत्रमप्राप्तप्रसिद्धिपुरुषापेक्षम्, **मायं कट्टु** त्ति मायां कृत्वा मायां पुरस्कृत्य, माययेत्यर्थः, **परिहास्यति** हीना भविष्यति, **पूजा** पुष्पादिभिः, **सत्कारो** वस्त्रादिभिः, इदमेकमेव विवक्षितमेकरूपत्वादिति, इदं तु प्राप्तप्रसिद्धिपुरुषापेक्षम्, शेषं सुगमम् ।

उक्तविपर्ययमाह-**तिहीत्यादि** सूत्रत्रयं स्फुटम्, किन्तु **[मायी मायं कट्टु आलोएज्ज** त्ति] इह मायी अकृत्यकरणकाल एव आलोचनादिकाले त्वमाय्येव आलोचना-द्यन्यथानुपपत्तेरिति, **अस्सिं** ति अयम्, यतो मायिन इहलोकाद्या गर्हिता भवन्ति यतश्चामायिन इहलोकाद्याः प्रशस्ता भवन्ति यतश्चामायिन आलोचनादिना निरतिचारी-भूतस्य ज्ञानादीनि स्वस्वभावं लभन्ते अतोऽहममायी भूत्वाऽऽलोचनादि करोमीति भावः ।

[सू० १७७] तओ पुरिसजाता पन्नत्ता, तंजहा-सुत्तधरे, अत्थधरे, तदुभयधरे ।

[टी०] अनन्तरं शुद्धिरुक्ता, इदानीं तत्कारिणोऽभ्यन्तरसम्पदा त्रिधा कुर्वन्नाह– **तओ पुरी**त्यादि सुबोधम्, नवरमेते यथोत्तरं प्रधाना इति ।

[सू० १७८] कप्पति णिग्गंथाण वा णिग्गंथीण वा ततो वत्थाइं धारित्तए वा परिहरित्तए वा, तंजहा-जंगिते, भंगिते, खोमिते १।

कप्पति णिग्गंथाण वा णिग्गंथीण वा ततो पायाइं धारित्तए वा परिहरित्तए

वा, तंजहा-लाउयपादे वा, दारुपादे वा, मट्टियापादे वा २।

[टी०] तेषामेव बाह्यां सम्पदं सूत्रद्वयेनाह– **कप्पती**त्यादि, **कल्पते** युज्यते, युक्तमित्यर्थः, **धारित्तए** त्ति धर्त्तुं परिग्रहे **परिहर्त्तुं** परिभोक्तुमिति, **जंगियं** जङ्गमजमौर्णिकादि, **भंगियं** अतसीमयम्, **खोमियं** कार्प्पासिकमिति। **अलाबूपात्रकं** तुम्बकम्, **दारुपात्रं** काष्ठमयम्, **मृत्तिकापात्रं** मृन्मयं शराव-वार्घटिकादि, शेषं सुगमम्।

[सू० १७९] तिहिं ठाणेहिं वत्थं धरेज्जा, तंजहा-हिरिवत्तियं, दुगुंछावत्तियं, परीसहवत्तियं ।

[टी०] वस्त्रग्रहणकारणान्याह–**तिही**त्यादि, **ह्रीः** लज्जा संयमो वा **प्रत्ययो** निमित्तं यस्य धारणस्य तत्तथा, **जुगुप्सा** प्रवचनखिंसा विकृताङ्गदर्शनेन मा भूदित्येवं **प्रत्ययो** यत्र तत्तथा, एवं **परीषहाः** शीतोष्ण-दंश-मशकादयः **प्रत्ययो** यत्र तत्तथा ।

[सू० १८०] तओ आयरक्खा पन्नत्ता, तंजहा-धम्मियाते पडिचोयणाते पडिचोएत्ता भवति, तुसिणीतो वा सिता, उट्ठेत्ता वा आताते एकंत-मंतमवक्कमेज्जा १।

णिग्गंथस्स णं गिलायमाणस्स कप्पंति ततो वियडदत्तीओ पडिग्गाहित्तते, तंजहा-उक्कोसा मज्झिमा जहन्ना २।

तिहिं ठाणेहिं समणे निग्गंथे साहम्मियं संभोगियं विसंभोगियं करेमाणे णातिक्कमति, तंजहा-सयं वा दट्ठुं, सड्ढस्स वा निसम्म, तच्चं मोसं आउट्टति चउत्थं नो आउट्टति ३।

तिविधा अणुन्ना पन्नत्ता, तंजहा-आयरियत्ताते उवज्झायत्ताते गणित्ताते ४। तिविधा समणुन्ना पन्नत्ता, तंजहा-आयरियत्ताते उवज्झायत्ताते गणित्ताते ५। एवं उपसंपदा ६, एवं विजहणा ७।

[टी०] निर्ग्रन्थप्रस्तावान्निर्ग्रन्थानेवानुष्ठानतः सप्तसूत्र्याऽऽह– सुगमा, नवरम् आत्मानं रागद्वेषादेरकृत्याद् भवकूपाद्वा रक्षन्तीत्**यात्मरक्षाः** । **धम्मियाए पडिचोयणाए** त्ति धार्मिकेणोपदेशेन 'नेदं भवादृशां विधातुमुचितम्' इत्यादिना प्रेरयिता उपदेष्टा भवति अनुकूलेतरोपसर्गकारिणः, ततोऽसावुपसर्गकरणान्निवर्त्तते, ततोऽकृत्यसेवा न भवतीत्यतः

आत्मा रक्षितो भवतीति १, **तूष्णीको वा** वाचंयम उपेक्षक इत्यर्थः **स्या**दिति २, प्रेरणाया अविषये उपेक्षणाऽसामर्थ्ये च ततः स्थाना**दुत्थाय आय** त्ति आत्मना **एकान्तं** विजनम् **अन्तं** भूविभाग**मवक्रामेत्** गच्छेत् ३।

निर्ग्रन्थस्य ग्लायतः अशक्नुवतः, तृड्वेदनादिना अभिभूयमानस्येत्यर्थः, आहारग्रहणं हि वेदनादिभिरेव कारणैरनुज्ञातम् । **तओ** त्ति तिस्रः **वियड** त्ति पानकाहारः, तस्य **दत्तयः** एकप्रक्षेपदानरूपाः, **प्रतिग्रहीतुम्** आश्रयितुं वेदनोपशमायेति । उत्कर्षः प्रकर्षः, तद्योगादुत्कर्षा, उत्कर्षवतीति वो**त्कर्षा** उत्कृष्टेत्यर्थः, प्रचुरपानकलक्षणा यया दिनमपि यापयति, **मध्यमा** ततो हीना, **जघन्या** यया सकृदेव वितृष्णो भवति यापनामात्रं वा लभते। अथवा पानकविशेषादुत्कृष्टाद्या वाच्याः, तथाहि-कलमकाञ्जिका-ऽवश्रावणादेः द्राक्षापानकादेर्वा प्रथमा १, षष्टिकादिकाञ्जिकादेर्मध्यमा २, तृणधान्यकाञ्जिकादे-रुष्णोदकस्य वा जघन्येति । देश-काल-स्वरुचिविशेषाद्वोत्कर्षादि नेयमिति।

साहम्मियं ति समानेन धर्मेण चरतीति साधर्मिकस्तम्, **सम** एकत्र **भोगो** भोजनं **सम्भोगः** साधूनां समानसामाचारीकतया परस्परमुपध्यादिदान-ग्रहणसंव्यवहारलक्षणः, स विद्यते यस्य स **साम्भोगिकः**, तम्, **विसम्भोगो** दानादिभिरसंव्यवहारः, स यस्यास्ति स **विसम्भोगिकः**, तं कुर्वन् **नातिक्रामति** न लङ्घयत्याज्ञां सामायिकं वा विहितकारित्वादिति, **स्वय**मात्मना साक्षात् **दृष्ट्वा** साम्भोगिकेन क्रियमाणामसांभोगिक-दानग्रहणादिकामसामाचारीम् । तथा **सड्ढस्स** त्ति श्रद्धा श्रद्धानं यस्मिन् अस्ति स **श्राद्धः** श्रद्धेयवचनः कोऽप्यन्यः साधुस्तस्य वचनमिति गम्यते **निशम्य** अवधार्य । तथा **तच्चं** ति एकं द्वितीयं यावत् तृतीयं **मोसं** ति मृषावादम् अकल्प्यग्रहण-पार्श्वस्थदानादिना सावद्यविषयप्रतिज्ञाभङ्गलक्षणमाश्रित्येति गम्यते, **आवर्त्तते** निवर्त्तते, तमालोचयतीत्यर्थः, अनाभोगतस्तस्य भावात्, प्रायश्चित्तं चास्योचितं दीयते, **चतुर्थं** त्वाश्रित्य प्रायो **नो आवर्त्तते** तं नालोचयति, तस्य दर्पत एव भावादिति, आलोचनेऽपि प्रायश्चित्तस्या-ऽदानमस्येति, अतश्चतुर्थासम्भोगकारणकारिणं विसम्भोगिकं कुर्वन्नातिक्रामतीति प्रकृतम्, उक्तं च—

एगं व दो व तिन्नि व आउट्टंतस्स होइ पच्छित्तं ।
आउट्टंते वि तओ परेण तिण्हं विसंभोगो ॥ [**निशीथभा० २०७५**] इति ।

इह चाद्यं स्थानद्वयं गुरुतरदोषाश्रयम्, यतस्तत्र ज्ञातमात्रे श्रुतमात्रे च विसंभोगः क्रियते, तृतीयं त्वल्पतरदोषाश्रयम्, तत्र हि चतुर्थवेलायां स विधीयत इति ।

अणुन्न त्ति, अनुज्ञानमनुज्ञा अधिकारदानम् । **आचर्यते** मर्यादावृत्तितया सेव्यत इत्**याचार्यः**, आचारे वा पञ्चप्रकारे साधुरित्**याचार्यः**, आह च–

पंचविहं आयारं आयरमाणा तहा पयासंता ।
आयारं दंसेंता आयरिया तेण वुच्चंति ॥ [**आव०नि० ९९८**]

तद्भावस्तत्ता, तया, उत्तरत्र गणाचार्यग्रहणादनुयोगाचार्यतयेत्यर्थः । तथा उपेत्याधीयते-ऽस्मादित्**युपाध्यायः**, आह च–

सम्मत्तनाणदंसणजुत्तो सुत्तत्थतदुभयविहिन्नू ।
आयरियठाणजोगो सुत्तं वाएउवज्झाओ ॥ [ ] त्ति ।

तद्भाव **उपाध्यायता**, तया, तथा गणः साधुसमुदायो यस्यास्ति स्वस्वामिसम्बन्धेनासौ **गणी** गणाचार्यः,तद्भावस्तत्ता, तया, गणनायकतयेति भावः । तथा **स**मिति सङ्गता औत्सर्गिकगुणयुक्तत्वेनोचिता आचार्यादितया अनुज्ञा **समनुज्ञा**, तथाहि–अनुयोगाचार्यस्यौत्सर्गिकगुणाः–

तम्हा वयसंपन्ना कालोचियगहियसयलसुत्तत्था ।
अणुजोगाणुण्णाए जोगा भणिया जिणिंदेहिं ॥
इहरा उ मुसावाओ पवयणखिंसा य होइ लोयम्मि ।
सेसाण वि गुणहाणी तित्थुच्छेओ य भावेणं ॥ [**पञ्चव० ९३२-३३**] ति,

गणाचार्योऽप्यौत्सर्गिक एवम्–

सुत्तत्थे निम्माओ पियदढधम्मोऽणुवत्तणाकुसलो ।
जाईकुलसंपन्नो गंभीरो लद्धिमंतो य ॥
संगहुवग्गहनिरओ कयकरणो पवयणाणुरागी य ।
एवंविहो उ भणिओ गणसामी जिणवरिंदेहिं ॥ [**पञ्चव० १३१५-१६**] ति ।

अथैवंविधगुणाभावे अनुज्ञाया अप्यभावात् कथमन्या समनुज्ञा भविष्यतीति ?,

अत्रोच्यते, उक्तगुणानां मध्यात् अन्यतरगुणाभावेऽपि कारणविशेषात् सम्भवत्येवासौ, कथमन्यथाऽभिधीयते–

जे यावि मंदि त्ति गुरुं विइत्ता, डहरे इमे अप्पसुए त्ति नच्चा ।

हीलंति मिच्छं पडिवज्जमाणा, करेंति आसायण ते गुरूणं ॥ [दशवै० ९।१।२] ति ।

अतः केषाञ्चित् गुणानामभावेऽप्यनुज्ञा, समग्रगुणभावे तु समनुज्ञेति स्थितम् । अथवा स्वस्य मनोज्ञाः समानसामाचारीकतया अभिरुचिताः **स्वमनोज्ञाः**, सह वा मनोज्ञैर्ज्ञानादिभिरिति **समनोज्ञाः** एकसाम्भोगिकाः साधवः, कथं त्रिविधा इत्याह– **आचार्यतये**त्यादि, भिक्षु-क्षुल्लकेत्यादिभेदाः सन्तोऽपि न विवक्षिताः, त्रिस्थानकाधिकारादिति । **एवं उवसंपय** त्ति, **एव**मित्याचार्यत्वादिभिस्त्रिधा समनुज्ञावत् उपसंपत्ति**रुपसंपत्** ज्ञानाद्यर्थं भवदीयोऽहमित्यभ्युपगमः, तथाहि-कश्चित् स्वाचार्यादिसन्दिष्टः सम्यक्श्रुतग्रन्थानां दर्शनप्रभावकशास्त्राणां वा सूत्रार्थयोर्ग्रहण-स्थिरीकरण-विस्मृतसन्धानार्थं तथा चारित्रविशेषभूताय वैयावृत्याय क्षमणाय वा सन्दिष्टमाचार्यान्तरं यदुपसम्पद्यते, उक्तं च–

उवसंपया य तिविहा णाणे तह दंसणे चरित्ते य ।

दंसण-णाणे तिविहा दुविहा य चरित्तअट्ठाए ॥ [आव० नि० ६९८, पञ्चा० ५८६] त्ति।

सेयमाचार्योपसम्पद्, एवमुपाध्याय-गणिनोरपीति। **एवं विजहण** त्ति **एव**मित्याचार्यत्वादिभेदेन त्रिधैव **विहानं** परित्यागः तच्च आचार्यादेः स्वकीयस्य प्रमाददोषमाश्रित्य वैयावृत्यक्षपणार्थमाचार्यान्तरोपसम्पत्त्या भवतीति, आह च– **नियगच्छादन्नम्मि उ सीयणदोसाइणा होइ** [आव०नि० ७१८] त्ति । अथवा आचार्यो ज्ञानाद्यर्थमुपसम्पन्नं यतिं तमर्थमननुतिष्ठन्तं सिद्धप्रयोजनं वा परित्यजति यत् साऽऽचार्यविहानिः, उक्तं च–

उवसंपन्नो जं कारणं तु तं कारणं अपूरिंतो ।

अहवा समाणियम्मी सारणया वा विसग्गो वा ॥ [आव०नि० ७२०] इति ।

एवमुपाध्याय-गणिनोरपीति ।

[सू० १८१] तिविधे वयणे पन्नत्ते, तंजहा-तव्वयणे, तदन्नवयणे, णोअवयणे १। तिविहे अवयणे पन्नते, तंजहा-णोतव्वयणे, णोतदन्नवयणे, अवयणे २।

तिविधे मणे पन्नत्ते, तंजहा-तम्मणे, तदन्नमणे, णोअमणे ३। तिविहे अमणे पन्नत्ते, तंजहा-णोतम्मणे, णोतदन्नमणे, अमणे ४।

[टी०] इयमनन्तरं विशिष्टा साधुकायचेष्टा त्रिस्थानकेऽवतारिता, अधुना तु वचन-मनसी तत्पर्युदासौ च तत्रावतारयन्नाह— **तिविहे** इत्यादि सूत्रचतुष्टयम्, अस्य गमनिका-**तस्य** विवक्षितार्थस्य घटादे**र्वचनं** भणनं **तद्वचनम्**, घटार्थापेक्षया घटवचनवत्, **तस्माद्** विवक्षितघटा**देरन्यः** पटादिस्तस्य वचनं **तदन्यवचनम्**, घटापेक्षया पटवचनवत्, **नोअवचनम्**, अभणननिवृत्तिर्वचनमात्रं डित्थादिवदिति, अथवा **सः** शब्दव्युत्पत्ति-निमित्तधर्मविशिष्टोऽर्थोऽनेनोच्यत इति **तद्वचनं** यथार्थनामेत्यर्थः, ज्वलन-तपनादिवत्, तथा **तस्मात्** शब्दव्युत्पत्तिनिमित्तधर्म्मविशिष्टा**दन्यः** शब्दप्रवृत्तिनिमित्तधर्म्मविशिष्टोऽर्थ उच्यते अनेनेति **तदन्यवचन**मयथार्थमित्यर्थः, मण्डपादिवत्, उभयव्यतिरिक्तं **नोअवचनम्**, निरर्थकमित्यर्थः, डित्थादिवत्। अथवा **तस्य** आचार्यादेर्वचनं **तद्वचनम्**, तद्व्यतिरिक्तवचनं **तदन्यवचनम्** अविवक्षितप्रणेतृविशेषम्, **नोअवचनं** वचन-मात्रमित्यर्थः। त्रिविधवचन-प्रतिषेधस्त्व**वचनम्**, तथाहि-**नोतद्वचनं** घटापेक्षया पटवचनवत्, **नोतदन्यवचनं** घटे घटवचनवत्, **अवचनं** वचननिवृत्तिमात्रमिति, एवं व्याख्यान्तरापेक्षयाऽपि ज्ञेयम्। तस्य देवदत्तादेस्तस्मिन् वा घटादौ मनस्**तन्मनः**, ततो देवदत्ताद् अन्यस्य यज्ञदत्तादेर्घटापेक्षया पटादौ वा मनस्**तदन्यमनः**, अविवक्षित-सम्बन्धिविशेषं तु मनोमात्रं **नोअमन** इति, एतदनुसारेणा**ऽमनो**ऽप्यूह्यमिति।

[सू० १८२] तिहिं ठाणेहिं अप्पवुट्ठीकाए सिता, तंजहा-तंसिं च णं देसंसि वा पदेसंसि वा णो बहवे उदगजोणिया जीवा य पोग्गला य उदगत्ताते वक्कमंति विउक्कमंति चयंति उववज्जंति १, देवा णागा जक्खा भूता णो सम्ममाराहिता भवंति, तत्थ समुट्ठियं उदगपोग्गलं परिणतं वासितुकामं अन्नं देसं साहरंति २, अब्भवद्दलगं च णं समुट्ठितं परिणतं वासितुकामं वाउकाए विधुणति ३, इच्चेतेहिं तिहिं ठाणेहिं अप्पवुट्ठिगाते सिता १।

तिहिं ठाणेहिं महावुट्ठीकाते सिता, तंजहा-तंसिं च णं देसंसि वा पतेसंसि वा बहवे उदगजोणिता जीवा य पोग्गला य उदगत्ताते वक्कमंति विउक्कमंति

चयंति उववज्जंति १, देवा नागा भूता जक्खा सम्ममाराहिता भवंति, अन्नत्थ समुट्ठितं उदगपोग्गलं परिणतं वासिउकामं तं देसं साहरंति २, अब्भवद्दलगं च णं समुट्ठितं परिणयं वासितुकामं णो वाउआते विधुणति ३, इच्चेतेहिं तिहिं ठाणेहिं महावुट्ठिकाए सिया २।

[टी०] अनन्तरं संयतमनुष्यादिव्यापारा उक्ताः, इदानीं तु प्रायो देवव्यापारान् **तिहीत्यादिभिरष्टाभिः** सूत्रैराह, सुगमानि चैतानि, किन्तु **अप्पवुट्ठिकाए** त्ति, **अल्पः** स्तोकः अविद्यमानो वा, वर्षणं **वृष्टिः** अधः पतनम्, **वृष्टिप्रधानः कायो** जीवनिकायो व्योमनिपतदप्काय इत्यर्थः, वर्षणधर्म्मयुक्तं वोदकं **वृष्टिः**, तस्याः **कायो** राशि**र्वृष्टिकायः**, अल्पश्चासौ वृष्टिकायश्च **अल्पवृष्टिकायः**, स **स्याद्** भवेत् । **तस्मिं**स्तत्र **मगधा**दौ, **च**शब्दोऽल्पवृष्टिताकारणान्तरसमुच्चयार्थः, **ण**मित्यलङ्कारे, **देशे** जनपदे, **प्रदेशे** तस्यैवैकदेशरूपे, **वा**शब्दौ विकल्पार्थौ । उदकस्य **योनयः** परिणामिकारणभूता उदकयोनयः, त एवो**दकयोनिका** उदकजननस्वभावा **व्युत्क्रामन्ति** उत्पद्यन्ते **व्यपक्रामन्ति** च्यवन्ते, एतदेव यथायोगं पर्यायत आचष्टे-**च्यवन्ते उत्पद्यन्ते** क्षेत्रस्वभावादित्येकम्, तथा **देवा** वैमानिक-ज्योतिष्काः, **नागा** नागकुमारा भवनपत्युपलक्षणमेतत्, **यक्षा भूता** इति व्यन्तरोपलक्षणम्, अथवा **देवा** इति सामान्यम्, **नागा**दयस्तु विशेषः, एतद्ग्रहणं च प्राय एषामेवंविधे कर्म्मणि प्रवृत्तिरिति ज्ञापनाय, विचित्रत्वाद्वा सूत्रगतेरिति, **नो सम्यगाराधिता भवन्ति** अविनयकरणाज्जनपदैरिति गम्यते, ततश्च **तत्र मगधा**दौ देशे प्रदेशे वा तस्यैव **समुत्थितम्** उत्पन्नम् **उदक**प्रधानं **पौद्गलं** पुद्गलसमूहो मेघ इत्यर्थः **उदकपौद्गलम्**, तथा **परिणतम्** उदकदायकावस्थाप्राप्तम्, अत एव विद्युदादिकरणा**द्वर्षितुकामं** सदन्यं देश**मङ्गा**दिकं **संहरन्ति** नयन्तीति द्वितीयम्। **अभ्राणि** मेघास्तै**र्वर्द्दलकं** दुर्दिनम् **अभ्रवर्द्दलकं वाउयाए** त्ति वायुकायः प्रचण्डवातो **विधुनाति** विध्वंसयतीति तृतीयम् । **इच्चे** इत्यादि निगमनमिति । एतद्विपर्यासादनन्तर-सूत्रम् ।

[सू० १८३] तिहिं ठाणेहिं अहुणोववन्ने देवे देवलोगेसु इच्छेज्ज माणुसं लोगं हव्वमागच्छित्तए, णो चेव णो संचातेति हव्वमागच्छित्तए । अहुणोववन्ने

देवे देवलोगेसु दिव्वेसु कामभोगेसु मुच्छिते गिद्धे गढिते अज्झोववन्ने, से णं माणुस्सए कामभोगे णो आढाति णो परियाणाति णो अट्ठं बंधति णो नियाणं पकरेति णो ठिइपकप्पं पकरेति १, अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु मुच्छिते गिद्धे गढिते अज्झोववन्ने, तस्स णं माणुस्सए पेम्मे वोच्छिन्ने दिव्वे संकंते भवति २, अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु मुच्छिते जाव अज्झोववन्ने, तस्स णं एवं भवति-इयण्हिं गच्छं, मुहुत्तं गच्छं, तेणं कालेणमप्पाउया मणुस्सा कालधम्मुणा संजुत्ता भवंति ३, इच्चेतेहिं तिहिं ठाणेहिं अहुणोववन्ने देवे देवलोगेसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, णो चेव णं संचातेति हव्वमागच्छित्तते ३।

तिहिं ठाणेहिं अहुणोववन्ने देवे देवलोगेसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तए, संचातेइ हव्वमागच्छित्तते । अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु अमुच्छिते अगिद्धे अगढिते अणज्झोववन्ने, तस्स णमेवं भवति-अत्थि णं मम माणुस्सए भवे आयरिए ति वा उवज्झाए ति वा पवत्ती ति वा थेरे ति वा गणी ति वा गणधरे ति वा गणावच्छेदए ति वा, जेसिं पभावेणं मए इमा एतारूवा देविड्ढी दिव्वा देवजुती दिव्वे देवाणुभावे लद्धे पत्ते अभिसमन्नागते, तं गच्छामि णं ते भगवंते वंदामि णमंसामि सक्कारेमि सम्माणेमि, कल्लाणं मंगलं देवतं चेइयं पज्जुवासामि १, अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु अमुच्छिए जाव अणज्झोववन्ने, तस्स णं एवं भवति-एस णं माणुस्सए भवे णाणी ति वा तवस्सी ति वा अतिदुक्कर-दुक्करकारगे, तं गच्छामि णं ते भगवंते वंदामि णमंसामि जाव पज्जुवासामि २, अहुणोववन्ने देवे देवलोगेसु जाव अणज्झोववन्ने, तस्स णमेवं भवति-अत्थि णं मम माणुस्सए भवे माता ति वा जाव सुण्हा ति वा, तं गच्छामि णं तेसिमंतियं पाउब्भवामि, पासंतु ता मे इमं एतारूवं दिव्वं देविड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभावं लद्धं पत्तं अभिसमन्नागतं ३, इच्चेतेहिं तिहिं ठाणेहिं अहुणोववन्ने देवे देवलोगेसु इच्छेज्ज माणुसं लोगं

हव्वमागच्छित्तते, संचातेति हव्वमागच्छित्तते ४।

[टी०] अधुनोपपन्नो देवः, क्वेत्याह-**देवलोकेष्वि**ति, इह च बहुवचनमेकस्यैकदा अनेकेषूत्पादासम्भवादेकार्थे दृश्यं वचनव्यत्ययाद् देवलोकानेकत्वोपदर्शनार्थं वा, अथवा देवलोकेषु मध्ये क्वचिद्देवलोक इति, **इच्छेद्** अभिलषेत्, पूर्वसङ्गतिकदर्शनाद्यर्थं मानुषाणामयं मानुषस्तम्, **हव्वं** शीघ्रम्, **न संचाएइ** त्ति न शक्नोति, दिवि देवलोके भवा **दिव्या**स्तेषु, **कामौ** च शब्द-रूपलक्षणौ **भोगा**श्च गन्ध-रस-स्पर्शाः **कामभोगा**स्तेषु, अथवा काम्यन्त इति **कामाः** मनोज्ञास्ते च ते भुज्यन्त इति **भोगाः** शब्दादयस्ते च ते कामभोगास्तेषु मूर्च्छित इव **मूर्च्छितो** मूढः, तत्स्वरूपस्याऽनित्यत्वादेर्विबोधाक्षमत्वात्, **गृद्धः** तदाकाङ्क्षावान्, अतृप्त इत्यर्थः, ग्रथित इव **ग्रथित**स्तद्विषयस्नेहरज्जुभिः सन्दर्भित इत्यर्थः, **अध्युपपन्नः** आधिक्येनाऽऽसक्तोऽत्यन्ततन्मना इत्यर्थः, **नो आद्रियते** न तेष्वादरवान् भवति, **नो परिजानाति** एतेऽपि वस्तुभूता इत्येवं न मन्यते, तथा तेष्विति गम्यते, **नो अर्थं बध्नाति** एतैरिदं प्रयोजनमिति न निश्चयं करोति, तथा तेषु **नो निदानं प्रकरोति** एते मे भूयासुरित्येवमिति, तथा तेष्वेव **नो स्थितिप्रकल्पम्** अवस्थानविकल्पनमेतेष्वहं तिष्ठेयमिति एते वा मम तिष्ठन्तु स्थिरा भवन्त्वित्येवंरूपं **स्थित्या** वा मर्यादया विशिष्टः **प्रकल्पः** आचार आसेवेत्यर्थस्तं **प्रकरोति** कर्तुमारभते, **प्र**शब्दस्यादिकर्मार्थत्वादिति, एवं दिव्यविषयप्रसक्तिरित्येकं कारणम् १ । तथा यतोऽसावधुनोपपन्नो देवो दिव्येषु कामभोगेषु मूर्च्छितादिविशेषणो भवति ततस्तस्य **मानुष्यकं** मनुष्यविषयं **प्रेम** स्नेहो येन मनुष्यलोके आगम्यते तद् **व्यवच्छिन्नम्**, दिवि भवं **दिव्यं** स्वर्गगतवस्तुविषयं **सङ्क्रान्तं** तत्र देवे प्रविष्टं **भवती**ति दिव्यप्रेमसङ्क्रान्तिरिति द्वितीयम् २ । तथाऽसौ देवो यतो दिव्यकामभोगेषु मूर्च्छितादि-विशेषणो भवति ततस्तत्प्रतिबन्धात् **तस्स णं** ति तस्य देवस्य **एवं** ति एवंप्रकारं चित्तं **भवति**, यथा **इयण्हिं** ति इत इदानीं **गच्छामि, मुहुत्तं** ति मुहूर्त्तेन **गच्छामि**, कृत्यसमाप्तावित्यर्थः, **तेणं कालेणं** ति येन तत् कृत्यं समाप्यते स च कृतकृत्यत्वादागमनशक्तो भवति तेन कालेन गतेनेति शेषः, तस्मिन् वा काले गते, **णं**शब्दो वाक्यालङ्कारार्थः, **अल्पायुषः** स्वभावादेव **मनुष्या** मात्रादयो यद्दर्शनार्थ-

माजिगमिषति ते **कालधर्म्मेण** मरणेन संयुक्ता भवन्ति, कस्यासौ दर्शनार्थमागच्छत्विति असमाप्तकर्त्तव्यता नाम तृतीयमिति ३ । **इच्चे** इत्यादि निगमनम्।

तदागमनहेतुमाह- देवकामेषु कश्चिदमूर्च्छितादिविशेषणो भवति, **तस्य** च मन इति गम्यते, **एवं** भूतं **भवति, आचार्यः** प्रतिबोधक-प्रव्राजकादिः अनुयोगाचार्यो वा, **इति**: एवंप्रकारार्थो **वा**शब्दो विकल्पार्थः, प्रयोगश्चैवम्– **मनुष्यभवे ममाचार्योऽस्तीति वा, उपाध्यायः** सूत्रदाता, सो**ऽस्तीति वा**, एवं सर्वत्र, नवरं प्रवर्त्तयति साधूनाचार्योपदिष्टेषु वैयावृत्यादिष्विति **प्रवर्ती**, उक्तं च–

तवसंजमजोगेसुं जो जोगो तत्थ तं पयट्टेइ ।
असहुं च नियत्तेई गणतत्तिल्लो पवत्ती उ ॥ [व्यव० १।९५९] त्ति ।

प्रवर्त्तिव्यापारितान् साधून् संयमयोगेषु सीदतः स्थिरीकरोति इति **स्थविरः**, उक्तं च–

थिरकरणा पुण थेरो पवत्तिवावारिएसु अत्थेसु ।
जो जत्थ सीयइ जई संतबलो तं थिरीकुणइ ॥ [व्यव० १।९६१] त्ति ।

गणोऽस्यास्तीति **गणी** गणाचार्यः, **गणधरो** जिनशिष्यविशेषः आर्यिकाप्रतिजागरको वा साधुविशेषः, उक्तं च–

पियधम्मो दढधम्मो संविग्गो उज्जुओ य तेयस्सी।
संगहुवग्गहकुसलो सुत्तत्थविऊ गणाहिवई ॥ [निशीथभा० २४४९, बृहत्कल्प० २०५०]

गणस्यावच्छेदो विभागोंऽशोऽस्यास्तीति, यो हि गणांशं गृहीत्वा गच्छोपष्टम्भायैवोपधिमार्गणादिनिमित्तं विहरति स **गणावच्छेदकः**, आह च–

उहावणा-पहावण-खेत्तोवहिमग्गणासु अविसाई ।
सुत्तत्थतदुभयविऊ गणवच्छो एरिसो होइ ॥ [व्यव० १।९६२] त्ति ।

इम त्ति इयं प्रत्यक्षासन्ना, एतदेव रूपं यस्या न कालान्तरे रूपान्तरभाक् सा **एतद्रूपा, दिव्या** स्वर्गसम्भवा प्रधाना वा, देवानां सुराणा**मृद्धिः** श्रीर्विमानरत्नादिसम्पद् **देवर्द्धिः**, एवं सर्वत्र, नवरं **द्युतिः** दीप्तिः शरीराभरणादिसम्भवा **युति**र्वा युक्तिरिष्टपरिवारादिसंयोगलक्षणा **अनुभागः** अचिन्त्या वैक्रियकरणादिका शक्तिः, **लब्धः** उपार्जितो जन्मान्तरे, **प्राप्तः** इदानीमुपनतः, **अभिसमन्वागतो** भोग्यतां गतः, **तदि**ति

तस्मात् **तान् भगवतः** पूज्यान् **वन्दे** स्तुतिभि**र्नमस्यामि** प्रणामेन **सत्करोम्या**दरकरणेन वस्त्रादिना वा **सन्मानया**म्युचितप्रतिपत्त्या **कल्याणं मङ्गलं दैवतं चैत्य**मिति बुद्ध्या **पर्युपासे** सेवे इत्येकम् । **एस णं** ति **एषः** अवध्यादिप्रत्यक्षीकृतः, **मानुष्यके भवे** वर्त्तमान इति शेषः, मनुष्य इत्यर्थः, **ज्ञानीति वा** कृत्वा **तपस्वीति वा** कृत्वा, किम्? **अतिदुष्करा**णां सिंहगुहाकायोत्सर्गकरणादीनां मध्ये **दुष्कर**मनुरक्तपूर्वोपभुक्त-प्रार्थनापरतरुणीमन्दिरवासाप्रकम्पब्रह्मचर्यानुपालनादिकं करोतीति **अतिदुष्कर-दुष्करकारकः, स्थूलभद्रवत्, तत्** तस्माद् **गच्छामि, ते** त्ति पूर्वमेकवचननिर्देशेऽपीह पूज्यविवक्षया बहुवचनमिति, **तान्** दुष्करदुष्करकारकान् **भगवतो वन्द** इति द्वितीयम्। तथा 'माया इ वा पिया इ वा भज्जा इ वा भाया इ वा भगिणी इ वा पुत्ता इ वा धूया इ वे'ति **यावच्छब्दा**क्षेपः, **स्नुषा** पुत्रभार्या, **तदि**ति तस्मात् **तेषामन्तिके** समीपे **प्रादुर्भवामि** प्रकटीभवामि, **ता मे** त्ति **तावत् मे** ममेति तृतीयम् ।

[सू० १८४] ततो ठाणाइं देवे पीहेज्जा, तंजहा-माणुस्सगं भवं, आरिते खेत्ते जम्मं, सुकुलपच्चायातिं ५।

तिहिं ठाणेहिं देवे परितप्पेज्जा, तंजहा-अहो णं मते संते बले संते वीरिए संते पुरिसक्कारपरक्कमे खेमंसि सुभिक्खंसि आयरिय-उवज्झाएहिं विज्जमाणेहिं कल्लसरीरेणं णो बहुते सुते अहीते १, अहो णं मते इहलोगपडिबद्धेणं परलोगपरंमुहेणं विसयतिसितेणं णो दीहे सामन्नपरिताते अणुपालिते २, अहो णं मते इड्ढि-रस-सायगरुएणं भोगाससगिद्धेणं णो विसुद्धे चरित्ते फासिते ३, इच्चेतेहिं [तिहिं ठाणेहिं देवे परितप्पेज्जा] ६।

[टी०] पीहेज्ज त्ति स्पृहयेद् अभिलषेत्, मानुष्यकं भवं, **आर्यक्षेत्रम्** अर्द्धषड्-विंशतिजनपदानामन्यतरत् **मगधा**दि, **सुकुले** इक्ष्वाकादौ देवलोकात् प्रतिनिवृत्तस्या-**ऽऽजातिः** जन्म **आयाति**र्वा आगतिः सुकुलप्रत्याजातिः सुकुलप्रत्यायातिर्वा, तामिति । **परितप्पेज्ज** त्ति पश्चात्तापं करोति, **अहो** विस्मये **सति** विद्यमाने **बले** शारीरे **वीर्ये** जीवाश्रिते **पुरुषकारे** अभिमानविशेषे **पराक्रमे** अभिमान एव च निष्पादितस्वविषये इत्यर्थः, **क्षेमे** उपद्रवाभावे सति **सुभिक्षे** सुकाले सति **कल्यशरीरेण** नीरोगदेहेनेति

सामग्रीसद्भावेऽपि **नो बहु श्रुतमधीत**मित्येकम् । **विसयतिसिएणं** ति विषयतृषितत्वादिहलोकप्रतिबन्धादिना दीर्घश्रामण्यपर्यायापालनम् इति द्वितीयम् । तथा **ऋद्धिः** आचार्यत्वादौ नरेन्द्रादिपूजा **रसा** मधुरादयो मनोज्ञाः **सातं** सुखमेतानि **गुरूणि** आदरविषया यस्य सोऽय**मृद्धि-रस-सातगुरुक**स्तेन, **भोगेषु** कामेषु **आशंसा** च अप्राप्तप्रार्थनं **गृद्धं** च प्राप्ततृप्तिर्यस्य स **भोगाशंसागृद्धः**, इह चानुस्वारलोप-ह्रस्वत्वे प्राकृततयेति, पाठान्तरेण **भोगामिषगृद्धेने**ति, **नो विशुद्धम्** अनतिचारं **चरित्रं स्पृष्ट**मिति तृतीयम्। **इत्येतै**रित्यादि निगमनम् ।

[सू० १८५] तिहिं ठाणेहिं देवे चतिस्सामीति जाणति-विमाणाभरणाइं णिप्पभाइं पासित्ता, कप्परुक्खगं मिलायमाणं पासित्ता, अप्पणो तेयलेस्सं परिहायमाणिं जाणित्ता, इच्चेतेहिं [तिहिं ठाणेहिं देवे चतिस्सामीति जाणति] ७।

तिहिं ठाणेहिं देवे उव्वेगमागच्छेज्जा, तंजहा-अहो णं मते इमातो एतारूवातो दिव्वातो देविड्ढीओ दिव्वाओ देवजुतीतो लद्धातो पत्तातो अभिसमन्नागतातो चतियव्वं भविस्सति १, अहो णं मते मातुओयं पिउसुक्कं तं तदुभयसंसट्ठं तप्पढमयाते आहारो आहारेयव्वो भविस्सति २, अहो णं मते कलमलजंबालाते असुतीते उव्वेयणिताते भीमाते गब्भवसहीते वसियव्वं भविस्सइ, इच्चेतेहिं तिहिं [ठाणेहिं देवे उव्वेगमागच्छेज्जा] ८।

[टी०] **तिहीं** ति विमानाभरणानां निष्प्रभत्वमौत्पातिकं तच्चक्षुर्विभ्रमरूपं वा, **कप्परुक्खगं** ति चैत्यवृक्षम्, **तेयलेस्सं** ति शरीरदीप्तिं सुखासिकां वा, **इच्चेतेही**त्यादि निगमनम्, भवन्ति चैवंविधानि लिङ्गानि देवानां च्यवनकाले, उक्तं च–

माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्री-ह्रीनाशो वाससां चोपरागः ।
दैन्यं तन्द्रा कामरागा-ऽङ्गभङ्गौ, दृष्टिभ्रान्तिर्वेपथुश्चारतिश्च ॥ [ ] इति ।

तिहीं ति **उद्वेगं** शोकं 'मयेतश्च्यवनीयं भविष्यति'इत्येकम्। तथा **मातुरोजः** आर्तवं **पितुः शुक्रं** तत्तथाविधं किमपि विलीनानामतिविलीनं **तयोः** ओजःशुक्रयो**रुभयं** द्वयं **तदुभयं** तच्च तत् **संसृष्टं** च, **संश्लिष्टं** चेति वा, परस्परमेकीभूतमित्यर्थः, तदुभयसंसृष्टं तदुभयसंश्लिष्टं वा एवंलक्षणो य **आहारः तस्य** गर्भवासकालस्य **प्रथमता** तत्प्रथमता

तस्याम्, प्रथमसमय एवेत्यर्थः, स **आहर्त्तव्यः** अभ्यवहार्यो **भविष्यती**ति द्वितीयम्, तथा **कलमलो** जठरद्रव्यसमूहः स एव **जम्बालः** कर्दमो यस्यां सा तथा, तस्याम्, अत एवाऽ**शुचिकायाम् उद्वेजनीयायाम्** उद्वेगकारिण्यां **भीमायां** भयानिकायां गर्भ एव वसति**र्गर्भवसति**स्तस्यां **वस्तव्य**मिति तृतीयम् । अत्र गाथे भवतः–

देवा वि देवलोए दिव्वाभरणाणुरंजियसरीरा ।
जं परिवडंति तत्तो तं दुक्खं दारुणं तेसिं ॥
तं सुरविमाणविभवं चिंतिय चयणं च देवलोगाओ।
अइबलियं चिय जं न वि फुट्टइ सयसक्करं हिययं ॥ [उप० माला २८४-२८५] ति ।

इच्चेएही**त्यादि** निगमनम् ।

[सू० १८६] तिसंठिया विमाणा पन्नत्ता, तंजहा-वट्टा, तंसा, चउरंसा । तत्थ णं जे ते वट्टा विमाणा ते णं पुक्खरकन्नियासंठाणसंठिता सव्वतो समंता पागारपरिक्खित्ता एगदुवारा पन्नत्ता, तत्थ णं जे ते तंसा विमाणा ते णं सिंघाडगसंठाणसंठिता दुहतो पागारपरिक्खित्ता एगतो वेतितापरिक्खित्ता तिदुवारा पन्नत्ता, तत्थ णं जे ते चउरंसा विमाणा ते णं अक्खाडगसंठाणसंठिता सव्वतो समंता वेतितापरिक्खिता चउदुवारा पन्नत्ता १।

तिपतिट्ठिया विमाणा पन्नत्ता, तंजहा-घणोदधिपतिट्ठिता, घणवातपइट्ठिया, ओवासंतरपइट्ठिता २।

तिविधा विमाणा पन्नत्ता, तंजहा-अवट्ठिता, वेउव्विता, परिजाणिता ३।

[टी०] अथ देववक्तव्यतानन्तरं तदाश्रयविमानवक्तव्यतामाह– **तिसंठिए**त्यादि सूत्रत्रयं स्फुटमेव, केवलं त्रीणि संस्थितानि **संस्थानानि** येषां तानि, त्रिभिर्वा प्रकारैः संस्थितानि **त्रिसंस्थितानि, तत्थ णं** ति तेषु मध्ये **पुक्खरकण्णिय** त्ति पुष्करकर्णिका पद्ममध्यभागः, सा हि वृत्ता समोपरिभागा च भवति, **सव्वत** इति दिक्षु **समन्ता**दिति विदिक्षु । **सिंघाडगं** ति त्रिकोणो जलजफलविशेषः, **एकत** एकस्यां दिशि यस्यां वृत्तविमानमित्यर्थः। **अक्खाडगो** चतुरस्रः प्रतीत एव, **वेदिका** मुण्डप्राकारलक्षणा, एतानि चैवंक्रमाण्येवावलिकाप्रविष्टानि भवन्ति, पुष्पावकीर्णानि त्वन्यथाऽपीति, भवन्ति चात्र गाथाः–

सव्वेसु पत्थडेसुं मज्झे वट्टं अणंतरे तंसं ।
एयंतरचतुरंसं पुणोवि वट्टं पुणो तंसं ॥
वट्टं वट्टस्सुवरिं तंसं तंसस्स उप्परिं होइ ।
चउरंसे चउरंसं उड्ढं तु विमाणसेढीओ ॥
वट्टं थ वलयगं पिव तंसं सिंघाडगं पिव विमाणं ।
चउरंसविमाणं पि य अक्खाडगसंठियं भणियं ॥
सव्वे वट्टविमाणा एगदुवारा हवंति विन्नेया ।
तिन्नि य तंसविमाणे चत्तारि य होंति चउरंसे ॥
पागारपरिक्खित्ता वट्टविमाणा हवंति सव्वे वि ।
चउरंसविमाणाणं चउद्दिसिं वेइया होइ ॥
जत्तो वट्टविमाणं तत्तो तंसस्स वेइया होइ ।
पागारो बोद्धव्वो अवसेसेहिं तु पासेहिं ॥
आवलियासु विमाणा वट्टा तंसा तहेव चउरंसा ।
पुप्फावगिन्नया पुण अणेगविहरूवसंठाणा ॥ [विमान० २४५-२५१] इति ।

अथ प्रतिष्ठान सूत्रं, प्रतिष्ठानसूत्रस्येयं विभजना–

घणउदहिपइट्ठाणा सुरभवणा होंति दोसु कप्पेसु ।
तिसु वाउपइट्ठाणा तदुभयसुपइट्ठिया तीसु ॥
तेण परं उवरिमगा आगासंतरपइट्ठिया सव्वे । [बृहत्सं० १२६-१२७] त्ति ।

अवस्थितानि शाश्वतानि । **वैक्रियाणि** भोगाद्यर्थं निष्पादितानि, यतोऽभिहितं **भगवत्याम्**– **जाहे णं भंते ! सक्के देविंदे देवराया दिव्वाइं भोगभोगाइं भुंजिउकामे भवइ से कहमियाणिं पकरेति ?, गोयमा ! ताहे चेव णं से सक्के देविंदे देवराया एगं महं नेमिपडिरूवगं** विउव्वइ, नेमिरिति चक्रधारा, तद्वद् वृत्तविमानमित्यर्थः, इत्यादि [**भगवती० १४।६।६**] । **परियानं** तिर्यग्लोकावतरणादि, तत् प्रयोजनं येषां तानि **पारियानिकानि** पालक-पुष्पकादीनि वक्ष्यमाणानीति ।

[सू० १८७] तिविहा नेरइया पन्नत्ता, तंजहा-सम्मादिट्ठी, मिच्छादिट्ठी, सम्मामिच्छादिट्ठी । एवं विगलिंदियवज्जं जाव वेमाणियाणं ।

ततो दुग्गतीतो पन्नत्ताओ, तंजहा-णेरइयदुग्गती, तिरिक्खजोणीयदुग्गती,

मणुससदुग्गती १।

ततो सुग्गतीतो पन्नत्ताओ, तंजहा-सिद्धसुग्गती, देवसुग्गती, मणुस्ससुग्गती २।

ततो दुग्गता पन्नत्ता, तंजहा-णेरतितदुग्गता, तिरिक्खजोणितदुग्गता, मणुस्सदुग्गता ३।

ततो सुग्गता पन्नत्ता, तंजहा-सिद्धसुग्गता, देवसुग्गता, मणुस्ससुग्गता ४।

[टी०] पूर्वतरसूत्रेषु देवा उक्ताः, अधुना वैक्रियादिसाधर्म्यान्नारकान्निरूपयन्नाह– **तिविहे**त्यादि गतार्थम्, नवरं **विगलिंदियवज्जं** ति नारकवत् दण्डकस्त्रिधा वाच्यः एकेन्द्रिय-विकलेन्द्रियान् वर्जयित्वा, यतः पृथिव्यादीनां मिथ्यात्वमेव द्वित्रिचतुरिन्द्रियाणां तु न मिश्रमिति ।

त्रिविधदर्शनाश्च दुर्गति-सुगतियोगात् दुर्गताः सुगताश्च भवन्तीति दुर्गत्यादिदर्शनाय सूत्रचतुष्टयमाह– **तओ** इत्यादि सूत्रचतुष्टयं व्यक्तम्, परं दुष्टा गति**र्दुर्गतिः**, मनुष्याणां दुर्गतिर्विवक्षयैव, तत्सुगतेरप्यभिधास्यमानत्वादिति । **दुर्गताः** दुःस्थाः, **सुगताः** सुस्थाः ।

[सू० १८८] **चउत्थभत्तितस्स णं भिक्खुस्स कप्पंति ततो पाणगाइं पडिगाहेत्तए, तंजहा-उस्सेतिमे, संसेतिमे, चाउलधोवणे १।**

छट्ठभत्तितस्स णं भिक्खुस्स कप्पंति ततो पाणगाइं पडिगाहेत्तए, तंजहा-तिलोदए, तुसोदए, जवोदए २।

अट्ठमभत्तियस्स णं भिक्खुस्स कप्पंति ततो पाणगाइं पडिगाहेत्तए, तंजहा-आयामते, सोवीरते, सुद्धवियडे ३।

तिविहे उवहडे पन्नत्ते, तंजहा-फलिओवहडे, सुद्धोवहडे, संसट्ठोवहडे ४।

तिविहे उग्गहिते पन्नत्ते, तंजहा-जं च ओगिण्हति, जं च साहरति, जं च आसगंसि पक्खिवति ५।

तिविधा ओमोयरिया पन्नत्ता, तंजहा-उवकरणोमोयरिया, भत्तपाणोमोदरिता, भावोमोदरिता ६।

उवकरणोमोदरिता तिविहा पन्नत्ता, तंजहा-एगे वत्थे, एगे पाते,

चियत्तोवहिसातिज्जणता ७।

ततो ठाणा णिग्गंथाण वा णिग्गंथीण वा अहियाते असुभाते अक्खमाते अणिस्सेसाते अणाणुगामियत्ताए भवंति, तंजहा-कूअणता, कक्करणता, अवज्झाणता ८।

ततो ठाणा णिग्गंथाण वा णिग्गंथीण वा हिताते सुहाते खमाते णिस्सेसाते आणुगामियत्ताते भवंति, तंजहा-अकूअणता, अकक्करणता, अणवज्झाणया ९।

ततो सल्ला पन्नत्ता, तंजहा-मायासल्ले णिदाणसल्ले मिच्छादंसणसल्ले १०।

तिहिं ठाणेहिं समणे णिग्गंथे संखित्तविउलतेउलेस्से भवति, तंजहा-आतावणताते, खंतिखमाते, अपाणगेणं तवोकम्मेणं ११।

तेमासितं णं भिक्खुपडिमं पडिवन्नस्स अणगारस्स कप्पंति ततो दत्तीओ भोयणस्स पडिगाहेत्तए, ततो पाणगस्स १२।

एगरातियं भिक्खुपडिमं सम्मं अणणुपालेमाणस्स अणगारस्स इमे ततो ठाणा अहिताते असुभाते अखमाते अणिस्सेसाते अणाणुगामियत्ताते भवंति, तंजहा-उम्मायं वा लभेज्जा, दीहकालियं वा रोगातंकं पाउणेज्जा, केवलिपन्नत्तातो वा धम्मातो भंसेज्जा १३।

एगरातियं णं भिक्खुपडिमं सम्मं अणुपालेमाणस्स अणगारस्स ततो ठाणा हिताते सुभाते खमाते णिस्सेसाते आणुगामियत्ताते भवंति, तंजहा-ओहिणाणे वा से समुप्पज्जेज्जा, मणपज्जवनाणे वा से समुप्पज्जेज्जा, केवलनाणे वा से समुप्पज्जेज्जा १४।

[टी०] सिद्धादिसुगताश्च तपस्विनः सन्तो भवन्तीति तत्कर्त्तव्य-परिहर्त्तव्यविशेषमाह– **चउत्थे**त्यादिसूत्राणि [चतुर्दश] व्यक्तानि, केवलम् एकं पूर्वदिने द्वे उपवासदिने चतुर्थं पारणकदिने **भक्तम्** भोजनं परिहरतो यत्र तपसि तत् चतुर्थभक्तम्, तद्यस्यास्ति स **चतुर्थभक्तिक**स्तस्य, एवमन्यत्रापि, शब्दव्युत्पत्तिमात्रमेतत्, प्रवृत्तिस्तु चतुर्थभक्तादि-शब्दानामेकाद्युपवासादिष्विति, भिक्षणं शीलं धर्म्मः तत्साधुकारिता वा यस्य स

भिक्षुर्भिनत्ति वा क्षुधमिति भिक्षुः, तस्य **पानकानि** पानाहाराः, उत्स्वेदेन निर्वृत्त**मुत्स्वेदिमं** येन व्रीह्यादिपिष्टं सुराद्यर्थम् उत्स्वेद्यते, तथा संसेकेन निवृत्तमिति **संसेकिमम्** अरणिकादिपत्रशाकमुत्काल्य येन शीतलजलेन संसिच्येत तदिति, **तन्दुलधावनं** प्रतीतमेव १। **तिलोदका**दि तत्प्रक्षालनजलम्, नवरं **तुषोदकं** व्रीह्युदकम् २। **आयामकम्** अवश्रावणम्, **सौवीरकं** काञ्जिकम्, **शुद्धविकटम्** उष्णोदकम् ३। **उपहत**मुपहितम्, भोजनस्थाने ढौकितं भक्तमिति भावः, **फलिकं** प्रहेणकादि, तच्च तदुपहृतं चेति **फलिकोपहृतम्** अवगृहीताभिधानपञ्चमपिण्डैषणाविषयभूतमिति। तथा **शुद्धम्** अलेपकृतं शुद्धौदनं च, तच्च तदुपहृतं चेति **शुद्धोपहृतम्**, एतच्चाल्पलेपाभिधानचतुर्थैषणा-विषयभूतमिति । तथा **संसृष्टं** नाम भोक्तुकामेन गृहीतं कूरादौ क्षिप्ते हस्तः क्षिप्तो न तावत् मुखे क्षिपति तच्च लेपालेपकरणस्वभावमिति, तदेवंभूतमुपहृतं **संसृष्टोपहृतम्**, इदं चतुर्थैषणात्वेन भजनीयम्, लेपालेपकृतादिरूपत्वादस्येति, अत्र गाथा–

सुद्धं च अलेवकडं अहवण सुद्धोदणो भवे सुद्धं ।
संसट्ठं आउत्तं भोक्तुमारब्धमित्यर्थः लेवाडमलेवडं वा वि ॥ [व्यव० ९।३८२०] त्ति ।

इह च त्रये एकत्व-द्वि-त्रिसंयोगैः सप्ताभिग्रहवन्तः साधवो भवन्तीति ४ ।

अवगृहीतं नाम केनचित् प्रकारेण दायकेनात्तं भक्तादि **य**दिति भक्तम्, **च**काराः समुच्चयार्थाः, **अवगृह्णाति** आदत्ते हस्तेन दायकस्तद**वगृहीतम्**, एतच्च षष्ठी पिण्डैषणेति, एवं च **वृद्धव्याख्या**– परिवेषकः पिटकायाः कूरं गृहीत्वा यस्मै दातुकामस्तद्भाजने क्षेप्तुमुपस्थितः इत्यादि महान् ५।

तथा, **अवमम्** ऊन**मुदरं** जठरं यस्यासाव**वमोदरः**, अवमं वोदरम् अवमोदरम्, तद्भावोऽ**वमोदरता**, प्राकृतत्वा**दोमोयरिय** त्ति, अवमोदरस्य वा करणमवमोदरिका, व्युत्पत्तिरेवेयमस्य, प्रवृत्तिस्तूनतामात्रे, तत्र प्रथमा जिनकल्पिकादीनामेव न पुनरन्येषाम्, शास्त्रीयोपध्यभावे हि समग्रसंयमाभावादिति, अतिरिक्ताग्रहणतो वोनोदरतेति, उक्तं च–

जं वट्टइ उवगारे उवकरणं तं सि होइ उवगरणं ।
अइरेगं अहिगरणं अजओ यजयं परिहरंतो ॥ [ ]

अयतश्च यकद् भुञ्जानो भवतीत्यर्थः। भक्तपानावमोदरता पुनरात्मीयाहारमान-

परित्यागतो वेदितव्या, उक्तं च–

बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ ।
पुरिसस्स महिलियाए अट्ठावीसं भवे कवला ॥ [पिण्डनि० ६४२]
कवलाण य परिमाणं कुक्कुडिअंडगपमाणमेत्तं तु ।
जो वा अविगियवयणो वयणम्मि छुहेज्ज वीसत्थो ॥ [ ] त्ति ।

इयं चाष्ट १ द्वादश २ षोडश ३ चतुर्विंशत्ये ४ कत्रिंशदन्तैः कवलैः ५ क्रमेणाल्पाहारादिसंज्ञिता पञ्चविधा भवति ।

एवम् अनेनानुसारेण पानेऽपि वाच्या । भावोनोदरता पुनः क्रोधादित्यागः, उक्तं च–

कोहाईणमणुदिणं चाओ जिणवयणभावणाउ य ।
भावेणोमोदरिया पन्नत्ता वीयरागेहिं ॥ [ ] ६।

उपकरणावमोदरिकाया भेदानाह- **उवकरणे**त्यादि, **एकं वस्त्रं** जिनकल्पिकादेरेव, एवं **पात्र**मपि, **एगं पायं जिणकप्पियाणं**[ओघनि० ६७९]इति वचनादिति, तथा **चियत्तेणं** संयमोपकारकोऽयमिति प्रीत्या मलिनादावप्रीत्यकरणेन वा **चियत्तस्स** वा संयमिनां संमतस्य **उपधेः** रजोहरणादिकस्य **साइज्जणय** त्ति सेवा **चियत्तोवहिसाइज्जणय** त्ति ७। **चियत्तेणे**ति प्रागुक्तम्, एतद्विपर्ययभेदान् सफलानाह– **तओ** इत्यादि स्पष्टम्, किन्तु **अहिताय** अपथ्याय **असुखाय** दुःखाय **अक्षमाय** अयुक्तत्वाय **अनिःश्रेयसाय** अमोक्षाय **अनानुगामिकत्वाय** न शुभानुबन्धायेति, **कूजनता** आर्त्तस्वरकरणम्, **कर्क्करणता** शय्योपध्यादिदोषोद्भावनगर्भं प्रलपनम्, **अपध्यानता** आर्त्त-रौद्रध्यायित्व-मिति८। उक्तविपर्ययसूत्रं व्यक्तम् ९ ।

निर्ग्रन्थानामेव परिहर्त्तव्यं त्रयमाह– **तओ** इत्यादि, शल्यते बाध्यते अनेनेति **शल्यम्**, द्रव्यतस्तोमरादि, भावतस्तु इदं त्रिविधं– **माया** निकृतिः, सैव **शल्यं** मायाशल्यम्, एवं सर्वत्र, नवरं नितरां दायते लूयते मोक्षफलमनिन्द्यब्रह्मचर्यादिसाध्यं कुशलकर्मकल्प-तरुवनमनेन देवर्द्ध्यादिप्रार्थनपरिणामनिशितासिनेति **निदानम्**, **मिथ्या** विपरीतं **दर्शनं** मिथ्यादर्शनमिति १० ।

निर्ग्रन्थानामेव लब्धिविशेषस्य कारणत्रयमाह **तिहिं** त्ति **सङ्क्षिप्ता** लघूकृता **विपुला**ऽपि विस्तीर्णाऽपि सती, अन्यथाऽऽदित्यबिम्बवत् दुर्दर्शः स्यादिति, **तेजोलेश्या**

तपोविभूतिजं तेजस्वित्वं तैजसशरीरपरिणतिरूपं महाज्वालाकल्पं येन स **सङ्क्षिप्त-विपुलतेजोलेश्यः** । **आतापनानां** शीतादिभिः शरीरस्य सन्तापनानां भाव **आतापनता** शीतातपादिसहनमित्यर्थः, तया, **क्षान्त्या** क्रोधनिग्रहेण **क्षमा** मर्षणं न त्वशक्ततयेति **क्षान्तिक्षमा**, तया, **अपानकेन** पारणककालादन्यत्र **तपःकर्म्मणा** षष्ठादिनेति, अभिधीयते च **भगवत्याम्**–

जे णं गोसाला ! एगाए सनहाए कुम्मासपिंडियाए एगेण य वियडासणेणं छट्ठं छट्ठेणं अणिक्खित्तेणं तवोकम्मेणं उड्ढं बाहाओ पगिज्झिय पगिज्झिय सूराभिमुहे आयावणभूमीए आयावेमाणे विहरइ से णं अंतो छण्हं मासाणं संखित्तविपुलतेयलेस्से भवइ [भगवती०१५।५४] त्ति ११ ।

तेमासियमित्यादि, **भिक्षुप्रतिमाः** साधोरभिग्रहविशेषाः, ताश्च द्वादश, तत्रैकमासिक्यादयो मासोत्तराः सप्त, तिस्रः सप्तरात्रिन्दिवप्रमाणाः प्रत्येकम्, एका अहोरात्रिकी, एका एकरात्रिकीति ।

तत्र **त्रिमासिकी** तृतीया, तां **प्रतिपन्नस्य** आश्रितस्य, **दत्तिः** सकृत्प्रक्षेपलक्षणेति १२। **एकरात्रिकी** द्वादशी, तां **सम्यगननुपालयतः उन्मादः** चित्तविभ्रमः, **रोगः** कुष्ठादिः, **आतङ्कः** शूल-विशूचिकादिः सद्योघाती, स च स चेति **रोगातङ्कम्**, **पाउणेज्ज** त्ति प्राप्नुयात्, **धर्म्मात्** श्रुत-चारित्रलक्षणात् **भ्रश्येत्**, सम्यक्त्वस्यापि हान्येति, उन्माद-रोग-धर्म्मभ्रंशाः प्रतिमायाः सम्यगननुपालनाजन्या **अहिताद्यर्थाः** दुःखार्था भवन्तीति हृदयम् १३ । विपर्ययसूत्रमेतदनुसारतो बोद्धव्यमिति १४।

[सू० १८९] जंबूदीवे दीवे ततो कम्मभूमीओ पन्नत्ताओ तंजहा- भरहे, एरवते, महाविदेहे १। एवं धायइसंडे दीवे पुरत्थिमद्धे जाव पुक्खरवरदीवड्ढपच्चत्थिमद्धे २-५।

[टी०] उक्तरूपाणि च साध्वनुष्ठानानि कर्म्मभूमिष्वेव भवन्तीति तन्निरूपणायाह- **जंबूदीवे**त्यादिसूत्राणि साक्षादतिदेशाभ्यां पञ्च सुगमानि चेति ।

[सू० १९०] तिविधे दंसणे पन्नत्ते, तंजहा-सम्मद्दंसणे, मिच्छद्दंसणे, सम्मामिच्छद्दंसणे १।

तिविधा रुती पन्नत्ता, तंजहा-सम्मरुती, मिच्छरुती, सम्मामिच्छरुती २।

तिविधे पओगे पन्नत्ते, तंजहा-सम्मप्पओगे, मिच्छप्पओगे, सम्मामिच्छप्पओगे ३।

[सू० १९१] तिविधे ववसाते पन्नत्ते, तंजहा-धम्मिते ववसाते, अधम्मिए ववसाते, धम्मियाधम्मिते ववसाते ४।

अथवा तिविधे ववसाते पन्नत्ते, तंजहा-पच्चक्खे, पच्चतिते, आणुगामिते ५।

अहवा तिविधे ववसाते पन्नत्ते, तंजहा-इहलोइए, परलोगिते, इहलोगितपरलोगिते ६।

इहलोगिते ववसाते तिविहे पन्नत्ते, तंजहा-लोगिते, वेतिते, सामतिते ७।

लोगिते ववसाते तिविधे पन्नत्ते, तंजहा-अत्थे, धम्मे, कामे ८।

वेतिते ववसाते तिविधे पन्नत्ते, तंजहा-रिव्वेदे, जजुवेदे, सामवेदे ९।

सामतिते ववसाते तिविधे पन्नत्ते, तंजहा-णाणे, दंसणे, चरित्ते १०।

तिविधा अत्थजोणी पन्नत्ता, तंजहा- सामं, दंडे, भेदे ११।

[टी०] उक्ता: कर्मभूमय:, अथ तद्गतजनधर्म्मनिरूपणायाह-**तिविहे**त्यादि-सूत्राण्येकादश कण्ठ्यानि, किन्तु त्रिविधं दर्शनं शुद्धा-ऽशुद्ध-मिश्रपुञ्जत्रयरूपं मिथ्यात्वमोहनीयम्, तथाविधदर्शनहेतुत्वादिति १ । **रुचि**स्तु तदुदयसम्पाद्यं तत्त्वानां श्रद्धानम् २। **प्रयोग:** सम्यक्त्वादिपूर्वो मन:प्रभृतिव्यापार इति, अथवा सम्यगादिप्रयोग: उचितानुचितोभयात्मक औषधादिव्यापार इति ३ ।

व्यवसायो वस्तुनिर्णय: पुरुषार्थसिद्ध्यर्थमनुष्ठानं वा, स च व्यवसायिनां धार्मिका-ऽधार्म्मिक-धार्मिकाधार्म्मिकाणां संयता-ऽसंयत-देशसंयतलक्षणानां सम्बन्धित्वाद-भेदेनोच्यमानस्त्रिधा भवतीति, संयमा-ऽसंयम-देशसंयमलक्षणविषयभेदाद्वा ४ ।

व्यवसायो निश्चय:, स च **प्रत्यक्षो**ऽवधि-मन:पर्याय-केवलाख्य:, प्रत्ययात् इन्द्रियानिन्द्रियलक्षणान्निमित्ताज्जात: **प्रात्ययिक:**, साध्यम् अग्न्यादिकमनुगच्छति साध्याभावे न भवति यो धूमादिहेतु: सोऽनुगामी, ततो जातमानुगामिकम् अनुमानम्,

तद्रूपो व्यवसाय **आनुगामिक** एवेति । अथवा **प्रत्यक्षः** स्वयंदर्शनलक्षणः, **प्रात्ययिकः** आप्तवचनप्रभवः, तृतीयस्तथैवेति ५ ।

इहलोके भव **ऐहलौकिको** य इह भवे वर्त्तमानस्य निश्चयोऽनुष्ठानं वा स **ऐहलौकिको** व्यवसाय इति भावः, यस्तु परलोके भविष्यति स **पारलौकिकः**, यस्त्विह परत्र च स ऐहलौकिकपारलौकिक इति ६ ।

लौकिकः सामान्यलोकाश्रयो निश्चयोऽनुष्ठानं वा, वेदाश्रितो **वैदिकः**, **समयः** साङ्ख्यादीनां सिद्धान्तः, तदाश्रितस्तु **सामयिकः** ७।

लौकिकादयो व्यवसायाः प्रत्येकं त्रिविधाः, ते च प्रतीता एव, नवरम् **अर्थ-धर्म-काम**विषयो निर्णयो यथा–

अर्थस्य मूलं निकृतिः क्षमा च, धर्मस्य दानं च दया दमश्च ।
कामस्य वित्तं च वपुर्वयश्च, मोक्षस्य सर्वोपरमः क्रियासु ॥ [ ]

इत्यादिरूपः, तदर्थमनुष्ठानं वा अर्थादिरेव व्यवसाय उच्यत इति ८ । ऋग्वेदाद्याहितो निर्णयो व्यापारो वा **ऋग्वेदा**दिरेवेति ९ । ज्ञानादीनि **सामयिको** व्यवसायः, तत्र **ज्ञानं** व्यवसाय एव, पर्यायशब्दत्वात्, **दर्शन**मपि श्रद्धानलक्षणं व्यवसायः, व्यवसायांशत्वात्तस्येति प्रतिपादितमेव, **चारित्र**मपि समभावलक्षणो व्यवसाय एव, बोधस्वभावस्यात्मनः परिणतिविशेषत्वात् १० ।

अर्थस्य राजलक्ष्म्यादे**र्योनिः** उपायोऽर्थयोनिः, **साम** प्रियवचनादि, **दण्डो** वधादिरूपः परनिग्रहः, **भेदो** जिगीषितशत्रुपरिवर्गस्य स्वाम्यादिस्नेहापनयनादिः, क्वचित्तु **दण्ड**पदत्यागेन **प्रदानेन** सह तिस्रोऽर्थयोनयः पठ्यन्ते, भवन्ति चात्र श्लोकाः–

परस्परोपकाराणां दर्शनं १ गुणकीर्त्तनम् २ ।
सम्बन्धस्य समाख्यान ३ मायत्याः संप्रकाशनम् ४ ॥ [ ]

अस्मिन्नेवं कृते इदमावयोर्भविष्यतीत्याशाजनन**मायतिसंप्रकाशन**मिति,

वाचा पेशलया साधु तवाहमिति चार्पणम् ५ ।
इति सामप्रयोगज्ञैः साम पञ्चविधं स्मृतम् ॥
वधश्चैव १ परिक्लेशो २ धनस्य हरणं तथा ३ ।
इति दण्डविधानज्ञैर्दण्डोऽपि त्रिविधः स्मृतः ॥

स्नेहरागापनयनं १ संहर्षोत्पादनं तथा २ ।
सन्तर्जनं च ३ भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः ॥ [ ]

संहर्षः स्पर्द्धा, **सन्तर्जनं** च अस्यास्मन्मित्रविग्रहस्य परित्राणं मत्तो भविष्यतीत्यादिरूपमिति, **प्रदान**लक्षणमिदम्–

यः सम्प्राप्तो धनोत्सर्गः, उत्तमाधममध्यमः ।
प्रतिदानं तथा तस्य १ गृहीतस्यानुमोदनम् २॥
द्रव्यदानमपूर्वं च ३, स्वयंग्राहप्रवर्त्तनम् ४ ।
देयस्य प्रतिमोक्षश्च ५, दानं पञ्चविधं स्मृतम् ॥ [ ]

धनोत्सर्गो धनसम्पत्, **स्वयंग्राहप्रवर्त्तनम्** परस्वेषु, **देयप्रतिमोक्ष** ऋणमोक्ष इति। प्रयोगश्चासामेवम्–

उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन, समं तुल्यपराक्रमैः ॥ [ ] इति ।

[सू० १९२] तिविधा पोग्गला पन्नत्ता, तंजहा-पओगपरिणता, मीसापरिणता, वीससापरिणता ।

तिपतिट्ठिया णरगा पन्नत्ता, तंजहा-पुढविपतिट्ठिता, आगासपतिट्ठिता, आयपतिट्ठिता । णेगम-संगह-ववहाराणं पुढविपइट्ठिया, उज्जुसुतस्स आगासपतिट्ठिया, तिण्हं सद्दणयाणं आयपतिट्ठिया ।

[टी०] अनन्तरं जीवा धर्म्मतः प्ररूपिताः, इदानीं पुद्गलांस्तथैव प्ररूपयन्नाह– **तिविहे**त्ति **प्रयोगपरिणताः** जीवव्यापारेण तथाविधपरिणतिमुपनीताः, यथा पटादिषु कर्म्मादिषु वा, **मीस** त्ति प्रयोग-विस्रसाभ्यां **परिणताः**, यथा पटपुद्गला एव प्रयोगेण पटतया विस्रसापरिणामेन चाऽभोगेऽपि पुराणतयेति, **विस्रसा** स्वभावः, तत्**परिणता** अभ्रेन्द्रधनुरादिवदिति ।

पुद्गलप्रस्तावाद्विस्रसापरिणतपुद्गलरूपाणां नरकावासानां प्रतिष्ठाननिरूपणायाह– **तिपतिट्ठिये**त्यादि स्फुटम्, केवलं [**नरका**] नरकावासाः, **आत्मप्रतिष्ठिताः** स्वरूपप्रतिष्ठिताः । तत्प्रतिष्ठानं नयैराह– **णेगमे**त्यादि, नैकेन सामान्य-सामान्यविशेष-विशेषग्राहकत्वात् तस्य नैकेन ज्ञानेन मिनोति परिच्छिनत्तीति **नैकमः**, अथवा निगमाः

निश्चितार्थबोधास्तेषु कुशलो भवो वा **नैगमः** १, संग्रहणं भेदानां सङ्गृह्णाति वा तान् संगृह्यन्ते वा ते येन स **सङ्ग्रहो** महासामान्यमात्राभ्युपगमपर इति २, व्यवहरणं व्यवह्रियते वा तेन विशेषेण वा सामान्यमवह्रियते निराक्रियतेऽनेनेति लोकव्यवहारपरो वा **व्यवहारो** विशेषमात्राभ्युपगमपरः ३, एतेषां नयानां मतेनेति गम्यम् । **ऋजु** अवक्रमभिमुखं **श्रुतं** श्रुतज्ञानं यस्येति **ऋजुश्रुतः**, **ऋजु** वा अतीतानागतवक्र-परित्यागाद्वर्त्तमानं वस्तु **सूत्रयति** गमयतीति **ऋजुसूत्रः**, स्वकीयं साम्प्रतं च वस्तु नान्यदित्यभ्युपगमपरः ४, शप्यते अभिधीयतेऽभिधेयमनेनेति **शब्दो** वाचको ध्वनिः, नयन्ति परिच्छिन्दन्त्यनेकधर्मात्मकं सद्वस्तु सावधारणतयैकेन धर्म्मेणेति **नयाः**, शब्दप्रधाना नयाः **शब्दनयाः**, ते च त्रयः-शब्द-समभिरूढैवंभूताख्याः, तत्र शपनमभिधानं शप्यते वा येन वस्तु स **शब्दः**, तदभिधेयविमर्शपरो नयोऽपि **शब्द** एवेति, स च भावनिक्षेपरूपं वर्त्तमानमभिन्नलिङ्गवाचकं बहुपर्यायमपि च वस्त्वभ्युप-गच्छतीति ५, वाचकं वाचकं प्रति वाच्यभेदं समभिरोहति आश्रयति यः स **समभिरूढः**, स ह्यनन्तरोक्तविशेषणस्यापि वस्तुनः शक्र-पुरन्दरादिवाचकभेदेन भेदमभ्युपगच्छति घट-पटादिवदिति ६। यथा शब्दार्थो घटते चेष्टत इति घट इत्यादिलक्षणः **एव**मिति तथा **भूतः** सत्यो घटादिरर्थो नान्यथेत्येवमभ्युपगमपर **एवंभूतो** नयः, अयं हि भावनिक्षेपादिविशेषणोपेतं व्युत्पत्त्य-र्थाविष्टमेवार्थमिच्छति, जलाहरणादिचेष्टावन्तं घटमिवेति ७ । तत्राद्यत्रयस्याशुद्धत्वात् प्रायो लोकव्यवहारपरत्वाच्च पृथिवीप्रतिष्ठितत्वं नरकाणामिति मतम् । चतुर्थस्य शुद्धत्वात् आकाशस्य च गच्छतां तिष्ठतां वा सर्वभावानामैकान्तिकाधारत्वात् भुवोऽनैकान्तिकत्वाच्चाकाशप्रतिष्ठितत्वमिति, त्रयाणां तु शुद्धतरत्वात् सर्वभावानां स्वभावलक्षणाधिकरणस्यान्तरङ्गत्वादव्यभिचारित्वाच्च आत्मप्रतिष्ठितत्वमिति, न हि स्वस्वभावं विहाय परस्वभावाधिकरणा भावाः कदाचनापि भवन्तीति, यत आह–

वत्थुं वसइ सहावे सत्ताओ चेयणव्व जीवम्मि ।
न विलक्खणत्तणाओ भिन्ने अन्यत्र **छायातवे चेव ॥** [**विशेषाव० २२४२**] त्ति ।

[सू० १९३] तिविहे मिच्छत्ते पन्नत्ते, तंजहा-अकिरिया, अविणए, अन्नाणे १।

अकिरिया तिविधा पन्नत्ता, तंजहा-पओगकिरिया, समुदाणकिरिया, अन्नाणकिरिया २।

पओगकिरिया तिविधा पन्नत्ता, तंजहा-मणपओगकिरिया, वइपओग-किरिया, कायपओगकिरिया ३।

समुदाणकिरिया तिविधा पन्नत्ता, तंजहा-अणंतरसमुदाणकिरिया, परंपरसमुदाणकिरिया, तदुभयसमुदाणकिरिया ४।

अन्नाणकिरिया तिविधा पन्नत्ता, तंजहा-मतिअन्नाणकिरिया, सुतअन्नाणकिरिया, विभंगअन्नाणकिरिया ५।

अविणए तिविहे पन्नत्ते,तंजहा-देसच्चाती, निरालंबणता, नाणापेज्जदोसे ६।

अन्नाणे विविधे पन्नत्ते, तंजहा-देसण्णाणे, सव्वण्णाणे, भावण्णाणे ७।

[टी०] नरकेषु च मिथ्यात्वाद् गतिर्जन्तूनां भवतीति अथवा नया मिथ्यादृश इति सम्बन्धान्मिथ्यात्वस्वरूपमाह– **तिविहे मिच्छत्ते** इत्यादिसूत्राणि पञ्च सुगमानि, नवरं मिथ्यात्वं विपर्यस्तश्रद्धानमिह न विवक्षितम्, प्रयोगक्रियादीनां वक्ष्यमाणतद्भेदानां असम्बध्यमानत्वात्, ततोऽत्र मिथ्यात्वं क्रियादीनामसम्यग्रूपता, मिथ्यादर्शनाना-भोगादिजनितो विपर्यासो दुष्टत्वमशोभनत्वमिति भावः। **अकिरिय** त्ति नञिह दुःशब्दार्थो यथा अशीला दुःशीलेत्यर्थः, ततश्चाक्रिया दुष्टक्रिया मिथ्यात्वाद्युपहतस्यामोक्ष-साधकमनुष्ठानम्, यथा मिथ्यादृष्टेर्ज्ञानमप्यज्ञानमिति, एव**मविनयो**ऽपि, **अज्ञानम्** असम्यग्ज्ञानमिति १।

अक्रिया हि अशोभना क्रियैवाऽतो**ऽक्रिया त्रिविधे**त्यभिधायापि **प्रयोगे**त्यादिना क्रियैवोक्तेति, तत्र वीर्यान्तरायक्षयोपशमाविर्भूतवीर्येणात्मना प्रयुज्यते व्यापार्यत इति **प्रयोगो** मनोवाक्कायलक्षणः, तस्य **क्रिया** करणं व्यापृतिरिति **प्रयोगक्रिया**, अथवा प्रयोगैः मनःप्रभृतिभिः क्रियते बध्यते इति **प्रयोगक्रिया**, कर्म्मेत्यर्थः, सा च दुष्टत्वादक्रिया, अक्रिया च मिथ्यात्वमिति सर्वत्र प्रक्रमः, **समुदाणं** ति प्रयोगक्रियैकरूपतया गृहीतानां

कर्म्मवर्गणानां **स**मिति सम्यक् प्रकृतिबन्धादिभेदेन देश-सर्वोपघातिरूपतया च आदानं स्वीकरणं **समुदानं** निपातनात्तदेव **क्रिया** कर्म्मेति **समुदानक्रिये**ति, अज्ञानाद्या चेष्टा कर्म्म वा सा **अज्ञानक्रिये**ति २। **प्रयोगक्रिया त्रिविधा** व्याख्यातार्था ३ ।

नास्त्य**न्तरं** व्यवधानं यस्याः साऽ**नन्तरा**, सा चासौ **समुदानक्रिया** चेति विग्रहः, प्रथमसमयवर्त्तिनीत्यर्थः, द्वितीयादिसमयवर्तिनी तु **परम्परसमुदानक्रिये**ति, प्रथमाप्रथम-समयापेक्षया तु **तदुभयसमुदानक्रिये**ति ४ । **मइअन्नाणकिरिय** त्ति

अविसेसिया मइच्चिय सम्मद्दिट्ठिस्स सा मइन्नाणं ।

मइअन्नाणं मिच्छादिट्ठिस्स सुयं पि एमेव ॥ [विशेषाव० ११४] त्ति ।

मत्यज्ञानात् **क्रिया** अनुष्ठानं **मत्यज्ञानक्रिया**, एवमितरे अपि, नवरं **विभङ्गो** मिथ्यादृष्टेरवधिः, स एवाज्ञानं **विभङ्गाज्ञान**मिति ५।

व्याख्यातमक्रियामिथ्यात्वम्, अविनयमिथ्यात्वव्याख्यानायाह– **अविणये**त्यादि, विशिष्टो नयो **विनयः** प्रतिपत्तिविशेषः, तत्प्रतिषेधा**दविनयः**, **देशस्य** जन्मक्षेत्रादेस्त्या**गो** देशत्यागः, स यस्मिन्नविनये प्रभुगालीप्रदानादावस्ति स **देशत्यागी**। निर्गत आलम्बनाद् आश्रयणीयात् गच्छ-कुटुम्बादेरिति निरालम्बनः, तद्भावो **निरालम्बनता**, आश्रयणीयानपेक्षत्वमिति भावः, पुष्टालम्बनाभावेन वोचितप्रतिपत्तिभ्रंशः। प्रेम च द्वेषश्च **प्रेमद्वेषम्**, नानाप्रकारं प्रेमद्वेषं **नानाप्रेमद्वेष**मविनयः, इयमत्र भावना– आराध्यविषय-माराध्यसंमतविषयं वा प्रेम तथाऽऽराध्यासम्मतविषयो द्वेष इत्येवं नियतावेतौ विनयः स्यात्, उक्तं च–

सरुषि नतिः स्तुतिवचनं तदभिमते प्रेम तद्द्विषि द्वेषः ।

दानमुपकारकीर्त्तनममन्त्रमूलं वशीकरणम् ॥ [ ] इति ।

नानाप्रकारौ तु तावाराध्यतत्संमतेतरलक्षणविशेषानपेक्षत्वेनानियतविषयावविनय इति।

अज्ञानमिथ्यात्वमित उच्यते – **अन्नाणे**त्यादि, ज्ञानं हि द्रव्यपर्यायविषयो बोधः, तन्निषेधोऽ**ज्ञानम्**, तत्र विवक्षितद्रव्यं देशतो यदा न जानाति तदा **देशाज्ञान**मकारप्रश्लेषात्, यदा च सर्वतस्तदा **सर्वाज्ञानम्**, यदा विवक्षितपर्यायतो न जानाति तदा **भावाज्ञान**मिति ।

[सू० १९४] तिविहे धम्मे पन्नत्ते, तंजहा-सुयधम्मे, चरित्तधम्मे,

अत्थिकायधम्मे ।

तिविधे उवक्कमे पन्नत्ते, तंजहा-धम्मिते उवक्कमे, अधम्मिते उवक्कमे, धम्मिताधम्मिते उवक्कमे १। अहवा तिविधे उवक्कमे पन्नत्ते, तंजहा-आतोवक्कमे, परोवक्कमे, तदुभयोवक्कमे २। एवं वेयावच्चे ३, अणुग्गहे ४, अणुसट्ठी ५, उवालंभे ६, एवमिक्किक्के तिन्नि तिन्नि आलावगा जहेव उवक्कमे ।

तिविहा कहा पन्नत्ता, तंजहा-अत्थकहा, धम्मकहा, कामकहा ७।

तिविधे विणिच्छते पन्नत्ते, तंजहा-अत्थविणिच्छते, धम्मविणिच्छते, कामविणिच्छते ८।

[टी०] उक्तं मिथ्यात्वम्, तच्चाधर्म्म इति तद्विपर्ययमधुना धर्म्ममाह– **तिविहे धम्मे** इत्यादि, श्रुतमेव धर्म्मः **श्रुतधर्म्मः** स्वाध्यायः, एवं **चारित्रधर्म्मः** क्षान्त्यादिश्रमणधर्म्मः, अयं च द्विविधोऽपि द्रव्य-भावभेदे धर्म्मे भावधर्म्म उक्तः, यदाह–

दुविहो उ भावधम्मो सुयधम्मो खलु चरित्तधम्मो य ।
सुयधम्मो सज्झाओ चरित्तधम्मो समणधम्मो ॥ [दशवै० नि० ४३] त्ति ।

अस्तिशब्देन प्रदेशा उच्यन्ते, तेषां **कायो** राशिरस्तिकायः, स चासौ संज्ञया **धर्म्मश्चेत्यस्तिकायधर्म्मः**, गत्युपष्टम्भलक्षणो धर्म्मास्तिकाय इत्यर्थः, अयं च द्रव्यधर्म्म इति ।

अनन्तरं श्रुतधर्म्म-चारित्रधर्म्मावुक्तौ, अधुना तद्विशेषानाह– **तिविहे उवक्कमे** इत्यादिसूत्राणि अष्टौ सुगमानि, परम् उपक्रमण**मुपक्रमः** उपायपूर्वक आरम्भः, धर्म्मे श्रुत-चारित्रात्मके भवः स वा प्रयोजनमस्येति **धार्म्मिकः**, श्रुत-चारित्रार्थ आरम्भ इत्यर्थः, तथा न धार्मिकः **अधार्मिकः** असंयमार्थः, तथा धार्मिकश्चासौ देशतः संयमरूपत्वात् अधार्मिकश्च तथैवासंयमरूपत्वात् **धार्मिकाधार्म्मिकः**, देशविरत्यारम्भ इत्यर्थः १ ।

अथ स्वाम्यन्तरभेदेनोपक्रममेव त्रिधाऽऽह, तत्रात्मनोऽनुकूलोपसर्गादौ शीलरक्षण-निमित्तमुपक्रमो वैहानसादिना विनाशः परिकर्म्म वा आत्मार्थं वा उपक्रमोऽन्यस्य वस्तुनः **आत्मोपक्रम** इति । तथा परस्य परार्थं वोपक्रमः **परोपक्रम** इति । तदुभयस्य आत्म-

परलक्षणस्य तदुभयार्थं वोपक्रमस्**तदुभयोपक्रम** इति २ । **एव**मिति उपक्रमसूत्रवत् आत्मपरोभयभेदेन वैयावृत्यादयो वाच्याः, व्यावृतस्य भावः कर्म्म वा **वैयावृत्यं** भक्तादिभिरुपष्टम्भः, तत्रात्मवैयावृत्यं गच्छनिर्गतस्यैव, परवैयावृत्यं ग्लानादिप्रतिजागरकस्य, तदुभयवैयावृत्यं गच्छवासिन इति ३ । **अनुग्रहो** ज्ञानाद्युपकारः, तत्र आत्माऽनुग्रहोऽध्ययनादिप्रवृत्तस्य, परानुग्रहो वाचनादिप्रवृत्तस्य, तदुभयानुग्रहः शास्त्रव्याख्यानशिष्यसङ्ग्रहादिप्रवृत्तस्येति ४ । **अनुशिष्टिः** अनुशासनम्, तत्र आत्मनो यथा–

बायालीसेसणसंकडम्मि गहणम्मि जीव ! न हु छलिओ ।
इण्हिं जह न छलिज्जसि भुंजंतो रागदोसेहिं ॥ [ओघनि० ५४५, पञ्चव० ३५४] ति,

तथा विधेयमिति शेष इति ।

परानुशिष्टिर्यथा–

ता तंसि भाववेज्जो भवदुक्खनिपीडिया तुहं एते ।
हंदि सरणं पवन्ना मोएयव्वा पयत्तेणं ॥ [पञ्चव० १३५१] ति ।

तदुभयानुशिष्टिर्यथा –

कहकहवि माणुसत्ताइ पावियं चरणपवररयणं च ।
ता भो एत्थ पमाओ कइया वि न जुज्जए अम्हं ॥ [ ] ति ।

उपालम्भः इयमेवानौचित्यप्रवृत्तिप्रतिपादनगर्भा, स चात्मनो यथा–

चोल्लगदिट्ठंतेणं दुलहं लहिऊण माणुसं जम्मं ।
जं न कुणसि जिणधम्मं अप्पा किं वेरिओ तुज्झ? ॥ [ ] त्ति ।

परोपालम्भो यथा–

उत्तमकुलसंभूओ उत्तमगुरुदिक्खिओ तुमं वच्छ ! ।
उत्तमनाणगुणड्ढो कह सहसा ववसिओ एवं ? ॥ [ ] ति ।

तदुभयोपालम्भो यथा–

एगस्स कए नियजीवियस्स बहुयाओ जीवकोडीओ ।
दुक्खे ठवंति जे के वि ताण किं सासयं जीयं ? ॥ [ ] ति ।

एवमित्यादिना पूर्वोक्तोऽतिदेशो व्याख्यातः, एवं चात्राक्षरघटना– यथैवोपक्रमे

आत्म-पर-तदुभयैस्त्रय आलापका उक्ता:, एवमेकैकस्मिन् वैयावृत्यादिसूत्रे ते त्रयस्त्रयो वाच्या इति ।

अथ श्रुतधर्मभेदा उच्यन्ते– **तिविहा कहे**त्ति **अर्थस्य** लक्ष्या: **कथा** उपायप्रतिपादनपरो वाक्यप्रबन्धोऽ**र्थकथा**, उक्तं च–

सामादि-धातुवादादि-कृष्यादिप्रतिपादिका ।
अर्थोपादानपरमा कथाऽर्थस्य प्रकीर्त्तिता ॥ [ ]

तथा– **अर्थाख्य: पुरुषार्थोऽयं प्रधान: प्रतिभासते ।**
तृणादपि लघुं लोके धिगर्थरहितं नरम् ॥ [ ] इति ।

इयं च **कामन्दका**दिशास्त्ररूपा । एवं धर्मोपायकथा **धर्म्मकथा**, उक्तं च–

दया-दान-क्षमाद्येषु धर्माङ्गेषु प्रतिष्ठिता ।
धर्म्मोपादेयतागर्भा बुधैर्धर्म्मकथोच्यते ॥ [ ]

तथा- **धर्माख्य: पुरुषार्थोऽयं, प्रधान इति गीयते ।**
पापसक्तं पशोस्तुल्यं, धिग्धर्मरहितं नरम् ॥ [ ] इति ।

इयं चो**त्तराध्ययना**दिरूपाऽवसेयेति । एवं **कामकथा**ऽपि, यदाह–

कामोपादानगर्भा च, वयोदाक्षिण्यसूचिका ।
अनुरागेङ्गिताद्युत्था, कथा कामस्य वर्णिता ॥ [ ]

तथा– **स्मितं न लक्षेण वचो न कोटिभिर्न कोटिलक्षै: सविलासमीक्षितम् ।**
अवाप्यतेऽन्यैर्हृदयोपगूहनं न कोटिकोट्याऽपि तदस्ति कामिनाम् ॥ [ ] इति ।

इयमपि **वात्स्यायना**दिरूपाऽवसेयेति, प्रकीर्णा वा तत्तदर्था वचनपद्धति: कथाचरित्रवर्णनरूपा वा । **अत्थविणिच्छए** त्ति **अर्थादिविनिश्चया**: अर्थादिस्वरूप-परिज्ञानानि, तानि च–

अर्थानामर्जने दु:खमर्जितानां च रक्षणे ।
नाशे दु:खं व्यये दु:खम्, धिगर्थं दु:खकारणम् ॥ [ ]

तथा– **धनदो धनार्थिनां धर्म:, कामद: सर्वकामिनाम् ।**
धर्म एवापवर्गस्य पारम्पर्येण साधक: ॥ [धर्मबिन्दु० १।२]

तथा– **शल्यं कामा विषं कामाः कामा आशीविषोपमाः ।**

कामानभिलषन्तोऽपि निष्कामा यान्ति दुर्गतिम् ॥ [ ] इत्यादीनि ।

[सू० १९५] तहारूवं णं भंते ! समणं वा माहणं वा पज्जुवासमाणस्स किंफला पज्जुवासणता ? सवणफला । से णं भंते ! सवणे किं फले ? णाणफले । से णं भंते ! णाणे किंफले ? विण्णाणफले । एवमेतेणं अभिलावेणं इमा गाहा अणुगंतव्वा-

सवणे णाणे य विन्नाणे पच्चक्खाणे य संजमे ।

अणण्हते तवे चेव वोदाणे अकिरि णिव्वाणे ॥१३॥

जाव सा णं भंते ! अकिरिया किंफला ? निव्वाणफला । से णं भंते ! णिव्वाणे किंफले ? सिद्धिगइगमणपज्जवसाणफले पन्नत्ते समणाउसो !

॥ तइयस्स तृतीयः ॥

[टी०] अनन्तरमर्थादिविनिश्चय उक्त इति तत्कारणफलपरम्परां त्रिस्थानकानवतारिणीमपि प्रसङ्गतो भगवत्प्रश्नद्वारेण निरूपयन्नाह– **तहारूवे**त्यादि पाठसिद्धम्, केवलं **पर्युपासना** सेवा, **श्रवणं फलं** यस्याः सा तथा, साधवो हि धर्म्मकथादिकं स्वाध्यायं कुर्वन्तीति श्रवणं तत्सेवायां भवतीति, **ज्ञानं** श्रुतज्ञानम्, **विज्ञानम्** अर्थादीनां हेयोपादेयत्वविनिश्चयः, **एव**मिति पूर्वोक्तेनाऽ**भिलापेन** 'से णं भंते ! विन्नाणे किंफले?, पच्चक्खाणफले' इत्यादिना, **इयं गाथा अनुगन्तव्या** अनुसरणीया, एतद्गाथोक्तानि पदान्यध्येतव्यानीत्यर्थः, **सवणे**त्यादि, भावितार्था, नवरं **प्रत्याख्यानं** निवृत्तिद्वारेण प्रतिज्ञाकरणम्, **संयमः** प्राणातिपाताद्यकरणम् ।

अनाश्रवो नवकर्म्मानुपादानम् । अनाश्रवणाल्लघुकर्म्मत्वेन **तपो**ऽनशनादिभेदं भवति। **व्यवदानं** पूर्वकृतकर्म्मवनलवनं **दाप् लवने** [पा० धा० १०५९] इति वचनात्, कर्म्मकचवरशोधनं वा **दैप् शोधने** [पा० धा० ९२४] इति वचनादिति । **अक्रिया** योगनिरोधः, **निर्वाणं** कर्मकृतविकारविरहितत्वम् । सिद्ध्यन्ति कृतार्था भवन्ति यस्यां सा **सिद्धिः** लोकाग्रम्, सैव गम्यमानत्वाद् **गतिः**, तस्यां गमनम्, तदेव **पर्यवसानफलं** सर्वान्तिमप्रयोजनं यस्य निर्वाणस्य तत् **सिद्धिगतिगमनपर्यवसानफलं प्रज्ञप्तं** मया

अन्यैश्च केवलिभिः, हे **श्रमणायुष्मन्निति गौतमा**दिकं शिष्यं **भगवाना**मन्त्र-यन्निदमुवाचेति।

॥ त्रिस्थानकस्य तृतीयोद्देशको समाप्तः ॥

[अथ चतुर्थ उद्देशकः]

[सू० १९६] पडिमापडिवन्नस्स णं अणगारस्स कप्पंति तओ उवस्सया पडिलेहित्तते, तंजहा-अहे आगमणगिहंसि वा, अहे वियडगिहंसि वा, अहे रुक्खमूलगिहंसि वा । एवमणुण्णवित्तते, उवातिणित्तते ।

पडिमापडिवन्नस्स णं अणगारस्स कप्पंति तओ संथारगा पडिलेहित्तते, तंजहा-पुढविसिला, कट्ठसिला, अधासंथडमेव । एवं अणुण्णवित्तते, उवातिणित्तते ।

[**टी०**] व्याख्यातः तृतीय उद्देशकः, अधुना चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः- पूर्वस्मिन् उद्देशके पुद्गल-जीवधर्मास्त्रित्वेनोक्ता इहापि त एव तथैवोच्यन्त इत्यनेन सम्बन्धेनायातस्यास्येदमादिसूत्रषट्कं **पडिमे**त्यादि, अस्य च पूर्वसूत्रेण सहायमभिसम्बन्धः– पूर्वसूत्रे श्रमणमाहनस्य पर्युपासनायाः फलपरम्परोक्ता इह तु तद्विशेषस्य कल्पविधिरुच्यत इत्येवंसम्बन्धितस्यास्य व्याख्या– **प्रतिमां** मासिक्यादिकां भिक्षुप्रतिज्ञाविशेषलक्षणां **प्रतिपन्नः** अभ्युपगतवान् यः स तथा तस्याऽ**नगारस्य कल्पन्ते** युज्यन्ते **त्रय** उपाश्रीयन्ते भज्यन्ते शीतादित्राणार्थं ये ते **उपाश्रयाः** वसतयः **प्रत्युपेक्षितुम्** अवस्थानार्थं निरीक्षितुमिति, **अहे**त्ति अथार्थः, **अथ**शब्दश्चेह पदत्रयेऽपि त्रयाणामप्याश्रयाणां प्रतिमाप्रतिपन्नस्य साधोः कल्पनीयतया तुल्यताप्रतिपादनार्थः, **वा** विकल्पार्थः, पथिकादीनामागमनेनोपेतं तदर्थं वा गृह**मागमनगृहं** सभा-प्रपादि, यदाह–

आगंतु गारत्थजणो जहिं तु, संठाइ जं वाऽऽगमणम्मि तेसिं ।

तं आगमोकं तु विदू वयंति, सभा-पवा-देउलमाइयं च ॥ [बृहत्कल्प० ३४८६] त्ति ।

तस्मिन् **उपाश्रयः** तदेकदेशभूतः **प्रत्युपेक्षितुं कल्पत** इति प्रक्रम इति । तथा **वियडं** ति विवृतम् अनावृतम्, तच्च द्वेधा अध ऊर्ध्वं च, तत्र पार्श्वत एकादिदिक्षु अनावृतमधोविवृतम्, अनाच्छादितममालगृहं चोर्ध्वविवृतम्, तदेव गृहं **विवृतगृहम्**,

तस्मिन् वा, तथा **वृक्षस्य** करीरादेर्निर्गलस्य **मूलम्** अधोभागस्तदेव **गृहं वृक्षमूलगृहं** तस्मिन् वेति। प्रत्युपेक्षया चोपाश्रये शुद्धे गृहस्थं प्रति तदनुज्ञापनं भवतीत्यनुज्ञापनासूत्रम्– **एव**मिति एतदेव **पडिमापडिवन्ने**त्याद्युच्चारणीयम्, नवरं प्रत्युपेक्षणास्थाने अनुज्ञापनं वाच्यमिति । अनुज्ञाते च गृहिणा तस्योपादानमित्युपादानसूत्रम्, तदप्येवमेवेति, **ओवाइणित्तए** त्ति उपादातुं ग्रहीतुम्, प्रवेष्टुमित्यर्थः, एवं संस्तारकसूत्रत्रयमपि, नवरं **पृथिवीशिला** उवट्टगो त्ति यः प्रसिद्धः, **काष्ठं** चासौ शिलेवाऽऽयति-विस्ताराभ्यां **शिला** सा चेति **काष्ठशिला, यथासंस्तृतमेवे**ति यत्तृणादि यथोपभोगार्हं भवति तथैव यल्लभ्यत इति ।

[सू० १९७] तिविधे काले पण्णत्ते, तंजहा-तीते, पडुप्पन्ने, अणागते ।

तिविधे समए पन्नत्ते, तंजहा-तीते, पडुप्पन्ने, अणागते । एवं आवलिया आणापाणू थोवे लवे मुहुत्ते अहोरत्ते जाव वाससतसहस्से पुव्वंगे पुव्वे जाव ओसप्पिणी ।

तिविधे पोग्गलपरियट्टे पन्नत्ते, तंजहा-तीते, पडुप्पन्ने, अणागते ।

[टी०] प्रतिमाश्च नियतकाला भवन्तीति कालं त्रिधाऽऽह– **तिविहे** त्ति **अति** अतिशये**नेतो** गतोऽ**तीतः**, पिधानवदकारलोपे **तीतो**, वर्त्तमानत्वमतिक्रान्त इत्यर्थः, साम्प्रतमुत्पन्नः **प्रत्युत्पन्नो** वर्त्तमान इत्यर्थः, न आगतोऽ**नागतो** वर्त्तमानत्वमप्राप्तः, भविष्यन्नित्यर्थः ।

कालसामान्यं त्रिधा विभज्य तद्विशेषांस्त्रिधा विभजयन्नाह– **तिविहे समये** इत्यादि कालसूत्राणि, समयादयो द्विस्थानकाद्योद्देशकवत् व्याख्येयाः, नवरं **पोग्गलपरियट्टे** इत्यादि वृत्तौ ।

[सू० १९८] तिविहे वयणे पन्नत्ते, तंजहा-एगवयणे, दुवयणे, बहुवयणे।

अहवा तिविधे वयणे पन्नत्ते, तंजहा-इत्थिवयणे, पुमवयणे, नपुंसगवयणे।

अहवा तिविधे वयणे पन्नत्ते, तंजहा-तीतवयणे, पडुप्पन्नवयणे, अणागयवयणे ।

तिविधा पन्नवणा पन्नत्ता, तंजहा-णाणपन्नवणा, दंसणपन्नवणा, चरित्तपन्नवणा १।

तिविधे सम्मे पन्नत्ते, तंजहा-नाणसम्मे, दंसणसम्मे, चरित्तसम्मे २।

तिविधे उवघाते पन्नत्ते, तंजहा-उग्गमोवघाते, उप्पायणोवघाते, एसणोवघाते ३। एवं विसोधी ४।

तिविहा आराहणा पन्नत्ता, तंजहा-णाणाराहणा, दंसणाराहणा, चरित्ताराहणा ५। णाणाराहणा तिविधा पन्नत्ता, तंजहा-उक्कस्सा, मज्झिमा, जहन्ना ६। एवं दंसणाराहणा वि ७, चरित्ताराहणा वि ८।

तिविधे संकिलेसे पन्नत्ते, तंजहा-नाणसंकिलेसे, दंसणसंकिलेसे, चरित्तसंकिलेसे ९। एवं असंकिलेसे वि १०, एवमतिक्कमे वि ११, वतिक्कमे वि १२, अइयारे वि १३, अणायारे वि १४ ।

तिण्हमतिक्कमाणं आलोएज्जा पडिक्कमेज्जा निंदेज्जा गरहेज्जा जाव पडिवज्जेजा, तंजहा-णाणातिक्कमस्स, दंसणातिक्कमस्स, चरित्तातिक्कमस्स १५। एवं वइक्कमाणं १६, अतिचाराणं १७, अणायाराणं १८।

तिविधे पायच्छित्ते पन्नत्ते, तंजहा-आलोयणारिहे, पडिक्कमणारिहे, तदुभयारिहे १९।

[टी०] एते च समयादयः पुद्गलपरिवर्त्तान्ताः स्वरूपेण बहवोऽपि तत्सामान्य-लक्षणमेकम् अर्थमाश्रित्यैकवचनान्ततयोक्ताः, भवन्ति चैकादिष्वर्थेष्वेकवचनादीनीत्येक-वचनादिप्ररूपयन्नाह– **तिविहे** इत्यादि, एकोऽर्थ उच्यतेऽनेन उक्तिर्वेति वचनम्, एकस्यार्थस्य वचनमेकवचनम्, एवमितरे अपि, अत्र क्रमेणोदाहरणानि देवो देवौ देवाः। वचनाधिकारे **अहवे**त्यादि सूत्रद्वयं सुगमम्, उदाहरणानि तु स्त्रीवचनादीनां नदी, नदः, कुण्डम्, **तीतादीनां** कृतवान् करोति करिष्यति।

वचनं हि जीवपर्यायस्तदधिकारात् तत्पर्यायान्तराणि त्रिस्थानकेऽवतारयन्नाह– **तिविहे** इत्यादिसूत्राणामेकोनविंशतिः, स्पष्टा चेयम्, परं **प्रज्ञापना** भेदाद्यभिधानम्, तत्र ***ज्ञानप्रज्ञापना*** *आभिनिबोधिकादि पञ्चधा ज्ञानम्, एवं* ***दर्शनं*** *क्षायिकादि त्रिधा,* ***चारित्रं***

सामायिकादि पञ्चधेति । समञ्चतीति **सम्यक्** अविपरीतम्, मोक्षसिद्धिं प्रतीत्यानुगुणमित्यर्थः, तच्च **ज्ञानादी**ति ।

उपहनन**मुपघातः**, पिण्ड-शय्यादेरकल्प्यतेत्यर्थः, तत्र उद्गमन**मुद्गमः** पिण्डादेः प्रभव इत्यर्थः, तस्य चाधाकर्म्मादयः षोडश दोषाः ।

आहाकम्मु इत्यादि, इह चाभेदविवक्षया उद्गमदोषा एवोद्गमः, अतस्तेनोद्गमेनोपघातः पिण्डादेरकल्पनीयताकरणं चरणस्य वा शबलीकरण**मुद्गमोपघातः**, उद्गमस्य वा पिण्डादिप्रसूतेरुपघातः आधाकर्म्मत्वादिभिर्दुष्टता **उद्गमोपघातः**, एवमितरावपि, केवल**मुत्पादना** सम्पादनम्, गृहस्थात् पिण्डादेरुपार्जनमित्यर्थः, तद्दोषा धात्रीत्वादयः षोडश, धाइदूइ इत्यादि ।

तथा **एषणा** गृहिणा दीयमानपिण्डादेर्ग्रहणम्, तद्दोषाः शङ्कितादयो दशेति, संकियमक्खिय इत्यादि । एवमुद्गमादिभिर्दोषैरविद्यमानतया या विशुद्धिः पिण्ड-चरणादीनां निर्दोषता सा उद्गमादिविशुद्धिरुद्गमादीनां वा विशुद्धिर्या सा तथेति, इदमेवातिदिशन्नाह– **एवं विसोही** । **तिविहा आराहणा** त्ति **ज्ञानस्य** श्रुतस्या**राधना** कालाध्ययनादिष्वष्टस्वाचारेषु प्रवृत्त्या निरतिचारपरिपालना **ज्ञानाराधना**, एवं **दर्शनस्य** निःशङ्कितादिषु, **चारित्रस्य** समिति-गुप्तिषु, सा चोत्कृष्टादिभेदा भावभेदात् कालभेदाद्वेति । ज्ञानादिप्रतिपतनलक्षणः सङ्क्लिश्यमानपरिणामनिबन्धनो **ज्ञानादिसङ्क्लेशः**, ज्ञानादिशुद्धिलक्षणो विशुद्ध्यमानपरिणामहेतुकस्त**दसङ्क्लेशः** । **एव**मिति, ज्ञानादिविषया एवाऽ**तिक्रमादय**श्चत्वारः, तत्राधाकर्म्माश्रित्य चतुर्णामपि निदर्शनम्–

आहाकम्मामंतण पडिसुणमाणे अइक्कमो होइ १ ।

पयभेयादि वइक्कम २ गहिए तइए ३ यरो गिलिए ४ ॥ [व्यवहारपीठिका ४३] त्ति ।

इत्थमेवोत्तरगुणरूपचारित्रस्य चत्वारोऽपि, एतदुद्देशेन ज्ञान-दर्शनयोस्तदुपग्रहकारिद्रव्याणां च पुस्तक-चैत्यादीनामुपघाताय मिथ्यादृशामुपबृंहणार्थं वा निमन्त्रणप्रतिश्रवणादिभिर्ज्ञानदर्शनातिक्रमादयोऽप्यायोज्या इति । **तिण्हं अइक्कमाणं** ति षष्ठ्या द्वितीयार्थत्वात् त्रीनतिक्रमाना**लोचयेत्** गुरवे निवेदयेदित्यादि प्राग्वत्, नवरं **यावत्**करणात् 'विसोहेज्जा विउट्टेज्जा अकरणयाए अब्भुट्ठेज्जा अहारिहं तवोकम्मं पायच्छित्त'मित्य-

ध्येतव्यमिति । पापच्छेदकत्वात् प्रायश्चित्तविशोधकत्वाद्वा प्राकृते 'पायच्छित्तमि'ति शुद्धिरुच्यते, तद्विषयः शोधनीयातिचारोऽपि प्रायश्चित्तमिति, तच्च त्रिधा, दशविधत्वेऽपि तस्य त्रिस्थानकानुरोधादिति, तत्रालोचनमा**लोचना** गुरवे निवेदनं तां शुद्धिभूतामर्हति तयैव शुद्ध्यति यदतिचारजातं भिक्षाचर्यादि तदा**लोचनार्ह**मिति, एवं **प्रतिक्रमणं** मिथ्यादुष्कृतम्, तदर्हं सहसा असमितत्वमगुप्तत्वं चेति, **उभयम्** आलोचना-प्रतिक्रमणलक्षण**मर्हति** यत्तत्तथा, मनसा रागद्वेषगमनादि, सार्द्धगाथेह–

भिक्खायरियाइ सुज्झइ अइयारो को वि वियडणाए उ ।
बीओ य असमिओ मि त्ति कीस सहसा अगुत्तो वा ? ॥
सद्दाइएसु रागं दोसं च मणो गओ तइयगम्मि [आव०नि० १४३९-१४४०] त्ति ।

[सू० १९९] जंबूदीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं ततो अकम्मभूमीओ पन्नत्ताओ, तंजहा-हेमवते, हरिवासे, देवकुरा ।

जंबूदीवे दीवे मंदरस्स उत्तरेणं तओ अकम्मभूमीओ पन्नत्ताओ, तंजहा-उत्तरकुरा, रम्मगवासे, एरण्णवए ।

जंबुमंदरस्स दाहिणेणं ततो वासा पन्नत्ता, तंजहा-भरहे, हेमवए, हरिवासे।

जंबुमंदरस्स उत्तरेणं ततो वासा पन्नत्ता, तंजहा-रम्मगवासे, हेरन्नवते, एरवते।

जंबुमंदरस्स दाहिणेणं तओ वासहरपव्वता पन्नत्ता, तंजहा-चुल्लहिमवंते, महाहिमवंते, णिसढे ।

जंबुमंदरस्स उत्तरेणं तओ वासहरपव्वता पन्नत्ता, तंजहा-णीलवंते, रुप्पी, सिहरी ।

जंबुमंदरस्स दाहिणेणं तओ महादहा पन्नत्ता, तंजहा-पउमदहे, महापउमदहे, तिगिंच्छिदहे। तत्थ णं ततो देवताओ महिड्ढियाओ जाव पलिओवमट्ठितीताओ परिवसंति, तंजहा-सिरी, हिरी, धिती । एवं उत्तरेण वि, णवरं केसरिदहे, महापोंडरीयदहे, पोंडरीयदहे । देवताओ- कित्ती, बुद्धी, लच्छी ।

जंबुमंदरदाहिणेणं चुल्लहिमवंतातो वासधरपव्वताओ पउमदहातो महादहातो

तओ महाणदीओ पवहंति, तंजहा- गंगा, सिंधू, रोहितंसा ।

जंबुमंदरउत्तरेणं सिहरीओ वासधरपव्वताओ पोंडरीयद्दहातो महादहाओ तओ महानदीओ पवहंति, तंजहा- सुवन्नकूला, रत्ता, रत्तावती ।

जंबुमंदरपुरत्थिमेणं सीताते महाणतीते उत्तरेणं ततो अंतरणतीतो पन्नत्ताओ, तंजहा- गाहावती, दहवती, पंकवती ।

जंबुमंदरपुरत्थिमेणं सीताते महाणतीते दाहिणेणं ततो अंतरणतीतो पन्नत्ताओ, तंजहा- तत्तजला, मत्तजला, उम्मत्तजला ।

जंबुमंदरपच्चत्थिमेणं सीओदाते महाणतीते दाहिणेणं ततो अंतरणदीतो पन्नत्ताओ, तंजहा- खारोदा, सीहसोया, अंतोवाहिणी ।

जंबुमंदरपच्चत्थिमेणं सीतोदाए महाणदीए उत्तरेणं तओ अंतरणदीतो पन्नत्ताओ, तंजहा- उम्मिमालिणी, फेणमालिणी, गंभीरमालिणी ।

एवं धायइसंडदीवपुरत्थिमद्धे वि अकम्मभूमीतो आढवेत्ता जाव अंतरणदीओ त्ति णिरवसेसं भाणियव्वं, जाव पुक्खरवरदीवड्ढपच्चत्थिमद्धे तहेव निरवसेसं भाणियव्वं ।

[टी०] एते च प्रज्ञापनादयो धर्म्माः प्रायो मनुष्यक्षेत्र एव स्युरिति तद्वक्तव्यतामाह– जंबूदीवेत्यादि, इदं च प्रकरणं द्विस्थानकानुसारेण जम्बूद्वीपपटानुसारेण चावसेयमिति। नवरमन्तरनदीनां विष्कम्भः पञ्चविंशत्यधिकं योजनशतमिति ।

[सू० २००] तिहिं ठाणेहिं देसे पुढवीते चलेज्जा, तंजहा-अधे णमिमीसे रयणप्पभाते पुढवीते उराला पोग्गला णिवतेज्जा, तते णं ते उराला पोग्गला णिवतमाणा देसं पुढवीते चलेज्जा १, महोरते वा महिड्ढिए जाव महेसक्खे इमीसे रतणप्पभाते पुढवीते अहे उम्मज्जणिमज्जियं करेमाणे देसं पुढवीते चलेज्जा २, णाग-सुवन्नाण वा संगामंसि वट्टमाणंसि देसं पुढवीते चलेज्जा ३, इच्चेतेहिं तिहिं [ठाणेहिं देसे पुढवीते चलेज्जा] ।

तिहिं ठाणेहिं केवलकप्पा पुढवी चलेज्जा, तंजहा-अधे णं इमीसे रतणप्पभाते पुढवीते घणवाते गुप्पेज्जा, तते णं से घणवाते गुविते समाणे

घणोदहिमेएज्जा, तते णं से घणोदधी एइए समाणे केवलकप्पं पुढविं चालेज्जा, देवे वा महिड्ढिते जाव महेसक्खे तहारूवस्स समणस्स माहणस्स वा इड्ढिं जुतिं जसं बलं वीरियं पुरिसक्कारपरक्कमं उवदंसेमाणे केवलकप्पं पुढविं चालेज्जा, देवासुरसंगामंसि वा वट्टमाणंसि केवलकप्पा पुढवी चलेज्जा, इच्चेतेहिं [ठाणेहिं केवलकप्पा पुढवी चलेज्जा] ।

[टी०] अनन्तरं मनुष्यक्षेत्रलक्षणक्षितिखण्डवक्तव्यतोक्तेत्यधुना भङ्ग्यन्तरेण सामान्यपृथिवीदेशवक्तव्यतामाह– **तिहीत्यादि** स्पष्टम्, केवलं **देश** इति भागः, **पृथिव्याः** रत्नप्रभाभिधानाया इति, **अहे** त्ति अधः, **ओराल** त्ति उदारा बादरा **निपतेयुः** विस्रसापरिणामात् ततो विचटेयुरन्यतो वाऽऽगत्य तत्र लगेयुर्यन्त्रमुक्तमहोपलवत्, **तए णं** ति ततस्ते निपतन्तो देशं पृथिव्याश्चलयेयुरिति पृथिवीदेशश्चलेदिति । **महोरगो** व्यन्तरविशेषः, **महिड्ढिए** परिवारादिना, **यावत्करणात् महज्जुइए** शरीरादिदीप्त्या, **महाबले** प्राणतः, **महाणुभागे** वैक्रियादिकरणतः, **महेसक्खे** महेश इत्याख्या यस्येति, **उन्मग्ननिमग्निकाम्** उत्पतनिपतां कुतोऽपि दर्प्पादेः कारणात् **कुर्वन् देशं पृथिव्याश्चलयेत्**, स च चलेदिति, **नाग**कुमाराणां **सुपर्ण**कुमाराणां च भवनपति-विशेषाणां परस्परं **सङ्ग्रामे वर्त्तमाने** जायमाने सति **देसं** ति देशश्चलेदिति, **इच्चेएहिं** त्यादि निगमनमिति।

पृथिव्या देशतश्चलनमुक्तम्, अधुना समस्तायास्तदाह– **तिहिं** ति स्पष्टम्, किन्तु केवलैव **केवलकल्पा**, ईषदूनता चेह न विवक्ष्यते, अतः परिपूर्णेत्यर्थः परिपूर्णप्राया वेति, **पृथिवी** भूः, **अहे** त्ति **अधो घनवातः** तथाविधपरिणामो वातविशेषो **गुप्येत्** व्याकुलो भवेत्, क्षुभ्येदित्यर्थः, ततः स गुप्तः सन् **घनोदधिं** तथाविधपरिणामजल-समूहलक्षण**मेजयेत्** कम्पयेत्, **तए णं** ति ततोऽनन्तरं स घनोदधि**रेजितः** कम्पितः **सन् केवलकल्पां पृथिवीं चलयेत्**, सा च चलेदिति, देवो वा **ऋद्धिं** परिवारादिरूपाम्, **द्युतिं** शरीरादेः, **यशः** पराक्रमकृतां ख्यातिम्, **बलं** शारीरम्, **वीर्यं** जीवप्रभवम्, **पुरुषकारं** साभिमानं व्यवसायम्, निष्पन्नफलं तमेव **पराक्रम**मिति, बल-वीर्याद्युपदर्शनं हि पृथिव्यादिचलनं विना न भवतीति तद्दर्शयंस्तां चलयेदिति । **देवाश्च** वैमानिका **असुराः** भवनपतयस्तेषां भवप्रत्ययं वैरं भवति, अभिधीयते च **भगवत्याम्**– **किंपत्तियण्णं**

भंते ! असुरकुमारा देवा सोहम्मं कप्पं गया य गमिस्संति य ? गोयमा ! तेसि णं देवाणं भवपच्चइए वेराणुबंधे [भगवती० ३।२।१३] त्ति, ततश्च **सङ्ग्रामः** स्यात्, तत्र **वर्त्तमाने पृथिवी चलेत्**, तत्र तेषां महाव्यायामत उत्पातनिपातसम्भवादिति । **इच्चेतेहीत्यादि** निगमनमिति ।

[सू० २०१] तिविधा देवकिब्बिसिया पन्नत्ता, तंजहा-तिपलिओवमट्ठितीता, तिसागरोवमट्ठितीता, तेरससागरोवमट्ठितीया ।

कहि णं भंते ! तिपलितोवमट्ठितीता देवकिब्बिसिया परिवसंति ?, उप्पिं जोतिसिताणं हव्विं सोहम्मीसाणेसु कप्पेसु एत्थ णं तिपलिओवमट्ठितीता देवकिब्बिसिता परिवसंति १।

कहि णं भंते ! तिसागरोवमट्ठितीता देवकिब्बिसिता परिवसंति ?, उप्पिं सोहम्मीसाणाणं कप्पाणं हव्विं सणंकुमार-माहिंदेसु कप्पेसु एत्थ णं तिसागरोवमट्ठितीया देवकिब्बिसिया परिवसंति २।

कहि णं भंते ! तेरससागरोवमट्ठितीया देवकिब्बिसिता परिवसंति ?, उप्पिं बंभलोगस्स कप्पस्स हव्विं लंतगे कप्पे एत्थ णं तेरससागरोवमट्ठितीया देवकिब्बिसिता परिवसंति ३।

[टी०] देवासुराः सङ्ग्रामकारितयाऽनन्तरमुक्ताः, ते च दशविधाः **इन्द्र-सामानिक-त्रायस्त्रिंश-पार्षद्या-ऽऽत्मरक्ष-लोकपाला-ऽनीक-प्रकीर्णका-ऽऽभियोग्य-किल्बिषिकाश्चैकशः** [तत्त्वार्थ० ४।४] इति वचनात्, इति तन्मध्यवर्त्तिनः त्रिस्थानकावतारित्वात् किल्बिषिकानभिधातुमाह– **तिविहेत्यादि** स्फुटम् । केवलं **किब्बिसिय** त्ति–

नाणस्स केवलीणं धम्मायरियस्स संघसाहूणं ।
माई अवन्नवाई किब्बिसियं भावणं कुणइ ॥ [बृहत्कल्प० १३०२] त्ति ।

एवंविधभावनोपात्तं **किल्बिषं** पापम् उदये विद्यते येषां ते **किल्बिषिकाः**, देवानां मध्ये **किल्बिषिकाः** पापाः, अथवा देवाश्च ते किल्बिषिकाश्चेति **देवकिल्बिषिकाः** मनुष्येषु चण्डाला इवाऽस्पृश्याः, **कहि णं** ति **उप्पिं** उपरि, **हेट्ठिं** अधस्तात् **सोहम्मीसाणेसु** त्ति षष्ठ्यर्थे सप्तमी ।

[सू० २०२] **सक्कस्स णं देविंदस्स देवरण्णो बाहिरपरिसाते देवाणं तिन्नि पलिओवमाइं ठिती पन्नत्ता १। सक्कस्स णं देविंदस्स देवरण्णो अब्भंतरपरिसाते देवीणं तिन्नि पल्लिओवमाइं ठिती पन्नत्ता २। ईसाणस्स णं देविंदस्स देवरण्णो बाहिरपरिसाते देवीणं तिन्नि पलिओवमाइं ठिती पण्णत्ता ३।**

[टी०] देवाधिकारायातं **सक्के**त्यादि सूत्रत्रयं सुगममिति ।

[सू० २०३] **तिविहे पायच्छित्ते पन्नत्ते, तंजहा-णाणपायच्छित्ते, दंसण-पायच्छित्ते, चरित्तपायच्छित्ते १।**

ततो अणुग्घातिमा पन्नत्ता, तंजहा-हत्थकम्मं करेमाणे, मेहुणं सेवमाणे, रातीभोयणं भुंजमाणे २।

तओ पारंचिता पन्नत्ता, तंजहा-दुट्ठे पारंचिते, पमत्ते पारंचिते, अन्नमन्नं करेमाणे पारंचिते ३।

ततो अणवट्ठप्पा पन्नत्ता, तंजहा-साहम्मियाणं तेणं करेमाणे, अन्नधम्मियाणं तेणं करेमाणे, हत्थातालं दलयमाणे ४।

[टी०] देवीनामनन्तरं स्थितिरुक्ता, देवीत्वं च पूर्वभवे सप्रायश्चित्तानुष्ठानाद्भवतीति प्रायश्चित्तस्य तद्वतां च प्ररूपणायाह– **तिविहे**त्यादि सूत्रचतुष्टयं सुगमम्, केवलं **नाणे**त्यादि, ज्ञानाद्यतिचारशुद्ध्यर्थं यदालोचनादि ज्ञानादीनां वा योऽतिचारस्तत् **ज्ञानप्रायश्चित्ता**दि, तत्राकाला-ऽविनयाध्ययनादयोऽष्टावतिचारा ज्ञानस्य, शङ्कितादयोऽष्टौ दर्शनस्य, मूलगुणोत्तरगुणविराधनारूपा विचित्राः चारित्रस्येति। **अणुग्घाइम** त्ति उद्घातो भागपातः, तेन निर्वृत्तमुद्घातिमम्, लघ्वित्यर्थः, यत उक्तम्–

अद्धेण छिन्नसेसं पुव्वद्धेणं तु संजुयं काउं ।
देज्जाहि लहुयदाणं गुरुदाणं तत्तियं चेव ॥ [ ] त्ति ।

भावना- मासोऽर्द्धेन छिन्नो जातानि पञ्चदश दिनानि, ततो मासापेक्षया पूर्वं तपः पञ्चविंशतितमं तदर्द्धं सार्द्धद्वादशकं तेन संयुतं मासार्द्धम्, जातानि सप्तविंशतिर्दिनानि सार्द्धानीत्येवं कृत्वा यद् दीयते तल्लघुमासदानम्, एवमन्यान्यपि, एतन्निषेधा**दनुद्घातिमं**

तपः, गुर्व्वित्यर्थः, तद्योगात् साधवोऽपि वा तथोच्यन्ते । **हस्तकर्म्म** आगमप्रसिद्धम्, तत् कुर्वन्, सप्तमी चेयं षष्ठ्यर्था, तेन कुर्वत इति व्याख्येयम्, एतेषां च हस्तकर्मादीनां यत्र विशेषे योऽनुद्घातिमविशेषो दीयते स **कल्पा**दितोऽवसेयः। **पारंचिय** त्ति **पारं** तीरं तपसा अपराधस्याऽञ्चति गच्छति ततो दीक्ष्यते यः स पाराञ्ची, स एव **पाराञ्चिकः**, तस्य यदनुष्ठानं तच्च पाराञ्चिकमिति दशमं प्रायश्चित्तम्, लिङ्ग-क्षेत्र-काल-तपोभिर्बहिःकरणमिति भावः, इह च सूत्रे **कल्पभाष्य** इदमभिधीयते–

आसायण पडिसेवी दुविहो पारंचिओ समासेणं ।
एक्केक्कंमि य भयणा सचरित्ते चेव अचरित्ते ॥
सव्वचरित्तं भस्सइ केण वि पडिसेविएण उ पएणं ।
कत्थइ चिट्ठइ देसो परिणामवराहमासज्ज ॥
तुल्लम्मि वि अवराहे परिणामवसेण होइ नाणत्तं ।
कत्थइ परिणामंम्मि वि तुल्ले अवराहनाणत्तं ॥ [बृहत्कल्प० ४९७२-७३-७४]

तत्र आशातकपाराञ्चिकः–

तित्थयरपवयणसुए आयरिए गणहरे महिड्ढीए ।
एते आसायंते पच्छित्ते मग्गणा होइ ॥ [बृहत्कल्प० ४९७५, ५०६०] त्ति । तत्र–
सव्वे आसायंते पावति पारंचियं ठाणं [बृहत्कल्प० ४९८३] ति ।

इह च सूत्रे प्रतिषेवकपाराञ्चिक एव त्रिविध उक्तः, तदुक्तम्–

पडिसेवणपारंची तिविहो सो होइ आणुपुव्वीए ।
दुट्ठे य १ पमत्ते या २ नेयव्वे अन्नमन्ने य ३ ॥ [बृहत्कल्प० ४९८५]

तत्र **दुष्टो** दोषवान् कषायतो विषयतश्च, पुनरेकैको द्विधा, सपक्ष-विपक्षभेदात्, उक्तं च–

दुविहो य होइ दुट्ठो कसायदुट्ठो य विसयदुट्ठो य ।
दुविहो कसायदुट्ठो सपक्ख-परपक्ख चउभंगो ॥ [बृहत्कल्प० ४९८६]

तत्र स्वपक्षे कषायदुष्टो यथा सर्षपनालिकाभिधानशाकभर्जिकाग्रहणकुपितो मृताचार्यदन्तभञ्जकः साधुः, विषयदुष्टस्तु साध्वीकामुकः, तत्र चोक्तम्–

लिंगेण लिंगिणीए संपत्तिं जो णिगच्छई पावो ।
सव्वजिणाणऽज्जाओ संघो वाऽऽसाइतो तेणं ॥

पावाणं पावयरो दिट्ठिप्फासे वि सो न कप्पति हु ।
जो जिणपुंगवमुद्दं नमिऊण तमेव धरिसेइ ॥ त्ति ।
संसारमणवयग्गं जाइ-जरा-मरणवेयणापउरं ।
पावमलपडलछन्ना भमंति मुद्दाधरिसणेणं ॥ [बृहत्कल्प० ५००८-१०] ति ।

परपक्षकषायदुष्टस्तु राजवधको द्वितीयो राजाग्रमहिष्यधिगन्तेति, उक्तं च–

जो य सलिंगे दुट्ठो कसाय-विसएहिं रायवहगो य ।
रायग्गमहिसिपडिसेवओ य बहुसो पयासो य ॥ [ ]

प्रमत्तः पञ्चमनिद्रा[प्रमाद]वान्, मांसाशिप्रव्रजितसाधुवदिति, अयं च सद्गुणोऽपि त्याज्य इति ।

तथा, **अन्योन्यं** परस्परं मुखपायुप्रयोगतो मैथुनं **कुर्वत्**, पुरुषयुगमिति शेषः, उच्यते च–

आसय-पोसयसेवी के वि मणूसा दुवेयगा होंति ।
तेसिं लिंगविवेगो [बृहत्कल्प० ५०२६] त्ति ।

आसेवितातिचारविशेषः सन्ननाचरिततपोविशेषस्तद्दोषोपरतोऽपि महाव्रतेषु नाव-स्थाप्यते नाधिक्रियते इत्**यनवस्थाप्यः**, तदतिचारजातं तच्छुद्धिरपि वाऽनवस्थाप्यमुच्यत इति नवमं प्रायश्चित्तमिति । तत्र **साधर्मिकाः** साधवस्तेषां सत्कस्योत्कृष्टोपधि-शिष्यादेर्वा बहुशो वा प्रद्विष्टचित्तो वा **तेणं** ति स्तेयं चौर्यं कुर्वन् १, तथा **अन्यधार्म्मिकाः** शाक्यादयो गृहस्था वा, तेषां सत्कस्योपध्यादेः स्तेयं कुर्वन्निति २, तथा हस्तेनाऽऽताडनं **हस्तातालस्तं दलमाणे** ददत्, यष्टि-मुष्टि-लकुटादिभिर्मरणादिनिरपेक्ष आत्मनः परस्य वा प्रहरन्निति भावः, उक्तं च–

उक्कोसं बहुसो वा पदुट्ठचित्तो व तेणियं कुणइ ।
पहरइ जो य सपक्खे निरविक्खो घोरपरिणामो ॥ [ ] त्ति।

[सू० २०४] ततो णो कप्पंति पव्वावेत्तए, तंजहा-पंडए, वातिए, कीवे १। एवं मुंडावेत्तए २, सिक्खावेत्तए ३, उवट्ठावेत्तए ४, संभुंजेत्तए ५, संवासित्तते ६।

ततो अवायणिज्जा पन्नत्ता, तंजहा-अविणीते, विगतीपडिबद्धे,

अविओसवितपाहुडे ।

ततो कप्पंति वातित्तते, तंजहा-विणीते, अविगतीपडिबद्धे, विओसवियपाहुडे।

तओ दुसन्नप्पा पन्नत्ता, तंजहा-दुट्ठे, मूढे, वुग्गाहिते ।

तओ सुसन्नप्पा पन्नत्ता, तंजहा-अदुट्ठे, अमूढे, अवुग्गाहिते ।

[टी०] पूर्वोक्तप्रायश्चित्तं प्रव्राजनादियुक्तस्य भवति, तानि चायोग्यनिरासेन योग्यानां विधेयानीति तदयोग्यान्निरूपयन् सूत्रषट्कमाह- **तओ णो कप्पंति पव्वावेत्तए** इत्यादि कण्ठ्यम्, किन्तु **पण्डकं** नपुंसकम्, तच्च लक्षणादिना विज्ञाय परिहर्त्तव्यम्, लक्षणानि चास्य–

महिलासहावो १ सर २ वन्नभेओ ३, मेंढं महंतं ४ मउया य वाणी ५ ।

ससद्दगं मुत्तमफेणगं च ६, एयाणि छप्पंडगलक्खणाणि ॥ [बृहत्कल्प० ५१४४] त्ति ।

तथा वातोऽस्यास्तीति **वातिकः**, यदा स्वनिमित्ततोऽन्यथा वा मेहनं कषायितं भवति तदा न शक्नोति यो वेदं धारयितुं यावन्न प्रतिसेवा कृता स **वातिक** इति, अयं च निरुद्धवेदो नपुंसकतया परिणमति, क्वचित्तु **वाहिय** त्ति पाठः, तत्र व्याधितो रोगीत्यर्थः। तथा **क्लीबः** असमर्थः, स च चतुर्द्धा वृत्तितो ज्ञेयः ।

इह त्रयोऽप्रव्राज्या उक्ताः त्रिस्थानकानुरोधाद्, अन्यथा अन्येऽपि ते सन्ति।

बाले वुड्ढे इत्यादि, यथैते प्रव्राजयितुं न कल्पन्ते एवमेत एव कथञ्चिच्छलितेन प्रव्राजिता अपि सन्तो **मुण्डयितुं** शिरोलोचेन न कल्पन्ते ।

एवं **शिक्षयितुं** प्रत्युपेक्षणादिसामाचारीं ग्राहयितुम्, तथा **उपस्थापयितुं** महाव्रतेषु व्यवस्थापयितुम्, तथा **सम्भोक्तुम्** उपध्यादिना, एवमनाभोगात् संभुक्ताश्च **संवासयितुम्** आत्मसमीपे आसयितुं **न कल्पन्त** इति प्रक्रम इति ।

कथञ्चित् संवासिता अपि वाचनाया अयोग्याः न वाचनीया इति तानाह– **तओ** त्ति सुगमम्, नवरं **अवाचनीयाः** सूत्रं न पाठनीयाः, अत एवार्थमप्यश्रावणीयाः, सूत्रादर्थस्य गुरुत्वात्, तत्राऽ**विनीतः** सूत्रार्थदातुर्वन्दनादिविनयरहितः, तद्वाचने हि दोषः, उक्तम् च–

विणयाहीया विज्जा देइ फलं इह परे य लोयम्मि ।

न फलंतऽविणयगहिया सस्साणि व तोयहीणाइं ॥ [बृहत्कल्प० ५२०३] ति ।

तथा **विकृतिप्रतिबद्धो** घृतादिरसविशेषगृद्धः, अनुपधानकारीति भावः, इहापि दोष एव, यदाह–

अतवो न होइ जोगो न य फलए इच्छियं फलं विज्जा ।

अवि फलति विउलमगुणं साहणहीणा जहा विज्जा ॥ [बृहत्कल्प० ५२०६] त्ति ।

तथा **अव्यवशमितम्** अनुपशान्तं प्राभृतमिव **प्राभृतं** नरकपालकौशलिकं परमक्रोधो यस्य सोऽव्यवशमितप्राभृतः, उक्तं च–

अप्पे वि पारमाणिं अवराहे वयइ खामियं तं च ।

बहुसो उदीरयंतो अविओसियपाहुडो स खलु ॥ [बृहत्कल्प० ५२०७] त्ति ।

पारमाणिं परमक्रोधसमुद्घातं व्रजतीति भावः, एतस्य वाचने इहलोकतस्त्यागोऽस्य प्रेरणायां कलहनात् प्रान्तदेवताछलनाच्च, परलोकतोऽपि त्यागः, तत्र श्रुतस्य दत्तस्य निष्फलत्वात्, ऊषरक्षिप्तबीजवदिति, आह च–

दुविहो उ परिच्चाओ इह चोयण कलह १ देवयाछलणं २ ।

परलोगम्मि अ अफलं खित्तं पिव ऊसरे बीयं ॥ [बृहत्कल्प० ५२०८] ति ।

एतद्विपर्ययसूत्रं सुगमम् ।

श्रुतदानस्यायोग्या उक्ताः, इदानीं सम्यक्त्वस्याप्ययोग्यानाह– **तओ** इत्यादि सुगमम्, किन्तु दुः**खेन** कृच्छ्रेण **संज्ञाप्यन्ते** बोध्यन्त इति **दुःसंज्ञाप्याः**, तत्र **दुष्टो** द्विष्टः तत्त्वं प्रज्ञापकं वा प्रति, स चाऽप्रज्ञापनीयः, द्वेषेणोपदेशाप्रतिपत्तेः, एवं **मूढो** गुण-दोषानभिज्ञः, **व्युद्ग्राहितः** कुप्रज्ञापकदृढीकृतविपर्यासः, सोऽप्युपदेशं न प्रतिपद्यते, उक्तं च–

पुव्वं कुग्गाहिया केई, बाला पंडियमाणिणो ।

नेच्छंति कारणं सोउं, दीवजाए जहा नरे ॥ [बृहत्कल्प० ५२२४] त्ति ४।

एतेषां स्वरूपं **कल्पात्** **कथाकोशा**च्चावसेयमिति । एतद्विपर्यस्तान् सुसंज्ञाप्यतयाऽऽह– **तओ** इत्यादि स्फुटमिति ।

[सू० २०५] ततो मंडलिया पव्वता पन्नत्ता, तंजहा-माणुसुत्तरे, कुंडलवरे, रुयगवरे ।

ततो महतिमहालया पन्नत्ता, तंजहा-जंबुद्दीवते मंदरे मंदरेसु, सयंभुरमणे समुद्दे समुद्देसु, बंभलोए कप्पे कप्पेसु ।

[टी०] उक्ताः प्रज्ञापनार्हाः पुरुषाः, अधुना तत्प्रज्ञापनीयवस्तूनि त्रिस्थानकावतारीण्याह– **तओ मंडलिए**त्यादि, **मण्डलं** चक्रवालम्, तदस्ति येषां ते **मण्डलिकाः** प्राकारवलयवदवस्थिताः, मानुषेभ्यो मानुषक्षेत्राद्बोत्तरः परतोवर्त्ती **मानुषोत्तर** इति, तत्स्वरूपं चेदम्–

पुक्खरवरदीवड्ढं परिखिवई माणुसुत्तरो सेलो ।
पायारसरिसरूवो विभयंतो माणुसं लोगं ॥
सत्तरस एगवीसाइं जोयणसयाइं सो समुव्विद्धो ।
चत्तारि य तीसाइं मूले कोसं च ओगाढो ॥
दस बावीसाइं अहे वित्थिण्णो होइ जोयणसयाइं ।
सत्त य तेवीसाइं वित्थिण्णो होइ मज्झम्मि ॥
चत्तारि य चउवीसे वित्थारो होइ उवरि सेलस्स ।
अड्ढाइज्जे दीवे दो य समुद्दे अणुपरीइ ॥ [द्वीपसागर० १-४] त्ति ।

तथा– **जंबूदीवो १ धायइ २ पुक्खरदीवो य ३ वारुणिवरो य ४ ।**
खीरवरो वि य दीवो ५ घयवरदीवो य ६ खोयवरो ७ ॥
नंदीसरो य ८ अरुणो ९ अरुणावाओ य १० कुंडलवरो य ११ ।
तह संख १२ रुयग १३ भुयवर १४ कुस १५ कुंचवरो १६ तओ दीवो ॥
[बृहत्सं० ८२-८३]

इति क्रमापेक्षया एकादशे कुण्डलवराख्ये द्वीपे प्राकारकुण्डलाकृतिः **कुण्डलवर** इति, तद्रूपमिदम्–

कुंडलवरस्स इत्यादि ।

तथा त्रयोदशे रुचकवराख्ये द्वीपे कुण्डलाकृती रुचक इति, एतस्य त्विदं स्वरूपम्–

रुयगवरस्स उ मज्झे नगुत्तमो होइ पव्वओ रुयगो ।
पागारसरिसरूवो रुयगं दीवं विभयमाणो ॥ इत्यादि ।

मानुषोत्तरादयो महान्त उक्ता इति महदधिकारादतिमहत आह– **तओ महती**त्यादि व्यक्तम्, केवलमतिमहान्तश्च ते **आलया**श्च आश्रयाः अतिमहालयाः, महान्तश्च

तेऽतिमहालयाश्चेति महातिमहालयाः, द्विरुच्चारणं च महच्छब्दस्य मन्दरादीनां सर्व-गुरुत्वख्यापनार्थम् । **मंदरेसु** त्ति मेरूणां मध्ये जम्बूद्वीपकस्य सातिरेकलक्षयोजन-प्रमाणत्वाच्छेषाणां चतुर्णां सातिरेकपञ्चाशीतियोजनसहस्रप्रमाणत्वादिति । **स्वयम्भूरमणो** महान् सुमेरोरारभ्य तस्य शेषसर्वद्वीप-समुद्रेभ्यः समधिकप्रमाणत्वात्, तेषां तस्य च क्रमेण किञ्चिन्न्यूनाधिकरज्जुपादप्रमाणत्वादिति । **ब्रह्मलोकस्तु** महान्, तत्प्रदेशे पञ्चरज्जुप्रमाणत्वात् लोकविस्तरस्य, तत्प्रमाणतया च विवक्षितत्वात् ब्रह्मलोकस्येति ।

[सू० २०६] तिविधा कप्पट्ठिती पन्नत्ता, तंजहा-सामाइयकप्पट्ठिती, छेदोवट्ठावणियकप्पट्ठिती, निव्विसमाणकप्पट्ठिती १।

अहवा तिविहा कप्पट्ठिती पन्नत्ता, तंजहा-णिव्विट्ठकप्पट्ठिती, जिणकप्पट्ठिती, थेरकप्पट्ठिती २।

[टी०] अनन्तरं ब्रह्मलोककल्प उक्त इति कल्पशब्दसाधर्म्यात् कल्पस्थितिं त्रिधाऽऽह– **तिविहेत्यादि** सूत्रद्वयं कण्ठ्यम्, केवलं **समानि** ज्ञानादीनि, तेषा**मायो** लाभः समायः, स एव **सामायिकं** संयमविशेषः, तस्य तदेव वा **कल्पः** करणमाचारः, यथोक्तम्–

सामर्थ्ये वर्णनायां च, करणे छेदने तथा ।
औपम्ये चाधिवासे च, कल्पशब्दं विदुर्बुधाः ॥ [ ]

इति **सामायिककल्पः**, स च प्रथम-चरमतीर्थयोः साधूनामल्पकालः, छेदोप-स्थापनीयसद्भावात्, मध्यतीर्थेषु महाविदेहेषु च यावत्कथिकः, छेदोपस्थापनीयाभावात्, तदेवं तस्य तत्र वा **स्थितिः** मर्यादा **सामायिककल्पस्थितिः** ।

तथा पूर्वपर्य्यायच्**छेदेनोपस्थापनीयम्** आरोपणीयं **छेदोपस्थापनीयम्**, व्यक्तितो महाव्रतारोपणमित्यर्थः, तच्च प्रथम-पश्चिमतीर्थयोरेवेति, शेषा व्युत्पत्तिस्तथैव, तत्**स्थिति**श्चोक्तलक्षणेष्वेव दशसु स्थानकेष्ववश्यंपालनलक्षणेति, तथाहि–

दसठाणठिओ कप्पो पुरिमस्स य पच्छिमस्स य जिणस्स ।
एसो धुयरयकप्पो दसठाणपइट्ठियो होइ ॥ त्ति ।
आचेल १ क्कुद्देसिय २ सिज्जायर ३ रायपिंड ४ किइकम्मे ५ ।
वय ६ जेट्ठ ७ पडिक्कमणे ८ मासं ९ पज्जोसवणकप्पे १० ॥ [बृहत्कल्प० ६३६३-४] त्ति।

तथा निव्विसमाण त्ति **निर्विशमाना** ये परिहारविशुद्धितपोऽनुचरन्ति, परिहारिका इत्यर्थः, तेषां **कल्पे स्थिति**र्यथा ग्रीष्म-शीत-वर्षाकालेषु क्रमेण तपो जघन्यं चतुर्थ-षष्ठा-ऽष्टमानि मध्यमं षष्ठादीनि उत्कृष्टमष्टमादीनीति, पारणे चाया**ममेव**, पिण्डैषणासप्तके चाद्ययोरग्रह एवेति, पञ्चसु पुनरेकया भक्तमेकया च पानकमित्येवं द्वयोरभिग्रहः।

णिव्विट्ठमाण त्ति **निर्व्विष्टा** आसेवितविवक्षितचारित्राः, अनुपरिहारिका इत्यर्थः, तत्**कल्पस्थिति**र्यथा प्रतिदिनमायाममात्रं तपो भिक्षा तथैवेति, उक्तं च– **कप्पट्ठिया वि पइदिण करेंति एमेव चायामं** [ ] ति। एते च निर्विशमानका निर्विष्टाश्च परिहारविशुद्धिका उच्यन्ते, तेषां च नवको गणो भवति, ते च एवंविधाः–

सव्वे चरित्तवंतो उ, दंसणे परिनिट्ठिया ।
नवपुव्विया जहन्नेणं, उक्कोसा दसपुव्विया ॥

जिणकप्प त्ति **जिना** गच्छनिर्गतसाधुविशेषाः, तेषां कल्पस्थिति**र्जिनकल्प-स्थितिः**, सा चैवम्-जिनकल्पं हि प्रतिपद्यते जघन्यतोऽपि नवमपूर्वस्य तृतीयवस्तुनि सति उत्कृष्टतस्तु दशसु भिन्नेषु, प्रथमे संहनने, दिव्याद्युपसर्ग-रोगवेदनाश्चासौ सहते, एकाक्येव भवति, दशगुणोपेतस्थण्डिल एवोच्चारादि जीर्णवस्त्राणि च त्यजति, वसतिः सर्वोपाधिविशुद्धाऽस्य, भिक्षाचर्या तृतीयपौरुष्याम्, पिण्डैषणोत्तरासां पञ्चानामेकतरैव, विहारो मासकल्पेन, तस्यामेव वीथ्यां षष्ठदिने भिक्षाटनमिति, एवंप्रकारा चेयं **सुयसंघयणे**त्यादिकाद् गाथासमूहात् **कल्पो**क्तादवगन्तव्येति, भणितं च–

गच्छम्मि य निम्माया धीरा जाहे य गहियपरमत्था ।
अग्गह जोग अभिग्गहे, उवेंति जिणकप्पियचरित्तं ॥ [बृहत्कल्प० ६४८३]

अग्रहे आद्ययोः, **अभिग्रहे** पञ्चानां पिण्डैषणानां **योगे** द्वयोर्मध्ये एकतरस्या **गृहीतपरमार्थाः**,

धिइबलिया तवसूरा निंती गच्छाउ ते पुरिससीहा ।
बलवीरियसंघयणा उवसग्गसहा अभीरु(रू) य ॥ [बृहत्कल्प० ६४८४] त्ति ।

स्थविराः आचार्यादयो गच्छप्रतिबद्धाः, तेषां कल्पस्थितिः **स्थविरकल्पस्थितिः**, सा च

पव्वज्जा सिक्खावयमत्थगहणं च अनियओ वासो ।

निप्फत्ती य विहारो सामायारी ठिई चेव ॥ [बृहत्कल्प० ११३२, १४४६, विशेषाव० ७] इत्यादिकेति । इह च सामायिके सति छेदोपस्थापनीयं तत्र च परिहारविशुद्धिकभेदरूपं निर्व्विशमानकं तदनन्तरं निर्विष्टकायिकं तदनन्तरं जिनकल्पः स्थविरकल्पो वा भवतीति सामायिककल्पस्थित्यादिकः सूत्रयोः क्रमोपन्यास इति ।

[सू० २०७] णेरतियाणं ततो सरीरगा पन्नता, तंजहा-वेउव्विए, तेयए, कम्मए। असुरकुमाराणं ततो सरीरगा एवं चेव, एवं सव्वेसिं देवाणं ।

पुढविकाइयाणं ततो सरीरगा पन्नत्ता, तंजहा-ओरालिए, तेयए, कम्मए। एवं वाउकाइयवज्जाणं जाव चउरिंदियाणं ।

[टी०] उक्तकल्पस्थितिव्यतिक्रामिणो नारकादिशरीरिणो भवन्तीति तच्छरीर-निरूपणायाह– **नेरइयाण**मित्यादिदण्डकः कण्ठ्यः, किन्तु **एवं सव्वदेवाणं** ति यथा असुराणां त्रीणि शरीराणि एवं नागकुमारादिभवनपति-व्यन्तर-ज्योतिष्क-वैमानिकानाम्, एवं **वाउकाइयवज्जाणं** ति, वायूनां हि आहारकवर्जानि चत्वारि शरीराणीति तद्वर्जनमेवं पञ्चेन्द्रियतिरश्चामपि चत्वारि मनुष्याणां तु पञ्चापीति त इह न दर्शिताः ।

[सू० २०८] गुरुं पडुच्च ततो पडिणीता पन्नत्ता, तंजहा-आयरियपडिणीते, उवज्झायपडिणीते, थेरपडिणीते १।

गतिं पडुच्च ततो पडिणीया पन्नत्ता, तंजहा-इहलोगपडिणीए, परलोगपडिणीए, दुहओलोगपडिणीए २।

समूहं पडुच्च ततो पडिणीता पन्नत्ता, तंजहा-कुलपडिणीते, गणपडिणीते, संघपडिणीते ३।

अणुकंपं पडुच्च ततो पडिणीया पन्नत्ता, तंजहा-तवस्सिपडिणीए, गिलाणपडिणीए, सेहपडिणीए ४।

भावं पडुच्च ततो पडिणीता पन्नत्ता, तंजहा-णाणपडिणीए, दंसणपडिणीए, चरित्तपडिणीए ५।

अथ तृतीयमध्ययनं त्रिस्थानकम् ।

प्रथम उद्देशकः ।

[सू० १२७] तओ इंदा पण्णत्ता, तंजहा-णामिंदे, ठवणिंदे, दव्विंदे ।
तओ इंदा पन्नत्ता, तंजहा-णाणिंदे, दंसणिंदे, चरित्तिंदे ।
तओ इंदा पन्नत्ता, तंजहा-देविंदे, असुरिंदे, मणुस्सिंदे ।

[टी०] द्विस्थानकानन्तरं त्रिस्थानकमेव भवति सङ्ख्याक्रमप्रामाण्यादित्यनेन सम्बन्धेनायातस्य चतुरनुयोगद्वारस्य चतुरुद्देशकस्यास्य तत्रापि द्वितीयाध्ययनान्त्योद्देशके जीवादिपर्याया उक्ता अस्याप्यध्ययनस्य प्रथमोद्देशके त एवाभिधीयन्त इत्येवम्-सम्बन्धस्यैतत्प्रथमोद्देशकस्य तत्राप्यनन्तरोद्देशकान्त्यसूत्रे पुद्गलधर्मा उक्ता एतत्प्रथमसूत्रे तु जीवधर्मा उच्यन्त इत्येवंसम्बन्धस्यैतदादिसूत्रस्य **तओ इंदे**त्यादेर्व्याख्या, सा च सुकरैव, नवरमिन्दनाद् ऐश्वर्याद् **इन्द्रः**, **नाम** संज्ञा, तदेव यथार्थमिन्द्रेत्यक्षरात्मकमिन्द्रो **नामेन्द्रः**, अथवा सचेतनस्याचेतनस्य वा यस्येन्द्र इत्ययथार्थं नाम क्रियते स नाम-नामवतोरभेदोपचारान्नाम चासाविन्द्रश्चेति **नामेन्द्रः**,

अयमर्थः-**यद्वस्त्वि**त्यादिना यथार्थमिन्द्र इत्याद्युक्तम् १, **स्थित**मित्यादिना त्वयथार्थं गोपालादाविन्द्रेत्यादि २, **यादृच्छिक**मनर्थकं डित्थादीति ३ ।

तथा इन्द्राद्यभिप्रायेण स्थाप्यत इति स्थापना लेप्यादिकर्म, सैवेन्द्रः **स्थापनेन्द्रः**, इन्द्रप्रतिमा साकारस्थापनेन्द्रः, अक्षादिन्यासस्त्वितर इति । स्थापनालक्षणमिदम्-

यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च तत्करणि ।
लेप्यादिकर्म तत् स्थापनेति क्रियतेऽल्पकालं च ॥ [ ] इति ।

तथा- **लेप्पगहत्थी हत्थि त्ति एस सब्भाविया भवे ठवणा ।**
होइ असब्भावे पुण हत्थि त्ति निरागिई अक्खो ॥ [आव०नि० १४४७] त्ति।

तथा द्रवति गच्छति तांस्तान् पर्यायान्, द्रूयते वा तैस्तैः पर्यायैः, द्रोर्वा सत्ताया अवयवो विकारो वा, वर्णादिगुणानां वा द्रावः समूह इति द्रव्यम्, तच्च भूतभावं भाविभावं चेति, आह च-

भावं ज्ञानादिं प्रतीत्य **प्रत्यनीक**स्तेषां वितथप्ररूपणतो दूषणतो वा, यथा–

पागयसुत्तनिबद्धं को वा जाणइ पणीय केणेयं ? ।
किं वा चरणेणं तू दाणेण विणा उ किं हवइ ॥ [ ] त्ति ।

सूत्रं व्याख्येय**मर्थः** तद्व्याख्यानं निर्युक्त्यादिस्त**दुभयं** द्वितयमिति, तत्प्रत्यनीकता–

काया वया य ते च्चिय ते चेव पमाय अप्पमाया य ।
मोक्खाहिगारियाणं जोइसजोणीहि किं कज्जं ? ॥ [बृहत्कल्प० १३०३] इत्यादि दूषणोद्भावनमिति।

[सू० २०९] ततो पितियंगा पन्नत्ता, तंजहा-अट्ठी अट्ठिमिंजा केस-मंसु-रोम-नहे १।

तओ माउयंगा पन्नत्ता, तंजहा-मंसे सोणिते मत्थुलुंगे २।

[टी०] उक्ता कल्पस्थितिर्गर्भजमनुजानामेव तच्छरीरं च मातापितृहेतुकमिति तयोस्तदङ्गेषु हेतुत्वे विभागमाह–**तओ पियंगे**त्यादि सूत्रद्वयं कण्ठ्यम्, केवलं **पितुः** जनकस्याऽङ्गानि अवयवाः **पित्रङ्गानि** प्रायः शुक्रपरिणतिरूपाणीत्यर्थः, **अस्थि** प्रतीतम्, **अस्थिमिंजा** अस्थिमध्यरसः, **केशाश्च** शिरोजाः **श्मश्रु** च कूर्चः **रोमाणि** च कक्षादिजातानि **नखाश्च** प्रतीताः **केश-श्मश्रु-रोम-नख**मित्येकमेव प्रायः समानत्वादिति। **मात्रङ्गानि** आर्त्तवपरिणतिप्रायाणीत्यर्थः, **मांसं** प्रतीतम्, **शोणितं** रक्तम्, **मस्तुलुङ्गं** शेषं मेदः– फिप्फिसादि, कपालमध्यवर्त्ति भेज्जकमित्येके ।

[सू० २१०] तिहिं ठाणेहिं समणे णिग्गंथे महानिज्जरे महापज्जवसाणे भवति, तंजहा-कया णं अहं अप्पं वा बहुं वा सुयं अहिज्जिस्सामि, कया णं अहमेकल्लविहारपडिमं उवसंपज्जित्ताणं विहरिस्सामि, कया णं अहमपच्छिममारणंतितसंलेहणाझूसणाझूसिते भत्तपाणपडियाइक्खिते पाओवगते कालं अणवकंखमाणे विहरिस्सामि, एवं स मणस स वयस स कायस पधारेमाणे निग्गंथे महानिज्जरे महापज्जवसाणे भवति ।

तिहिं ठाणेहिं समणोवासते महानिज्जरे महापज्जवसाणे भवति, तंजहा-कया णं अहमप्पं वा बहुं वा परिग्गहं परिचइस्सामि १, कया णं अहं

मुंडे भवेत्ता अगारातो अणगारितं पव्वइस्सामि २, कया णं अहं अपच्छिममारणंतियसंलेहणाझूसणाझूसिते भत्तपाणपडियातिक्खिते पाओवगते कालं अणवकंखमाणे विहरिस्सामि ३, एवं स मणस स वयस स कायस पधारेमाणे समणोवासते महानिज्जरे महापज्जवसाणे भवति ।

[टी०] पूर्वोक्तस्थविरकल्पस्थितिप्रतिपन्नस्य विशिष्टनिर्ज्जराकारणान्यभिधातुमाह– **तिहीत्यादि** सुगमम्, नवरं महती **निर्जरा** कर्म्मक्षपणा यस्य स तथा, महत् प्रशस्तमात्यन्तिकं वा **पर्यवसानं** पर्यन्तं समाधिमरणतोऽपुनर्मरणतो वा जीवितस्य यस्य स तथा, अत्यन्तं शुभाशयत्वादिति, **एवं स मणस** त्ति एवमुक्तलक्षणं त्रयम्, **स** इति साधुः **मणस** त्ति मनसा ह्रस्वत्वं प्राकृतत्वात्, एवं **स वयस** त्ति वचसा, स **कायस** त्ति कायेनेत्यर्थः, सकारागमः प्राकृतत्वादेव, त्रिभिरपि करणैरित्यर्थः, अथवा **स्वमन**सेत्यादि, **प्रधारयन्** पर्यालोचयन्, क्वचित्तु **पागडेमाणे** त्ति पाठस्तत्र प्रकटयन् व्यक्तीकुर्वन्नित्यर्थः। यथा श्रमणस्य तथा श्रमणोपासकस्यापि त्रीणि निर्ज्जरादिकारणानीति दर्शयन्नाह– **तिहीत्यादि** कण्ठ्यम् ।

[सू० २११] तिविहे पोग्गलपडिघाते पन्नत्ते, तंजहा-परमाणुपोग्गले परमाणुपोग्गलं पप्प पडिहम्मेज्जा, लुक्खत्ताते वा पडिहम्मेज्जा, लोगंते वा पडिहम्मेज्जा ।

[टी०] अनन्तरं कर्म्मनिर्ज्जरोक्ता, सा च पुद्गलपरिणामविशेषरूपेति पुद्गलपरिणाम-विशेषमभिधातुमाह– **तिविहेत्यादि**, **पुद्गलानाम्** अण्वादीनां **प्रतिघातो** गतिस्खलनं **पुद्गलप्रतिघातः**, परमाणुश्चासौ पुद्गलश्च **परमाणुपुद्गलः** स तदन्तरं **प्राप्य प्रतिहन्येत** गतेः प्रतिघातमापद्येत, **रूक्षतया वा** तथाविधपरिणामान्तरात् गतितः **प्रतिहन्येत**, **लोकान्ते वा**, परतो धर्म्मास्तिकायाभावादिति ।

[सू० २१२] तिविहे चक्खू पन्नत्ते, तंजहा-एगचक्खू, बिचक्खू, तिचक्खू। छउमत्थे णं मणुस्से एगचक्खू, देवे बिचक्खू, तहारूवे समणे वा माहणे वा उत्पन्ननाणदंसणधरे से णं तिचक्खु त्ति वत्तव्वं सिता ।

[टी०] पुद्गलप्रतिघातं च चक्षुरेव जानातीति तन्निरूपणायाह– **तिविहेत्यादि** प्रायः

अवत्तव्वगसंचिता । एवमेगिंदियवज्जा जाव वेमाणिया ।

[टी०] अनन्तरं विकुर्वणोक्ता, सा च नारकाणामप्यस्तीति नारकान्निरूपयन्नाह– **तिविहे**त्यादि कण्ठ्यम्, नवरं **कती**त्यनेन सङ्ख्यावाचिना द्व्यादयः सङ्ख्यावन्तोऽभिधीयन्ते, अयं चान्यत्र प्रश्नविशिष्टसङ्ख्यावाचकतया रूढोऽपीह सङ्ख्यामात्रे द्रष्टव्यः, तत्र नारकाः **कति** सङ्ख्याताः एकैकसमये ये उत्पन्नाः सन्तः **सञ्चिताः** कत्युत्पत्तिसाधर्म्याद् बुद्ध्या राशीकृतास्ते **कतिसञ्चिताः**, तथा **न कति** न सङ्ख्याता इत्य**कति** असङ्ख्याता अनन्ता वा, तत्र ये **अकति** असङ्ख्याताः एकैकसमये उत्पन्नाः सन्तस्तथैव **सञ्चिता**स्ते **अकतिसञ्चिताः**, तथा यः परिमाणविशेषो न कति नाप्यकतीति शक्यते वक्तुं सोऽ**वक्तव्यकः**, स चैक इति तत्सञ्चिता **अवक्तव्यकसञ्चिताः**, समये समये एकतयोत्पन्ना इत्यर्थः, उत्पद्यन्ते हि नारका एकसमये एकादयोऽसङ्ख्येयान्ताः, उक्तं च–

एगो व दो व तिन्नि व संखमसंखा व एगसमएणं ।
उववज्जंतेवइया उव्वट्टंता वि एमेव ॥ [बृहत्सं० १५६] त्ति ।

एवमिति नारकवच्छेषाश्चतुर्विंशतिदण्डकोक्ता वाच्या एकेन्द्रियवर्जाः, यतस्तेषु प्रतिसमयमसङ्ख्याता अनन्ता वा अकतिशब्दवाच्या एवोत्पद्यन्ते, न त्वेकः सङ्ख्याता वा इति, आह च–

अणुसमयमसंखेज्जा संखेज्जाऊय तिरिय मणुया य ।
एगिंदिएसु गच्छे आरा ईसाणदेवा य ॥ [बृहत्सं० ३३५]
एगो असंखभागो वट्टइ उव्वट्टणोववायम्मि ।
एगनिगोए निच्चं एवं सेसेसु वि स एव ॥ [बृहत्सं० ३३५ प्रक्षेप०] त्ति ।

[सू० १३०] तिविहा परियारणा पन्नत्ता, तंजहा-एगे देवे अन्ने देवे अन्नेसिं देवाणं देवीओ अभिजुंजिय २ परियारेति, अप्पणिज्जियाओ देवीओ अभिजुंजिय २ परियारेति, अप्पाणमेव अप्पणा विकुव्विय २ परियारेति। एगे देवे णो अन्ने देवे णो अन्नेसिं देवाणं देवीओ अभिजुंजिय २ परियारेति, अप्पणिज्जियाओ देवीओ अभिजुंजिय २ परियारेइ, अप्पाणमेव अप्पणा विकुव्विय २ परियारेति। एगे देवे णो अन्ने देवे णो अन्नेसिं देवाणं देवीओ

देविड्ढी तिविहा पन्नत्ता, तंजहा-विमाणिड्ढी, विगुव्वणिड्ढी, परियारणिड्ढी २। अहवा देविड्ढी तिविधा पन्नत्ता, तंजहा-सचित्ता, अचित्ता, मीसिता ३।

राइड्ढी तिविधा पन्नत्ता, तंजहा-रण्णो अतियाणिड्ढी, रण्णो निज्जाणिड्ढी, रण्णो बल-वाहण-कोस-कोट्ठागारिड्ढी ४। अहवा रातिड्ढी तिविहा पन्नत्ता, तंजहा-सचित्ता, अचित्ता, मीसिता ५।

गणिड्ढी तिविहा पन्नत्ता, तंजहा-णाणिड्ढी, दंसणिड्ढी, चरित्तिड्ढी ६। अहवा गणिड्ढी तिविहा पन्नत्ता, तंजहा-सचित्ता, अचित्ता, मीसिया ७।

[टी०] अनन्तरमभिसमागम उक्तः, स च ज्ञानम्, तच्चर्द्धिरिहैव वक्ष्यमाणत्वादिति ऋद्धिसाधर्म्यात् तद्भेदानाह– **तिविहा इड्ढी** इत्यादिसूत्राणि सप्त सुगमानि, नवरं **देवस्य** इन्द्रादेर्**ऋद्धिः** ऐश्वर्यं **देवर्द्धिः**, एवं **राज्ञः** चक्रवर्त्त्यादेर्**गणिनो** गणाधिपतेराचार्यस्येति १। विमानानां विमानलक्षणा वा **ऋद्धिः** समृद्धिः, द्वात्रिंशल्लक्षादिकं बाहुल्यं महत्त्वं रत्नादिरमणीयत्वं चेति **विमानर्द्धिः**, भवति च द्वात्रिंशल्लक्षादिकं सौधर्मादिषु विमानबाहुल्यम्, यथोक्तम्-

बत्तीस अट्ठवीसा बारस अट्ठ य चउरो सयसहस्सा ।
आरेण बंभलोगा विमाणसंखा भवे एसा ॥
पंचास चत्त छच्चेव सहस्सा लंत-सुक्क-सहसारे ।
सय चउरो आणय-पाणएसु तिन्नारण-ऽच्चुयए ॥
एक्कारसुत्तरं हेट्ठिमेसु सत्तुत्तरं च मज्झिमए ।
सयमेगं उवरिमए पंचेव अणुत्तरविमाणा ॥ [बृहत्सं० ११७-११९] इति ।

उपलक्षणं चैतत् भवन-नगराणामिति । वैक्रियकरणलक्षणा ऋद्धिर्**वैक्रियर्द्धिः**, वैक्रियशरीरैर्हि जम्बूद्वीपद्वयमसङ्ख्यातान् वा द्वीप-समुद्रान् पूरयन्तीति, उक्तं च **भगवत्याम्**– **चमरे णं भंते ! केमहिड्ढिए जाव केवतियं च णं पभू विउव्वित्तए ?, गोयमा ! चमरे णं जाव पभू णं केवलकप्पं जंबुद्दीवं दीवं बहूहिं असुरकुमारेहिं देवेहि य देवीहि य आइन्नं जाव करेत्तए** [भगवती० ३।१।३,१५] इत्यादि । **परिचारणा** कामासेवा, तद्**ऋद्धिः** अन्यान् देवानन्यसत्का देवीः स्वकीया देवीरभियुज्यात्मानं च विकृत्य परिचारयतीत्येवमुक्तलक्षणेति २ । **सचित्ता** स्वशरीरा-ऽग्रमहिष्यादिसचेतनवस्तुसम्पत्, **अचेतना** वस्त्राऽऽभरणादि-

विषया, **मिश्रा** अलङ्कृतदेव्यादिरूपा ३ । **अतियानं** नगरप्रवेशः, तत्र **ऋद्धिः** तोरण-हट्टशोभा-जनसम्मर्द्दादिलक्षणा, **निर्याणं** नगरान्निर्गमः, तत्र **ऋद्धिः** हस्तिकल्पन-सामन्तपरिवारणादिका, **बलं** चतुरङ्गम्, **वाहनानि** वेगसरादीनि, **कोशो** भाण्डागारम्, **कोष्ठा** धान्यभाजनानि, तेषा**मगारं** गेहं **कोष्ठागारं** धान्यगृहमित्यर्थः, तेषां तान्येव वा **ऋद्धिर्या** सा तथा ४ । **सचित्ता**दिका पूर्ववद् भावनीयेति ५ । **ज्ञानर्द्धि**र्विशिष्टश्रुतसम्पत्, **दर्शनर्द्धिः** प्रवचने निःशङ्कितादित्वं प्रवचनप्रभावक-शास्त्रसम्पद्वा, **चारित्रर्द्धि**-र्निरतिचारता ६ । **सचित्ता** शिष्यादिका, **अचित्ता** वस्त्रादिका, **मिश्रा** तथैवेति ७ । इह च विकुर्वणादिऋद्धयोऽन्येषामपि भवन्ति, केवलं देवादीनां विशेषवत्यस्ता इति तेषामेवोक्ता इति ।

[सू० २१५] ततो गारवा पन्नत्ता, तंजहा-इड्ढीगारवे रसगारवे सातगारवे।

[टी०] ऋद्धिसद्भावे च गौरवं भवतीति तद्भेदानाह– **तओ गारवे**त्यादि व्यक्तम्, परं गुरोर्भावः कर्म्म वेति **गौरवम्**, तच्च द्वेधा द्रव्यतो वज्रादेर्भावतोऽभिमान-लोभलक्षणाशुभभावत आत्मनः, तत्र भावगौरवं त्रिधा, तत्र ऋद्ध्या नरेन्द्रादिपूजालक्षणया आचार्यत्वादिलक्षणया वा अभिमानादिद्वारेण गौरवम् **ऋद्धिगौरवम्**, ऋद्धिप्राप्त्यभिमाना-ऽप्राप्तप्रार्थनाद्वारेणात्मनोऽशुभभावो भावगौरवमित्यर्थः, एवमन्यत्रापि, नवरं **रसो** रसनेन्द्रियार्थो मधुरादिः, **सातं** सुखमिति, अथवा ऋद्ध्यादिषु **गौरव**मादर इति ।

[सू० २१६] तिविधे करणे पन्नत्ते, तंजहा-धम्मिते करणे, अधम्मिए करणे, धम्मिताधम्मिते करणे ।

[टी०] अनन्तरं चारित्रर्द्धिरुक्ता, चारित्रं च करणमिति तद्भेदानाह– **तिविहे**त्यादि, कृतिः **करणम**नुष्ठानम्, तच्च धार्म्मिकादिस्वामिभेदेन त्रिविधम्, तत्र **धार्म्मिकस्य** संयतस्येदं **धार्म्मिक**मेवमितरे, नवरम**धार्म्मिकः** असंयतः, तृतीयो देशसंयतः । अथवा धर्म्मे भवं धर्म्मो वा प्रयोजनमस्येति धार्मिकम्, विपर्यस्तमितरत्, एवं तृतीयमपीति।

[सू० २१७] तिविहे भगवता धम्मे पन्नत्ते, तंजहा-सुअधिज्जिते सुज्झातिते सुतवस्सिते । जया सुअधिज्जितं भवति तदा सुज्झातियं भवति, जया सुज्झातितं भवति तदा सुतवस्सितं भवति । से सुअधिज्जिते सुज्झातिते

सुतवस्सिते सुतक्खाते णं भगवता धम्मे पण्णत्ते ।

[टी०] धार्म्मिककरणमनन्तरमुक्तम्, तच्च धर्म एवेति तद्भेदानाह– **तिविहे**त्यादि स्पष्टम्, केवलं **भगवता महावीरेणे**त्येवं जगाद **सुधर्म्मस्वामी जम्बूस्वामिनं** प्रतीति, **सुट्ठु** काल-विनयाद्याराधनेनाऽ**धीतं** गुरुसकाशात् सूत्रतः पठितं **स्वधीतम्**, तथा **सुट्ठु** विधिना तत एव व्याख्यानेनाऽर्थतः श्रुत्वा **ध्यातम्** अनुप्रेक्षितम्, श्रुतमिति गम्यम्, **सुध्यातम्**, अनुप्रेक्षणाऽभावे तत्त्वानवगमेनाऽध्ययन-श्रवणयोः प्रायोऽकृतार्थत्वादिति, अनेन भेदद्वयेन श्रुतधर्म्म उक्तः, तथा **सुट्ठु** इहलोकाद्याशंसारहितत्वेन **तपसितं** तपस्यानुष्ठानं **सुतपसित**मिति च चारित्रधर्म्म उक्त इति, त्रयाणामप्येषामुत्तरोत्तरतोऽविनाभावं दर्शयति- **जया** इत्यादि व्यक्तम्, परं निर्दोषाध्ययनं विना श्रुतार्थाप्रतीतेः सुध्यातं न भवति, तदभावे ज्ञानविकलतया सुतपसितं न भवतीति भावः, यदेतत् स्वधीतादित्रयं **भगवता वर्द्धमानस्वामिना धर्म्मः प्रज्ञप्तः से** त्ति स **स्वाख्यातः** सुष्ठूक्तः सम्यग्ज्ञान-क्रियारूपत्वात्, तयोश्चैकान्तिकात्यन्तिकसुखावन्ध्योपायत्वेन निरुपचरितधर्म्मत्वात्, सुगतिधारणाद्धि धर्म्म इति, उक्तं च–

नाणं पयासयं सोहओ तवो संजमो य गुत्तिकरो ।
तिण्हं पि समाओगे मोक्खो जिणसासणे भणिओ ॥ [आव० नि० १०३] त्ति ।

णमिति वाक्यालङ्कारे ।

[सू० २१८] तिविधा वावत्ती पन्नत्ता, तंजहा-जाणू, अजाणू, वितिगिंच्छा। एवमज्झोववज्जणा, परियावज्जणा ।

[टी०] सुतपसितमिति चारित्रमुक्तम्, तच्च प्राणातिपातादिविनिवृत्तिस्वरूपमिति तस्या भेदानाह– **तिविहे**त्यादि, व्यावर्त्तनं **व्यावृत्तिः**, कुतोऽपि हिंसाद्यवधेर्निवृत्तिरित्यर्थः, सा च या ज्ञस्य हिंसादेर्हेतु-स्वरूप-फलविदुषो ज्ञानपूर्विका व्यावृत्तिः सा तदभेदात् **जाणु** त्ति गदिता, या त्वज्ञस्याज्ञानात् सा **अजाणू** इत्यभिहिता, या तु विचिकित्सातः संशयात् सा निमित्त-निमित्तिनोरभेदा**द्विचिकित्से**त्यभिहिता । व्यावृत्तिरित्यनेनाऽऽन्तरं चारित्रमुक्तं तद्विपक्षश्चाशुभाध्यवसाया-ऽनुष्ठाने इति तयोरधुना भेदानतिदेशत आह– **एव**मित्यादिसूत्रे, **एव**मिति व्यावृत्तिरिव त्रिधा **अज्झोववज्जण** त्ति अध्युपपदनं

क्वचिदिन्द्रियार्थे अध्युपपत्तिरभिष्वङ्ग इत्यर्थः, तत्र जानतो विषयजन्यमनर्थं या तत्राध्युपपत्तिः सा **जाणू**, या त्वजानतः सा **अजाणू**, या तु संशयवतः सा **विचिकित्से**ति, **परियावज्जण** त्ति पर्यापदनं पर्यापत्तिरासेवेति यावत्, साऽप्येवमेवेति ।

[सू० २१९] तिविधे अंते पन्नत्ते, तंजहा-लोगंते, वेयंते, समयंते ।

[टी०] जाणु त्ति ज्ञः, स च ज्ञानात् स्यादित्युक्तम्, ज्ञानं चातीन्द्रियार्थेषु प्रायः शास्त्रादिति शास्त्रभेदेन तद्भेदानाह– **तिविहे अंते** इत्यादि, अमनमधिगमन**मन्तः** परिच्छेदः, तत्र **लोको** लोकशास्त्रं तत्कृतत्वात् तदध्येयत्वाच्चार्थशास्त्रादिः तस्मादन्तो निर्णयस्तस्य वा परमरहस्यं पर्यन्तो वेति **लोकान्तः**, एवमितरावपि, नवरं **वेदा** ऋगादयः ४, **समया** जैनादिसिद्धान्ता इति ।

[सू० २२०] ततो जिणा पन्नत्ता, तंजहा-ओहिणाणजिणे, मणपज्जवणाणजिणे, केवलणाणजिणे १।

ततो केवली पन्नत्ता, तंजहा-ओहिनाणकेवली, मणपज्जवनाणकेवली, केवलनाणकेवली २।

तओ अरहा पन्नत्ता, तंजहा-ओहिनाणअरहा, मणपज्जवनाणअरहा, केवलनाणअरहा ३।

[टी०] अनन्तरं समयान्त उक्तः, समयश्च जिन-केवल्यर्हच्छब्दवाच्यैरुक्तः सम्यग् भवतीति जिनादिशब्दवाच्यभेदानभिधातुं त्रिसूत्रीमाह– **तओ जिणे**त्यादि, सुगमा, नवरं राग-द्वेष-मोहान् जयन्तीति **जिनाः** सर्वज्ञाः, उक्तं च-

रागो द्वेषस्तथा मोहो जितो येन जिनो ह्यसौ ।

अस्त्री-शस्त्रा-ऽक्षमालत्वादर्हन्नेवानुमीयते ॥ [ ] इति ।

तथा जिना इव ये वर्त्तन्ते निश्चयप्रत्यक्षज्ञानतया तेऽपि **जिनाः**, तत्रावधिज्ञानप्रधानो जिनोऽ**वधिजिनः**, एवमितरावपि, नवरमाद्यावुपचरितावितरो निरुपचारः, उपचारकारणं तु प्रत्यक्षज्ञानित्वमिति, केवलम् एकमनन्तं पूर्णं वा ज्ञानादि येषामस्ति ते **केवलिनः**, उक्तं च-

कसिणं केवलकप्पं लोगं जाणंति तह य पासंति ।

केवलचरित्तणाणी तम्हा ते केवली होंति ॥ [आव० नि० १०९२] त्ति ।

इहापि जिनवद् व्याख्या, अर्हन्ति देवादिकृतां पूजामित्**यर्हन्तः**, अथवा नास्ति **रहः** प्रच्छन्नं किञ्चिदपि येषां प्रत्यक्षज्ञानित्वात्ते **अरहसः**, शेषं प्राग्वत् ।

[सू० २२१] तओ लेसाओ दुब्भिगंधाओ पन्नत्ताओ, तंजहा-कण्हलेसा, णीललेसा, काउलेसा १। तओ लेसाओ सुब्भिगंधाओ पन्नत्ताओ, तंजहा-तेऊ, पम्हा, सुक्कलेसा २। एवं दोग्गतिगामिणीओ ३, सोग्गतिगामिणीओ ४, संकिलिट्ठाओ ५, असंकिलिट्ठाओ ६, अमणुन्नाओ ७, मणुन्नाओ ८, अविसुद्धाओ ९, विसुद्धाओ १०, अप्पसत्थाओ ११, पसत्थाओ १२, सीतलुक्खाओ १३, णिद्धुण्हाओ १४।

[टी०] एते च सलेश्या अपि भवन्तीति लेश्याप्रकरणमाह- **तओ** इत्यादि सुगमम्, नवरं **दुब्भिगंधाओ** त्ति दुरभिगन्धा दुर्गन्धाः, दुरभिगन्धत्वं च तासां पुद्गलात्मत्कत्वात्, पुद्गलानां च गन्धादीनाम् अवश्यं भावादिति, आह च–

जह गोमडस्स गंधो सुणगमडस्स व जहा अहिमडस्स ।
एत्तो वि अणंतगुणो लेसाणं अप्पसत्थाणं ॥ [उत्तरा० ३४।१६] ति ।

नामानुसारी चासां वर्णः, कपोतवर्णा लेश्या **कपोतलेश्या**, धूम्रवर्णेत्यर्थः । **सुब्भिगंधाओ** त्ति सुरभिगन्धाः, आह च–

जह सुरभिकुसुमगंधो [उत्तरा० ३४।१७] इत्यादि ।

तेजो वह्निस्तद्वर्णा लेश्या, लोहितवर्णेत्यर्थः, **तेजोलेश्ये**ति । पद्मगर्भवर्णा लेश्या, पीतवर्णेत्यर्थः, **पद्मलेश्या** । **शुक्ला** प्रतीता, **एवं**करणात् प्रथमसूत्रवत् **तओ** इत्याद्यभिलापेन शेषसूत्राण्यध्येतव्यानीति, तत्र **दुर्गतिं** नरक-तिर्यग्रूपां गमयन्ति प्राणिनमिति **दुर्गतिगामिन्यः**, **सुगतिः** मनुष्य-देवगतिरूपा, **सङ्क्लिष्टाः** सङ्क्लेशहेतुत्वादिति, विपर्ययः सर्वत्र सुज्ञानः, **अमनोज्ञाः** अमनोज्ञरसोपेतपुद्गलमयत्वात्, **अविशुद्धा** वर्णतः, **अप्रशस्ताः** अश्रेयस्योऽनादेया इत्यर्थः, **शीतरूक्षाः** स्पर्शतः आद्याः, द्वितीयास्तु **स्निग्धोष्णाः** स्पर्शत एवेति ।

[सू० २२२] तिविहे मरणे पन्नत्ते, तंजहा-बालमरणे, पंडियमरणे, बालपंडियमरणे १।

बालमरणे तिविहे पन्नत्ते, तंजहा-ठितलेस्से, संकिलिट्ठलेस्से, पज्जवजातलेस्से २।

पंडियमरणे तिविहे पन्नत्ते, तंजहा-ठितलेस्से, असंकिलिट्ठलेस्से, पज्जवजातलेस्से ३।

बालपंडितमरणे तिविहे पन्नत्ते, तंजहा-ठितलेस्से, असंकिलिट्ठलेस्से, अपज्जवजातलेस्से ४।

[टी०] अनन्तरं लेश्या उक्ताः, अधुना तद्विशेषितमरणनिरूपणायाह– **तिविहे**त्यादि सूत्रचतुष्टयम्, **बाल**ः अज्ञः, तद्वद् यो वर्त्तते विरतिसाधकविवेकविकलत्वात् स **बाल**ः असंयतः, तस्य मरणं **बालमरणम्**, एवमितरे, केवलं 'पडि'धातोर्गत्यर्थत्वेन ज्ञानार्थत्वाद्विरतिफलेन फलवद्विज्ञानयुक्तत्वात् **पण्डितो** बुद्धतत्त्वः, संयत इत्यर्थः, तथा अविरतत्वेन बालत्वाद्विरतत्वेन च पण्डितत्वाद् **बालपण्डित**ः संयतासंयत इति। **स्थिता** अवस्थिता अविशुध्यन्त्यसङ्क्लिश्यमाना च **लेश्या** कृष्णादिर्यस्मिन् तत् **स्थितलेश्यम्, सङ्क्लिष्टा** सङ्क्लिश्यमाना सङ्क्लेशमागच्छन्तीत्यर्थः, सा **लेश्या** यस्मिंस्तत्तथा, तथा **पर्यवा**ः पारिशेष्याद्विशुद्धिविशेषाः प्रतिसमयं जाता यस्यां सा तथा, विशुद्ध्या वर्द्धमानेत्यर्थः, सा **लेश्या** यस्मिंस्तत्तथेति। तत्र प्रथमं कृष्णादिलेश्यः सन् यदा कृष्णादिलेश्येष्वेव नारकादिषूत्पद्यते तदा प्रथमं भवति, यदा तु नीलादिलेश्यः सन् कृष्णादिलेश्येषूत्पद्यते तदा द्वितीयम्, यदा पुनः कृष्णलेश्यादिः सन् नील-कापोतलेश्येषूत्पद्यते तदा तृतीयम्। उक्तं चान्त्यद्वयसंवादि **भगवत्यां** यदुत–

से णूणं भंते ! कण्हलेसे नीललेसे जाव सुक्कलेसे भवित्ता काउलेसेसु नेरइएसु उववज्जइ ?, हंता, गोयमा !, से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! लेसाठाणेसु संकिलिस्समाणेसु वा विसुज्झमाणेसु वा काउलेस्सं परिणमइ २ काउलेसेसु नेरइएसु उववज्जइ[भगवती० १३।१।२९-३०]त्ति। एतदनुसारेणोत्तरसूत्रयोरपि स्थितलेश्यादिविभागो नेय इति। पण्डितमरणे सङ्क्लिश्यमानता लेश्याया नास्ति संयतत्वादेवेत्ययं बालमरणाद्विशेषः। बालपण्डितमरणे तु सङ्क्लिश्यमानता विशुध्यमानता च लेश्याया नास्ति, मिश्रत्वादेवेत्ययं विशेष इति। एवं च पण्डितमरणं वस्तुतो द्विविधमेव, सङ्क्लिश्यमानलेश्यानिषेधे अवस्थित-वर्द्धमानलेश्यत्वात् तस्य, त्रिविधत्वं तु व्यपदेशमात्रादेव, बालपण्डितमरणं त्वेकविधमेव,

सङ्क्लिश्यमानपर्यवजातलेश्यानिषेधे अवस्थितलेश्यत्वात् तस्येति, त्रैविध्यं त्वस्येतरव्यावृत्तितो व्यपदेशत्रयप्रवृत्तेरिति ।

[सू० २२३] ततो ठाणा अव्ववसितस्स अहिताते असुभाते अखमाते अणिस्सेसाते अणाणुगामियत्ताते भवंति, तंजहा-से णं मुंडे भवित्ता अगारातो अणगारितं पव्वइते णिग्गंथे पावयणे संकिते कंखिते वितिगिंच्छिते भेदसमावन्ने कलुससमावन्ने निग्गंथं पावयणं णो सद्दहति णो पत्तियति णो रोएति, तं परिस्सहा अभिजुंजिय अभिजुंजिय अभिभवंति, णो से परिस्सहे अभिजुंजिय अभिजुंजिय अभिभवइ १, से णं मुंडे भवित्ता अगारातो अणगारितं पव्वतिते पंचहिं महव्वतेहिं संकिते जाव कलुससमावन्ने पंच महव्वताइं नो सद्दहति जाव णो से परिस्सहे अभिजुंजिय अभिजुंजिय अभिभवति २, से णं मुंडे भवेत्ता अगारातो अणगारियं पव्वतिते छहिं जीवनिकाएहिं जाव अभिभवइ ३।

ततो ठाणा ववसियस्स हिताते जाव आणुगामितत्ताते भवंति, तंजहा-से णं मुंडे भवित्ता अगारातो अणगारितं पव्वतिते णिग्गंथे पावयणे णिस्संकिते णिक्कंखिते जाव नो कलुससमावन्ने णिग्गंथं पावयणं सद्दहति पत्तियति रोतेति से परिस्सहे अभिजुंजिय अभिजुंजिय अभिभवति, नो तं परिस्सहा अभिजुंजिय अभिजुंजिय अभिभवंति १, से णं मुंडे भवेत्ता अगारातो अणगारियं पव्वतिते समाणे पंचहिं महव्वतेहिं णिस्संकिते जाव परिस्सहे अभिजुंजिय अभिजुंजिय अभिभवति, नो तं परिस्सहा अभिजुंजिय अभिजुंजिय अभिभवंति २, से णं मुंडे भवेत्ता अगारातो अणगारियं पव्वतिते छहिं जीवनिकाएहिं णिस्संकिते जाव परिस्सहे अभिजुंजिय अभिजुंजिय अभिभवति, नो तं परिस्सहा अभिजुंजिय अभिजुंजिय अभिभवंति ३।

[टी०] मरणमनन्तरमुक्तम्, मृतस्य च जन्मान्तरे यथाविधस्य यद्वस्तुत्रयं यस्मै सम्पद्यते तत्तस्मै दर्शयितुमाह– **तओ ठाणे**त्यादि, **त्रीणि स्थानानि** प्रवचन-महाव्रत-जीवनिकायलक्षणानि, **अव्यवसितस्य** अनिश्चयवतोऽपराक्रमवतो वाऽ**हिताय** अपथ्यायाऽ**सुखाय** दुःखाय **अक्षमाय** असङ्गतत्वाय **अनिःश्रेयसाय** अमोक्षायाऽ-

ननुगामिकत्वाय अशुभानुबन्धाय **भवन्ति, से णं** ति यस्य त्रीणि स्थानान्यहितादित्वाय भवन्ति स **शङ्कितो** देशतः सर्वतो वा संशयवान्, **काङ्क्षितस्तथैव** मतान्तरस्यापि साधुत्वेन मन्ता, **विचिकित्सितः** फलं प्रति **शङ्कोपेतः**, अत एव **भेदसमापन्नो** द्वैधीभावमापन्नः एवमिदं न वैवमितिमतिकः, **कलुषसमापन्नो** नैतदेवमितिप्रतिपत्तिकः, ततश्च निर्ग्रन्थानामिदं **नैर्ग्रन्थं** प्रशस्तं प्रगतं प्रथमं वा वचनमिति **प्रवचनम्** आगमः, दीर्घत्वं प्राकृतत्वात्, **न श्रद्धत्ते** सामान्यतो **न प्रत्येति** न प्रीतिविषयीकरोति **नो रोचयति** न चिकीर्षाविषयीकरोति **त**मिति य एवंभूतस्तं प्रव्रजिताभासं परिषह्यन्त इति **परीषहाः** क्षुदादयः **अभियुज्य अभियुज्य** सम्बन्धमुपगत्य प्रतिस्पर्द्धय वा **अभिभवन्ति** न्यक्कुर्वन्तीति, शेषं सुगमम् ।

उक्तविपर्ययसूत्रं प्राग्वत्, किन्तु **हितम्** अदोषकरमिह परत्र चात्मनः परेषां च पथ्यान्नभोजनवत्, **सुखम्** आनन्दस्तृषितस्य शीतलजलपान इव, **क्षमम्** उचितं तथाविधव्याधिव्याघातकौषधपानमिव, **निःश्रेयसं निश्चितं श्रेयः** प्रशस्यं भावतः पञ्चनमस्कारकरणमिव, **अनुगामिकम्** अनुगमनशीलं भास्वरद्रव्यजनितच्छायेवेति ।

[सू० २२४] एगमेगा णं पुढवी तिहिं वलएहिं सव्वओ समंता संपरिक्खित्ता, तंजहा-घणोदधिवलएणं, घणवातवलएणं, तणुवायवलएणं ।

[टी०] अयं चैवंविधः साधुरिहैव पृथिव्यां भवतीत्यर्थेन सम्बन्धेन पृथिवीस्वरूपमाह– **एगमेगे**त्यादि, एकैका पृथ्वी रत्नप्रभादिका **सर्व्वतः**, किमुक्तं भवति ? **समन्तात्**, अथवा दिक्षु विदिक्षु चेत्यर्थः, **सम्परिक्षिप्ता** वेष्टिता, आभ्यन्तरं घनोदधिवलयं ततः क्रमेणेतरे, तत्र **घनः** स्त्यानो हिमशिलावत् **उदधिः** जलनिचयः, स चासौ स चेति **घनोदधिः**, स एव वलयमिव **वलयं** कटकं **घनोदधिवलयम्**, तेन, एवमितरे अपि, नवरं घनश्चासौ वातश्च तथाविधपरिणामोपेतो **घनवातः**, एवं **तनुवातो**ऽपि तथाविधपरिणाम एवेति ।

[सू० २२५] णेरइया णं उक्कोसेणं तिसमइएणं विग्गहेणं उववज्जंति, एगिंदियवज्जं जाव वेमाणियाणं ।

[टी०] एतासु च पृथिवीषु नारका एव उत्पद्यन्त इति तदुत्पत्तिविधिमभिधातुमाह–

नेरइया णमित्यादि, त्रयः समयास्त्रिसमयं तद्यत्रास्ति स **त्रिसमयिकस्तेन विग्रहेण** वक्रगमनेन, **उक्कोसेणं** ति त्रसानां हि त्रसनाड्यन्तरुत्पादात् वक्रद्वयं भवति, तत्र च त्रय एव समयाः, तथाहि– आग्नेयदिशो नैर्ऋतदिशमेकेन समयेन गच्छति, ततो द्वितीयेन समश्रेण्याऽधः, ततस्तृतीयेन वायव्यदिशि समश्रेण्यैवेति, त्रसानामेव त्रसोत्पत्तावेवंविध उत्कर्षेण विग्रह इत्याह– **एगेंदियेत्यादि**, एकेन्द्रियास्त्वेकेन्द्रियेषु पञ्चसामयिकेनाप्युत्पद्यन्ते, यतस्ते बहिस्तात् त्रसनाडीतो बहिरप्युत्पद्यन्ते, तथाहि–

विदिसाउ दिसं पढमे बीए पइसरइ लोयनाडीए ।
तइए उप्पिं धावइ चउत्थए नीइ बाहिं तु ॥

पंचमए विदिसीए गंतुं उप्पज्जए उ एगिंदी [ ] ति, सम्भव एवायम्, भवति तु चतुःसामयिक एव, **भगवत्यां** तथोक्तत्वादिति, तथाहि– **अपज्जत्तगसुहुमपुढविकाइए णं भंते ! अहेलोगखेत्तनालीए बाहिरिल्ले खेत्ते समोहए समोहणित्ता जे भविए उड्ढलोयखेत्तनालीए बाहिरिल्ले खेत्ते अपज्जत्तसुहुमपुढविकाइयत्ताए उववज्जित्तए से णं भंते ! कतिसमइएणं विग्गहेणं उववज्जेज्जा ?, गो० ! तिसमइएण वा चउसमइएण वा विग्गहेण उववज्जेज्जा** [भगवती० ३४।१।३८] इत्यादि ।

अत उक्तम्– **एगिंदियवज्जं** ति, **यावद्वैमानिकानामिति** वैमानिकान्तानां जीवानां त्रिसामयिक उत्कर्षेण विग्रहो भवतीति भावः ।

[सू० २२६] खीणमोहस्स णं अरहतो ततो कम्मंसा जुगवं खिज्जंति, तंजहा-नाणावरणिज्जं दंसणावरणिज्जं अंतरातियं ।

मोहवतां त्रिस्थानकमभिधायाधुना क्षीणमोहस्य तदाह– **खीणेत्यादि, क्षीणमोहस्य** क्षीणमोहनीयकर्म्मणोऽर्हतो जिनस्य त्रयः **कर्मांशाः** कर्म्मप्रकृतय इति, उक्तं च–

चरमे नाणावरणं पंचविहं दंसणं चउविगप्पं ।
पंचविहमंतरायं खवइत्ता केवली होइ ॥ [ ] त्ति ।

शेषं कण्ठ्यम् ।

[सू० २२७] अभितीणक्खत्ते तितारे पन्नत्ते १। एवं सवणे २, अस्सिणी ३, भरणी ४, मगसिरे ५, पूसे ६, जेट्ठा ७।

[टी०] अनन्तरमशाश्वतानां त्रिस्थानकमुक्तम्, अधुना शाश्वतानां तदाह–

अभीत्यादिसूत्राणि सप्त कण्ठ्यानीति ।

[सू० २२८] धम्मातो णं अरहाओ संती अरहा तिहिं सागरोवमेहिं तिचउब्भागपलिओवमऊणएहिं वीतिक्कंतेहिं समुप्पन्ने ।

[सू० २२९] समणस्स णं भगवओ महावीरस्स जाव तच्चाओ पुरिसजुगाओ जुगंतकरभूमी ।

मल्ली णं अरहा तिहिं पुरिससएहिं सद्धिं मुंडे भवित्ता जाव पव्वतिते, एवं पासे वि ।

[सू० २३०] समणस्स णं भगवतो महावीरस्स तिन्नि सया चउद्दसपुव्वीणं अजिणाणं जिणसंकासाणं सव्वक्खरसन्निवातीणं जिणो इव अवितहं वागरमाणाणं उक्कोसिया चउद्दसपुव्विसंपया होत्था ।

[सू० २३१] तओ तित्थयरा चक्कवट्टी होत्था, तंजहा-संती कुंथू अरो ३।

[टी०] परम्परसूत्रे क्षीणमोहस्य त्रिस्थानकमुक्तम्, अधुना तद्विशेषाणां तीर्थकृतां तदाह– **धम्मे**त्यादि प्रकरणम्, **तिचउब्भाग** त्ति त्रिभिश्चतुर्भागैः पादैः पल्योपमस्य सत्कैरूनानि **त्रिचतुर्भागपल्योपमोनानि** तैर्व्यतिक्रान्तैरिति ।

समणस्सेत्यादि, युगानि पञ्चवर्षमानानि कालविशेषा लोकप्रसिद्धानि वा कृतयुगादीनि तानि च क्रमव्यवस्थितानि ततश्च पुरुषा गुरुशिष्यक्रमिणः पितापुत्रक्रमवन्तो वा युगानीव पुरुषयुगानि, पुरुषसिंहवत् समासः, ततश्च पञ्चम्या द्वितीयार्थत्वात् **तृतीयं पुरुषयुगं** यावत्, **जम्बूस्वामिनं** यावदित्यर्थः, **युग** त्ति पुरुषयुगं तदपेक्षयाऽ**न्तकराणां** भवान्तकारिणां निर्वाणगामिनामित्यर्थः, **भूमि**ः कालो **युगान्तकरभूमि**ः, इदमुक्तं भवति– भगवतो **वर्द्धमान**स्वामिनस्तीर्थे तस्मादेवावधेस्तृतीयं पुरुषं **जम्बूस्वामिनं** यावन्निर्वाणमभूत्, तत उत्तरं तद्व्यवच्छेद इति १ ।

मल्लीत्यादि सूत्रद्वयम्, तत्र संवादः– **एगो भगवं वीरो पासो मल्ली य तिहिं तिहिं सतेहिं** [आव० नि०२२४, विशेषाव० १६४२] ति, मल्लिजिनः स्त्रीशतैरपि त्रिभिः ।

समणेत्यादि, **अजिणाणं** ति असर्वज्ञत्वेन **जिनसंकाशानां** सकलसंशयच्छेदकत्वेन,

सर्व्वे सकला **अक्षरसन्निपाताः** अकारादिसंयोगा विद्यन्ते येषां ते तथा, स्वार्थिकेनप्रत्ययोपादानात्, तेषाम्, विदितसकलवाङ्मयानामित्यर्थः, **वागरमाणाणं** ति व्यागृणताम्, व्याकुर्वतामित्यर्थः । **तओ** त्ति सुगमम् –

संती कुंथू य अरो अरहंता चेव चक्कवट्टी य ।
अवसेसा तित्थयरा मंडलिआ आसि रायाणो ॥ [आव० नि० २२३] त्ति ।

[सू० २३२] ततो गेवेज्जविमाणपत्थडा पन्नत्ता, तंजहा-हेट्ठिमगेवेज्जविमाणपत्थडे, मज्झिमगेवेज्जविमाणपत्थडे, उवरिमगेवेज्जविमाणपत्थडे ।

हेट्ठिमगेवेज्जविमाणपत्थडे तिविहे पन्नत्ते, तंजहा-हेट्ठिमहेट्ठिमगेवेज्जविमाणपत्थडे, हेट्ठिममज्झिमगेवेज्जविमाणपत्थडे, हेट्ठिमउवरिमगेवेज्जविमाणपत्थडे ।

मज्झिमगेवेज्जविमाणपत्थडे तिविधे पन्नत्ते, तंजहा-मज्झिमहेट्ठिमगेवेज्जविमाणपत्थडे, मज्झिममज्झिमगेवेज्जविमाणपत्थडे, मज्झिमउवरिमगेवेज्जविमाणपत्थडे ।

उवरिमगेवेज्जविमाणपत्थडे तिविधे पन्नत्ते, तंजहा-उवरिमहेट्ठिमगेवेज्जविमाणपत्थडे, उवरिममज्झिमगेवेज्जविमाणपत्थडे, उवरिमउवरिमगेवेज्जविमाणपत्थडे ।

[टी०] तीर्थकराश्चैते विमानेभ्योऽवतीर्णा इति विमानत्रिस्थानकमाह– **तओ** इत्यादि, लोकपुरुषस्य ग्रीवास्थाने भवानि **ग्रैवेयकानि** तानि च तानि विमानानि च तेषां **प्रस्तटा** रचनाविशेषवन्तः समूहाः ।

[सू० २३३] जीवा णं तिट्ठाणणिव्वत्तिते पोग्गले पावकम्मत्ताते चिणिंसु वा चिणंति वा चिणिस्संति वा, तंजहा-इत्थिणिव्वत्तिते, पुरिसणिव्वत्तिते, *णपुंसगणिव्वत्तिते* । *एवं* —

चिण उवचिण बंध उदीर वेद तह णिज्जरा चेव ॥१४॥

[टी०] इयं च ग्रैवेयकादिविमानवासिता कर्म्मणः सकाशात् भवतीति कर्म्मणः त्रिस्थानकमाह– **जीवा णं**इत्यादिसूत्राणि षट्, तत्र त्रिभिः स्थानैः स्त्रीवेदादिभि-**र्निर्वर्त्तितान्** अर्जितान् **पुद्गलान् पापकर्म्मतया** अशुभकर्म्मत्वेनोत्तरोत्तराशुभाध्य-

वसायत**श्चितवन्तः** आसकलनत एव**मुपचितवन्तः** परिपोषणत एवं **बद्धवन्तो** निर्मापणतः **उदीरितवन्तः** अध्यवसायवशेनानुदीर्णोदयप्रवेशनतः **वेदितवन्तः** अनुभवनतः **निर्जरितवन्तः** प्रदेशपरिशाटनतः, सङ्ग्रहणीगाथार्द्धमत्र– **एवं चिण उवचिण बंध उदीर वेय तह निज्जरा चेव** त्ति **एव**मिति यथैकं कालत्रयाभिलापेनोक्तं तथा सर्वाण्यपीति ।

[सू० २३४] तिपतेसिता खंधा अणंता पण्णत्ता, एवं जाव तिगुणलुक्खा पोग्गला अणंता पन्नत्ता ।

॥ तिट्ठाणं समत्तं ॥

[**टी०**] कर्म्म च पुद्गलात्मकमिति पुद्गलस्कन्धान् प्रति त्रिस्थानकमाह– **तिपएसिए**त्यादि स्पष्टमिति, सर्वसूत्रेषु व्याख्यातशेषं कण्ठ्यमिति ॥

॥ त्रिस्थानकस्य चतुर्थोद्देशकः समाप्तः ॥

इति श्रीमत्तपागच्छाधिराजभट्टारकपुरन्दरसूरीश्वर**श्रीविजयसेनसूरि**राज्ये
श्रीमत्तपागच्छशृंगारहारसूरीश्वर**श्रीविजयदेवसूरि**यौवराज्ये
पण्डित**श्रीकुशलवर्धनगणि**शिष्यनगर्षिगणिना स्ववाचनपरोपकारकृते
कृतोद्धाररूपयां श्रीसकलवाचकशिरोमणिमहोपाध्यायश्रीविमलहर्षगणिभिः
संशोधितायां सुखावबोधायां श्रीस्थानाङ्गदीपिकायां
त्रिस्थानकाख्यं तृतीयमध्ययनं
समाप्तम्।

अथ चतुर्थमध्ययनं चतुःस्थानकम् ।

[प्रथम उद्देशकः ।]

[सू० २३५] चत्तारि अंतकिरियाओ पन्नत्ताओ, तंजहा-

तत्थ खलु इमा पढमा अंतकिरिया- अप्पकम्मपच्चायाते यावि भवति, से णं मुंडे भवित्ता अगारातो अणगारितं पव्वतिते संजमबहुले संवरबहुले समाहिबहुले लूहे तीरट्ठी उवहाणवं दुक्खक्खवे तवस्सी, तस्स णं णो तहप्पगारे तवे भवति, णो तधप्पगारा वेयणा भवति, तधप्पगारे पुरिसजाते दीहेणं परितातेणं सिज्झति बुज्झति मुच्चति परिणिव्वाति सव्वदुक्खाणमंतं करेइ, जहा से भरहे राया चाउरंतचक्कवट्टी, पढमा अंतकिरिया १।

अहावरा दोच्चा अंतकिरिया- महाकम्मपच्चायाते यावि भवति, से णं मुंडे भवित्ता अगाराओ अणगारितं पव्वतिते संजमबहुले संवरबहुले जाव उवधाणवं दुक्खक्खवे तवस्सी, तस्स णं तहप्पगारे तवे भवति, तहप्पगारा वेयणा भवति, तहप्पगारे पुरिसजाते निरुद्धेणं परितातेणं सिज्झति जाव अंतं करेति, जहा से गतसूमाले अणगारे, दोच्चा अंतकिरिया २।

अहावरा तच्चा अंतकिरिया- महाकम्मपच्चायाते यावि भवति, से णं मुंडे भवित्ता अगारातो अणगारियं पव्वतिते, जहा दोच्चा, नवरं दीहेणं परितातेणं सिज्झति जाव सव्वदुक्खाणमंतं करेति, जहा से सणंकुमारे राया चाउरंतचक्कवट्टी, तच्चा अंतकिरिया ३।

अहावरा चउत्था अंतकिरिया- अप्पकम्मपच्चायाते यावि भवति, से णं मुंडे भवित्ता जाव पव्वतिते संजमबहुले जाव तस्स णं णो तहप्पगारे तवे भवति, णो तहप्पगारा वेयणा भवति, तहप्पगारे पुरिसजाते णिरुद्धेणं परितातेणं सिज्झति जाव सव्वदुक्खाणमंतं करेति, जहा सा मरुदेवा भगवती, चउत्था अंतकिरिया ४।

[टी०] व्याख्यातं तृतीयमध्ययनम्, अधुना सङ्ख्याक्रमसंबद्धमेव चतुःस्थानकाख्यं चतुर्थमारभ्यते, अस्य चायं पूर्वेण सह विशेषसम्बन्धः- अनन्तराध्ययने विचित्रा

जीवाजीवद्रव्यपर्याया उक्ता इहापि त एवोच्यन्ते, इत्यनेन सम्बन्धेनायातस्यास्य चतुरुद्देशकस्य चतुरनुयोगद्वारस्य सूत्रानुगमे प्रथमोद्देशकादिसूत्रमेतत्- **चत्तारि अंतकिरियेत्यादि** ।

अस्य चायमभिसम्बन्धः– अनन्तरोद्देशकस्योपान्त्यसूत्रे कर्म्मणश्चयाद्युक्तमिह तु कर्म्मणस्तत्कार्यस्य वा भवस्यान्तक्रियोच्यत इति । अथवा **श्रुतं मयाऽऽयुष्मता भगवतैवमाख्यातम्** [**सू०१**] इत्यभिधाय यत्तदाख्यातं तदभिहितं तथेदमपरं तेनैवाख्यातं यत्तदुच्यत इत्येवंसम्बन्धस्यास्य व्याख्या– **अन्तक्रिया** भवस्यान्तकरणम्, तत्र यस्य न तथाविधं तपो नापि परीषहादिजनिता तथाविधा वेदना दीर्घेण च प्रव्रज्यापर्यायेण सिद्धिर्भवति तस्यैका १, यस्य तु तथाविधे तपोवेदने अल्पेनैव च प्रव्रज्यापर्यायेण सिद्धिः स्यात् तस्य द्वितीया २, यस्य च प्रकृष्टे तपोवेदने दीर्घेण च पर्यायेण सिद्धिस्तस्य तृतीया ३, यस्य पुनरविद्यमानतथाविधतपोवेदनस्य ह्रस्वपर्यायेण सिद्धिस्तस्य चतुर्थीति, अन्तक्रियाया एकस्वरूपत्वेऽपि सामग्रीभेदात् चातुर्विध्यमिति समुदायार्थः ।

अवयवार्थस्त्वयम्– **चतसृोऽन्तक्रियाः प्रज्ञप्ता** भगवतेति गम्यते, **तत्रेति** सप्तमी निर्द्धारणे, तासु चतसृषु मध्ये इत्यर्थः, **खलु**र्वाक्यालङ्कारे, **इयम**नन्तरं वक्ष्यमाणत्वेन प्रत्यक्षासन्ना **प्रथमा**, इतरापेक्षया आद्या अन्तक्रिया, इह कश्चित् पुरुषः देवलोकादौ यात्वा ततोऽल्पैः स्तोकैः **कर्म्मभिः** करणभूतैः **प्रत्यायातः** प्रत्यागतो मानुषत्वम् इति **अल्पकर्म्मप्रत्यायातो** य इति गम्यते, अथवा एकत्र जनित्वा ततोऽल्पकर्मा सन् यः प्रत्यायातः स तथा, लघुकर्मतयोत्पन्न इत्यर्थः, **च**कारो वक्ष्यमाणमहाकर्म्मापेक्षया समुच्चयार्थः, **अपि**ः सम्भावने, सम्भाव्यतेऽयमपि पक्ष इत्यर्थः, **भवति** स्यात्, **स** इति असौ, **णं** वाक्यालङ्कारे, **मुण्डो भूत्वा** द्रव्यतः शिरोलोचेन भावतो रागाद्यपनयनेन **अगाराद्** द्रव्यतो गेहाद्भावतः संसाराभिनन्दिनां देहिनामावासभूतादविवेकगेहाद् निष्क्रम्येति गम्यते, [**अनगारिताम्**, अगारी गृही असंयतः, तत्प्रतिषेधा**दनगारी** संयतः, तद्भावस्तत्ता, तां साधुतामित्यर्थः,] **प्रव्रजितः** प्रगतः, प्राप्त इत्यर्थः, किंभूत इत्याह **संजमबहुले** त्ति **संयमेन** पृथिव्यादिसंरक्षणलक्षणेन **बहुल**ः प्रचुरो यः स तथा, संयमो वा बहुलो यस्य स तथा, एवं **संवरबहुलो**ऽपि, नवरमाश्रवनिरोधः संवरः,

अथवा इन्द्रिय-कषायनिग्रहादिभेदः, एवं च संयमबहुलग्रहणं प्राणातिपातविरतेः प्राधान्यख्यापनार्थम्, यतः–

एक्कं चिय एत्थ वयं निद्दिट्ठं जिणवरेहिं सव्वेहिं ।
पाणाइवायविरमणमवसेसा तस्स रक्खट्ठा ॥१॥ [ ] इति ।

एतच्च द्वितयमपि रागाद्युपशमयुक्तचित्तवृत्तेर्भवति, अत आह– **समाधिबहुलः**, समाधिस्तु प्रशमवाहिता ज्ञानादिर्वा, समाधिः पुनर्निःस्नेहस्यैव भवतीत्याह– **लूहे** रूक्षः शरीरे मनसि च द्रव्य-भावस्नेहवर्जितत्वेन परुषः, लूषयति वा कर्म्ममलमपनयतीति **लूषः**, कथमसावेवं संवृत्त इत्याह– यतः **तीरट्ठी, तीरं** पारं भवार्णवस्यार्थयत इत्येवंशीलस्तीरार्थी तीरस्थायी वा तीरस्थितिरिति वा प्राकृतत्वात् **तीरट्ठी**ति, अत एवाह **उवहाणवं** ति उपधीयते उपष्टभ्यते श्रुतमनेनेति **उपधानं** श्रुतविषयस्तपउपचार इत्यर्थः, तद्वान्, अत एव **दुक्खक्खवे** त्ति दुःखम् असुखं तत्कारणत्वाद्वा कर्म्म तत् क्षपयतीति **दुःखक्षपः**, कर्म्मक्षपणं च तपोहेतुकमित्यत आह– **तवस्सी**ति, तपोऽभ्यन्तरं कर्म्मेन्धनदहनज्वलनकल्पमनवरतशुभध्यानलक्षणमस्ति यस्य स **तपस्वी, तस्स णं** ति यश्चैवंविधस्तस्य, **णं** वाक्यालङ्कारे, **नो तथाप्रकारम्** अत्यन्तघोरं **वर्द्धमान**जिनस्येव **तपः** अनशनादि भवति, तथा **नो तथाप्रकारा** अतिघोरैवोपसर्गादिसम्पाद्या **वेदना** दुःखासिका भवति, अल्पकर्म्मप्रत्यायातत्वादिति, ततश्च **तत्तथाप्रकार**-मल्पकर्म्मप्रत्यायातादिविशेषणकलापोपेतं **पुरुषजातं** पुरुषप्रकारो **दीर्घेण** बहुकालेन **पर्यायेण** प्रव्रज्यालक्षणेन करणभूतेन **सिध्यति** अणिमादियोगेन निष्ठितार्थो वा विशेषतः सिद्धिगमनयोग्यो वा भवति, सकलकर्म्मनायकमोहनीयघातात्, ततो घातिचतुष्टयघातेन **बुध्यते** केवलज्ञानभावात् समस्तवस्तूनि, ततो **मुच्यते** भवोपग्राहिकर्म्मभिः, ततः **परिनिर्व्वाति** सकलकर्म्मकृतविकारव्यतिकरनिराकरणेन शीतीभवतीति, किमुक्तं भवतीत्याह– **सर्वदुःखानामन्तं करोति**, शारीर-मानसानामित्यर्थः, अतथाविधतपोवेदनो दीर्घेणापि पर्यायेण किं कोऽपि सिद्धः ? इति शङ्कापनोदार्थमाह– **जहा से** इत्यादि, यथाऽसौ प्रथमजिनप्रथमनन्दनो नन्दनशताग्रजन्मा **भरतो** राजा, चत्वारोऽन्ताः पर्यन्ताः पूर्व-दक्षिण-पश्चिमसमुद्र-हिमवल्लक्षणा यस्याः पृथिव्याः सा चतुरन्ता, तस्या अयं

स्वामित्वेनेति **चातुरन्तः**, स चासौ **चक्रवर्त्ती** चेति स तथा, स हि प्राग्भवे लघूकृतकर्म्मा **सर्वार्थसिद्ध**विमानाच्च्युत्वा चक्रवर्त्तितयोत्पद्य राज्यावस्थ एव केवलमुत्पाद्य कृतपूर्वलक्षप्रव्रज्यः अतथाविधतपोवेदन एव सिद्धिमुपगत इति प्रथमान्तक्रियेति १ ।

अहावरे त्ति(ति?) **अथ** अनन्तर**मपरा** पूर्वापेक्षया याऽन्या द्वितीयस्थानेऽभिधानात् **द्वितीया** महाकर्म्मभिः गुरुकर्म्मभि**र्महाकर्मा** सन् प्रत्यायातः प्रत्याजातो वा यः स तथा, **तस्स ण**मिति, **तस्य** महाकर्म्मप्रत्याजातत्वेन तत्क्षपणाय तथाप्रकारं घोरं तपो भवति, एवं वेदनाऽपि, कर्मोदयसम्पाद्यत्वादुपसर्गादीनामिति, **निरुद्धेने**ति अल्पेन, यथाऽसौ **गजसुकुमारो विष्णु**लघुभ्राता, स हि भगवतोऽ**रिष्टनेमि**जिननाथस्यान्तिके प्रव्रज्यां प्रतिपद्य श्मशाने कृतकायोत्सर्गलक्षणमहातपाः शिरोनिहितजाज्वल्यमाना-ऽङ्गारजनितात्यन्तवेदनोऽल्पेनैव पर्यायेण सिद्धवानिति, शेषं कण्ठ्यम् २ ।

अहावरेत्यादि कण्ठ्यम्, यथाऽसौ **सनत्कुमार** इति चतुर्थचक्रवर्त्ती, स हि महातपा महावेदनश्च सरोगत्वात् दीर्घतरपर्यायेण सिद्धः, तद्भवे सिद्धयभावेन भवान्तरे सेत्स्यमानत्वादिति ३ ।

अहावरेत्यादि कण्ठ्यम्, यथाऽसौ **मरुदेवी** प्रथमजिनजननी, सा हि स्थावरत्वेऽपि क्षीणप्रायकर्म्मत्वेनाल्पकर्मा अविद्यमानतपोवेदना च सिद्धा, गजवरारूढाया एवायुःसमाप्तौ सिद्धत्वादिति ४। एतेषां च दृष्टान्त-दार्ष्टान्तिकानामर्थानां न सर्वथा साधर्म्यमन्वेषणीयम्, देशदृष्टान्तत्वादेषाम्, यतो मरुदेव्या **मुण्डे भवित्ते**त्यादिविशेषणानि कानिचिन्न घटन्ते, अथवा फलतः सर्वसाधर्म्यमपि मुण्डनादिकार्यस्य सिद्धत्वस्य सिद्धत्वादिति ।

[सू० २३६] चत्तारि रुक्खा पन्नत्ता, तंजहा- उन्नते णाममेगे उन्नते १, उन्नते णाममेगे पणते २, पणते णाममेगे उन्नते ३, पणते नाममेगे पणते ४,१ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- उन्नत्ते नाममेगे उन्नते तहेव, जाव पणते नाममेगे पणते, २।

चत्तारि रुक्खा पन्नत्ता, तंजहा- उन्नते नाममेगे उन्नतपरिणते १, उण्णते नाममेगे पणतपरिणते २, पणते णाममेगे उन्नतपरिणते ३, पणए नाममेगे पणयपरिणए ४,३ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- उन्नते

नाममेगे उन्नतपरिणते,चउभंगो ४, ४।

चत्तारि रुक्खा पन्नत्ता, तंजहा- उन्नते णाममेगे उन्नतरूवे, तहेव चउभंगो ४, ५ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- उन्नते नामं० ४, ६।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा- उन्नते नाममेगे उन्नतमणे, उन्न० ४, ७ । एवं संकप्पे ८, पन्ने ९, दिट्ठी १०, सीलाचारे ११, ववहारे १२, परक्कमे १३, एगे पुरिसजाए, पडिवक्खो नत्थि ।

चत्तारि रुक्खा पन्नत्ता, तंजहा- उज्जू नाममेगे उज्जू, उज्जू नाममेगे वंके, चउभंगो ४, १४ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- उज्जू नाममेगे ४, १५ । एवं जहा उन्नतपणतेहिं गमो तहा उज्जुवंकेहि वि भाणियव्वो जाव परक्कमे २६ ।

[टी०] पुरुषविशेषाणामन्तक्रियोक्ता, अधुना तेषामेव स्वरूपनिरूपणाय दृष्टान्तदार्ष्टान्तिकसूत्राणि षड्विंशतिमाह– **चत्तारि रुक्खे**त्यादि कण्ठ्यम्, किन्तु **वृश्च्यन्ते** छिद्यन्ते इति **वृक्षाः**, ते विवक्षया **चत्वारः प्रज्ञप्ता** भगवता, तत्र **उन्नतः** उच्चो द्रव्यतया, **नामे**ति सम्भावने वाक्यालङ्कारे वा, **एकः** कश्चिद् वृक्षविशेषः, स च पुन**रुन्नतो** जात्यादिभावेनाऽशोकादिरित्येको भङ्गः, **उन्नतो नाम** द्रव्यत एव **एकः** अन्यः **प्रणतो** जात्यादिभावैर्हीनो निम्बादिरित्यर्थः इति द्वितीयः, **प्रणतो नामै**को द्रव्यतः खर्व्व इत्यर्थः, स एव **उन्नतो** जात्यादिना भावेनाशोकादिरिति तृतीयः, **प्रणतो** द्रव्यत एव खर्व्वः स एव **प्रणतो** जात्यादिहीनो निम्बादिरिति चतुर्थः, अथवा पूर्वमु**न्नतः** तुङ्गः अधुनाऽप्यु**न्नतस्तु**ङ्ग एवेत्येवं कालापेक्षया चतुर्भङ्गीति १, **एव**मित्यादि, **एवमेव** वृक्षव**च्चत्वारि पुरुषजातानि** पुरुषप्रकारा अनगारा अगारिणो वा, उन्नतः पुरुषः कुलैश्वर्यादिभिर्लौकिकगुणैः शरीरेण वा गृहस्थपर्याये, पुनरु**न्नतो** लोकोत्तरैर्ज्ञानादिभिः प्रव्रज्यापर्याये, अथवा उन्नत उत्तमभवत्वेन पुनरुन्नतः शुभगतित्वेन **कामदेवा**दिवदित्येकः, **तहेव** त्ति वृक्षसूत्रमिवेदम्, **जाव** त्ति यावत् **पणए नामं एगे पणए** त्ति चतुर्थभङ्गकस्तावद् वाच्यम्, तत्र उन्नतस्तथैव प्रणतस्तु ज्ञान-विहारादिहीनतया दुर्गतिगमनाद्वा, शिथिलत्वे **शैलक**राजर्षिवत् **ब्रह्मदत्त**वद्वेति द्वितीयः, तृतीयः पुनरागतसंवेगः **शैलक**वत् **मेतार्य**वद्वा,

चतुर्थ **उदायिनृपमारक**वत् **कालशौकरिक**वद्वेति २ ।

एवं दृष्टान्त-दार्ष्टान्तिकसूत्रे सामान्यतोऽभिधाय तद्विशेषसूत्राण्याह– **उन्नतः** तुङ्गतया **एको** वृक्षः **उन्नतपरिणतः** अशुभरसादिरूपमनुन्नतत्वमपहाय शुभरसादिरूपोन्नततया परिणत इत्येकः, द्वितीये भङ्गे **प्रणतपरिणत** उक्तलक्षणोन्नतत्वत्यागात्, एतदनुसारेण तृतीय-चतुर्थौ वाच्यौ । विशेषसूत्रता चास्य पूर्वमुन्नतत्व-प्रणतत्वे सामान्येनाभिहिते इह तु पूर्वावस्थातोऽवस्थान्तरगमनेन विशेषिते इति, एवं दार्ष्टान्तिकेऽपि परिणतसूत्रमवगन्तव्यमिति ४ ।

परिणामश्चाऽऽकार-बोध-क्रियाभेदात् त्रिधा, तत्राऽऽकारमाश्रित्य रूपसूत्रम्, तत्र उन्नतरूपः संस्थाना-ऽवयवादिसौन्दर्यात् ५ । गृहस्थपुरुषोऽप्येवम्, प्रव्रजितस्तु संविग्नसाधुनेपथ्यधारीति ६ ।

बोधपरिणामापेक्षाणि चत्वारि सूत्राणि, तत्र **उन्नतो** जात्यादिगुणैरुच्चतया वा **उन्नतमनाः** प्रकृत्या औदार्यादियुक्तमनाः, एवमन्येऽपि त्रयः ७। **एव**मिति सङ्कल्पादिसूत्रेषु चतुर्भङ्गिकातिदेशोऽकारि लाघवार्थम्, **सङ्कल्पो** विकल्पो मनोविशेष एव विमर्श इत्यर्थः, उन्नतत्वं चास्यौदार्यादियुक्ततया सदर्थविषयतया वा ८ । प्रकृष्टं ज्ञानं **प्रज्ञा**, सूक्ष्मार्थविवेचकत्वमित्यर्थः, तस्याश्चोन्नतत्वमविसंवादितया ९। तथा **दर्शनं** दृष्टिः चक्षुर्ज्ञानं नयमतं वा, तदुन्नतत्वमप्यविसंवादितयैवेति १० ।

क्रियापरिणामापेक्षमतः सूत्रत्रयम्, तत्र **शीलाचारः**, शीलं समाधिस्तत्प्रधानस्तस्य वाऽऽचारः अनुष्ठानं शीलेन वा स्वभावेनाचार इति, उन्नतत्वं चास्यादूषणतया, **वाचनान्तरे** तु शीलसूत्रमाचारसूत्रं च भेदेनाधीयत इति ११, **व्यवहारः** अन्योन्यदान-ग्रहणादिर्विवादो वा, उन्नतत्वमस्य श्लाघ्यत्वेनेति १२ । **पराक्रमः** पुरुषकारविशेषः परेषां वा शत्रूणामाक्रमणम्, तस्योन्नतत्वमप्रतिहतत्वेन शोभनविषयत्वेन चेति १३, उन्नतविपर्ययः सर्वत्र प्रणतत्वं भावनीयमिति, **एगे पुरिसे**त्यादि, एतेषु मनःप्रभृतिषु सप्तसु चतुर्भङ्गिकासूत्रेषु एक एव पुरुषजातालापकोऽध्येतव्यः, **प्रतिपक्षो** द्वितीयपक्षो दृष्टान्तभूतः वृक्षसूत्रं **नास्ति**, नाध्येतव्यमिति यावत्, इह मनःप्रभृतीनां दार्ष्टान्तिकपुरुषधर्माणां दृष्टान्तभूत-वृक्षेष्वसम्भवादिति ।

उज्जु त्ति **ऋजुः** अवक्रो **नामे**ति पूर्ववदेकः कश्चिद् वृक्षः तथा **ऋजुः** अविपरीतस्वभाव औचित्येन फलादिसम्पादनादित्येकः, द्वितीये द्वितीयं पदं **वङ्क** इति वक्रः, फलादौ विपरीतः, तृतीये प्रथमपदं **वक्रः** कुटिलः, चतुर्थः सुज्ञानः, अथवा पूर्वम् ऋजुरवक्रः, पश्चादपि ऋजुः अवक्रोऽथवा मूले ऋजुरन्ते च ऋजुरित्येवं चतुर्भङ्गी कार्येत्येष दृष्टान्तः १, पुरुषस्तु ऋजुः अवक्रो बहिस्तात् शरीरगति-वाक्-चेष्टादिभिस्तथा ऋजुरन्तर्निर्म्मायत्वेन सुसाधुवदित्येकः, तथा ऋजुस्तथैव **वङ्क** इति तु वक्रः अन्तर्मायित्वेन कारणवशप्रयुक्तार्जवभावदुःसाधुवदिति द्वितीयः, तृतीयस्तु कारणवशाद्दर्शितबहिरनार्जवोऽन्तर्निर्माय इति प्रवचनगुप्तिरक्षाप्रवृत्तसाधुवदिति, चतुर्थ उभयतो वक्रः, तथाविधशठवदिति, कालभेदेन वा व्याख्येयम् २ ।

अथ ऋजु– ऋजुपरिणत इत्यादिका एकादश चतुर्भङ्गिका लाघवार्थमतिदेशेनाह– **एव**मित्यनेन ऋजुर्नाम ऋजुरित्यादिनोपदर्शितक्रमभङ्गकक्रमेण **यथे**ति येन प्रकारेण, परिणत-रूपादिविशेषणनवकविशेषिततयेत्यर्थः, **उन्नत-प्रणताभ्यां** परस्परं प्रतिपक्षभूताभ्यां **गमः** सदृशपाठः कृतः, **तथा** तेन प्रकारेण परिणत-रूपादिविशेषिताभ्यामित्यर्थः, **ऋजुवक्राभ्यामपि भणितव्यः**, कियान् स इत्याह– **जाव परक्कमे** त्ति, ऋजुवक्रवृक्षसूत्रात् त्रयोदशसूत्रं यावदित्यर्थः, तत्र च ऋजु २ ऋजुपरिणत २ ऋजुरूप २ लक्षणानि षट् सूत्राणि वृक्षदृष्टान्त-पुरुषदार्ष्टान्तिकस्वरूपाणि, शेषाणि तु मनःप्रभृतीनि सप्त अदृष्टान्तानीति १३ ।

[सू० २३७] पडिमापडिवन्नस्स णमणगारस्स कप्पंति चत्तारि भासातो भासित्तए, तंजहा- जायणी, पुच्छणी, अणुन्नवणी, पुट्ठस्स वागरणी ।

[सू० २३८] चत्तारि भासाजाता पन्नत्ता, तंजहा- सच्चमेगं भासजातं, बीतियं मोसं, ततियं सच्चमोसं, चउत्थं असच्चमोसं ४ ।

[टी०] पुरुषविचार एवेदमाह– **पडिमे**त्यादि स्फुटम्, परं **प्रतिमा** भिक्षुप्रतिमा द्वादश समयप्रसिद्धास्ताः **प्रतिपन्नः** अभ्युपगतवान् यस्तस्य, याच्यतेऽनयेति **याचनी** पानकादेः **दाहिसि मे एत्तो अन्नतरं पाणगजाय** [ ]मित्यादिसमयप्रसिद्धक्रमेण, तथा **प्रच्छनी** मार्गादेः

कथञ्चित् सूत्रार्थयोर्वा, तथा **अनुज्ञापनी** अवग्रहस्य, तथा पृष्टस्य केनाप्यर्थादेर्**व्याकरणी** प्रतिपादनीति ।

भाषाप्रस्तावाद् भाषाभेदानाह– [**चत्तारि भासे**त्यादि,] **जातम्** उत्पत्तिधर्म्मकम्, तच्च व्यक्तिवस्तु, अतो **भाषाया जातानि** व्यक्तिवस्तूनि भेदाः प्रकाराः **भाषाजातानि**, तत्र सन्तो मुनयो गुणाः पदार्था वा, तेभ्यो हितं **सत्यमेकं** प्रथमं सूत्रक्रमापेक्षया, भाष्यते सा तया वा भाषणं वा **भाषा** काययोगगृहीतवाग्योगनिसृष्टभाषाद्रव्यसंहतिः तस्या **जातं** प्रकारो **भाषाजातम्** 'अस्त्यात्मे'त्यादिवत्, **द्वितीयं** सूत्रक्रमादेव **मोसं** ति प्राकृतत्वान्**मृषा** अनृतं 'नास्त्यात्मे'त्यादिवत्, **तृतीयं सत्यमृषा** तदुभयस्वभावम् 'आत्माऽस्त्यकर्त्ते'त्यादिवत्, **चतुर्थमसत्यमृषा** अनुभयस्वभावं 'देही'त्यादिवदिति ।

[सू० २३९] चत्तारि वत्था पन्नत्ता, तंजहा- सुद्धे णामं एगे सुद्धे १, सुद्धे णामं एगे असुद्धे २, असुद्धे णामं एगे सुद्धे ३, असुद्धे णामं एगे असुद्धे ४ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- सुद्धे णामं एगे सुद्धे, चउभंगो ४ । एवं परिणत-रूवे वत्था सपडिवक्खा ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा- सुद्धे णामं एगे सुद्धमणे, चउभंगो ४। एवं संकप्पे जाव परक्कमे ।

[**टी०**] पुरुषभेदनिरूपणायैवेयं त्रयोदशसूत्री **चत्तारि वत्थे**त्यादि स्पष्टा, नवरं **शुद्धं** वस्त्रं निर्मलतन्त्वादिकारणारब्धत्वात् पुनः **शुद्ध**मागन्तुकमलाभावादिति, अथवा पूर्वं शुद्धमासीदिदानीमपि शुद्धमेव, विपक्षौ सुज्ञानावेवेति, अथ दार्ष्टान्तिकयोजना **एवमेवे**त्यादि, **शुद्धो** जात्यादिना पुनः **शुद्धो** निर्म्मलज्ञानादिगुणतया कालापेक्षया वेति **चउभंगो** त्ति चत्वारो भङ्गाः समाहृताः चतुर्भङ्गी चतुर्भङ्गं वा, पुल्लिँङ्गता चात्र प्राकृतत्वात्, तदयमर्थः– वस्त्रवच्चत्वारो भङ्गाः पुरुषेऽपि वाच्या इति । **एव**मिति यथा शुद्धात् शुद्धपदे परे चतुर्भङ्गं सदार्ष्टान्तिकं वस्त्रमुक्तमेवं शुद्धपदप्राक्पदे परिणतपदे रूपपदे च चतुर्भङ्गानि वस्त्राणि **सपडिवक्ख** त्ति सप्रतिपक्षाणि सदार्ष्टान्तिकानि वाच्यानीति, तथाहि– 'चत्तारि वत्था पन्नत्ता, तंजहा– सुद्धे नामं एगे सुद्धपरिणए' चतुर्भङ्गी, **एवमि**त्यादि

पुरुषजातसूत्रचतुर्भङ्गी। 'एवं सुद्धे नामं एगे सुद्धमणे' चतुर्भङ्गी, एवं पुरुषेणापि, व्याख्या तु पूर्ववत् ।

चत्तारीत्यादि, शुद्धो बहिः, शुद्धमना अन्तः, एवं शुद्धसङ्कल्पः शुद्धप्रज्ञः शुद्धदृष्टिः शुद्धशीलाचारः शुद्धव्यवहारः शुद्धपराक्रम इति वस्त्रवर्जाः पुरुषा एव चतुर्भङ्गवन्तो वाच्याः, व्याख्या च प्रागिवेति, अत एवाह– **एव**मित्यादि ।

[सू० २४०] चत्तारि सुता पन्नत्ता, तंजहा- अतिजाते अणुजाते अवजाते कुलिंगाले ।

[टी०] पुरुषभेदाधिकार एवेदमाह– **चत्तारि सुते**त्यादि । **सुताः** पुत्राः **अइजाए** त्ति पितुः सम्पदमतिलङ्घ्य **जातः** संवृत्तोऽतिक्रम्य वा तां **यातः** प्राप्तो विशिष्टतरसम्पदम्, समृद्धतर इत्यर्थः, इत्यतिजातोऽतियातो वा, **ऋषभवत्** । तथा **अणुजाए** त्ति अनुरूपः, सम्पदा पितुस्तुल्यो जातोऽ**नुजातः**, पितृसम इत्यर्थः, **महायशो**वत्, **आदित्ययशसा** पित्रा तुल्यत्वात्तस्य । तथा **अवजाए** त्ति अप इत्यपसदो हीनः पितुः सम्पदो जातोऽ**पजातः**, पितुः सकाशादीषद्धीनगुण इत्यर्थः, **आदित्ययशो**वत्, **भरता**पेक्षया तस्य हीनत्वात् । तथा **कुलिंगाले** त्ति कुलस्य स्वगोत्रस्याङ्गार इवाङ्गारो दूषकत्वादुपतापकत्वाद्वेति **कण्डरीक**वत्, एवं शिष्यचातुर्विध्यमप्यवसेयम्, **सुत**शब्दस्य शिष्येष्वपि प्रवृत्तिदर्शनात्, तत्रातिजातः **सिंहगिर्य**पेक्षया **वैरस्वामि**वत्, अनुजातः **शय्यंभवा**पेक्षया **यशोभद्र**वत्, अपजातो **भद्रबाहु**स्वाम्यपेक्षया **स्थूलभद्र**वत्, कुलाङ्गारः **कूलवालक**वदुदायिनृपमारकवद्वेति।

[सू० २४१] चत्तारि पुरिसजाता पन्नत्ता, तंजहा- सच्चे नामं एगे सच्चे, सच्चे नामं एगे असच्चे ४, एवं परिणते जाव परक्कमे ।

चत्तारि वत्था पन्नत्ता, तंजहा- सुती नामं एगे सुती, सुई नामं एगे असुई, चउभंगो ४। एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- सुती णामं एगे सुती, चउभंगो । एवं जहेव सुद्धेणं वत्थेणं भणितं तहेव सुतिणा वि, जाव परक्कमे ।

[टी०] तथा **चत्तारी**त्यादि, **सत्यो** यथावद्वस्तुभणनाद् यथाप्रतिज्ञातकरणाच्च, पुनः

सत्यः संयमित्वेन सद्भ्यो हितत्वाद्, अथवा पूर्वं सत्य आसीदिदानीमपि सत्य एवेति चतुर्भङ्गी । एवंप्रकारसूत्राण्यतिदिशन्नाह – **एव**मित्यादि व्यक्तम्, नवरमेवं सूत्राणि– 'चत्तारि पुरिसजाया पं० तं०–सच्चे नामं एगे सच्चपरिणए ४, एवं सच्चरूवे ४, सच्चमणे ४, सच्चसंकप्पे ४, सच्चपन्ने ४, सच्चदिट्ठी ४, सच्चसीलायारे ४, सच्चववहारे ४, सच्चपरक्कमे' त्ति ४ ।

पुरुषाधिकार एवेदमपरमाह– **चत्तारि वत्थे**त्यादि, **शुचि** पवित्रं स्वभावेन, पुनः **शुचि** संस्कारेण कालभेदेन वेति, पुरुषचतुर्भङ्ग्यां शुचिः पुरुषोऽपूतिशरीरतया पुनः शुचिः स्वभावेनेति । 'सुइपरिणए सुइरूवे' इत्येतत् सूत्रद्वयं दृष्टान्त-दार्ष्टान्तिकोपेतम्, **सुइमणे** इत्यादि च पुरुषमात्राश्रितमेव सूत्रसप्तकमतिदिशन्नाह– **एव**मित्यादि कण्ठ्यम्।

[सू० २४२] चत्तारि कोरवा पन्नत्ता, तंजहा- अंबपलंबकोरवे तालपलंबकोरवे वल्लिपलंबकोरवे मेंढविसाणकोरवे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा- अंबपलंबकोरवसमाणे तालपलंबकोरवसमाणे वल्लिपलंबकोरवसमाणे मेंढविसाणकोरवसमाणे ।

[टी०] पुरुषाधिकार एवेदमपरमाह– **चत्तारि कोरवे**त्यादि, तत्र **आम्रः** चूतः, तस्य **प्रलम्बः** फलम्, तस्य **कोरकं** तन्निष्पादकं मुकुलम् **आम्रप्रलम्बकोरकम्**, एवमन्येऽपि, नवरं **तालो** वृक्षविशेषः, **वल्ली** कालिङ्ग्यादिका, **मेंढविषाणा** मेषशृङ्गसमानफला वनस्पतिजातिः, आउलिविशेष इत्यर्थः, तस्याः कोरकमिति विग्रहः, एतान्येव चत्वारि दृष्टान्ततयोपात्तानीति **चत्वारी**त्युक्तम्, न तु चत्वार्येव लोके कोरकाणि, बहुतरोपलम्भादिति, **एवे**त्यादि सुगमम्, नवरमुपनय एवम्– यः पुरुषः सेव्यमान उचितकाले उचितमुपकारफलं जनयत्यसावाम्रप्रलम्बकोरकसमानः, यस्त्वतिचिरेण सेवकस्य कष्टेन महदुपकारफलं करोति स तालप्रलम्बकोरकसमानः, यस्तु अक्लेशेनाचिरेण च ददाति स वल्लीप्रलम्बकोरकसमानः, यस्तु सेव्यमानोऽपि शोभनवचनान्येव ब्रूते उपकारं तु न कञ्चन करोति स मेण्ढविषाणकोरकसमानः, तत्कोरकस्य सुवर्णवर्णत्वादखाद्यफलदायकत्वाच्चेति ।

[सू० २४३] चत्तारि घुणा पन्नत्ता, तंजहा- तयक्खाते, छल्लिक्खाते,

कट्ठक्खाते, सारक्खाते । एवामेव चत्तारि भिक्खागा पन्नत्ता, तंजहा- तयक्खायसमाणे जाव सारक्खातसमाणे । तयक्खातसमाणस्स णं भिक्खागस्स सारक्खातसमाणे तवे पण्णत्ते, सारक्खायसमाणस्स णं भिक्खागस्स तयक्खातसमाणे तवे पण्णत्ते, छल्लिक्खायसमाणस्स णं भिक्खागस्स कट्ठक्खायसमाणे तवे पण्णत्ते, कट्ठक्खायसमाणस्स णं भिक्खागस्स छल्लिक्खायसमाणे तवे पण्णत्ते ।

[टी०] पुरुषाधिकार एव घुणसूत्रम्– **त्वचं** बाह्यवल्कं खादतीति **त्वक्खादः**, एवं शेषा अपि, नवरं **छल्लि** त्ति अभ्यन्तरं वल्कम्, **काष्ठं** प्रतीतम्, **सारः** काष्ठमध्यमिति दृष्टान्तः, **एवमेवे**त्याद्युपनयसूत्रम्, भिक्षणशीला भिक्षणधर्माणो भिक्षणे साधवो वा **भिक्षाकाः**, त्वक्खादेन घुणेन समानोऽत्यन्तं सन्तोषितया आयामाम्लादि-प्रान्ताहारभक्षकत्वात् त्वक्खादसमानः, एवं छल्लीखादसमानोऽलेपाहारकत्वात्, काष्ठखादसमानो निर्विकृतिकाहारतया, सारखादसमानः सर्वकामगुणाहारत्वादिति । एतेषां चतुर्णामपि भिक्षाकाणां तपोविशेषाभिधानसूत्रं **तयक्खाये**त्यादि सुगमम्, केवलमयं भावार्थः– त्वक्कल्पासाराहाराभ्यवहर्त्तुर्निरभिष्वङ्गत्वात् कर्म्मभेदमङ्गीकृत्य वज्रसारं तपो भवतीत्यतोऽपदिश्यते **सारक्खायसमाणे तवे** त्ति, सारखादघुणस्य सारखादत्वादेव समर्थत्वात् वज्रतुण्डत्वाच्चेति । सारखादसमानस्योक्तलक्षणस्य साभिष्वङ्गतया त्वक्खादसमानं कर्म्मसारभेदं प्रत्यसमर्थं तपः स्यात्, त्वक्खादकघुणस्य हि त्वक्खादकत्वादेव सारभेदनं प्रत्यसमर्थत्वादिति। तथा छल्लीखादघुणसमानस्य भिक्षाकस्य त्वक्खादघुणसमानापेक्षया किञ्चिद्विशिष्टभोजित्वेन किञ्चित्साभिष्वङ्गत्वात् सारखाद-काष्ठखादघुणसमानापेक्षया त्वसारभोजित्वेन निरभिष्वङ्गत्वाच्च कर्मभेदं प्रति काष्ठखादघुणसमानं तपः प्रज्ञप्तम्, नातितीव्रम्, सारखादघुणवत्, नाप्यतिमन्दादि, त्वक्छल्लीखादघुणवदिति भावः, तथा काष्ठखादघुणसमानस्य साधोः सारखाद-घुणसमानापेक्षया असारभोजित्वेन निरभिष्वङ्गत्वात् त्वक्छल्लीखादघुणसमानापेक्षया सारतरभोजित्वेन साभिष्वङ्गत्वाच्च छल्लीखादघुणसमानं तपः प्रज्ञप्तम्, कर्म्मभेदं प्रति न सारखादकाष्ठखादघुणवदतिसमर्थादि नापि त्वक्खादघुणवदतिमन्दमिति भावः,

प्रथमविकल्पे प्रधानतरं तपो द्वितीयेऽप्रधानतरम्, तृतीये प्रधानम्, चतुर्थेऽप्रधानमिति ।

[सू० २४४] चउव्विहा तणवणस्सतिकाइया पन्नत्ता, तंजहा- अग्गबीया, मूलबीया, पोरबीया, खंधबीया ।

[टी०] अनन्तरं वनस्पत्यवयवखादका घुणाः प्ररूपिता इति वनस्पतिमेव प्ररूपयन्नाह– **चउव्विहेत्यादि, वनस्पतिः** प्रतीतः, स एव **कायः** शरीरं येषां ते वनस्पतिकायाः, त एव वनस्पतिकायिकाः, तृणप्रकारा वनस्पतिकायिकास्**तृणवनस्पतिकायिका** बादरा इत्यर्थः, अग्रं बीजं येषां ते **अग्रबीजाः** कोरण्टकादयः, अग्रे वा बीजं येषां तेऽग्रबीजाः व्रीह्यादयः, मूलमेव बीजं येषां ते **मूलबीजाः** उत्पलकन्दादयः, एवं **पर्वबीजा** इक्ष्वादयः, **स्कन्धबीजाः** सल्लक्यादयः, **स्कन्धः** स्थुडमिति, एतानि च सूत्राणि नान्यव्यवच्छेदनपराणि, तेन बीजरुह-सम्मूर्च्छनजादीनां नाभावो मन्तव्यः, सूत्रान्तरविरोधादिति ।

[सू० २४५] चउहिं ठाणेहिं अहुणोववन्ने णेरइए णिरयलोगंसि इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, णो चेव णं संचातेति हव्वमागच्छित्तते । अहुणोववन्ने णेरइए णिरयलोगंसि समुब्भूयं वेयणं वेयमाणे इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, णो चेव णं संचातेति हव्वमागच्छित्तते १। अहुणोववन्ने णेरइए निरयलोगंसि णिरयपालेहिं भुज्जो भुज्जो अहिट्ठिज्जमाणे इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, णो चेव णं संचातेति हव्वमागच्छित्तते २। अहुणोववन्ने णेरइए णिरयवेयणिज्जंसि कम्मंसि अक्खीणंसि अवेतितंसि अणिज्जिन्नंसि इच्छेज्जा [माणुसं लोगं हव्वमागच्छित्तते], नो चेव णं संचाएइ [हव्वमागच्छित्तते] ३। एवं णिरयाउअंसि कम्मंसि अक्खीणंसि जाव णो चेव णं संचातेति हव्वमागच्छित्तते ४। इच्चेतेहिं चउहिं ठाणेहिं अहुणोववन्ने नेरतिते जाव नो चेव णं संचातेति हव्वमागच्छित्तए ४।

[टी०] अनन्तरं वनस्पतिजीवानां चतुःस्थानकमुक्तम्, अधुना जीवसाधर्म्यान्नारक-जीवानाश्रित्य तदाह– **चउही**त्यादि सुगमम्, केवलं **ठाणेहिं** ति कारणैः, **अहुणोववन्ने** त्ति **अधुनोपपन्नः** अचिरोपपन्नः, **निर्गतमयं** शुभमस्मादिति निरयो नरकः, तत्र भवो

नैरयिकः, तस्य चानन्योत्पत्तिस्थानतां दर्शयितुमाह– **निरयलोके**, तस्मादिच्छेन्मानुषाणामयं **मानुषस्तं लोकं** क्षेत्रविशेषं **हव्वं** शीघ्रमागन्तुम्, **नो चेव** त्ति नैव, **णं** वाक्यालङ्कारे, **संचाएइ** सम्यक् शक्नोति आगन्तुम् । **समुब्भूयं** ति समुद्भूताम् अतिप्रबलतयोत्पन्नाम्, पाठान्तरेण **सम्मुखभूताम्** एकहेलोत्पन्नाम्, पाठान्तरेणामहतो महतो भवनं महद्भूतम्, तेन सह या सा **समहद्भूता** ताम्, **समहोद्भूतां** वा **वेदनां** दुःखरूपां **वेदयमानः** अनुभवन् **इच्छेदि**ति मनुष्यलोकागमनेच्छायाः कारणम् १, एतदेव चाशकनस्य, तीव्रवेदनाभिभूतो हि न शक्त आगन्तुमिति । तथा **निरयपालैः** अम्बादिभिः **भूयो भूयः** पुनः पुन**रधिष्ठीयमानः** समाक्रम्यमाणः **आगन्तुमिच्छे**दित्यागमनेच्छाकारणमेतदेव चागमनाशक्तिकारणम्, तैरत्यन्ताक्रान्तस्यागन्तुमशक्तत्वादिति २, तथा निरये **वेद्यते** अनुभूयते यत् निरययोग्यं वा यद्वेदनीयं त**न्निरयवेदनीयम्** अत्यन्ताशुभनामकर्म्मादि असातवेदनीयं वा तत्र कर्म्मणि **अक्षीणे** स्थित्या **अवेदिते** अननुभूतानुभागतया **अनिर्जीर्णे** जीवप्रदेशेभ्योऽपरिशटिते **इच्छेत् मानुषं लोकमागन्तुं न च शक्नोति**, अवश्यवेद्यकर्म्मनिगड-नियन्त्रितत्वादित्यागमनाशकन एव कारणमिति ३, तथा **एव**मिति 'अहुणोववन्ने' इत्याद्यभिलापसंसूचनार्थम्, **निरयायुष्के कर्म्मणि अक्षीणे यावत्**करणात् 'अवेइए' इत्यादि दृश्यमिति ४, निगमयन्नाह– **इच्चेएहिं** ति, **इति** एवंप्रकारै**रेतैः** प्रत्यक्षैरनन्तरोक्तत्वादिति ।

[सू० २४६] कप्पंति णिग्गंथीणं चत्तारि संघाडीओ धारित्तए वा परिहरित्तते वा, तंजहा- एगं दुहत्थवित्थारं, दो तिहत्थवित्थाराओ, एगं चउहत्थवित्थारं।

[टी०] अनन्तरं नारकस्वरूपमुक्तम्, ते चासंयमोपष्टम्भकपरिग्रहादुत्पद्यन्त इति तद्विपक्षभूतं परिग्रहविशेषं चतुःस्थानकेऽवतारयन्नाह– **कप्पंती**त्यादि, **कल्पन्ते** युज्यन्ते निर्गता ग्रन्थाद् बन्धहेतोर्हिरण्यादेर्मिथ्यात्वादेश्चेति **निर्ग्रन्थ्यः** साध्व्यस्तासां **सङ्घाट्यः** उत्तरीयविशेषरूपा **धारयितुं वा** परिग्रहे **परिहर्त्तुं** वा परिभोक्तुमिति, **द्वौ हस्तौ विस्तारः** पृथुत्वं यस्याः सा तथा, **कल्पन्त** इति क्रियापेक्षया कर्तृत्वात् संघाटीनाम्, **एगं दुहत्थवित्थारं, एगं चउहत्थवित्थारं** ति प्रथमा स्यात्तदर्थे च प्राकृतत्वात् द्वितीयोक्ता, धारयन्ति परिभुञ्जते वेति प्रत्ययपरिणामेन वा क्रियानुस्मृतेः द्वितीयैव, तत्र प्रथमा उपाश्रये

भोग्या, त्रिहस्तविस्तारयोरेका भिक्षागमने द्वितीया विचारभूमिगमने, चतुर्थी समवसरणे।

[सू० २४७] चत्तारि झाणा पन्नत्ता, तंजहा- अट्टे झाणे, रोद्दे झाणे, धम्मे झाणे, सुक्के झाणे ।

अट्टे झाणे चउव्विहे पन्नत्ते, तंजहा- अमणुन्नसंपओगसंपउत्ते तस्स विप्पओगसतिसमण्णागते यावि भवति १, मणुन्नसंपओगसंपउत्ते तस्स अविप्पओगसतिसमण्णागते यावि भवति २, आतंकसंपओगसंपउत्ते तस्स विप्पओगसतिसमण्णागते यावि भवति ३, परिजुसितकामभोगसंपओगसंपउत्ते तस्स अविप्पओगसतिसमण्णागते यावि भवति ४ । अट्टस्स णं झाणस्स चत्तारि लक्खणा पन्नत्ता, तंजहा- कंदणता, सोतणता, तिप्पणता, परिदेवणता।

रोद्दे झाणे चउव्विहे पन्नत्ते, तंजहा- हिंसाणुबंधि, मोसाणुबंधि, तेणाणुबंधि, सारक्खणाणुबंधि । रोद्दस्स णं झाणस्स चत्तारि लक्खणा पन्नत्ता, तंजहा- ओसण्णदोसे, बहुदोसे, अन्नाणदोसे, आमरणंतदोसे ।

धम्मे झाणे चउव्विहे चउप्पदोयारे पन्नत्ते, तंजहा- आणाविजते, अवायविजते, विवागविजते, संठाणविजते । धम्मस्स णं झाणस्स चत्तारि लक्खणा पन्नत्ता, तंजहा- आणारुई, णिसग्गरुई, सुत्तरुई, ओगाढरुई । धम्मस्स णं झाणस्स चत्तारि आलंबणा पन्नत्ता, तंजहा- वायणा, पडिपुच्छणा, परियट्टणा, अणुप्पेहा। धम्मस्स णं झाणस्स चत्तारि अणुप्पेहाओ पन्नत्ताओ, तंजहा- एगाणुप्पेहा, अणिच्चाणुप्पेहा, असरणाणुप्पेहा, संसाराणुप्पेहा ।

सुक्के झाणे चउव्विहे चउप्पओआरे पन्नत्ते, तंजहा- पुहत्तवितक्के सवियारी १, एगत्तवितक्के अवियारी २, सुहुमकिरिए अणियट्टी ३, समुच्छिन्नकिरिए अप्पडिवाती ४। सुक्कस्स णं झाणस्स चत्तारि लक्खणा पन्नत्ता, तंजहा- अव्वहे, असम्मोहे, विवेगे, विउस्सग्गे । सुक्कस्स णं झाणस्स चत्तारि *आलंबणा पन्नत्ता, तंजहा- खंती, मुत्ती, मद्दवे, अज्जवे । सुक्कस्स णं* झाणस्स चत्तारि अणुप्पेहाओ पन्नत्ताओ, तंजहा- अणंतवत्तियाणुप्पेहा,

विप्परिणामाणुप्पेहा, असुभाणुप्पेहा, अवायाणुप्पेहा ।

[टी०] नारकत्वं ध्यानविशेषाद्,ध्यानविशेषार्थमेव च संघाट्यादिपरिग्रह इति ध्यानं प्रकरणत आह, **चत्तारि** त्ति सुगमं चैतत्, नवरं ध्यातयो **ध्यानानि**, अन्तर्मुहूर्त्तमात्रं कालं चित्तस्थिरतालक्षणानि, उक्तं च–

अंतोमुहुत्तमित्तं चित्तावत्थाणमेगवत्थुम्मि ।
छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ॥ [ध्यानश० ३] त्ति ।

तत्र ऋतं दुःखं तस्य निमित्तं तत्र वा भवं ऋते वा पीडिते भव**मार्त्तं ध्यानं** दृढोऽध्यवसायः, हिंसाद्यतिक्रौर्यानुगतं **रौद्रम्**, श्रुत-चरणधर्म्मादनपेतं **धर्म्यम्**, शोधयत्यष्टप्रकारं कर्म्ममलं शुचं वा क्लमयतीति **शुक्लम्** । **चउव्विहे** त्ति चतस्रो **विधा** भेदा यस्य तत्तथा, **अमनोज्ञस्य** अनिष्टस्य, **असमणुन्नस्स** त्ति पाठान्तरे **अस्वमनोज्ञस्य** अनात्मप्रियस्य शब्दादिविषयस्य तत्साधनवस्तुनो वा **सम्प्रयोगः** सम्बन्धस्तेन **सम्प्रयुक्तः** सम्बद्धः अमनोज्ञसम्प्रयोगसम्प्रयुक्तः अस्वमनोज्ञसम्प्रयोग-सम्प्रयुक्तो वा, य इति गम्यते, **तस्ये**ति अमनोज्ञशब्दादे**र्विप्रयोगाय** विप्रयोगार्थं **स्मृतिः** चिन्ता तां **समन्वागतः** समनुप्राप्तो भवति यः प्राणी सोऽभेदोपचारादार्त्तमिति, **चापी**ति शब्द उत्तरविकल्पापेक्षया समुच्चयार्थः, अथवा अमनोज्ञसम्प्रयोगसम्प्रयुक्तो यः प्राणी तस्य प्राणिनः **विप्रयोगे** प्रक्रमादमनोज्ञशब्दादिवस्तूनां वियोजने **स्मृतिः** चिन्तनम्, तस्याः **समन्वागतं** समागमनं समन्वाहारो विप्रयोगस्मृतिसमन्वागतम्, **चापी**ति तथैव, **भवति** आर्त्तध्यानमिति प्रक्रमः, इति प्रथमम्, एवमुत्तरत्रापि, नवरं **मनोज्ञं** वल्लभं धन-धान्यादि, **अविप्रयोगः** अवियोग इति द्वितीयमार्त्तमिति । तथा **आतङ्को** रोग इति तृतीयम् ।

तथा **परिजुसिय** त्ति निषेविताः ये **कामाः** कमनीयाः **भोगाः** शब्दादयः, अथवा **कामौ** शब्द-रूपे **भोगाः** गन्ध-रस-स्पर्शाः **कामभोगाः**, कामानां वा शब्दादीनां यो भोगस्तैस्तेन वा **सम्प्रयुक्तः**, पाठान्तरे तु तेषां तस्य वा **सम्प्रयोग**स्तेन **सम्प्रयुक्तो** यः स तथा, अथवा **परिझुसिय** त्ति परिक्षीणो जरादिना स चासौ **कामभोगसम्प्रयुक्तश्च** यस्तस्य तेषामेवा**ऽविप्रयोगस्मृतेः समन्वागतं** समन्वाहारः, तदपि भवत्यार्त्तं ध्यानमिति

चतुर्थम् । द्वितीयं वल्लभधनादिविषयं चतुर्थं तत्सम्पाद्यशब्दादिभोगविषयमिति भेदोऽनयोर्भावनीयः, शास्त्रान्तरे तु द्वितीय-चतुर्थयोरेकत्वेन तृतीयत्वम्, चतुर्थं तु तत्र निदानमुक्तम्, उक्तं च–

अमणुन्नाणं सद्दाइविसयवत्थूण दोसमइलस्स । वस्तूनि शब्दादिसाधनानि, **दोसो** त्ति द्वेषः।
धणियं वियोगचिंतणमसंपयोगाणुसरणं च ॥

तह सूल-सीसरोगाइवेयणाए वियोगपणिहाणं ।
तयसंपयोगचिंता तप्पडियाराउलमणस्स ॥

इट्ठाणं विसयाईण वेयणाए य रागरत्तस्स ।
अवियोगज्झवसाणं तह संजोगाभिलासो य ॥

देविंद-चक्कवट्टित्तणाइगुणरिद्धिपत्थणामइयं ।
अहमं नियाणचिंतणमन्नाणाणुगयमच्चंतं ॥ [ध्यानश० ६-९] ति ।

आर्त्तध्यानलक्षणान्याह– लक्ष्यते निर्णीयते परोक्षमपि चित्तवृत्तिरूपत्वादार्त्तध्यानमेभिरिति **लक्षणानि**, तत्र **क्रन्दनता** महता शब्देन विरवणम्, **शोचनता** दीनता, **तेपनता** तिपेः क्षरणार्थत्वादश्रुविमोचनम्, **परिदेवनता** पुनः पुनः क्लिष्टभाषणमिति, एतानि चेष्टवियोगा-ऽनिष्टसंयोग-रोगवेदनाजनितशोकरूपस्यैवार्त्तस्य लक्षणानि, यत आह–

तस्सक्कंदण-सोयण-परिदेवण-ताडणाइं लिंगाइं ।
इट्ठाणिट्ठवियोगा-ऽवियोग-वियणानिमित्ताइं ॥ [ध्यानश० १५] ति ।

निदानस्यान्येषां च लक्षणान्तरमस्ति, आह च–

निंदइ नियकयाइं पसंसइ सविम्हओ विभूतीओ ।
पत्थेइ तासु रज्जइ तयज्जणपरायणो होइ ॥ [ध्यानश० १६] त्ति ।

अथ रौद्रध्यानभेदा उच्यन्ते, **हिंसाणु०** त्ति **हिंसां** सत्त्वानां वध-बन्धनादिभिः प्रकारैः पीडा**मनुबध्नाति** सततप्रवृत्तां करोतीत्येवंशीलं यत् प्रणिधानं हिंसानुबन्धो वा यत्रास्ति त**द्धिंसानुबन्धि** रौद्रध्यानम् इति प्रक्रम इति, उक्तं च–

सत्तवहवेहबंधणडहणंकणमारणाइपणिहाणं ।
अइकोहग्गहघत्थं णिग्घिणमणसोऽहमविवागं ॥ [ध्यानश० १९] ति ।

तथा **मृषा** असत्यम्, तदनुबध्नाति पिशुना-ऽसभ्याऽसद्भूतादिभिर्वचनभेदैस्त-न्मृषानुबन्धि, आह च–

पिसुणा-ऽसब्भा-ऽसब्भूय-भूयघायाइवयणपणिहाणं ।
मायाविणोऽतिसंधणपरस्स पच्छन्नपावस्स ॥ [ध्यानश० २०] त्ति ।

तथा **स्तेनस्य** चौरस्य कर्म्म **स्तेयं** तीव्रक्रोधाद्याकुलतया तदनुबन्धवत् **स्तेयानुबन्धि**, आह च–

तह तिव्वकोह-लोहाउलस्स भूतोवघायणमणज्जं ।
परदव्वहरणचित्तं परलोगावायनिरवेक्खं ॥ [ध्यानश० २१] ति ।

संरक्षणे सर्वोपायैः परित्राणे विषयसाधनधनस्यानुबन्धो यत्र तत् **संरक्षणानुबन्धि**, यदाह–

सद्दाइविसयसाहणधणसंरक्खणपरायणमणिट्ठं ।
सव्वाहिसंकण-परोवघायकलुसाउलं चित्तं ॥ [ध्यानश० २२] ति ।

अथैतल्लक्षणान्युच्यन्ते– **ओसन्नदोसे** त्ति हिंसादीनामन्यतरस्मिन् **ओसन्नं** प्रवृत्तेः प्राचुर्यं बाहुल्यं यत् स एव दोषः, अथवा **ओसन्नं** ति बाहुल्येनानुपरतत्वेन **दोषो** हिंसादीनां चतुर्णामन्यतर **ओसन्नदोषः**, तथा **बहुष्वपि** सर्वेष्वपि हिंसादिषु **दोषः** प्रवृत्तिलक्षणो **बहुदोषः**, **बहुर्वा** बहुविधो हिंसानृतादिरिति **बहुदोषः**, तथा **अज्ञानात्** कुशास्त्रसंस्कारात् हिंसादिष्वधर्मस्वरूपेषु नरकादिकारणेषु धर्म्मबुद्ध्याऽभ्युदयार्थं या प्रवृत्तिस्तल्लक्षणो दोषोऽ**ज्ञानदोषः**, अथवा उक्तलक्षणमज्ञानमेव दोषोऽ**ज्ञानदोष** इति, अन्यत्र **नानाविधदोष** इति पाठस्तत्र **नानाविधेषु** त्वक्तक्षणादिषु हिंसाद्युपायेषु **दोषो**ऽसकृत्प्रवृत्तिरिति **नानाविधदोष** इति, तथा मरणमेवान्तो मरणान्तः, आ मरणान्ता**दामरणान्तम्** असञ्जातानुतापस्य **कालसौकरिकादे**रिव या हिंसादिषु प्रवृत्तिः सैव दोष **आमरणान्तदोषः** ।

अथ **धर्म्यं चतुर्विधमि**ति स्वरूपेण, **चतुर्षु पदेषु** स्वरूप-लक्षणा-ऽऽलम्बना-ऽनुप्रेक्षालक्षणेष्**ववतारो** विचारणीयत्वेन यस्य त**च्चतुष्पदावतारम्**, चतुर्विधस्यैव पर्यायो वाऽयमिति, क्वचित् **चउप्पडोयार**मिति पाठस्तत्र **चतुर्षु** पदेषु **प्रत्यवतारो** यस्येति

विग्रह इति। **आणाविजए** त्ति **आ** अभिविधिना ज्ञायन्तेऽर्था यया साऽऽज्ञा प्रवचनम्, सा विचीयते निर्णीयते पर्यालोच्यते वा यस्मिंस्त**दाज्ञाविचयं** धर्म्मध्यानमिति, प्राकृतत्वेन **विजय**मिति, आज्ञा वा विजीयते अधिगमद्वारेण परिचिता क्रियते यस्मिन्नि**त्याज्ञा-विजयम्**, एवं शेषाण्यपि, नवरम् **अपाया** रागादिजनिताः प्राणिनामैहिकामुष्मिका अनर्थाः, **विपाकः** फलं कर्म्मणां ज्ञानाद्यावारकत्वादि, **संस्थानानि** लोक-द्वीप-समुद्र-जीवादीनामिति, आह च–

आप्तवचनं प्रवचनमाज्ञा विचयस्तदर्थनिर्णयनम्।
आश्रव-विकथा-गौरव-परीषहाद्यैरपायस्तु॥
अशुभ-शुभकर्म्मपाकानुचिन्तनार्थो विपाकविचयः स्यात्।
द्रव्य-क्षेत्राकृत्यनुगमनं संस्थानविचयस्तु॥ [प्रशम० २४८-२४९] इति।

एतल्लक्षणान्याह– **आणारुइ** त्ति **आज्ञा** सूत्रव्याख्यानं **निर्युक्त्या**दि तत्र तया वा **रुचिः** श्रद्धानम् **आज्ञारुचिः**, एवमन्यत्रापि, नवरं **निसर्गः** स्वभावोऽनुपदेशस्तेन, तथा **सूत्रम्** आगमः तत्र तस्माद्वा, तथा अवगाहन**मवगाढम्** द्वादशाङ्गावगाहो विस्ताराधिगम इति सम्भाव्यते, तेन **रुचिः**, अथवा **ओगाढ** त्ति साधुप्रत्यासन्नीभूतस्तस्य साधूपदेशाद् **रुचिः**, उक्तं च–

आगमउवएसेणं निसग्गओ जं जिणप्पणीयाणं।
भावाणं सद्दहणं धम्मज्झाइस्स तं लिंगं॥ [ध्यानश० ६७] ति।

तत्त्वार्थश्रद्धानरूपं सम्यक्त्वं धर्मस्य लिङ्गमिति हृदयम्। धर्मस्यालम्बनान्युच्यन्ते, धर्मध्यानसौधारोहणार्थमा**लम्ब्यन्त** इत्यालम्बनानि, वाचनं **वाचना** विनेयाय निर्जरायै सूत्रदानादि, तथा शङ्किते सूत्रादौ शङ्कापनोदाय गुरोः प्रच्छनं **प्रतिप्रच्छना**, **प्रति**शब्दस्य धात्वर्थमात्रार्थत्वादिति, तथा पूर्वाधीतस्यैव सूत्रादेरविस्मरण-निर्जरार्थमभ्यासः **परिवर्त्तने**ति, अनुप्रेक्षण**मनुप्रेक्षा** सूत्रार्थानुस्मरणमिति।

अथानुप्रेक्षा उच्यन्ते– **अन्वि**ति ध्यानस्य पश्चात् **प्रेक्षणानि** पर्यालोचनान्यनुप्रेक्षाः, तत्र–

एकोऽहं न च मे कश्चिन्नाहमन्यस्य कस्यचित्।
न तं पश्यामि यस्याहं नासौ भावीति यो मम॥ [ ]

इत्येवमात्मन एकस्य **एकाकिनो**ऽसहायस्याऽ**नुप्रेक्षा** भावना **एकानुप्रेक्षा** । तथा–

कायः सन्निहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्व्वमुत्पादि भङ्गुरम् ॥ [ ]

इत्येवं जीवितादेरनित्यस्यानुप्रेक्षा **अनित्यानुप्रेक्षे**ति, तथा

जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥ [प्रशम० १५२]

एव**मशरणस्य** अत्राणस्यात्मनोऽनुप्रेक्षा **अशरणानुप्रेक्षे**ति, तथा–

माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ॥ [प्रशम० १५६]

इत्येवं संसारस्य चतसृषु गतिषु सर्वावस्थासु संसरणलक्षणस्यानुप्रेक्षा **संसारा-नुप्रेक्षे**ति ।

अथ शुक्लमाह– **पुहत्तवियक्के** त्ति **पृथक्त्वेन** एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन, **पृथुत्वेन** वा विस्तीर्णभावेनेत्यन्ये, **वितर्को** विकल्पः पूर्वगतश्रुतालम्बनो नानानयानुसरणलक्षणो यस्मिंस्तत्तथा, पूज्यैस्तु वितर्कः श्रुतालम्बनतया श्रुतमित्यु-पचारादधीत इति, तथा विचरणम् अर्थाद् व्यञ्जने व्यञ्जनादर्थे तथा मनःप्रभृतीनां योगानामन्यतरस्मादन्यतरस्मिन्निति विचारो **विचारोऽर्थव्यञ्जनयोगसङ्क्रान्तिः [तत्त्वार्थ० ९।४६]** इति वचनात्, सह विचारेण सविचारि, सर्वधनादित्वादिन्समासान्तः, उक्तं च–

उप्पायठितिभंगाइं पज्जयाणं जमेगदव्वम्मि ।
नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ॥
सवियारमत्थवंजणजोगंतरओ तयं पढमसुक्कं ।
होति पुहुत्तवियक्कं सवियारमरागभावस्स ॥ [ध्यानश० ७७-७८]

इत्येको भेदः । तथा **एगत्तवियक्के** त्ति **एकत्वेन** अभेदेनोत्पादादिपर्यायाणा-मन्यतमैकपर्यायालम्बनतयेत्यर्थो **वितर्कः** पूर्वगतश्रुताश्रयो व्यञ्जनरूपोऽर्थरूपो वा यस्य तदे**कत्ववितर्कम्**, तथा न विद्यते विचारोऽर्थ-व्यञ्जनयोरितरस्मादितरत्र तथा मनःप्रभृतीनामन्यतरस्मादन्यत्र सञ्चरणलक्षणो निवातगृहगतप्रदीपस्येव यस्य तदविचारीति पूर्ववदिति, उक्तं च–

जं पुण सुनिप्पकंपं निवायसरणप्पईवमिव चित्तं ।
उप्पायठिइभंगाइयाणमेगम्मि पज्जाए ॥
अवियारमत्थवंजणजोगंतरओ तयं बिइयसुक्कं ।
पुव्वगयसुयालंबणमेगत्तवियक्कमवियारं ॥ [ध्यानश० ७९-८०] इति द्वितीयः ।

तथा **सुहुमकिरिए** त्ति निर्वाणगमनकाले केवलिनो निरुद्धमनोवाग्योगस्यार्द्ध-निरुद्धकाययोगस्यैतद्, अतः सूक्ष्मा क्रिया कायिकी उच्छ्वासादिका यस्मिंस्तत्तथा, न निवर्त्तते न व्यावर्त्तत इत्येवंशील**मनिवर्त्ति** प्रवर्द्धमानतरपरिणामादिति तृतीयः ।

तथा, **समुच्छिन्नकिरिए** त्ति समुच्छिन्ना क्षीणा क्रिया कायिक्यादिका शैलेशीकरणे निरुद्धयोगत्वेन यस्मिंस्तत्तथा, **अप्पडिवाए** त्ति अनुपरतिस्वभावमिति चतुर्थः, आह हि–

तस्सेव य सेलेसीगयस्स सेलो व्व निप्पकंपस्स ।
वोच्छिन्नकिरियमप्पडिवाई झाणं परमसुक्कं ॥ [ध्यानश० ८२] ति ।

इह चान्त्ये शुक्लभेदद्वये अयं क्रमः– केवली किलान्तर्मुहुर्त्तभाविनि परमपदे, भवोपग्राहिकर्म्मसु च वेदनीयादिषु समुद्घाततो निसर्गेण वा समस्थितिषु सत्सु योगनिरोधं करोति, तत्र च–

पज्जत्तमेत्तसन्निस्स जत्तियाइं जहन्नजोगिस्स ।
होंति मणोदव्वाइं तव्वावारो य जम्मेत्तो ॥
तदसंखगुणविहीणे समए समए निरुंभमाणो सो ।
मणसो सव्वनिरोहं कुणइ असंखेज्जसमएहिं ॥
पज्जत्तमेत्तबेंदियजहन्नवइजोगपज्जया जे उ ।
तदसंखगुणविहीणे समए समए निरुंभंतो ॥
सव्ववइजोगरोहं संखातीएहिं कुणइ समएहिं ।
तत्तो अ सुहुमपणगस्स पढमसमओववन्नस्स ॥
जो किर जहन्नजोगो तदसंखेज्जगुणहीणमेक्केक्के ।
समए निरुंभमाणो देहतिभागं च मुंचंतो ॥
रुंभइ स काययोगं संखातीतेहिं चेव समएहिं ।
तो कयजोगनिरोहो सेलेसीभावणामेइ ॥ [विशेषाव० ३०५९-३०६४]

शैलेशस्येव मेरोरिव या स्थिरता सा शैलेशीति,

हूस्सक्खराइं मज्झेण जेण कालेण पंच भन्नंति ।
अच्छइ सेलेसिगओ तत्तियमेत्तं तओ कालं ॥
तणुरोहारंभाओ झायइ सुहुमकिरियाणियट्टिं सो ।
वोच्छिन्नकिरियमप्पडिवाइं सेलेसिकालम्मि ॥ [विशेषाव० ३०६८-३०६९] इति ।

अथ शुक्लध्यानलक्षणान्युच्यन्ते– **अव्वहे** त्ति देवादिकृतोपसर्गादिजनितं भयं चलनं वा व्यथा, तस्या अभावो **अव्यथम्**, तथा देवादिकृतमायाजनितस्य सूक्ष्मपदार्थविषयस्य च संमोहस्य मूढताया निषेधा**दसम्मोहः**, तथा देहादात्मन आत्मनो वा सर्वसंयोगानां विवेचनं बुद्ध्या पृथक्करणं **विवेकः**, तथा निःसङ्गतया देहोपधित्यागो **व्युत्सर्ग** इति। अत्र विवरणगाथे–

चालिज्जइ बीहेइ व धीरो न परीसहोवसग्गेहिं १ ।
सुहुमेसु न संमुज्झइ भावेसु न देवमायासु २ ॥
देहविवित्तं पेच्छइ अप्पाणं तह य सव्वसंजोगे ३ ।
देहोवहिवुस्सग्गं निस्संगो सव्वहा कुणइ ४ ॥ [ध्यानश० ९१-९२] त्ति ।

आलम्बनसूत्रं व्यक्तम्, तत्र गाथा–

अह खंतिमद्दवज्जवमुत्तीओ जिणमयप्पहाणाओ ।
आलंबणाइं जेहि उ सुक्कज्झाणं समारुहइ ॥ [ध्यानश० ६९] त्ति ।

अथ तदनुप्रेक्षा उच्यन्ते– **अणंतवत्तियाणुप्पेह** त्ति **अनन्ता** अत्यन्तं प्रभूता **वृत्तिः** वर्त्तनं यस्यासावनन्तवृत्तिः, अनन्ततया वा वर्त्तत इत्यनन्तवर्त्ती, तद्भावस्तत्ता, भवसन्तानस्येति गम्यते, तस्या अनुप्रेक्षा अनन्तवृत्तितानुप्रेक्षा अनन्तवर्त्तितानुप्रेक्षा वेति, यथा–

एस अणाई जीवो संसारो सागरो व्व दुत्तारो ।
नारय-तिरिय-नरा-ऽमरभवेसु परिहिंडए जीवो ॥ [ ] इति ।

एवमुत्तरत्रापि समासः, नवरं **विपरिणामे** त्ति विविधेन प्रकारेण परिणमनं विपरिणामो वस्तूनामिति गम्यते, यथा–

सव्वट्ठाणाइं असासयाइं इह चेव देवलोगे य ।
सुरअसुरनराईणं रिद्धिविसेसा सुहाइं च ॥ [मरण० प्रकी० ५७५]

असुभे त्ति अशुभत्वं संसारस्येति गम्यते, यथा–

धी संसारो जम्मि जुयाणओ परमरूवगव्वियओ ।
मरिऊण जायइ किमी तत्थेव कडेवरे नियए ॥ [मरण० प्रकी० ६००]

तथा **अवाये** त्ति **अपाया** आश्रवाणामिति गम्यते, यथा–

कोहो य माणो य अणिग्गहीया माया य लोभो य पवड्ढमाणा ।
चत्तारि एए कसिणा कसाया सिंचंति मूलाइं पुणब्भवस्स ॥ [दशवै० ८।४०]

[सू० २४८] चउव्विहा देवाण ठिती पन्नत्ता, तंजहा- देवे णामेगे १, देवसिणाते नामेगे २, देवपुरोहिते नामेगे ३, देवपज्जलणे नामेगे ४।

चउव्विधे संवासे पन्नत्ते, तंजहा- देवे णामेगे देवीए सद्धिं संवासं गच्छेज्जा, देवे णामेगे छवीते सद्धिं संवासं गच्छेज्जा, छवी णामेगे देवीए सद्धिं संवासं गच्छेज्जा, छवी णामेगे छवीते सद्धिं संवासं गच्छेज्जा ।

[टी०] ध्यानाद् देवत्वमपि स्यादतो देवस्थितिसूत्रम्, **स्थितिः** क्रमो मर्यादा राजामात्यादिमनुष्यस्थितिवदेव । **देवः** सामान्यो **नामे**ति वाक्यालङ्कारे **एकः** कश्चित्, **स्नातकः** प्रधानः, देव एव देवानां वा स्नातक इति विग्रहः, एवमुत्तरत्रापि, नवरं **पुरोहितः** शान्तिकर्म्मकारी, **पज्जलणे** त्ति प्रज्वलयति दीपयति वर्णवादकरणेन मागधवदिति **प्रज्वलन** इति ।

देवस्थितिप्रस्तावात् तद्विशेषभूतसंवाससूत्रम्, एतच्च व्यक्तम्, किन्तु **संवासो** मैथुनार्थं संवसनम्, **छवि** त्ति त्वक्, तद्योगादौदारिकशरीरं तद्वती नारी तिरश्ची वा तद्वान्नरस्तिर्यङ् वा **छवि**रित्युच्यते ।

[सू० २४९] चत्तारि कसाया पन्नत्ता, तंजहा-कोधकसाए, माणकसाए, मायाकसाए, लोभकसाए । एवं णेरइयाणं जाव वेमाणियाणं २४ ।

चउपतिट्ठिए कोधे पन्नत्ते, तंजहा-आतपतिट्ठिए, परपतिट्ठिए, तदुभय-पतिट्ठिए, अपतिट्ठिए । एवं णेरइयाणं जाव वेमाणियाणं २४ । एवं जाव लोभे वेमाणियाणं २४ ।

चउहिं ठाणेहिं कोधुप्पत्ती सिता, तंजहा-खेत्तं पडुच्चा, वत्थुं पडुच्चा, सरीरं पडुच्चा, उवहिं पडुच्चा । एवं णेरइयाणं जाव वेमाणियाणं २४ ।

एवं जाव लोभे वेमाणियाणं २४ ।

चउव्विधे कोधे पन्नत्ते, तंजहा-अणंताणुबंधिकोधे, अपच्चक्खाणे कोधे, पच्चक्खाणावरणे कोधे, संजलणे कोधे । एवं नेरइयाणं जाव वेमाणियाणं २४ । एवं जाव लोभे वेमाणियाणं २४ ।

चउव्विहे कोधे पन्नत्ते, तंजहा-आभोगणिव्वत्तिते, अणाभोगणिव्वत्तिते, उवसंते, अणुवसंते । एवं नेरइयाणं जाव वेमाणियाणं २४ । एवं जाव लोभे जाव वेमाणियाणं २४ ।

[टी०] अनन्तरं संवास उक्तः, स च वेदलक्षणमोहोदयादिति मोहविशेषभूत-कषायप्रकरणमाह– **चत्तारि कसाये**त्यादि, तत्र कृषन्ति विलिखन्ति कर्म्मक्षेत्रं सुखदुःखफलयोग्यं कुर्व्वन्ति कलुषयन्ति वा जीवमिति निरुक्तिविधिना कषायाः,

अथवा कषति हिनस्ति देहिन इति कषं कर्म्म भवो वा, तस्याऽऽया लाभहेतुत्वात् कषं वा आययन्ति गमयन्ति देहिन इति कषायाः, उक्तं च–

कम्मं कसं भवो वा कसमाओ सिं जओ कसायातो ।
कसमाययंति व जओ गमयंति कसं कसाय त्ति ॥ [विशेषाव० १२२८, २९७८] त्ति ।

तत्र क्रोधनं क्रुध्यति वा येन स क्रोधः क्रोधमोहनीयोदयसम्पाद्यो जीवस्य परिणतिविशेषः क्रोधमोहनीयकर्मैव वेति, एवमन्यत्रापि, नवरं जात्यादिगुणवानहमेवेत्येवं मननम् अवगमनं मन्यते वाऽनेनेति मानः, तथा मानं हिंसनं वञ्चनमित्यर्थो मीयते वाऽनयेति माया, तथा **लोभनम्** अभिकाङ्क्षणं लुभ्यते वाऽनेनेति लोभः ।

एवमिति यथा सामान्यतश्चत्वारः कषायास्तथा विशेषतो नारकाणामसुराणां यावच्चतुर्विंशतितमे पदे वैमानिकानामिति ।

चउप्पइट्ठिए त्ति चतुर्षु आत्मपरोभयतदभावेषु प्रतिष्ठितः **चतुःप्रतिष्ठितः**, तत्र **आयपइट्ठिए** त्ति आत्मापराधेनैहिकापायदर्शनादात्मविषय **आत्मप्रतिष्ठितः**, परेणा-क्रोशादिनोदीरितः परविषयो वा **परप्रतिष्ठितः**, आत्म-परविषय **उभयप्रतिष्ठितः**, आक्रोशादिकारणनिरपेक्षः केवलं क्रोधवेदनीयोदयाद् यो भवति सोऽ**प्रतिष्ठितः**, उक्तं च–

सापेक्षाणि च निरपेक्षाणि च कर्म्माणि फलविपाकेषु ।

सोपक्रमं च निरुपक्रमं च दृष्टं यथाऽऽयुष्कम् ॥ [ ] इति ।

अयं च चतुर्थभेदो जीवप्रतिष्ठितोऽपि आत्मादिविषयेऽनुत्पन्नत्वादप्रतिष्ठित उक्तः, न तु सर्वथा अप्रतिष्ठितः, चतुःप्रतिष्ठितत्वस्याभावप्रसङ्गादिति । एकेन्द्रिय-विकलेन्द्रियाणां कोपस्यात्मादिप्रतिष्ठितत्वं पूर्वभवे तत्परिणामपरिणतमरणेनोत्पन्नानामिति । एवं मान-माया-लोभैर्दण्डकत्रयमपरमध्येतव्यमिति । **क्षेत्रं** नारकादीनां ४ स्वं स्वमुत्पत्तिस्थानं **प्रतीत्य** आश्रित्य, एवं **वस्तु** सचेतनादि ३ **वास्तु** वा गृहम्, **शरीरं** दुःसंस्थितं विरूपं वा, **उपधिर्यद्यस्योपकरणम्**, एकेन्द्रियादीनां भवान्तरापेक्षयेति, एवं मानादिभिरपि दण्डकत्रयम् ।

अनन्तं भवमनुबध्नाति अविच्छिन्नं करोतीत्येवंशीलोऽ**नन्तानुबन्धी** अनन्तो वाऽनुबन्धोऽस्येत्य**नन्तानुबन्धी** ।

न विद्यते प्रत्याख्यानम् अणुव्रतादिरूपं यस्मिन् सोऽप्रत्याख्यानो देशविरत्यावारकः, प्रत्याख्यानम् **आ** मर्यादया सर्वविरतिरूपमेवेत्यर्थो **वृणोती**ति **प्रत्याख्यानावरणः**, **सञ्ज्वलयति** दीपयति सर्वसावद्यविरतिमपीन्द्रियार्थसम्पाते वा **सञ्ज्वलति** दीप्यत इति **सञ्ज्वलनः** यथाख्यातचारित्रावारकः, एवं मान-माया-लोभेष्वप्यनन्तानुबन्ध्यादि-भेदचतुष्टयमध्येतव्यमिति, एषां निरुक्तिः पूज्यैरियमुक्ता–

अनन्तान्यनुबध्नन्ति यतो जन्मानि भूतये ।
अतोऽनन्तानुबन्ध्याख्या क्रोधाद्याद्येषु दर्शिता ॥
नाल्पमप्युत्सहेद्येषाम् प्रत्याख्यानमिहोदयात् ।
अप्रत्याख्यानसंज्ञाऽतो द्वितीयेषु निवेशिता ॥
सर्वसावद्यविरतिः प्रत्याख्यानमुदाहृतम् ।
तदावरणसंज्ञाऽतस्तृतीयेषु निवेशिता ॥
शब्दादीन् विषयान् प्राप्य सञ्ज्वलन्ति यतो मुहुः ।
अतः सञ्ज्वलनाह्वानं चतुर्थानामिहोच्यते ॥ [ ] इति ।

एवं मानादिभिरपि दण्डकत्रयम् । **आभोगणिव्वत्तिए** त्ति **आभोगो** ज्ञानं तेन निर्वर्त्तितो *यज्जानन् कोपविपाकादि रुष्यति, इतरस्तु यदजानन्निति*, **उपशान्तः**

अनुदयावस्थः, तत्प्रतिपक्षोऽ**नुपशान्तः**, एकेन्द्रियादीनामाभोगनिर्वर्त्तितः संज्ञिपूर्व-भवापेक्षया, अनाभोगनिर्वर्त्तितस्तु तद्भवापेक्षयाऽपि, उपशान्तो नारकादीनां विशिष्टो-दयाभावात्, अनुपशान्तो निर्विचार एवेति, एवं मानादिभिरपि दण्डकत्रयम् ।

[सू० २५०] जीवा णं चउहिं ठाणेहिं अट्ठ कम्मपगडीओ चिणिंसु, तंजहा-कोहेणं, माणेणं, मायाए, लोभेणं । एवं जाव वेमाणियाणं २ । एवं चिणंति एस दंडओ, एवं चिणिस्संति एस दंडओ, एवमेतेणं तिन्नि दंडगा । एवं उवचिणिंसु उवचिणंति उवचिणिस्संति, बंधिंसु ३, उदीरिंसु ३, वेदेंसु ३, निज्जरेंसु णिज्जरेंति निज्जरिस्संति, जाव वेमाणियाणं । एवमेक्केक्के पदे तिन्नि तिन्नि दंडगा भाणियव्वा जाव निज्जरिस्संति ।

[टी०] इदानीं कषायाणामेव कालत्रयवर्त्तिनः फलविशेषा उच्यन्ते– **जीवा ण**मित्यादि गतार्थम्, नवरं **चयनं** कषायपरिणतस्य कर्म्मपुद्गलोपादानमात्रम्, **उपचयनं** चितस्या-बाधाकालं मुक्त्वा ज्ञानावरणीयादितया निषेकः, स चैवम्– प्रथमस्थितौ बहुतरं कर्म्मदलिकं निषिञ्चति, ततो द्वितीयायां विशेषहीनम्, एवं यावदुत्कृष्टायां विशेषहीनं निषिञ्चति, उक्तं च–

मोत्तूण सगमबाहं पढमाइ ठिईए बहुतरं दव्वं ।
सेसे विसेसहीणं जावुक्कोसंति सव्वेसिं ॥ [कर्मप्र० १।८३] ति ।

बन्धनं तस्यैव ज्ञानावरणीयादितया निषिक्तस्य पुनरपि कषायपरिणतिविशेषान्नि-काचनमिति, **उदीरणम्** अनुदयप्राप्तस्य करणेनाकृष्योदये प्रक्षेपणमिति, **वेदनं** स्थितिक्षयादुदयप्राप्तस्य कर्म्मण उदीरणाकरणेन वोदयभावमुपनीतस्यानुभवनमिति, **निर्जरा** कर्म्मणोऽकर्म्मत्वभवनमिति, इह च देशनिर्जरैव ग्राह्या, सर्वनिर्जरायाश्चतुर्विंशति-दण्डकेऽसम्भवात्, क्रोधादीनां च तदकारणत्वात्, क्रोधादिक्षयस्यैव तत्कारणत्वादिति ।

[सू० २५१] चत्तारि पडिमाओ पन्नत्ताओ, तंजहा-समाहिपडिमा, उवहाणपडिमा, विवेगपडिमा, विउसग्गपडिमा । चत्तारि पडिमाओ पन्नत्ताओ, तंजहा- भद्दा, सुभद्दा, महाभद्दा, सव्वतोभद्दा । चत्तारि पडिमातो पन्नत्ताओ, तंजहा-खुड्डिया मोयपडिमा, महल्लिया मोयपडिमा, जवमज्झा, वइरमज्झा।

[टी०] अनन्तरं निर्जरोक्ता, सा च विशिष्टा प्रतिमाद्यनुष्ठानाद्भवतीति प्रतिमासूत्रत्रयम्, तद् द्विस्थानकाधीतमपीहाधीयते, चतुःस्थानकानुरोधादिति, व्याख्याऽप्यस्य पूर्ववदनुसर्त्तव्या, किन्तु स्मरणाय किञ्चिदुच्यते– **समाधिः** श्रुतं चारित्रं च, तद्विषया **प्रतिमा** प्रतिज्ञा अभिग्रहः **समाधिप्रतिमा**, द्रव्यसमाधिर्वा प्रसिद्धः, तद्विषया प्रतिमा अभिग्रहः **समाधिप्रतिमा**, एवमन्या अपि, नवर**मुपधानं** तपः, **विवेकः** अशुद्धा-ऽतिरिक्तभक्त-पान-वस्त्र-शरीर-तन्मलादित्यागः, **विउसग्गे** त्ति कायोत्सर्गः । तथा पूर्वादिदिक्चतुष्टयाभिमुखस्य प्रत्येकं प्रहरचतुष्टयमानः कायोत्सर्गो **भद्रे**ति, अहोरात्रद्वयेन चास्याः समाप्तिरिति, **सुभद्रा**ऽप्येवंभूतैव सम्भाव्यते, न च दृष्टेति न लिखितेति, एवमेव चाहोरात्रप्रमाणः कायोत्सर्गो **महाभद्रा**, चतुर्भिश्चाहोरात्रैरियं समाप्यते, यस्तु दिग्दशकाभिमुखस्याहोरात्रप्रमाणः कायोत्सर्गः सा **सर्व्वतोभद्रा**, सा च दशभिरहोरात्रैः समाप्यत इति । **मोयप्रतिमा** प्रश्रवणप्रतिज्ञा, सा च क्षुल्लिका या षोडशभक्तेन समाप्यते महती तु याऽष्टादशभक्तेनेति, **यवमध्या** या यववद्वृत्ति-कवलादिभिराद्यन्तयोर्हीना मध्ये च वृद्धेति, **वज्रमध्या** तु याऽऽद्यन्तवृद्धा मध्ये हीना चेति ।

[सू० २५२] चत्तारि अत्थिकाया अजीवकाया पन्नत्ता, तंजहा-धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, पोग्गलत्थिकाए । चत्तारि अत्थिकाया अरूविकाया पन्नत्ता, तंजहा-धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, जीवत्थिकाए ।

[टी०] प्रतिमाश्च जीवास्तिकाये एवेति तद्विपर्ययस्वरूपाजीवास्तिकायसूत्रम्– **अत्थिकाय** त्ति, 'अस्ति' इत्ययं त्रिकालवचनो निपातः, अभूवन् भवन्ति भविष्यन्ति चेति भावना, अतोऽ**स्ति** च ते प्रदेशानां **काया**श्च राशय इति, **अस्ति**शब्देन प्रदेशाः क्वचिदुच्यन्ते, ततश्च तेषां वा कायाः अस्तिकायाः, ते चाऽ**जीवकाया**ः अचेतनत्वात्। अस्तिकाया मूर्त्तामूर्त्ता भवन्तीत्यमूर्त्तप्रतिपादनायाऽरूप्यस्तिकायसूत्रम्, रूपं मूर्त्तिर्वर्णादिमत्त्वम्, तदस्ति येषां ते रूपिणः, तत्पर्युदासादरूपिणः अमूर्त्ता इति ।

[सू० २५३] चत्तारि फला पन्नत्ता, तंजहा-आमे णामं एगे आममहुरे १, आमे णामेगे पक्कमहुरे २, पक्के णामेगे आममहुरे ३, पक्के णामेगे पक्कमहुरे

४ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आमे णामेगे आममहुर-फलसमाणे ४ ।

[टी०] अनन्तरं जीवास्तिकाय उक्तः, तद्विशेषभूतपुरुषनिरूपणाय फलसूत्रम्, **आमम्** अपक्वं सत् **आम**मिव **मधुरम् आममधुर**मीषन्मधुरमित्यर्थः, तथा **आमं** सत् **पक्व**मिव **मधुर**मत्यन्तमधुरमित्यर्थः, तथा **पक्वं** सत् **आममधुरं** प्राग्वत्, तथा **पक्वं** सत् **पक्वमधुरं** प्राग्वदेवेति, पुरुषस्तु **आमो** वयः-श्रुताभ्यामव्यक्तः **आममधुरफलसमानः**, उपशमादिलक्षणस्य माधुर्यस्याल्पस्यैव भावात्, तथा **आम** एव **पक्वमधुरफलसमानः** पक्वफलवन्मधुरस्वभावः, प्रधानोपशमादिगुणयुक्तत्वादिति, तथा **पक्वो**ऽन्यो वयः-श्रुताभ्यां परिणतः **आममधुरफलसमानः**, उपशमादिमाधुर्यस्याल्पत्वात्, तथा **पक्व**स्तथैव, **पक्वमधुरफलसमानो**ऽपि तथैवेति ।

[सू० २५४] चउव्विहे सच्चे पन्नत्ते, तंजहा-काउज्जुयया, भासुज्जुयया, भावुज्जुयता, अविसंवायणाजोगे ।

चउव्विहे मोसे पन्नत्ते, तंजहा-कायअणुज्जुयता, भासअणुज्जुयता, भावअणुज्जुयता, विसंवादणाजोगे ।

[सू० २५५] चउव्विहे पणिहाणे पन्नत्ते, तंजहा-मणपणिधाणे, वइपणिधाणे, कायपणिधाणे, उवकरणपणिधाणे । एवं णेरइयाणं, पंचेंदियाणं जाव वेमाणियाणं ।

चउव्विहे सुप्पणिहाणे पन्नत्ते, तंजहा-मणसुप्पणिहाणे जाव उवगरण-सुप्पणिहाणे । एवं संजयमणुस्साण वि ।

चउव्विहे दुप्पणिहाणे पन्नत्ते, तंजहा-मणदुप्पणिहाणे जाव उवकरण-दुप्पणिहाणे । एवं पंचेंदियाणं जाव वेमाणियाणं ।

[टी०] अनन्तरं पक्वमधुर उक्तः, स च सत्यगुणयोगात् भवतीति सत्यं तद्विपर्ययं च मृषा तथा सत्यासत्यनिमित्तं प्रणिधानं प्रतिपिपादयिषुः सूत्राण्याह– **चउव्विहे सच्चे** इत्यादीनि गतार्थानि, नवर**मृजुकस्य** अमायिनो भावः कर्म्म वा **ऋजुकता**, कायस्य ऋजुकता **कायर्जुकता**, एवमितरे अपि, नवरं **भावो** मन इति, कायर्जुकतादयश्च

शरीर-वाङ्-मनसां यथावस्थितार्थप्रत्यायनार्थाः प्रवृत्तयः, तथा अनाभोगादिना गवादिकमश्वादिकं यद्वदति कस्मैचित् किञ्चिदभ्युपगम्य वा यन्न करोति सा विसंवादना, तद्विपक्षेण योगः सम्बन्धोऽ**विसंवादनायोग** इति । **मोसे** त्ति **मृषा**ऽसत्यम् । कायस्यानृजुकतेत्यादि वाक्यम् ।

प्रणिधिः **प्रणिधानं** प्रयोगः, तत्र मनसः प्रणिधानम् आर्त्त-रौद्र-धर्म्मादिरूपतया प्रयोगो **मनःप्रणिधानम्**, एवं वाक्काययोरपि, **उपकरणस्य** लौकिक-लोकोत्तररूपस्य वस्त्र-पात्रादेः संयमासंयमोपकाराय प्रणिधानं प्रयोग **उपकरणप्रणिधानम्** ।

एवमिति यथा सामान्यतस्तथा नैरयिकाणामिति, तथा चतुर्विंशतिदण्डकपठितानां मध्ये ये पञ्चेन्द्रियास्तेषामपि वैमानिकान्तानामेवमेवेति, एकेन्द्रियादीनां मनःप्रभृतीनामसम्भवेन प्रणिधानासम्भवादिति । प्रणिधानविशेषः सुप्रणिधानं दुष्प्रणिधानं चेति तत्सूत्राणि, शोभनं संयमार्थत्वात् प्रणिधानं मनःप्रभृतीनां प्रयोजनं **सुप्रणिधान**मिति। इदं च सुप्रणिधानं चतुर्विंशतिदण्डकनिरूपणायां मनुष्याणां तत्रापि संयतानामेव भवति, चारित्रपरिणतिरूपत्वात् सुप्रणिधानस्येत्याह– **एवं संजये**त्यादि । दुष्प्रणिधानसूत्रं सामान्यसूत्रवत्, नवरं **दुष्प्रणिधानम्** असंयमार्थं मनःप्रभृतीनां प्रयोग इति ।

[सू० २५६] चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आवातभद्दते णामेगे णो संवासभद्दते १, संवासभद्दते णामेगे णो आवातभद्दए २, एगे आवातभद्दते वि संवासभद्दते वि ३, एगे णो आवातभद्दते नो संवासभद्दए ४ [१] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अप्पणो णामेगे वज्जं पासति, णो परस्स १, परस्स णामेगे वज्जं पासति ४ [२] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अप्पणो णामेगे वज्जं उदीरेति, णो परस्स ४ [३] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अप्पणो नामेगे वज्जं उवसामेति, णो परस्स ४ [४] ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-अब्भुट्ठेइ णामेगे णो अब्भुट्ठावेति [५]। एवं वंदति णामेगे णो वंदावेति [६] । एवं सक्कारेति [७], सम्माणेति

[८], **पूएइ** [९], **वाएइ** [१०], **पडिच्छति** [११], **पुच्छति** [१२], **वागरेति** [१३] ।

सुत्तधरे णामेगे णो अत्थधरे, अत्थधरे णामेगे णो सुत्तधरे ४ [१४] ।

[**टी०**] पुरुषाधिकारादेवापरथा पुरुषसूत्राणि चतुर्द्दश सुगमानि, नवर**मापतनमा**पातः प्रथममीलकः, तत्र **भद्रको** भद्रकारी दर्शना-ऽऽलापादिना सुखकरत्वात्, **संवासः** चिरं सहवासस्तस्मिन्नभद्रको हिंसकत्वात् संसारकारणनियोजकत्वाद्वेति, **संवासभद्रकः** सह संवसतामत्यन्तोपकारितया, **नो आपातभद्रकः** अनालाप-कठोरालापादिना, एवं द्वावन्यौ ।

वज्जं ति वर्ज्यत इति वर्ज्यम्, अवद्यं वा **अ**कारलोपात्, वज्रवद्वज्रं वा गुरुत्वाद्धिंसा-ऽनृतादि पापं कर्म्म, त**दात्मनः** सम्बन्धि कलहादौ **पश्यति**, पश्चात्तापान्वितत्वात्, न **परस्य**, तं प्रत्युदासीनत्वात् । अन्यस्तु **परस्य**, **नात्मनः**, साभिमानत्वात् । इतर **उभयोः** निरनुशयत्वेन यथावद्वस्तुबोधात् । अपरस्तु नोभयोर्विमूढत्वात् इति । दृष्ट्वा चैक आत्मनः सम्बन्धि अवद्य**मुदीरयति** भणति यदुत मया कृतमेतदिति, उपशान्तं वा पुनः प्रवर्त्तयति, अथवा वज्रं कर्म्म, तदुदीरयति पीडोत्पादनेन उदये प्रवेशयतीति, एव**मुपशमयति** निवर्त्तयति पापं कर्म्म वा । **अब्भुट्ठेइ** त्ति अभ्युत्थानं करोति न कारयति परेण, संविग्नपाक्षिको लघुपर्यायो वा, कारयत्येव गुरुः, उभयवृत्तिर्वृषभादिः, अनुभयवृत्तिर्जिनकल्पिकोऽविनीतो वेति । एवं वन्दनादिसूत्रेष्वपि, नवरं **वन्दते** द्वादशावर्त्तादिना, **सत्करोति** वस्त्रादिदानेन, **सन्मानयति** स्तुत्यादिगुणोन्नतिकरणेन, **पूजयति** उचितपूजाद्रव्यैरिति, **वाचयति** पाठयति, **नो वायावेइ** आत्मानमन्येनेति उपाध्यायादिः, द्वितीये शैक्षकः, तृतीये क्वचित् ग्रन्थान्तरेऽनधीती, चतुर्थे जिनकल्पिकः। एवं सर्वत्रोदाहरणं स्वबुद्ध्या योजनीयम्, **प्रतीच्छती**ति सूत्रार्थौ गृह्णाति, **पृच्छति** प्रश्नयति सूत्रादि, **व्याकरोति** ब्रूते तदेवेति । **सूत्रधरः** पाठकः, **अर्थधरो** बोद्धा, अन्यस्तूभयधरः, चतुर्थस्तु जड इति ।

[**सू० २५७**] **चमरस्स णं असुरिंदस्स असुरकुमाररन्नो चत्तारि लोगपाला पन्नत्ता, तंजहा-सोमे, जमे, वरुणे, वेसमणे । एवं बलिस्स वि सोमे जमे**

वेसमणे वरुणे ।

धरणस्स कालवाले, कोलवाले, सेलवाले, संखवाले । भूताणंदस्स कालवाले, कोलवाले, संखवाले, सेलवाले ।

वेणुदेवस्स चित्ते, विचित्ते, चित्तपक्खे, विचित्तपक्खे । वेणुदालिस्स चित्ते, विचित्ते, विचित्तपक्खे, चित्तपक्खे ।

हरिस्स पभे, सुप्पभे, पभकंते, सुप्पभकंते, । हरिसहस्स पभे, सुप्पभे, सुप्पभकंते, पभकंते ।

अग्गिसिहस्स तेऊ, तेउसिहे, तेउकंते, तेउप्पभे । अग्गिमाणवस्स तेऊ, तेउसिहे, तेउप्पभे, तेउकंते ।

पुन्नस्स रुते, रुतंसे, रुतकंते, रुतप्पभे । एवं विसिट्ठस्स रुते, रुतंसे, रुयप्पभे, रुयकंते ।

जलकंतस्स जले, जलरते, जलकंते, जलप्पभे । जलप्पभस्स जले, जलरते, जलप्पभे, जलकंते ।

अमितगतिस्स तुरियगती, खिप्पगती, सीहगती, सीहविक्कमगती । अमितवाहणस्स तुरियगती, खिप्पगती, सीहविक्कमगती, सीहगती ।

वेलंबस्स काले, महाकाले, अंजणे, रिट्ठे । पभंजणस्स काले, महाकाले, रिट्ठे, अंजणे ।

घोसस्स आवत्ते, वियावत्ते, णंदियावत्ते, महाणंदियावत्ते । महाघोसस्स आवत्ते, वियावत्ते, महाणंदियावते, णंदियावत्ते ।

सक्कस्स सोमे, जमे, वरुणे, वेसमणे । ईसाणस्स सोमे, जमे, वेसमणे वरुणे। एवं एगंतरिता जावच्चुतस्स ।

चउव्विहा वायकुमारा पन्नत्ता, तंजहा-काले, महाकाले, वेलंबे, पभंजणे।

चउव्विहा देवा पन्नत्ता, तंजहा-भवणवासी, वाणमंतरा, जोतिसिया विमाणवासी ।

[टी०] पुरुषाधिकारादेव देवविशेषपुरुषनिरूपणपराणि लोकपालादिसूत्राणि सर्वाणि

सुगमानि, नवरम् **इन्द्रः** परमैश्वर्ययोगात् प्रभुर्महान् वा गजेन्द्रवत्, **राजा** तु राजनाद् दीपनात्, शोभावत्त्वादित्यर्थः आराध्यत्वाद्वा, एकार्थौ वैताविति, दाक्षिणात्येषु यो नामतस्तृतीयो लोकपालः स औदीच्येषु चतुर्थश्चतुर्थस्त्वितर इति, एवम् **एक्कंतरिय** त्ति, यन्नामानः शक्रस्य तन्नामान एव सनत्कुमार-ब्रह्मलोक-शुक्र-प्राणतेन्द्राणां तथा यन्नामान ईशानस्य तन्नामान एव माहेन्द्र-लान्तक-सहस्रारा-ऽच्युतेन्द्राणामिति । **कालादयः** पातालकलश-स्वामिन इति ।

[सू० २५८] चउव्विहे पमाणे पन्नत्ते, तंजहा-दव्वप्पमाणे, खेत्तप्पमाणे, कालप्पमाणे, भावप्पमाणे ।

[टी०] चतुर्विधा देवा इत्युक्तम्, एतच्च सङ्ख्याप्रमाणमिति प्रमाणप्ररूपणसूत्रम्, तत्र प्रमितिः प्रमीयते वा परिच्छिद्यते येनार्थस्तत् **प्रमाणम्**, तत्र द्रव्यमेव प्रमाणं दण्डादिद्रव्येण वा धनुरादिना शरीरादेर्द्रव्यैर्वा दण्ड-हस्ता-ऽङ्गुलादिभिः द्रव्यस्य वा जीवादेः द्रव्याणां वा जीव-धर्म्मा-ऽधर्म्मादीनां द्रव्ये वा परमाण्वादौ पर्यायाणां द्रव्येषु वा तेष्वेव तेषामेव प्रमाणं **द्रव्यप्रमाणम्**, एवं यथायोगं सर्वत्र विग्रहः कार्यः, तत्र द्रव्यप्रमाणं द्विधा– प्रदेशनिष्पन्नं विभागनिष्पन्नं च, तत्र आद्यं परमाण्वाद्यनन्तप्रदेशिकान्तम्, विभागनिष्पन्नं पञ्चधा मानादि, तत्र मानं धान्यमानं सेतिकादि, रसमानं कर्षादि १, उन्मानं तुलाकर्षादि २, अवमानं हस्तादि ३, गणितमेकादि ४, प्रतिमानं गुञ्जा-वल्लादीति ५ । **क्षेत्रम्** आकाशम्, तस्य **प्रमाणं** द्विधा-प्रदेशनिष्पन्नादि, तत्र प्रदेशनिष्पन्नमेकप्रदेशावगाढादि असङ्ख्येयप्रदेशावगाढान्तम्, विभागनिष्पन्नमङ्गुलादि । **कालः** समयः, **तन्मानं** द्विधा- प्रदेशनिष्पन्नमेकसमयस्थित्यादि असङ्ख्येयसमयस्थित्यन्तम्, विभागनिष्पन्नं समयावलिकेत्यादि, क्षेत्र-कालयोर्द्रव्यत्वे सत्यपि भेदनिर्देशो जीवादिद्रव्यविशेषकत्वेनाऽनयोस्तत्पर्यायताऽपीति द्रव्याद्विशिष्टताख्यापनार्थः । भाव एव भावानां वा प्रमाणं **भावप्रमाणं** गुण-नय-सङ्ख्याभेदभिन्नम्, तत्र गुणा जीवस्य ज्ञान-दर्शन-चारित्राणि, तत्र ज्ञानं प्रत्यक्षा-ऽनुमानोपमाना-ऽऽगमरूपं प्रमाणमिति, नया नैगमादयः, सङ्ख्या एकादिकेति ।

[सू० २५९] चत्तारि दिसाकुमारिमहत्तरियाओ पन्नत्ताओ, तंजहा-रूया,

रूयंसा, सुरूवा, रूयावती १। चत्तारि विज्जुकुमारिमहत्तरियाओ पन्नत्ताओ, तंजहा-चित्ता, चित्तकणगा, सतेरा, सोतामणी २।

[सू० २६०] सक्कस्स णं देविंदस्स देवरन्नो मज्झिमपरिसाते देवाणं चत्तारि पलिओवमाइं ठिती पन्नत्ता ३। ईसाणस्स णं देविंदस्स देवरण्णो मज्झिमपरिसाते देवीणं चत्तारि पलिओवमाइं ठिती पन्नत्ता ४।

[टी०] देवाधिकारे एवेदं सूत्रचतुष्टयम्– **चत्तारि दिसा** इत्यादि सुगमम्, नवरं दिक्कुमार्यश्च ता महत्तरिकाश्च प्रधानतमास्तासां वा महत्तरिका **दिक्कुमारीमहत्तरिकाः**, एता मध्यरुचकवास्तव्या अर्हतो जातमात्रस्य नालकल्पनादि कुर्वन्तीति । **विद्युत्कुमारीमहत्तरिकास्तु** विदिग्रुचकवास्तव्याः, एताश्च भगवतो जातमात्रस्य चतसृष्वपि दिक्षु स्थिता दीपिकाहस्ता गायन्तीति ।

[सू० २६१] चउव्विहे संसारे पन्नत्ते, तंजहा-दव्वसंसारे, खेत्तसंसारे, कालसंसारे, भावसंसारे ।

[टी०] एते च देवाः संसारिण इति संसारसूत्रम्, तत्र **संसरणम्** इतश्चेतश्च परिभ्रमणं **संसारः** । तत्र संसारशब्दार्थज्ञस्तत्रानुपयुक्तो द्रव्याणां वा जीव-पुद्गललक्षणानां यथायोगं भ्रमणं **द्रव्यसंसारः** । तेषामेव क्षेत्रे चतुर्दशरज्ज्वात्मके यत् संसरणं स **क्षेत्रसंसारः**, यत्र वा क्षेत्रे संसारो व्याख्यायते तदेव क्षेत्रमभेदोपचारात् संसारो यथा रसवती गुणनिकेत्यादि। कालस्य दिवस-पक्ष-मासर्त्वयन-संवत्सरादिलक्षणस्य संसरणं चक्रन्यायेन भ्रमणं पल्योपमादिकालविशेषविशेषितं वा यत् कस्यापि जीवस्य नरकादिषु स **कालसंसारः**, यस्मिन् वा काले पौरुष्यादिके संसारो व्याख्यायते स कालोऽपि संसार उच्यते अभेदाद्यथा प्रत्युपेक्षणाकरणात् कालोऽपि प्रत्युपेक्षणेति । तथा संसारशब्दार्थज्ञः तत्रोपयुक्तो जीव-पुद्गलयोर्वा संसरणमात्रमुपसर्जनीकृतसम्बन्धिद्रव्यं भावानां वौदयिकादीनां वर्णादीनां वा संसरणपरिणामो **भावसंसार** इति ।

[सू० २६२] चउव्विहे दिट्ठिवाते पन्नत्ते, तंजहा-परिकम्मं, सुत्ताइं, पुव्वगए, अणुजोगे ।

[टी०] अयं च द्रव्यादिसंसारोऽनेकनयैर्दृष्टिवादे विचार्यते इति दृष्टिवादसूत्रम्–

चउव्विहे दिट्ठिवाए इत्यादि, तत्र **दृष्टयो** दर्शनानि नया **उद्यन्ते** अभिधीयन्ते **पतन्ति** वा अवतरन्ति यस्मिन्नसौ दृष्टिवादो दृष्टिपातो वा द्वादशमङ्गम्, तत्र सूत्रादिग्रहण-योग्यतासंपादनसमर्थं **परिकर्म** गणितपरिकर्मवत्, तच्च सिद्धसेनिकादि, **सूत्राणी**ति ऋजुसूत्रादीनि द्वाविंशतिर्भवन्ति, इह सर्वद्रव्य-पर्याय-नयाद्यर्थसूचनात् सूत्राणीति, समस्तश्रुतात् पूर्वं करणात् **पूर्वाणि**, तानि चोत्पादपूर्वादीनि चतुर्दशेति, एतेषां चैवं नाम-प्रमाणानि, तद्यथा–

उप्पाय १ अग्गेणीय २ वीरियं ३ अत्थिनत्थि उ पवायं ४ ।
णाणपवायं ५ सच्चं ६ आयपवायं च ७ कम्मं च ८ ॥
पुव्वं पच्चक्खाणं ९ विज्जणुवायं १० अवंझ ११ पाणाउं १२ ।
किरियाविसालपुव्वं १३ चोद्दसमं बिंदुसारं तु १४ ॥
उप्पाये पयकोडी १ अग्गेणीयम्मि छन्नउइलक्खा २ ।
विरियम्मि सयरिलक्खा ३ सट्ठिलक्खा उ अत्थिणत्थिम्मि ४ ॥
एगा पउणा कोडी णाणपवायम्मि होइ पुव्वम्मि ५ ।
एगा पयाण कोडी छच्च पया सच्चवायम्मि ६ ॥
छव्वीसं कोडीओ आयपवायम्मि होइ पयसंखा ७ ।
कम्मपवाए कोडी असीतीलक्खेहिं अब्भहिआ ८ ॥
चुलसीइ सयसहस्सा पच्चक्खाणम्मि वन्निया पुव्वे ।
एक्का पयाण कोडी दससहसहिया य अणुवाए १० ॥
छव्वीसं कोडीओ पयाण पुव्वे अवंझणाममि ११ ।
पाणाउम्मि य कोडी छप्पणलक्खेहिं अब्भहिया १२ ॥
नवकोडीओ संखा किरियविसालम्मि वन्निया गुरुणा १३ ।
अद्धत्तेरसलक्खा पयसंखा बिंदुसारम्मि ॥ [ ] त्ति ।

तेषु **गतं** प्रविष्टं यत् श्रुतं तत् **पूर्वगतं** पूर्वाण्येव, अङ्गप्रविष्टमङ्गानि यथेति । योजनं योगः अनुरूपोऽनुकूलो वा सूत्रस्य निजेनाभिधेयेन सह योग इत्**यनुयोगः**, स चैकस्तीर्थकराणां प्रथमसम्यक्त्वावाप्ति-पूर्वभवादिगोचरो यः स **मूलप्रथमा-नुयोगो**ऽभिधीयते, यस्तु कुलकरादिवक्तव्यतागोचरः स **गण्डिकानुयोग** इति ।

[सू० २६३] चउव्विहे पायच्छित्ते पन्नत्ते, तंजहा-णाणपायच्छित्ते,

दंसणपायच्छित्ते, चरित्तपायच्छित्ते, वियत्तकिच्चे पायच्छित्ते १ ।

चउव्विहे पायच्छित्ते पन्नत्ते, तंजहा-पडिसेवणापायच्छित्ते, संजोयणा-पायच्छित्ते, आरोवणापायच्छित्ते, पलिउंचणापायच्छित्ते २ ।

[टी०] पूर्वगतमनन्तरमुक्तम्, तत्र च प्रायश्चित्तप्ररूपणाऽऽसीदिति प्रायश्चित्तसूत्रद्वयम्, तत्र ज्ञानमेव प्रायश्चित्तम्, यतस्तदेव पापं छिनत्ति प्रायः चित्तं वा शोधयतीति निरुक्तवशात् **ज्ञानप्रायश्चित्त**मिति, एवमन्यत्रापि । **वियत्तकिच्चे** त्ति **व्यक्तस्य** भावतो गीतार्थस्य **कृत्यं** करणीयं **व्यक्तकृत्यं प्रायश्चित्त**मिति, गीतार्थो हि गुरु-लाघवपर्यालोचनेन यत् किञ्चन करोति तत् सर्वं पापविशोधकमेव भवतीति, अथवा ज्ञानाद्यतिचारविशुद्धये यानि प्रायश्चित्तान्यालोचनादीनि विशेषतोऽभिहितानि तानि तथाऽपदिश्यन्ते, **वियत्त** त्ति **विशेषेण** अवस्थाद्यौचित्येन विशेषानभिहितमपि **दत्तं** वितीर्णमभ्यनुज्ञातमित्यर्थः, यत् किञ्चिन्मध्यस्थगीतार्थेन **कृत्यम्** अनुष्ठानं तद् **विदत्तकृत्यं** प्रायश्चित्तमेव, **चियत्तकिच्चे** त्ति पाठान्तरतस्तु प्रीतिकृत्यं वैयावृत्यादीति । प्रतिषेवणम् आसेवनमकृत्यस्येति **प्रतिषेवणा**, सा च द्विधा परिणामभेदात् प्रतिषेवणीयभेदाद्वा, तत्र परिणामभेदात्–

पडिसेवणा उ भावो सो पुण कुसलो व्व होज्जऽकुसलो वा ।

कुसलेण होइ कप्पो अकुसलपरिणामओ दप्पो ॥ [व्यवहारभा० ३९]

इत्यादि प्रतिषेवणा तस्यां प्रायश्चित्तमालोचनादि, [**प्रतिषेवणाप्रायश्चित्तम्** १], तथा संयोजनम् एकजातीयातिचारमीलनं **संयोजना** यथा शय्यातरपिण्डो गृहीतः सोऽप्युदकार्द्रहस्तादिना सोऽप्यभ्याहृतः सोऽप्याधाकर्म्मिकस्तत्र यत् प्रायश्चित्तं तत् **संयोजनाप्रायश्चित्तम्**, तथा आरोपणमेकापराधप्रायश्चित्ते पुनः पुनरासेवनेन विजातीय-प्रायश्चित्ताध्यारोपण**मारोपणा**, यथा पञ्चरात्रिन्दिवप्रायश्चित्तमापन्नः पुनस्तत्सेवने दशरात्रिन्दिवं इत्यादि आरोपणया प्रायश्चित्त**मारोपणाप्रायश्चित्त**मिति। तथा **परिकुञ्चनम्** अपराधस्य द्रव्य-क्षेत्र-काल-भावानां गोपायनमन्यथा सतामन्यथा भणने परिकुञ्चना परिवञ्चना वा, तस्याः प्रायश्चित्तं **परिकुञ्चनाप्रायश्चित्तम्**, [विशेषोऽत्र **व्यवहार-पीठा**दवसेय इति।]

[सू० २६४] चउव्विहे काले पन्नत्ते, तंजहा-पमाणकाले, अधाउणिव्वत्ति-काले, मरणकाले, अद्धाकाले ।

[टी०] प्रायश्चित्तं च कालापेक्षया दीयत इति कालनिरूपणासूत्रम्, तत्र प्रमीयते परिच्छिद्यते येन वर्षशत-पल्योपमादि तत् **प्रमाणम्**, तदेव कालः **प्रमाणकालः**, स च अद्धाकालविशेष एव दिवसादिलक्षणो मनुष्यक्षेत्रान्तर्वर्त्तीति, उक्तं च–

दुविहो पमाणकालो दिवसपमाणं च होइ राई य ।
चउपोरिसिओ दिवसो राई चउपोरिसी चेव ॥ [आव० नि० ७३०, विशेषाव०२०६९] त्ति,

यथा यत्प्रकारं नारकादिभेदेनाऽऽयुः कर्म्मविशेषो **यथायुस्तस्य** रौद्रादिध्यानादिना **निर्वृत्तिः** बन्धनं तस्याः सकाशाद्यः **कालो** नारकादित्वेन स्थितिर्जीवानां स **यथायुर्निर्वृत्तिकालः**, अयमप्यद्धाकाल एवायुष्ककर्मानुभवविशिष्टः सर्वसंसारिजीवानां वर्त्तनादिरूप इति ।

मरणस्य मृत्योः **कालः** समयो मरणकालः, अयमप्यद्धासमयविशेष एव मरणविशिष्टो मरणमेव वा कालो मरणपर्यायत्वादिति, उक्तं च–

कालो त्ति मयं मरणं जहेह मरणं गओ त्ति कालगओ ।
तम्हा स कालकालो जो जस्स मओ मरणकालो ॥ [विशेषाव० २०६६] त्ति ।

तथा अद्धैव कालः **अद्धाकालः**, कालशब्दो हि वर्ण-प्रमाणकालादिष्वपि वर्त्तते, ततोऽद्धाशब्देन विशेष्यत इति, अयं च सूर्यक्रियाविशिष्टो मनुष्यक्षेत्रान्तर्वर्त्ती समयादिरूपोऽवसेयः ।

[सू० २६५] चउव्विहे पोग्गलपरिणामे पन्नत्ते, तंजहा-वन्नपरिणामे गंधपरिणामे रसपरिणामे फासपरिणामे ।

[टी०] द्रव्यपर्यायभूतस्य कालस्य चतुःस्थानकमुक्तम्, इदानीं पर्यायाधिकारात् पुद्गलानां पर्यायभूतस्य परिणामस्य तदाह– **चउव्विहेत्यादि**, **परिणामः** अवस्थातोऽवस्थान्तरगमनम्, तत्र **वर्णस्य** कालादेः **परिणामः** अन्यथा भवनं वर्णेन वा कालादिनेतरत्यागेन पुद्गलस्य परिणामो वर्णपरिणामः, एवमन्येऽपि ।

[सू० २६६] भरहेरवतेसु णं वासेसु पुरिम-पच्छिमवज्जा मज्झिमगा बावीसं अरहंता भगवंतो चाउज्जामं धम्मं पण्णवयंति, तंजहा-सव्वातो पाणातिवातातो वेरमणं, एवं मुसावादाओ [वेरमणं, सव्वातो] अदिन्नादाणाओ [वेरमणं],

सव्वातो बहिद्धादाणातो वेरमणं ।

सव्वेसु वि णं महाविदेहेसु अरहंता भगवंतो चाउज्जामं धम्मं पण्णवयंति, तंजहा-सव्वातो पाणातिवाताओ वेरमणं जाव सव्वातो बहिद्धादाणाओ वेरमणं ।

[टी०] अजीवद्रव्यपरिणाम उक्तः, अधुना तु जीवद्रव्यस्य परिणामा विचित्राः सूत्रप्रपञ्चेनाभिधीयन्ते, तत्र च **भरते**त्यादिसूत्रद्वयं व्यक्तम्, किन्तु पुरिम-पश्चिमवर्जाः, किमुक्तं भवति ? **मध्यमका** इति, ते चाष्टादयोऽपि भवन्तीत्युच्यते-**द्वाविंशति**रिति। **चत्वारो** यमा एव **यामा** निवृत्तयो यस्मिन् स तथा । **बहिद्धादाणाओ** त्ति **बहिद्धा** मैथुनं परिग्रहविशेषः, **आदानं** च परिग्रहस्तयोर्द्वन्द्वैकत्वम्, अथवा आदीयत इत्**यादानं** परिग्राह्यं वस्तु, तच्च धर्मोपकरणमपि भवतीत्यत आह- **बहिस्तात्** धर्मोपकरणाद् बहिर्यदिति, इह च मैथुनं परिग्रहेऽन्तर्भवति, न ह्यपरिगृहीता योषिद् भुज्यते, इति प्रत्याख्येयस्य प्राणातिपातादेश्चतुर्विधत्वात् चतुर्यामता धर्म्मस्येति, इयं चेह भावना-मध्यमतीर्थकराणां विदेहकानां च चतुर्यामधर्म्मस्य पूर्व-पश्चिमतीर्थकरयोश्च पञ्चयामधर्म्मस्य प्ररूपणा शिष्यापेक्षा, परमार्थतस्तु पञ्चयामस्यैवोभयेषामप्यसौ, यतः प्रथम-पश्चिमतीर्थकरतीर्थसाधव ऋजुजडा वक्रजडाश्चेति, तत्त्वादेव परिग्रहो वर्जनीय इत्युपदिष्टे मैथुनवर्जनमवबोद्धुं पालयितुं च न क्षमाः, मध्यम-विदेहजतीर्थकरतीर्थसाधवस्तु ऋजुप्रज्ञत्वात् तद् बोद्धुं वर्जयितुं च क्षमा इति ।

[सू० २६७] **चत्तारि दुग्गतीतो पन्नत्ताओ, तंजहा-णेरइयदुग्गती, तिरिक्खजोणियदुग्गती, मणुस्सदुग्गई, देवदुग्गई ।**

चत्तारि सोग्गईओ पन्नत्ताओ, तंजहा-सिद्धसोग्गती, देवसोग्गती, मणुयसोग्गती, सुकुलपच्चायाति ।

चत्तारि दुग्गता पन्नत्ता, तंजहा-नेरइयदुग्गता, तिरिक्खजोणियदुग्गता, मणुस्सदुग्गता, देवदुग्गता ।

चत्तारि सोग्गता पन्नत्ता, तंजहा-सिद्धसोग्गता जाव सुकुलपच्चायाया ।

[टी०] अनन्तरोक्तेभ्यः प्राणातिपातादिभ्योऽनुपरतोपरतानां दुर्गति-सुगती भवतः,

तद्वन्तश्च ते दुर्गतेतरा भवन्तीति दुर्गति-सुगत्यात्मकपरिणामयोर्दुर्गत-सुगतानां च भेदान् सूत्रचतुष्टयेनाह– सुगमानि । नवरं **मनुष्यदुर्गतिः** दुषित [निन्दित]मनुष्यापेक्षया, **देवदुर्गतिः** किल्बिषिकाद्यपेक्षयेति । **सुकुलपच्चायाइ** त्ति देवलोकादौ गत्वा **सुकुले** इक्ष्वाक्वादौ **प्रत्यायातिः** प्रत्यागमनं **प्रत्याजातिर्वा** प्रतिजन्मेति, इयं च तीर्थकरादीनामेवेति मनुष्यसुगतेर्भोगभूमिजादिमनुजत्वरूपाया भिद्यते, दुर्गतिरेषामस्तीत्यचि प्रत्यये दुर्गता दुःस्था वा दुर्गताः, एवं सुगताः ।

[सू० २६८] पढमसमयजिणस्स णं चत्तारि कम्मंसा खीणा भवंति, तंजहा-णाणावरणिज्जं, दंसणावरणिज्जं, मोहणिज्जं, अंतराइतं ।

उप्पन्ननाणदंसणधरे णं अरहा जिणे केवली चत्तारि कम्मंसे वेदेति, तंजहा-वेदणिज्जं, आउयं, णामं, गोतं ।

पढमसमयसिद्धस्स णं चत्तारि कम्मंसा जुगवं खिज्जंति, तंजहा-वेयणिज्जं, आउयं, णामं, गोतं ।

[टी०] अनन्तरं सिद्धसुगता उक्ताः, ते चाष्टकर्मक्षयात् भवन्त्यतः क्षयपरिणामस्य क्रममाह- **पढमे**त्यादि सूत्रत्रयं व्यक्तम्, परं प्रथमः समयो यस्य स तथा स चासौ जिनश्च सयोगिकेवली **प्रथमसमयजिन**स्तस्य **कर्म्मणः** सामान्यस्यांशाः ज्ञानावरणीयादयो भेदा इति । **उत्पन्ने** आवरणक्षयाज्जाते **ज्ञान-दर्शने** विशेष-सामान्यबोधरूपे धारयतीत्**युत्पन्नज्ञान-दर्शनधरो**ऽनेनाऽनादिसिद्धकेवलज्ञानवतः सदाशिवस्यासद्भावं दर्शयति, न विद्यते **रहः** एकान्तो गोप्यमस्य सकलसन्निहित-व्यवहित-स्थूल-सूक्ष्मपदार्थ-सार्थसाक्षात्कारित्वादित्य**रहा**, देवादिपूजाऽर्हत्वेनार्हन् वा, रागादिजेतृत्वा**ज्जिनः**, **केवलानि** परिपूर्णानि ज्ञानादीनि यस्य सन्ति स **केवली**ति । सिद्धत्वस्य कर्मक्षपणस्य च एकसमये सम्भवात् **प्रथमसमयसिद्धस्ये**त्यादि व्यपदिश्यते ।

[सू० २६९] चउहिं ठाणेहिं हासुप्पत्ती सिता, तंजहा-पासेत्ता, भासेत्ता, सुणेत्ता, संभरेत्ता ।

[टी०] असिद्धानां तु हास्यादयो विकारा भवन्तीति हास्यं तावच्चतुःस्थान-कावतारित्वादाह– **चउही**त्यादि, हसनं **हासः** हासमोहनीयजनितो विकारः, तस्यो**त्पत्तिः**

उत्पादः **हासोत्पत्तिः** । **पासित्त** त्ति दृष्ट्वा विदूषकादिचेष्टां चक्षुषा, तथा **भाषित्वा** वाचा किञ्चिच्चसूरिवचनम्, तथा **श्रुत्वा** श्रोत्रेण परोक्तं तथाविधवाक्यम्, तथा तथाविधमेव चेष्टा-वाक्यादिकं **स्मृत्वा**, हसतीति शेषः, एवं दर्शनादीनि हासकारणानि भवन्तीति ।

[सू० २७०] चउव्विहे अंतरे पन्नत्ते, तंजहा-कट्ठंतरे, पम्हंतरे, लोहंतरे, पत्थरंतरे। एवामेव इत्थिए वा पुरिसस्स वा चउव्विहे अंतरे पन्नत्ते, तंजहा-कट्ठंतरसमाणे, पम्हंतरसमाणे, लोहंतरसमाणे, पत्थरंतरसमाणे ।

[टी०] असिद्धानामेव धर्मान्तरनिरूपणाय दृष्टान्त-दार्ष्टान्तिकार्थवत् सूत्रद्वयम्, **कट्ठे**त्यादि, काष्ठस्य च काष्ठस्य चेति काष्ठयो**रन्तरं** विशेषो रूपनिर्म्माणादिभिरिति **काष्ठान्तरम्**, एवं **पक्ष्म** कर्प्पासरूतादि, **पक्ष्मणोरन्तरं** विशिष्टसौकुमार्यादिभिः, **लोहान्तरम्** अत्यन्तच्छेदकत्वादिभिः, **प्रस्तरान्तरं** पाषाणान्तरं चिन्तितार्थप्रापणादि-भिरिति, **एवमेव** काष्ठाद्यन्तरवत्, **स्त्रिया वा** स्त्र्यन्तरापेक्षया, **पुरुषस्य वा** पुरुषान्तरापेक्षया, **वा**शब्दौ स्त्रीपुंसयोश्चातुर्विध्यं प्रति निर्विशेषताख्यापनार्थौ, **काष्ठान्तरेण समानं** तुल्यमन्तरं विशेषो विशिष्टपदवीयोग्यत्वादिना, **पक्ष्मान्तरसमानं** वचन-सुकुमारतयैव, **लोहान्तरसमानं** स्नेहच्छेदेन परीषहादौ निर्भङ्गत्वादिभिश्च, **प्रस्तरान्तर-समानं** चिन्तातिक्रान्तमनोरथपूरकत्वेन विशिष्टगुणवद्वन्द्यपदवीयोग्यत्वादिना चेति ।

[सू० २७१] चत्तारि भयगा पन्नत्ता, तंजहा-दिवसभयते, जत्ताभयते, उच्चत्तभयते, कब्बालभयते ।

[टी०] अनन्तरमन्तरमुक्तमिति पुरुषविशेषान्तरनिरूपणाय भृतकसूत्रम्, तत्र **भ्रियते** पोष्यते स्मेति भृतः, स एवानुकम्पितो **भृतकः**, कर्म्मकर इत्यर्थः, प्रतिदिवसं नियतमूल्येन कर्म्मकरणार्थं यो गृह्यते स **दिवसभृतकः** १, **यात्रा** देशान्तरगमनं तस्यां सहाय इति भ्रियते यः स **यात्राभृतकः** २, मूल्य-कालनियमं कृत्वा यो **नियतं** यथावसरं **कर्म्म** कार्यते स **उच्चताभृतकः** ३, **कब्बाडभृतकः** क्षितिखानकः ओड्डादिः, यस्य स्वं कर्म्मार्प्यते 'द्विहस्ता त्रिहस्ता वा त्वया भूमिः खनितव्या, एतावत्ते धनं दास्यामि'इत्येवं नियम्येति।

[सू० २७२] चत्तारि पुरिसजाता पन्नत्ता, तंजहा-संपागडपडिसेवी णामेगे णो पच्छन्नपडिसेवी, पच्छन्नपडिसेवी णामेगे णो संपागडपडिसेवी, एगे संपागडपडिसेवी वि पच्छन्नपडिसेवी वि, एगे णो संपागडपडिसेवी णो पच्छन्नपडिसेवी ।

[टी०] उक्तं लौकिकस्य पुरुषविशेषस्यान्तरम्, अधुना लोकोत्तरस्य तस्यान्तर-प्रतिपादनाय प्रतिषेविसूत्रम्, तत्र **सम्प्रकटम्** अगीतार्थसमक्षमकल्प्यभक्तादि प्रतिषेवितुं शीलं यस्य स **सम्प्रकटप्रतिसेवी**त्येवं सर्वत्र, नवरं **प्रच्छन्न**मगीतार्थासमक्षम्, अत्र चाद्ये भङ्गकत्रये पुष्टालम्बनो बकुशादिः निरालम्बनो वा पार्श्वस्थादिर्द्रष्टव्यः, चतुर्थे तु निर्ग्रन्थः स्नातको वेति ।

[सू० २७३] चमरस्स णं असुरिंदस्स असुरकुमाररन्नो सोमस्स महारन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-कणगा, कणगलता, चित्तगुत्ता, वसुंधरा। एवं जमस्स वरुणस्स वेसमणस्स ।

बलिस्स णं वतिरोयणिंदस्स वतिरोयणरन्नो सोमस्स महारन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-मित्तगा, सुभद्दा, विज्जुता, असणी । एवं जमस्स वेसमणस्स वरुणस्स ।

धरणस्स णं णागकुमारिंदस्स णागकुमाररन्नो कालवालस्स महारन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-असोगा, विमला, सुप्पभा, सुदंसणा । एवं जाव संखवालस्स ।

भूताणंदस्स णं णागकुमारिंदस्स णागकुमाररन्नो कालवालस्स महारन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-सुणंदा, सुभद्दा, सुजाता, सुमणा। एवं जाव सेलवालस्स ।

जहा धरणस्स एवं सव्वेसिं दाहिणिंदलोगपालाणं जाव घोसस्स । जहा भूताणंदस्स एवं जाव महाघोसस्स लोगपालाणं ।

कालस्स णं पिसातिंदस्स पिसायरन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-कमला, कमलप्पभा, उप्पला, सुदंसणा । एवं महाकालस्स वि ।

सुरूवस्स णं भूतिंदस्स भूतरन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-रूववती, बहुरूवा, सुरूवा, सुभगा, एवं पडिरूवस्स वि ।

पुण्णभद्दस्स णं जक्खिंदस्स जक्खरन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-पुत्ता, बहुपुत्तिता, उत्तमा, तारगा । एवं माणिभद्दस्स वि ।

भीमस्स णं रक्खसिंदस्स रक्खसरन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-पउमा, वसुमती, कणगा, रतणप्पभा । एवं महाभीमस्स वि ।

किंनरस्स णं किंनरिंदस्स चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-वडेंसा, केतुमती, रतिसेणा, रतिप्पभा, एवं किंपुरिसस्स वि । सप्पुरिसस्स णं किंपुरिसिंदस्स किंपुरिसरन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-रोहिणी, णवमिता, हिरी, पुप्फवती, एवं महापुरिसस्स वि ।

अतिकायस्स णं महोरगिंदस्स चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-भुयगा, भुयगवती, महाकच्छा, फुडा, एवं महाकायस्स वि ।

गीतरतिस्स णं गंधव्विंदस्स चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-सुघोसा, विमला, सुस्सरा, सरस्सती, एवं गीयजसस्स वि ।

चंदस्स णं जोतिसिंदस्स जोतिसरन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-चंदप्पभा, दोसिणाभा, अच्चिमाली, पभंकरा । एवं सूरस्स वि, णवरं सूरप्पभा, दोसिणाभा, अच्चिमाली, पभंकरा ।

इंगालगस्स णं महग्गहस्स चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-विजया, वेजयंती, जयंती, अपराजिता । एवं सव्वेसिं महग्गहाणं जाव भावकेउस्स।

सक्कस्स णं देविंदस्स देवरन्नो सोमस्स महारन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-रोहिणी, मयणा, चित्ता, सोमा । एवं जाव वेसमणस्स।

ईसाणस्स णं देविंदस्स देवरन्नो सोमस्स महारन्नो चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा-पुढवी, राती, रयणी, विज्जू । एवं जाव वरुणस्स ।

[टी०] अन्तराधिकारादेव देवपुरुषाणां स्त्रीकृतमन्तरं प्रतिपादयन् **चमरस्सेत्यादि-**

कमग्रमहिषीसूत्रप्रपञ्चमाह, कण्ठ्यश्चायम्, नवरं **महारन्नो** त्ति लोकपालस्याग्रभूताः प्रधाना **महिष्यो** राजभार्या **अग्रमहिष्य** इति, **वइरोयण** त्ति विविधैः प्रकारै **रोचन्ते** दीप्यन्त इति विरोचनास्त एव **वैरोचनाः** उत्तरदिग्वासिनोऽसुराः, तेषामिन्द्रः । धरणसूत्रे **एव**मिति कालवालस्येव कोलवाल-शैलपाल-शङ्खपालानामेतन्नामिका एव चतस्रश्चतस्रो भार्याः, एतदेवाह- **जाव संखवालस्स** त्ति। भूतानन्दसूत्रे **एव**मिति यथा कालवालस्य तथान्येषामपि, नवरं तृतीयस्थाने चतुर्थो वाच्यः, धरणस्य दक्षिणनागकुमारनिकायेन्द्रस्य लोकपालानामग्रमहिष्यो यथा यन्नामिकास्तथा तन्नामिका एव सर्वेषां दाक्षिणात्यानां शेषाणामष्टानां वेणुदेव-हरिकान्त- अग्निशिख-पूर्ण-जलकान्त-अमितगति-वेलम्बघोषाख्यानामिन्द्राणां ये लोकपालाः सूत्रे दर्शितास्तेषां सर्वेषामिति, यथा च भूतानन्दस्यौदीच्यनागराजस्य तथा शेषाणामष्टानामौदीच्येन्द्राणां वेणुदालि-हरिस्सहा-ऽग्निमानवविशिष्ट-जलप्रभा-ऽमितवाहन-प्रभञ्जन-महाघोषाख्यानां ये लोकपालास्तेषामपीति, एतदेवाह- **जहा धरणस्से**त्यादि ।

[सू० २७४] चत्तारि गोरसविगतीओ पन्नत्ताओ, तंजहा-खीरं, दहिं, सप्पिं, णवणीतं १।

चत्तारि सिणेहविगतीओ पन्नत्ताओ, तंजहा-तेल्लं, घयं, वसा, णवणीतं २।

चत्तारि महाविगतीओ पन्नत्ताओ, तंजहा-महु, मंसं, मज्जं, णवणीतं ३।

[टी०] उक्तं सचेतनानामन्तरम्, अथान्तराधिकारादेवाचेतनविशेषाणां विकृतीनां गोरस-स्नेह-महत्त्वलक्षणमन्तरं सूत्रत्रयेणाह- **चत्तारी**त्यादि, गवां रसो **गोरसः**, व्युत्पत्तिरेवेयं गोरसशब्दस्य, प्रवृत्तिस्तु महिष्यादीनामपि दुग्धादिरूपे रसे, **विकृतयः** शरीर-मनसोः प्रायो विकारहेतुत्वादिति, शेषं प्रकटम्, नवरं **सर्प्पिः** घृतम्, **नवनीतं** म्रक्षणम् । स्नेहरूपा विकृतयः **स्नेहविकृतयः**, **वसा** अस्थिमध्यरसः । **महाविकृतयो** महारसत्वेन महाविकारकारित्वात्, महतः सत्त्वोपघातस्य कारणत्वाच्चेति, इह विकृतिप्रस्तावाद् विकृतयो वृद्धगाथाभिः प्ररूप्यन्ते–

खीरं ५ दहि ४ णवणीयं ४ घयं ४ तहा तेल्लमेव ४ गुड २ मज्जं २ ।
महु २ मंसं ३ चेव तहा ओगाहिमगं च दसमा उ ॥

गोमहिसुट्टिपसूणं एलगखीराणि पंच चत्तारि ।
दहिमाइयाइं जम्हा उट्टीणं ताणि णो हुंति ॥
चत्तारि होंति तेल्ला तिल-अयसि-कुसुंभ-सरिसवाणं च ।
विगईओ सेसाइं डोलाईणं न विगईओ ॥ इत्यादि ।

[सू० २७५] चत्तारि कूडागारा पन्नत्ता, तंजहा-गुत्ते णामं एगे गुत्ते, गुत्ते णामं एगे अगुत्ते, अगुत्ते णामं एगे गुत्ते, अगुत्ते णामं एगे अगुत्ते । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गुत्ते णाममेगे गुत्ते ४ ।

चत्तारि कूडागारसालाओ पन्नत्ताओ, तंजहा-गुत्ता णाममेगा गुत्तदुवारा, गुत्ता णाममेगा अगुत्तदुवारा, अगुत्ता णाममेगा गुत्तदुवारा, अगुत्ता णाममेगा अगुत्तदुवारा । एवामेव चत्तारि इत्थीओ पन्नत्ताओ, तंजहा-गुत्ता नाममेगा गुत्तिंदिता, गुत्ता णाममेगा अगुत्तिंदिता ४ ।

[टी०] अचेतनान्तराधिकारादेव गृहविशेषान्तरं दृष्टान्ततयाऽभिधित्सुः पुरुष-स्त्रियोश्चान्तरं दार्ष्टान्तिकतया अभिधातुकामः सूत्रचतुष्टयमाह– **चत्तारि कूडे**त्यादि, **कूटानि** शिखराणि स्तूपिकाः, तद्वन्त्य**गाराणि** गेहानि, अथवा **कूटं** सत्त्वबन्धनस्थानम्, तद्वदगाराणि **कूटागाराणि**, तत्र **गुप्तं** प्राकारादिवृतं भूमिगृहादि वा पुनर्गुप्तं स्थगितद्वारतया पूर्वकालापरकालापेक्षया वेति, एवमन्येऽपि त्रयो भङ्गा बोद्धव्याः, पुरुषस्तु गुप्तो नेपथ्यादिनाऽन्तर्हितत्वेन पुन**र्गुप्तो** गुप्तेन्द्रियत्वेन, अथवा गुप्तः पूर्वं पुनर्गुप्तोऽधुनापीति, विपर्यय ऊह्यः ।

तथा कूटस्येव आकारो यस्याः **शालाया** गृहविशेषस्य सा तथा, अयं च स्त्रीलिङ्गदृष्टान्तः, स्त्रीलक्षणदार्ष्टान्तिकार्थसाधर्म्यवशात्, तत्र **गुप्ता** परिवारावृता गृहान्तर्गता वस्त्राच्छादिताङ्गा गूढस्वभावा वा **गुप्तेन्द्रिया** तु निगृहीतानौचित्यप्रवृत्तेन्द्रिया, एवं शेषभङ्गा ऊह्याः ।

[सू० २७६] चउव्विहा ओगाहणा पन्नत्ता, तंजहा-दव्वोगाहणा, खेत्तोगाहणा, कालोगाहणा, भावोगाहणा ।

[टी०] अनन्तरं गुप्तेन्द्रियत्वमुक्तम् इन्द्रियाणि चावगाहनाश्रयाणीत्यवगाहना-निरूपणसूत्रम्, अवगाहन्ते आसते यस्याम् आश्रयन्ति वा यां जीवाः साऽ**वगाहना**

शरीरम्, द्रव्यतोऽवगाहना **द्रव्यावगाहना**, एवं सर्वत्र, तत्र द्रव्यतोऽनन्तद्रव्या, क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढा, कालतोऽसङ्ख्येयसमयस्थितिका, भावतो वर्णाद्यनन्त-गुणेति, अथवाऽवगाहना विवक्षितद्रव्यस्याधारभूता आकाशप्रदेशाः, तत्र द्रव्याणाम-वगाहना द्रव्यावगाहना, क्षेत्रमेवावगाहना **क्षेत्रावगाहना**, कालस्यावगाहना समयक्षेत्रलक्षणा **कालावगाहना**, भाववतां द्रव्याणामवगाहना **भावावगाहना** भावप्राधान्यादिति । आश्रयणमात्रं वाऽवगाहना, तत्र द्रव्यस्य पर्यायैर**वगाहना**ऽऽश्रयणं द्रव्यावगाहना, एवं क्षेत्रस्य कालस्य भावानां द्रव्येणेति, अन्यथा वोपयुज्य व्याख्येयमिति।

[सू० २७७] चत्तारि पन्नत्तीओ अंगबाहिरियातो पन्नत्ताओ, तंजहा-चंदपन्नत्ती, सूरपन्नत्ती, जंबूदीवपन्नत्ती, दीवसागरपन्नत्ती ।

॥ चउट्ठाणस्स पढमो उद्देसओ सम्मत्तो ॥

[टी०] अवगाहनायाश्च प्ररूपणा **प्रज्ञप्ति**ष्विति तच्चतुःस्थानकसूत्रम्, तत्र **प्रज्ञाप्यन्ते** प्रकर्षेण बोध्यन्ते अर्था यासु ताः **प्रज्ञप्तयः**, **अङ्गानि आचारादीनि**, तेभ्यो बाह्याः **अङ्गबाह्याः**, यथार्थाभिधानाश्चैताः कालिकश्रुतरूपाः, तत्र **सूरप्रज्ञप्ति-जम्बूद्वीपप्रज्ञप्ती** पञ्चम-षष्ठाङ्गयोरुपाङ्गभूते, इतरे तु प्रकीर्णकरूपे इति, **व्याख्याप्रज्ञप्ति**रस्ति पञ्चमी केवलं साऽङ्गप्रविष्टेत्येताश्चतस्र उक्ताः ॥

॥ चतुःस्थानके प्रथमोद्देशकः समाप्तः ॥

[अथ द्वितीय उद्देशकः]

[सू० २७८] चत्तारि पडिसंलीणा पन्नत्ता, तंजहा-कोधपडिसंलीणे माणपडिसंलीणे मायापडिसंलीणे लोभपडिसंलीणे । चत्तारि अपडिसंलीणा पन्नत्ता, तंजहा-कोधअपडिसंलीणे जाव लोभअपडिसंलीणे ।

चत्तारि पडिसंलीणा पन्नत्ता, तंजहा-मणपडिसंलीणे वतिपडिसंलीणे कायपडिसंलीणे इंदियपडिसंलीणे । चत्तारि अपडिसंलीणा पन्नत्ता, तंजहा-मणअपडिसंलीणे जाव इंदियअपडिसंलीणे ४ ।

[टी०] व्याख्यातश्चतुःस्थानकस्य प्रथमोद्देशकोऽधुना द्वितीय आरभ्यते, अस्य चायं पूर्वेण सहाभिसम्बन्धः-अनन्तरोद्देशके जीवादिद्रव्य-पर्यायाणां चतुःस्थानकमुक्तमिहापि

तेषामेव तदुच्यत इत्येवंसम्बन्धस्यास्योद्देशकस्येदमादिसूत्रचतुष्टयम्– **चत्तारी**त्यादि, अस्य च पूर्वसूत्रेण सहायमभिसम्बन्धः– अनन्तरसूत्रे प्रज्ञप्तय उक्ताः, ताश्च प्रतिसंलीनैरेव बुध्यन्त इति **प्रतिसंलीनाः** सेतराः अनेनाभिधीयन्त इत्येवंसम्बन्धमिदं सुगमम्, नवरं क्रोधादिकं वस्तु वस्तु प्रति सम्यग्लीना निरोधवन्तः **प्रतिसंलीनाः**, तत्र क्रोधं प्रति उदयनिरोधेनोदयप्राप्तविफलीकरणेन च प्रतिसंलीनः **क्रोधप्रतिसंलीनः**,

कुशलमनउदीरणेनाऽकुशलमनोनिरोधेन च मनः प्रतिसंलीनं यस्य स मनसा वा प्रतिसंलीनो **मनःप्रतिसंलीनः**, एवं वाक्कायेन्द्रियेष्वपि, नवरं शब्दादिषु मनोज्ञा-ऽमनोज्ञेषु राग-द्वेषपरिहारी **इन्द्रियप्रतिसंलीन** इति, अत्र गाथा–

अपसत्थाण निरोहो जोगाणमुदीरणं च कुसलाणं ।
कज्जम्मि य विही गमणं जोगे संलीणया भणिया ॥
सद्देसु य भद्दय-पावएसु सोयविसयमुवगएसु ।
तुट्ठेण व रुट्ठेण व समणेण सया न होयव्वं ॥ [ ]

एवं शेषेन्द्रियेष्वपि वक्तव्या इति । एवं मनःप्रभृतिभिरसंलीनो भवति विपर्ययादिति।

[सू० २७९] चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दीणे णाममेगे दीणे, दीणे णाममेगे अदीणे, अदीणे णाममेगे दीणे, अदीणे णाममेगे अदीणे १ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दीणे णाममेगे दीणपरिणते, दीणे णामं एगे अदीणपरिणते, अदीणे णामं एगे दीणपरिणते, अदीणे णाममेगे अदीणपरिणते २ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दीणे णाममेगे दीणरूवे, ह्व [=४], ३ । एवं दीणमणे ४, दीणसंकप्पे ५, दीणपन्ने ६, दीणदिट्ठी ७, दीणसीलाचारे ८, दीणववहारे ९।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दीणे णाममेगे दीणपरक्कमे, दीणे णाममेगे अदीण[परक्कमे], ह्व [=४], १०। एवं सव्वेसिं चउभंगो भाणितव्वो।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दीणे णाममेगे दीणवित्ती ४, ११। एवं दीणजाती १२, दीणभासी १३, दीणोभासी १४।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दीणे णाममेगे दीणसेवी, ह्व [= ४] १५ । एवं दीणे णाममेगे दीणपरियाए ह्व [= ४], १६ । एवं दीणे णाममेगे दीणपरियाले ह्व [= ४], १७ । सव्वत्थ चउभंगो ।

[टी०] असंलीनमेव प्रकारान्तरेण सप्तदशभिश्चतुर्भङ्गीरूपैर्दीनसूत्रैराह-**दीनो** दैन्यवान् क्षीणोर्जितवृत्तिः पूर्वं पश्चादपि **दीन** एव, अथवा **दीनो** बहिर्वृत्त्या पुन**र्दीनो**-ऽन्तर्वृत्त्येत्यादिश्चतुर्भङ्गी, तथा दीनो बहिर्वृत्त्या म्लानवदनत्वादि-गुणयुक्तशरीरेणेत्यर्थः, एवं **प्रज्ञा**सूत्रं यावदादिपदं व्याख्येयम्, **दीनपरिणतः** अदीनः सन् दीनतया परिणतोऽन्तर्वृत्त्येत्यादिश्चतुर्भङ्गी २, तथा **दीनरूपो** मलिनजीर्णवस्त्रादिनेपथ्यापेक्षया ३, तथा **दीनमनाः** स्वभावत एवानुन्नतचेताः ४, **दीनसङ्कल्प** उन्नतचित्तस्वाभाव्येऽपि कथञ्चिद्दीनविमर्शः ५, तथा **दीनप्रज्ञः** हीनसूक्ष्मार्थालोचनः ६, तथा **दीनश्चित्तादि**-भिरेवमुत्तरत्राप्यादिपदम्, तथा **दीनदृष्टि**र्विच्छायचक्षुः ७, तथा **दीनशीलसमाचारः** हीनधर्म्मानुष्ठानः ८, तथा **दीनव्यवहारो** हीनान्योन्यदान-प्रतिदानादिक्रियः हीनविवादो वा ९, तथा **दीनपराक्रमो** हीनपुरुषकार इति १०, तथा दीनस्येव **वृत्तिः** वर्त्तनं जीविका यस्य स **दीनवृत्तिः** ११, तथा **दीनं** दैन्यवन्तं पुरुषं दैन्यवद्वा यथा भवति तथा याचत इत्येवंशीलो **दीनयाची**, दीनं वा यातीति **दीनयायी**, **दीना** वा हीना जातिरस्येति **दीनजातिः** १२, तथा दीनवद्दीनं वा भाषते **दीनभाषी** १३, दीनवदवभासते प्रतिभाति अपभाषते वा याचत इत्येवंशीलो **दीनावभासी दीनापभाषी** वा १४, तथा **दीनं** नायकं सेवत इति **दीनसेवी** १५, तथा दीनस्येव **पर्यायः** अवस्था प्रव्रज्यादिलक्षणो यस्य स **दीनपर्यायः** १६, **दीनपरियाले** त्ति दीनः परिवारो यस्य स तथा १७, **सव्वत्थ चउभंगो** त्ति सर्वसूत्रेषु चत्वारो भङ्गा द्रष्टव्या इति ।

[सू० २८०] **चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अज्जे णाममेगे अज्जे ४, १ ।**

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अज्जे णाममेगे अज्जपरिणते ४, २ ।

एवं अज्जरूवे ३, अज्जमणे ४, अज्जसंकप्पे ५, अज्जपन्ने ६, अज्जदिट्ठी ७, अज्जसीलाचारे ८, अज्जववहारे ९, अज्जपरक्कमे १०, अज्जवित्ती ११,

अज्जजाती १२, अज्जभासी १३, अज्जओभासी १४, अज्जसेवी १५, एवं अज्जपरियाए १६, अज्जपरियाले १७, एवं सत्तरस आलावगा जहा दीणेणं भणिया तहा अज्जेण वि भाणियव्वा ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अज्जे णाममेगे अज्जभावे, अज्जे नाममेगे अणज्जभावे, अणज्जे नाममेगे अज्जभावे, अणज्जे नाममेगे अणज्जभावे १८।

[टी०] पुरुषजाताधिकारवत्येवेयमष्टादशसूत्री गतार्था नवरम्, आर्यो नवधा, यदाह–

खेत्ते जाई कुल कम्म सिप्प भासाए नाणचरणे य ।

दंसणआरिय णवहा मेच्छा सग-जवण-खसमाइ ॥ [ ] त्ति ।

तत्र **आर्यः** क्षेत्रतः पुन**रार्यः** पापकर्मबहिर्भूतत्वेनाऽपाप इत्यर्थः, एवं सप्तदश सूत्राणि नेयानि । तथा **आर्यभावः** क्षायिकादिज्ञानादियुक्तः **अनार्यभावः** क्रोधादिमानिति ।

[सू० २८१] [१] चत्तारि उसभा पन्नत्ता, तंजहा-जातिसंपन्ने, कुलसंपन्ने, बलसंपन्ने, रूवसंपन्ने । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने जाव रूवसंपन्ने १ ।

चत्तारि उसभा पन्नत्ता, तंजहा-जातिसंपन्ने णामं एगे नो कुलसंपण्णे, कुलसंपन्ने नामं एगे नो जाइसंपन्ने, एगे जातिसंपन्ने वि कुलसंपन्ने वि, एगे नो जातिसंपन्ने नो कुलसंपन्ने । एवामेव चत्तारि पुरिसज्जाया पन्नत्ता, तंजहा-जातिसंपन्ने ट्क [= ४], २ ।

चत्तारि उसभा पन्नत्ता, तंजहा-जातिसंपन्ने नामं एगे नो बलसंपन्ने ट्क [= ४] । एवामेव चत्तारि पुरिसज्जाया पन्नत्ता, तंजहा-जातिसंपन्ने ह्व[= ४], ३।

चत्तारि उसभा पन्नत्ता, तंजहा-जातिसंपन्ने नामं एगे नो रूवसंपन्ने ट्क [= ४] । एवामेव चत्तारि पुरिसज्जाया पन्नत्ता, तंजहा-जातिसंपन्ने नामं एगे नो रूवसंपन्ने, रूवसंपन्ने नामं एगे ह्व [= ४], ४ ।

चत्तारि उसभा पन्नत्ता, तंजहा-कुलसंपन्ने नामं एगे नो बलसंपन्ने, बलसंपन्ने

नामं एगे ह्व [= ४] । एवामेव चतारि पुरिसज्जाया पन्नत्ता, तंजहा-कुलसंपन्ने नाममेगे नो बलसंपन्ने ह्व [= ४], ५ ।

चत्तारि उसभा पन्नत्ता, तंजहा-कुलसंपन्ने णाममेगे णो रूवसंपन्ने ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-कुलसंपन्ने णाममेगे णो रूवसंपन्ने ह्व [= ४], ६ ।

चत्तारि उसभा पन्नत्ता, तंजहा-बलसंपन्ने णामं एगे नो रूवसंपन्ने ह्व [= ४] । एवामेव चतारि पुरिसजाता पन्नत्ता, तंजहा-बलसंपन्ने णाममेगे नो रूवसंपन्ने ह्व [= ४], ७ ।

[२] चत्तारि हत्थी पन्नत्ता, तंजहा-भद्दे, मंदे, मिते, संकिन्ने । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-भद्दे, मंदे, मिते, संकिन्ने ।

चत्तारि हत्थी पन्नत्ता, तंजहा-भद्दे णाममेगे भद्दमणे, भद्दे णाममेगे मंदमणे, भद्दे णाममेगे मियमणे, भद्दे नाममेगे संकिन्नमणे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-भद्दे णाममेगे भद्दमणे, भद्दे णाममेगे मंदमणे, भद्दे णाममेगे मियमणे, भद्दे णाममेगे संकिन्नमणे ।

चत्तारि हत्थी पन्नत्ता, तंजहा-मंदे णाममेगे भद्दमणे, मंदे नाममेगे मंदमणे, मंदे णाममेगे मितमणे, मंदे णाममेगे संकिन्नमणे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मंदे णाममेगे भद्दमणे तं चेव ।

चत्तारि हत्थी पन्नत्ता, तंजहा-मिते णाममेगे भद्दमणे, मिते णाममेगे मंदमणे, मिते णाममेगे मितमणे, मिते णाममेगे संकिन्नमणे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मिते णाममेगे भद्दमणे तं चेव ।

चत्तारि हत्थी पन्नत्ता, तंजहा-संकिण्णे नाममेगे भद्दमणे, संकिन्ने नाममेगे मंदमणे, संकिन्ने नाममेगे मियमणे, संकिन्ने णाममेगे संकिन्नमणे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-संकिन्ने नाममेगे भद्दमणे तं चेव जाव संकिन्ने नाममेगे संकिन्नमणे ।

मधुगुलियपिंगलक्खो अणुपुव्वसुजायदीहणंगूलो ।

पुरओ उदग्गधीरो सव्वंगसमाधितो भद्दो ॥१५॥
चलबहलविसमचम्मो थुल्लसिरो थूलएण पेएण ।
थूलणह-दंत-वालो हरिपिंगललोयणो मंदो ॥१६॥
तणुओ तणुतग्गीवो तणुयततो तणुयदंत-णह-वालो ।
भीरू तत्थुव्विग्गो तासी य भवे मिते णामं ॥१७॥
एतेसिं हत्थीणं थोव-थोवं तु जो अणुहरति हत्थी ।
रूवेण व सीलेण व सो संकिन्नो त्ति णायव्वो ॥१८॥
भद्दो मज्जति सरए मंदो उण मज्जते वसंतम्मि ।
मिओ मज्जति हेमंते संकिन्नो सव्वकालम्मि ॥१९॥

[टी०] पुरुषजातप्रकरणमेव दृष्टान्त-दार्ष्टान्तिकार्थोपेतमा विकथासूत्रादभिधीयते, पाठसिद्धं चैतत्, नवरम् **ऋषभा** बलीवर्दाः, **जातिः** गुणवन्मातृकत्वम्, **कुलं** गुणवत्पितृकत्वम्, **बलं** भारवहनादिसामर्थ्यम्, **रूपं** शरीरसौन्दर्यमिति, पुरुषास्तु स्वयं भावयितव्याः २, अनन्तरदृष्टान्तसूत्राणि तु सपुरुषदार्ष्टान्तिकानि जात्यादीनि चत्वारि पदानि भुवि विन्यस्य षण्णां द्विकसंयोगानां **जाइसंपन्ने नो कुलसंपन्ने** इत्यादिना स्थानभङ्गकक्रमेण षडेव चतुर्भङ्गिकाः कृत्वा समवसेयानि ।

हस्तिसूत्रे भद्रादयो हस्तिविशेषा वक्ष्यमाणलक्षणा वनादिविशेषिताश्च, यदाह–

भद्रो मन्दो मृगश्चेति विज्ञेयास्त्रिविधा गजाः ।
वनप्रचार १ सारूप्य २ सत्त्वभेदोपलक्षिताः ३ ॥ [ ] इति ।

तत्र भद्रो हस्ती भद्र एव धीरत्वादिगुणयुक्तत्वात्, मन्दो मन्द एव धैर्य-वेगादिगुणेषु मन्दत्वात्, मृगो मृग एव तनुत्व-भीरुत्वादिना, सङ्कीर्णः किञ्चिद् भद्रादिगुणयुक्तत्वात् सङ्कीर्ण एवेति, पुरुषोऽप्येवं भावनीयः, उत्तरसूत्राणि तु चत्वारि सदार्ष्टान्तिकानि भद्रादिपदानि चत्वारि तदधः क्रमेण चत्वार्येव भद्रमनःप्रभृतीनि च विन्यस्य **भद्दे नामं एगे भद्दमणे** इत्यादिना क्रमेण समवसेयानि,

भ	मं	मृ	सं
भम	मंम	मिम	संम

, तत्र भद्रो जात्याकाराभ्यां प्रशस्तस्तथा भद्रं मनो यस्याथवा भद्रस्येव मनो यस्य स तथा,

धीर इत्यर्थः, मन्दं मन्दस्येव वा मनो यस्य स तथा, नात्यन्तधीरः, एवं मृगमना भीरुरित्यर्थः, सङ्कीर्णमना भद्रादिचित्रलक्षणोपेतमना विचित्रचित्त इत्यर्थः, पुरुषास्तु वक्ष्यमाणभद्रादिलक्षणानुसारेण प्रशस्ताप्रशस्तस्वरूपा मन्तव्या इति ।

भद्रादिलक्षणमिदम्– **महु** गाहा, **मधुगुटिकेव** क्षौद्रवटिकेव **पिङ्गले** पिङ्गे **अक्षिणी** लोचने यस्य स तथा, **अनुपूर्वेण** परिपाट्या सुष्ठु **जातः** उत्पन्नो यः सोऽ**नुपूर्वसुजातः**, स्वजात्युचितकालक्रमजातो हि बल-रूपादिगुणयुक्तो भवति स चासौ दीर्घलाङ्गूलश्च दीर्घपुच्छ इति स तथा, अनुपूर्व्वेण वा स्थूल-सूक्ष्म-सूक्ष्मतरलक्षणेन सुजातं दीर्घं लाङ्गूलं यस्य स तथेति, **पुरतः** अग्रभागे **उदग्रः** उन्नतः, तथा **धीरः** अक्षोभः, तथा सर्वाण्यङ्गानि सम्यक् प्रमाणलक्षणोपेतत्वेन आहितानि व्यवस्थितानि यस्य स **सर्वाङ्गसमाहितो** भद्रो नाम गजविशेषो भवतीति । **चल** गाहा, **चलं** श्लथं **बहलं** स्थूलं **विषमं** वलियुक्तं चर्म्म यस्य स तथा, **स्थूलशिराः**, स्थूलकेन **पेएण** त्ति पेचकेन पुच्छमूलेन युक्तः, **स्थूलनख-दन्त-वालो हरिपिङ्गललोचनः** सिंहवत् पिङ्गाक्षो **मन्दो** गजविशेषो भवतीति । **तणु**गाहा, **तनुकः** कृशः **तनुग्रीवः तनुत्वक् तनुचर्म्मा तनुकदन्तनखवालः**, **भीरुः** भयशीलः स्वभावतः, **त्रस्तो** भयकारणवशात् स्तब्धकर्णकरणादिलक्षणोपेतो भीत एव, **उद्विग्नः** कष्टविहारादावुद्वेगवान्, स्वयं त्रस्तः परानपि त्रासयतीति **त्रासी** च भवेन्**मृगो नाम** गजभेद इति, **एएसिं** गाहा **भद्दो** गाहा कण्ठ्ये । तथा–

दंतेहि हणइ भद्दो मंदो हत्थेण आहणइ हत्थी ।
गत्ताधरेहि य मिओ संकिन्नो सव्वओ हणइ ॥ [ ] त्ति ।

[सू० २८२] [१] चत्तारि विकहाओ पन्नत्ताओ, तंजहा-इत्थिकहा, भत्तकहा, देसकहा, रायकहा ।

इत्थिकहा चउव्विहा पन्नत्ता, तंजहा-इत्थीणं जाइकहा, इत्थीणं कुलकहा, इत्थीणं रूवकहा, इत्थीणं णेवत्थकहा ।

भत्तकहा चउव्विहा पन्नत्ता, तंजहा-भत्तस्स आवावकहा, भत्तस्स णिव्वावकहा, भत्तस्स आरंभकहा, भत्तस्स निट्ठाणकहा ।

देसकहा चउव्विहा पन्नत्ता, तंजहा-देसविहिकहा, देसविकप्पकहा, देसच्छंदकहा, देसनेवत्थकहा ।

रायकहा चउव्विहा पन्नत्ता, तंजहा-रन्नो अतिताणकहा, रन्नो निज्जाणकहा, रन्नो बलवाहणकहा, रन्नो कोस-कोट्ठागारकहा ।

[२] चउव्विहा कहा पन्नत्ता, तंजहा-अक्खेवणी, विक्खेवणी, संवेगणी, निव्वेगणी ।

अक्खेवणी कहा चउव्विहा पन्नत्ता, तंजहा-आयारक्खेवणी, ववहारक्खेवणी, पन्नत्तिक्खेवणी, दिट्ठिवातअक्खेवणी ।

विक्खेवणी कहा चउव्विहा पन्नत्ता, तंजहा-ससमयं कहेति, ससमयं कहेत्ता परसमयं कहेति १, परसमयं कहेत्ता ससमयं ठावतित्ता भवति २, सम्मावातं कहेति, सम्मावातं कहेत्ता मिच्छावातं कहेति ३, मिच्छावातं कहेत्ता सम्मावातं ठावतित्ता भवति ४ ।

संवेगणी कथा चउव्विहा पन्नत्ता, तंजहा-इहलोगसंवेगणी, परलोगसंवेगणी, आतसरीरसंवेगणी, परसरीरसंवेगणी ।

णिव्वेगणी कहा चउव्विहा पन्नत्ता, तंजहा-इहलोगे दुच्चिन्ना कम्मा इहलोगे दुहफलविवागसंजुत्ता भवंति १, इहलोगे दुच्चिन्ना कम्मा परलोगे दुहफलविवागसंजुत्ता भवंति २, परलोगे दुच्चिन्ना कम्मा इहलोगे दुहफलविवागसंजुत्ता भवंति ३, परलोगे दुच्चिन्ना कम्मा परलोगे दुहफलविवागसंजुत्ता भवंति ४ । इहलोगे सुचिन्ना कम्मा इहलोगे सुहफलविवागसंजुत्ता भवंति १, इहलोगे सुचिन्ना कम्मा परलोगे सुहफलविवागसंजुत्ता भवंति २, एवं चउभंगो तहेव ।

[टी०] अनन्तरं संकीर्णः सङ्कीर्णमना इत्यत्र मनःस्वरूपमुक्तम्, अथ वाचः स्वरूपभणनाय विकथाकथाप्रकरणमाह, सुगमम्, नवरं विरुद्धा संयमबाधकत्वेन कथा वचनपद्धति**र्विकथा**, ततः स्त्रीणां स्त्रीषु वा कथा **स्त्रीकथा**, इयं च कथेत्युक्तापि स्त्रीविषयत्वेन संयमविरुद्धत्वाद्विकथेति भावनीयेति, एवं **भक्तस्य** भोजनस्य, **देशस्य**

जनपदस्य, **राज्ञो** नृपस्येति । ब्राह्मणीप्रभृतीनामन्यतमाया या प्रशंसा निन्दा वा सा जात्या जातेर्वा कथेति **जातिकथा**, यथा–

धिग्ब्राह्मणीर्धवाभावे या जीवन्ति मृता इव ।
धन्या मन्ये जने शूद्रीः पतिलक्षेऽप्यनिन्दिताः ॥ [ ] इति ।

एवम् उग्रादिकुलोत्पन्नानामन्यतमाया यत् प्रशंसादि सा **कुलकथा**, यथा–

अहो चौलुक्यपुत्रीणां साहसं जगतोऽधिकम् ।
पत्युर्मृत्यौ विशन्त्यग्नौ याः प्रेमरहिता अपि ॥ [ ] इति ।

तथा अन्ध्रीप्रभृतीनामन्यतमाया रूपस्य यत् प्रशंसादि सा **रूपकथा**, यथा–

चन्द्रवक्त्रा सरोजाक्षी सद्गी पीनघनस्तनी ।
किं लाटी नो मता साऽस्य देवानामपि दुर्लभा? ॥ [ ] इति ।

तासामेव अन्यतमायाः कच्छाबन्धादिनेपथ्यस्य यत् प्रशंसादि सा **नेपथ्यकथेति**, यथा–

धिग्नारीरौदीच्या बहुवसनाच्छादिताङ्गलतिकत्वात् ।
यद्यौवनं न यूनां चक्षुर्मोदाय भवति सदा ॥ [ ] इति ।

स्त्रीकथायां चैते दोषाः–

आय-परमोहुदीरणं उड्डाहो सुत्तमाइपरिहाणी ।
बंभवयस्स अगुत्ती पसंगदोसा य गमणादी ॥ [निशीथभा० १२१]

उन्निष्क्रमणादय इत्यर्थः । तथा शाक-घृतादीन्येतावन्ति तस्यां रसवत्यामुपयुज्यन्त इत्येवंरूपा कथा **आवापकथा**, एतावन्तस्तत्र पक्वापक्वान्नभेदा व्यञ्जनभेदा वेति **निर्वापकथेति**, तित्तिरादीनामियतां तत्रोपयोग **इत्यारम्भकथा**, एतावत् द्रविणं तत्रोपयुज्यत इति **निष्ठानकथेति**, उक्तं च–

सागघयादावावो पक्वापक्वो य होइ निव्वावो ।
आरंभ तित्तिराई णिट्ठाणं जा सयसहस्सं ॥ [निशीथभा० १२३] इति ।

इह चामी दोषाः–

आहारमंतरेण वि गेहीओ जायए स इंगालं ।
अजिइंदिय ओदरियावाओ उ अणुन्नदोसा य ॥ [निशीथभा० १२४] इति ।

तथा **देशे** मगधादौ **विधिः** विरचना भोजन-मणि-भूमिकादीनां भुज्यते वा यद्यत्र प्रथमतयेति देशविधिः, तत्कथा **देशविधिकथा**, एवमन्यत्रापि । नवरं **विकल्पः** सस्यनिष्पत्तिः वप्र-कूपादि-देवकुल-भवनादिविशेषश्चेति, **छन्दो** गम्यागम्यविभागो यथा **लाट**देशे मातुलभगिनी गम्या अन्यत्रागम्येति, **नेपथ्यं** स्त्री-पुरुषाणां वेषः स्वाभाविको विभूषाप्रत्ययश्चेति । इह दोषाः–

रागद्दोसुप्पत्ती सपक्ख-परपक्खओ य अहिगरणं ।
बहुगुण इमो त्ति देसो सोउं गमणं च अन्नेसिं ॥ [निशीथभा० १२७] ति ।

तथा **रायकहे** त्ति, **अतियानं** नगरादौ प्रवेशः, तत्कथा **अतियानकथा**, यथा–

सियसिंधुरखंधगओ सियचमरो सेयछत्तछन्नणहो ।
जणणयणकिरणसेओ एसो पविसइ पुरे राया ॥ [ ] इति ।

एवं सर्वत्र, नवरं **निर्याणं** निर्गमः, तत्**कथा** यथा–

वज्जंतायोज्जममंदबंदिसद्दं मिलंतसामंतं ।
संखुद्धसेन्नमुद्धुयचिंधं नयरा निवो नीइ ॥ [ ]

बलं हस्त्यादि, **वाहनं** वेगसरादि, तत्**कथा** यथा–

हेसंतहयं गज्जंतमयगलं घणघणंतरहलक्खं ।
कस्सऽन्नस्स वि सेन्नं णिन्नासियसत्तुसिन्नं भो ! ॥ [ ]

कोशो भाण्डागारम्, **कोष्ठागारं** धान्यागारमिति, तत्**कथा** यथा–

पुरिसपरंपरपत्तेण भरियविस्संभरेण कोसेणं ।
णिज्जियवेसमणेणं तेण समो को निवो अन्नो? ॥ [ ] त्ति ।

इह चैते दोषाः–

चारिय चोरा १ भिमरे २ हिय १ मारिय २ संक काउकामा वा ।
भुत्ताभुत्तोहाणे करेज्ज वा आससपओगं ॥ [निशीथभा० १३०]

भुक्तभोगोऽभुक्तभोगो वा अवधावनं कुर्यादित्यर्थः ।

आक्षिप्यते मोहात् तत्त्वं प्रत्याकृष्यते श्रोताऽनयेत्य**ाक्षेपणी**, तथा विक्षिप्यते सन्मार्गात् कुमार्गे कुमार्गाद्वा सन्मार्गे श्रोताऽनयेति **विक्षेपणी**, संवेगयति संवेगं करोतीति **संवेगनी संवेद्यते** वा संबोध्यते **संवेज्यते** वा संवेगं ग्राह्यते श्रोताऽनयेति **संवेदनी**

संवेजनी वेति, निर्विद्यते संसारादेर्निर्व्विण्णः क्रियते अनयेति **निर्वेदनी**ति । **आचारो** लोचा-ऽस्नानादिः, तत्प्रकाशनेन आक्षेपणी **आचाराक्षेपणी**ति, एवमन्यत्रापि, नवरं **व्यवहारः** कथञ्चिदापन्नदोषव्यपोहाय प्रायश्चित्तलक्षणः, **प्रज्ञप्तिः** संशयापन्नस्य श्रोतुर्मधुरवचनैः प्रज्ञापनम्, **दृष्टिवादः** श्रोत्रपेक्षया नयानुसारेण सूक्ष्मजीवादिभावकथनम्, अन्ये त्वभिदधति **आचारा**दयो ग्रन्था एव परिगृह्यन्ते, आचाराद्यभिधानादिति, अस्याश्चायं रसः—

विज्जा चरणं च तवो पुरिसक्कारो य समिइगुत्तीओ ।
उवइस्सइ खलु जं सो कहाए अक्खेवणीय रसो ॥ [दशवै० नि० १९५] इति ।

स्वसमयं स्वसिद्धान्तं **कथयति**, तद्गुणानुद्दीपयति पूर्वम्, ततस्तं कथयित्वा **परसमयं कथयति**, तद्दोषान् दर्शयतीत्येका । एवं परसमयकथनपूर्वकं **स्वसमयं स्थापयिता** स्वसमयगुणानां स्थापको भवतीति द्वितीया । **सम्मावाय**मित्यादि, अस्यायमर्थः— परसमयेष्वपि घुणाक्षरन्यायेन यो यावान् जिनागमतत्त्ववादसदृशतया सम्यग् अविपरीततत्त्वानां वादः सम्यग्वादः तं कथयति, तं **कथयित्वा** तेष्वेव यो जिनप्रणीततत्त्व- विरुद्धत्वान्**मिथ्यावाद**स्तं दोषदर्शनतः **कथयती**ति तृतीया। परसमयेष्वेव **मिथ्यावादं कथयित्वा सम्यग्वादं स्थापयिता भवती**ति चतुर्थी ।

इहलोको मनुष्यजन्म, तत्स्वरूपकथनेन संवेगनी **इहलोकसंवेगनी**, सर्वमिदं मानुषत्वमसारमध्रुवं कदलीस्तम्भसमानमित्यादिरूपा । एवं **परलोकसंवेदनी** देवादि-भवस्वभावकथनरूपा देवा अपीर्ष्या-विषाद-भय-वियोगादिदुःखैरभिभूताः, किं पुनस्तिर्यगादय इति । **आत्मशरीरसंवेगनी** यदेतदस्मदीयं शरीरमेतदशुचिकारण-जातमशुचिद्वारविनिर्गतमिति न प्रतिबन्धस्थानमित्यादिकथनरूपा, एवं **परशरीरसंवेगनी**, अथवा **परशरीरं** मृतकशरीरमिति ।

इहलोके दुश्चीर्णानि चौर्यादीनि **कर्म्माणि** क्रिया **इहलोके** दुःखमेव कर्म्मद्रुमजन्यत्वात् फलं **दुःखफलं** तस्य **विपाकः** अनुभवो **दुःखफलविपाक**स्तेन संयुक्तानि **दुःखफलविपाकसंयुक्तानि भवन्ति** चौरादीनामिवेत्येका, एवं नारकाणामिवेति द्वितीया, आ गर्भात् व्याधि-दारिद्र्याभिभूतानामिवेति तृतीया, प्राक्कृताशुभकर्मोत्पन्नानां

नरकप्रायोग्यं बध्नतां काक-गृध्रादीनामिव चतुर्थीति ।

इहलोए सुचिन्नेत्यादि चतुर्भङ्गी तीर्थकरदानदातृ १ सुसाधु २ तीर्थकर ३ देवभवस्थतीर्थकरादीना ४ मिव भावनीयेति ।

[सू० २८३] चत्तारि पुरिसजाया पन्नत्ता, तंजहा-किसे णाममेगे किसे, किसे णाममेगे दढे, दढे णाममेगे किसे, दढे णाममेगे दढे । चत्तारि पुरिसजाया पन्नत्ता, तंजहा-किसे णाममेगे किससरीरे, किसे णाममेगे दढसरीरे, दढे णाममेगे किससरीरे, दढे णाममेगे दढसरीरे ४ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-किससरीरस्स नाममेगस्स णाणदंसणे समुप्पज्जति णो दढसरीरस्स, दढसरीरस्स णाम एगस्स णाणदंसणे समुप्पज्जति णो किससरीरस्स, एगस्स किससरीरस्स वि णाणदंसणे समुप्पज्जति दढसरीरस्स वि, एगस्स नो किससरीरस्स णाणदंसणे समुप्पज्जति णो दढसरीरस्स ।

[टी०] उक्तो वाग्विशेषोऽधुना पुरुषजातप्रधानतया कायविशेषमाह– **चत्तारि पुरिसे**त्यादि कण्ठ्यम्, नवरं **कृशः** तनुशरीरः पूर्वं पश्चादपि **कृश** एव, अथवा **कृशो** भावेन हीनसत्त्वादित्वात् पुनः **कृशः** शरीरादिभिः, एवं **दृढो**ऽपि विपर्ययादिति, पूर्वसूत्रार्थविशेषाश्रितमेव द्वितीयं सूत्रम्, तत्र कृशो भावतः, शेषं सुगमम् ।

कृशस्यैव चतुर्भङ्ग्या ज्ञानोत्पादमाह– **चत्तारी**त्यादि व्यक्तम्, किन्तु **कृशशरीरस्य** विचित्रतपसा भावितस्य शुभपरिणामसम्भवेन तदावरणक्षयोपशमादिभावात् ज्ञानञ्च दर्शनञ्च **ज्ञानदर्शनं** ज्ञानेन वा सह दर्शनं ज्ञानदर्शनं छाद्मस्थिकं कैवलिकं वा तत् **समुत्पद्यते, न दृढशरीरस्य**, तस्य हि उपचितत्वेन बहुमोहतया तथाविधशुभपरिणामाभावेन क्षयोपशमाद्यभावादित्येकः, तथाऽमन्दसंहननस्याल्पमोहस्य **दृढशरीरस्यैव** ज्ञानदर्शनमुत्पद्यते, स्वस्थशरीरतया मनःस्वास्थ्येन शुभपरिणामभावतः क्षयोपशमादिभावात् **न कृशशरीरस्या**ऽस्वास्थ्यादिति द्वितीयः, तथा कृशस्य दृढस्य वा तदुत्पद्यते विशिष्टसंहननस्याल्पमोहस्योभयथापि शुभपरिणामभावात् कृशत्व-दृढत्वे नापेक्षत इति तृतीयः, चतुर्थः सुज्ञानः ।

[सू० २८४] चउहिं ठाणेहिं निग्गंथाण वा निग्गंथीण वा अस्सिं समयंसि

अतिसेसे नाणदंसणे समुप्पज्जिउकामे वि न समुप्पज्जेज्जा, तंजहा-अभिक्खणं अभिक्खणमित्थिकहं भत्तकहं देसकहं रायकहं कहेत्ता भवति १, विवेगेणं विउसग्गेणं णो सम्ममप्पाणं भावित्ता भवति २, पुव्वरत्तावरत्तकालसमयंसि णो धम्मजागरितं जागरतित्ता भवति ३, फासुयस्स एसणिज्जस्स उंछस्स सामुदाणियस्स णो सम्मं गवेसित्ता भवति ४, इच्चेतेहिं चउहिं ठाणेहिं निग्गंथाण वा निग्गंथीण वा जाव नो समुप्पज्जेज्जा ।

चउहिं ठाणेहिं निग्गंथाण वा निग्गंथीण वा अतिसेसे णाणदंसणे समुप्पज्जिउकामे समुप्पज्जेज्जा, तंजहा-इत्थीकहं भत्तकहं देसकहं रायकहं णो कहेत्ता भवति, विवेगेणं विउसग्गेणं सम्ममप्पाणं भावेत्ता भवति, पुव्वरत्तावरत्तकालसमयंसि धम्मजागरितं जागरतित्ता भवति, फासुयस्स एसणिज्जस्स उंछस्स सामुदाणियस्स सम्मं गवेसित्ता भवति, इच्चेतेहिं चउहिं ठाणेहिं णिग्गंथाण वा णिग्गंथीण वा जाव समुप्पज्जेज्जा ।

[टी०] ज्ञानदर्शनयोरुत्पादः उक्तोऽधुना तद्व्याघात उच्यते, तत्र– **चउही**त्यादि सूत्रं स्फुटम्, परं **निर्ग्रन्थी**ग्रहणात् स्त्रिया अपि केवलमुत्पद्यत इत्याहेति । **अस्मिन्नि**ति अस्मिन् प्रत्यक्ष इवानन्तरप्रत्यासन्ने समये **अइसेसे** त्ति शेषाणि मत्यादि– चक्षुर्दर्शनादीनि अतिक्रान्तं सर्वावबोधादिगुणैर्यत्त**दतिशेष**मतिशयवत् केवलमित्यर्थः, **समुत्पत्तु-काममपी**ति इहेवार्थो द्रष्टव्यः, ज्ञानादेरभिलाषाभावात् । **कथयिते**ति शी[३]लार्थिकस्तृन्, तेन द्वितीया न विरुद्धेति। **विवेकेने**ति अशुद्धादित्यागेन **विउसग्गेणं** ति कायव्युत्सर्गेण । **पूर्वरात्र**श्च रात्रेः पूर्वो भागो **अपररात्र**श्च रात्रेरपरो भागः तावेव **कालः** स एव **समयः** अवसरो जागरिकायाः **पूर्वरात्रापररात्रकालसमय**स्तस्मिन्, कुटुम्बजागरिकाव्यवच्छेदेन धर्म्मप्रधाना जागरिका निद्राक्षयेण बोधो **धर्मजागरिका**, भावप्रत्युपेक्षेत्यर्थः, यथा–

किं कय किं वा सेसं किं करणिज्जं तवं च न करेमि ।
पुव्वावरत्तकाले जागरओ भावपडिलेहा ।। [ओघनि० २६२]

इत्यादिरूपा, विभक्तिपरिणामात् तया **जागरिता** जागरको भवति । तथा प्रगता असवः उच्छ्वासादयः प्राणा यस्मात् स **प्रासुको** निर्जीवस्तस्य, **एष्यते** गवेष्यते

उद्गमादिदोषरहिततयेत्**येषणीयः** कल्प्यस्तस्य, उञ्छ्यते अल्पाल्पतया गृह्यत इत्**युञ्छो** भक्त-पानादिस्तस्य, **समुदाने** भिक्षणे याच्ञायां भवः **सामुदानिकः** तस्य, **नो सम्यग् गवेषयिता** अन्वेष्टा **भवति**, इत्येवंप्रकारैः **एतैर**नन्तरोदितैरित्यादि निगमनम्, एतद्विपर्ययसूत्रं कण्ठ्यम् ।

[सू० २८५] नो कप्पति निग्गंथाण वा निग्गंथीण वा चउहिं महापाडिवतेहिं सज्झायं करेत्तए, तंजहा-आसाढपाडिवते, इंदमहपाडिवते, कत्तियपाडिवते, सुगिम्हपाडिवते १।

णो कप्पति निग्गंथाण वा निग्गंथीण वा चउहिं संझाहिं सज्झायं करेत्तए, तंजहा-पढमाते, पच्छिमाते, मज्झण्हे, अड्ढरत्ते ।

कप्पति निग्गंथाण वा निग्गंथीण वा चाउक्कालं सज्झायं करेत्तए, तंजहा-पुव्वण्हे, अवरण्हे, पओसे, पच्चूसे २।

[टी०] निर्ग्रन्थप्रस्तावात्तदकृत्यनिषेधाय सूत्रे **नो कप्पइ** इत्यादिके कण्ठ्ये, केवलं महोत्सवानन्तरवृत्तित्वेनोत्सवानुवृत्त्या शेषप्रतिपद्विलक्षणतया महाप्रतिपदस्तासु, इह च देशविशेषरूढ्या **पाडिवएहिं** ति निर्देशः, **स्वाध्यायो नन्द्या**दिसूत्रविषयो वाचनादिः, अनुप्रेक्षा तु न निषिध्यते, आषाढस्य पौर्णमास्या अनन्तरा प्रतिप**दाषाढप्रतिपदे**वमन्यत्रापि, नवर**मिन्द्रमहः** अश्वयुक्पौर्णमासी, **सुग्रीष्मः** चैत्रपौर्णमासीति, इह च यत्र विषये यतो दिवसान्महामहाः प्रवर्त्तन्ते तत्र तद्दिवसात् स्वाध्यायो न विधीयते महसमाप्तिदिनं यावत् तच्च पौर्णमास्येव, प्रतिपदस्तु क्षणानुवृत्तिसम्भवेन वर्ज्यन्त इति, उक्तं च–

आसाढी इंदमहो कत्तिय सुगिम्हए य बोद्धव्वे ।
एए महामहा खलु सव्वेसिं जाव पाडिवया ॥ [आव० नि० १३५२] इति ।

अकालस्वाध्याये चामी दोषाः–

सुयणाणम्मि अभत्ती लोगविरुद्धं पमत्तछलणा य ।
विज्जासाहणवेगुन्नधम्मया एव मा कुणसु ॥ [आव० नि० १४२२] इति,

विद्यासाधनवैगुण्यसाधर्म्येणैवेत्यर्थः । **प्रथमा** सन्ध्या अनुदिते सूर्ये, **पश्चिमा**

अस्तमयसमये । उक्तविपर्ययसूत्रं कण्ठ्यम्, किन्तु **पुव्वण्हे अवरण्हे** त्ति दिनस्याऽऽद्य-चरमप्रहरयोः, **पओसे पच्चूसे** त्ति रात्रेरिति ।

[सू० २८६] चउव्विहा लोगट्ठिती पन्नत्ता, तंजहा-आगासपतिट्ठिए वाते, वातपतिट्ठिए उदधी, उदधिपतिट्ठिया पुढवी, पुढविपइट्ठिया तसा थावरा पाणा।

[टी०] स्वाध्यायप्रवृत्तस्य च लोकस्थितिपरिज्ञानं भवतीति तामेव प्रतिपादयन्नाह– **चउव्विहे**त्यादि, **लोकस्य** क्षेत्रलक्षणस्य **स्थितिः** व्यवस्था **लोकस्थितिः**, आकाशप्रतिष्ठितो वातो घनवात-तनुवातलक्षणः, **उदधिः** घनोदधिः, **पृथिवी** रत्नप्रभादिका, **त्रसा** द्वीन्द्रियादयस्ते पुनर्ये रत्नप्रभादिपृथिवीष्वप्रतिष्ठितास्तेऽपि विमान-पर्वतादिपृथिवीप्रतिष्ठितत्वात् पृथिवीप्रतिष्ठिता एव, विमान-पृथिवीनां चाकाशादि-प्रतिष्ठितत्वं यथासम्भवमवसेयम्, अविवक्षा वेह विमानादिगतदेवादित्रसानामिति, स्थावरास्त्विह बादरवनस्पत्यादयो ग्राह्याः, सूक्ष्माणां सकललोकप्रतिष्ठितत्वात्, शेषं सुगममिति ।

[सू० २८७] चत्तारि पुरिसजाता पन्नत्ता, तंजहा- तहे नाममेगे, नोतहे नाममेगे, सोवत्थी नाममेगे, पधाणे नाममेगे ४, १ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-आयंतकरे नाममेगे णो परंतकरे १, परंतकरे णाममेगे णो आतंतकरे २, एगे आतंतकरे वि परंतकरे वि ३, एगे णो आतंतकरे णो परंतकरे ४, २ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आतंतमे नाममेगे नो परंतमे, परंतमे नामं एगे ह्व [= ४], ३ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-आयंदमे नाममेगे णो परंदमे ह्व [= ४], ४ ।

[टी०] अनन्तरं त्रसाः प्राणा उक्ताः, अधुना त्रसप्राणविशेषस्य **चत्तारी**त्यादिभि-श्चतुर्भिश्चतुर्भङ्गीसूत्रैः स्वरूपं दर्शयति, कण्ठ्यानि चैतानि, केवलं **तह** त्ति सेवकः सन् यथैवादिश्यते तथैव यः प्रवर्त्तते स **तथः**, अन्यस्तु नो तथैवान्यथापीत्यर्थ इति

नोतथः, तथा स्वस्तीत्याह चरति वा **सौवस्तिकः** प्राकृतत्वात् ककारलोपे दीर्घत्वे च **सोवत्थी** माङ्गलिकाभिधायी मागधादिरन्यः, एतेषामेवाराध्यतया **प्रधानः** प्रभुरन्य इति । **आयंतकरे** त्ति आत्मनोऽन्तम् अवसानं भवस्य करोतीत्**यात्मान्तकरः**, **नो परस्य भवान्तकरो** धर्म्मदेशनाऽनासेवकः प्रत्येकबुद्धादिः १, तथा परस्य भवान्तं करोति मार्गप्रवर्त्तनेन **परान्तकरो** नात्मान्तकरोऽचरमशरीर आचार्यादिः २, तृतीयस्तु तीर्थकरोऽन्यो वा ३, चतुर्थो दुःषमाचार्यादिः४, अथवाऽऽत्मनोऽन्तं मरणं करोतीति **आत्मान्तकरः**, एवं **परान्तकरोऽ**पि, इह प्रथम आत्मवधकः, द्वितीयः परवधकः, तृतीय उभयहन्ता, चतुर्थस्त्ववधक इति, अथवाऽऽत्मतन्त्रः सन् कार्याणि करोतीत्**यात्मतन्त्रकरः**, एवं **परतन्त्रकरो**ऽपि, इह तु प्रथमो जिनः, द्वितीयो भिक्षुः, तृतीय आचार्यादिः, चतुर्थः कार्यविशेषापेक्षया शठयतिः, [अथवा **आत्मतन्त्रम्** आत्मायत्तं धन-गच्छादि करोतीत्यात्मतन्त्रकरः, एवमितरोऽपि, भङ्गयोजना स्वयमूह्येति ।] तथा आत्मानं तमयति खेदयतीत्**यात्मतमः** आचार्यादिः, परं शिष्यादिकं तमयतीति **परतमः**, सर्वत्र प्राकृतत्वादनुस्वारः, अथवा आत्मनि **तमः** अज्ञानं क्रोधो वा यस्य स **आत्मतमाः**, एवमितरोऽपि, तथा आत्मानं **दमयति** शमवन्तं करोति शिक्षयति वेत्या**त्मदमः** आचार्योऽश्वदमकादिर्वा, एवमितरोऽपि, नवरं परः शिष्योऽश्वादिर्वा ।

[सू० २८८] चउव्विधा गरहा पन्नत्ता, तंजहा-उवसंपज्जामित्तगा गरहा, वितिगिंच्छामित्तेगा गरहा, जं किंचि मिच्छामीत्तेगा गरहा, एवं पि पन्नत्तेगा गरहा ।

[टी०] दमश्च गर्ह्यगर्हातः स्यादिति गर्हासूत्रम्, तत्र गुरुसाक्षिका आत्मनो निन्दा **गर्हा**, तत्र **उपसंपद्ये** आश्रयामि गुरुं स्वदोषनिवेदनार्थम् अभ्युपगच्छामि वोचितं प्रायश्चित्तम् **इती**ति एवंप्रकारः परिणाम **एका गर्हे**ति, गर्हात्वं चास्योक्तपरिणामस्य गर्हायाः कारणत्वेन कारणे कार्योपचाराद् गर्हासमानफलत्वाच्च द्रष्टव्यमिति ।

तथा **वितिगिच्छामि** त्ति **वी**ति विशेषेण विविधप्रकारैर्वा **चिकित्सामि** प्रतिकरोमि निराकरोमि गर्हणीयान् दोषान् **इती**ति एवंविकल्पात्मिका **एका**ऽन्या **गर्हा**, तत एवेति, तथा **जं किंचि मिच्छामी**ति **यत् किञ्चना**नुचितं तन्**मिथ्या** विपरीतं दुष्ठु **मे** मम

इतीत्येवं वासनागर्भवचनरूपा **एका**ऽन्या **गर्हा**, एवंस्वरूपत्वादेव गर्हायाः, तथा **एवमपीति** अनेनापि स्वदोषगर्हणप्रकारेणापि **प्रज्ञप्ता** अभिहिता जिनैर्दोषशुद्धिरिति प्रतिपत्तिरे**का गर्हा**, [एवंविधप्रतिपत्तेर्गर्हा]कारणत्वादिति ।

[सू० २८९] चत्तारि पुरिसजाया पन्नत्ता, तंजहा-अप्पणो नाममेगे अलमंथू भवति, णो परस्स, परस्स नाममेगे अलमंथू भवति णो अप्पणो, एगे अप्पणो वि अलमंथू भवति परस्स वि, एगे नो अप्पणो अलमंथू भवति णो परस्स १ ।

चत्तारि मग्गा पन्नत्ता, तंजहा-उज्जू नाममेगे उज्जू, उज्जू नाममेगे वंके, वंके नाममेगे उज्जू, वंके नाममेगे वंके २ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-उज्जू नाममेगे उज्जू ह्व [= ४], ३ ।

चत्तारि मग्गा पन्नत्ता, तंजहा-खेमे नाममेगे खेमे, खेमे णाममेगे अखेमे ह्व [= ४], ४ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-खेमे णाममेगे खेमे ह्व [= ४], ५ ।

चत्तारि मग्गा पन्नत्ता, तंजहा-खेमे णाममेगे खेमरूवे, खेमे णाममेगे अखेमरूवे ह्व [= ४], ६ । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-खेमे नाममेगे खेमरूवे ह्व [= ४], ७ ।

चत्तारि संबुक्का पन्नत्ता, तंजहा-वामे नाममेगे वामावत्ते, वामे नाममेगे दाहिणावत्ते, दाहिणे नाममेगे वामावत्ते, दाहिणे नाममेगे दाहिणावत्ते ८ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-वामे नाममेगे वामावत्ते ह्व [= ४], ९ ।

चत्तारि धूमसिहाओ पन्नत्ताओ, तंजहा-वामा नाममेगा वामावत्ता ह्व [= ४], १० ।

एवामेव चत्तारि इत्थीओ पन्नत्ताओ, तंजहा-वामा णाममेगा वामावत्ता ह्व [= ४], ११ ।

चत्तारि अग्गिसिहाओ पन्नत्ताओ, तंजहा-वामा णाममेगा वामावत्ता ह्व

[= ४], १२ ।

एवामेव चत्तारि इत्थीओ पन्नत्ताओ, तंजहा-वामा णाममेगा वामावत्ता ह्व [= ४], १३ ।

चत्तारि वायमंडलिया पन्नत्ता, तंजहा-वामा णाममेगा वामावत्ता ह्व (= ४], १४ ।

एवामेव चत्तारि इत्थीओ पन्नत्ताओ, तंजहा-वामा णाममेगा वामावत्ता ह्व [= ४], १५ ।

चत्तारि वणसंडा पन्नत्ता, तंजहा-वामे नाममेगे वामावत्ते ह्व [= ४], १६। **एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-वामे णाममेगे वामावत्ते ह्व** [= ४], १७ ।

[टी०] गर्हा च दोषवर्जकस्यैव सम्यग् भवति नेतरस्येति दोषवर्जक-जीवस्वरूपनिरूपणाय सप्तदश चतुर्भङ्गीसूत्राणि सुगमानि, केवलम् **अलमस्तु** निषेधो भवतु य एवमाह सोऽ**लमस्त्वि**त्युच्यते, निषेधक इत्यर्थः, स चात्मनो दुर्णयेषु प्रवर्त्तमानस्यैको निषेधकः, अथवा **अलमंथु** त्ति समयभाषया समर्थोऽभिधीयते, ततः आत्मनो निग्रहे समर्थः कश्चिदिति १। एको मार्ग **ऋजु**रादावन्तेऽपि **ऋजुः**, अथवा ऋजुः प्रतिभाति तत्त्वतोऽपि ऋजुरेवेति २। पुरुषस्तु ऋजुः पूर्वापरकालापेक्षया, अन्तस्तत्त्वबहिस्तत्त्वापेक्षया वेति, क्वचित्तु **उज्जू नामं एगे उज्जूमणे** त्ति पाठः, सोऽपि बहिस्तत्त्वान्तस्तत्त्वापेक्षया व्याख्येयः ३। **क्षेमो नामैको** मार्ग आदौ निरुपद्रवतया पुनः **क्षेमो**ऽन्ते तथैव, प्रसिद्धि-तत्त्वाभ्यां वा ४। एवं पुरुषोऽपि क्रोधाद्युपद्रवरहिततया क्षेम इति ५। **क्षेमो** भावतोऽनुपद्रवत्वेन **क्षेमरूप** आकारेण मार्गः ६। पुरुषस्तु प्रथमो भाव-द्रव्यलिङ्गयुक्तः साधुः, द्वितीयः कारणिको द्रव्यलिङ्गवर्जितः साधुरेव, तृतीयो निह्नवः, चतुर्थोऽन्यतीर्थिको गृहस्थो वेति ७, **संबुक्के** त्ति **शम्बूकाः** शङ्खाः, **वामो** वामपार्श्वव्यवस्थितत्वात् प्रतिकूलगुणत्वाद्वा, **वामावर्त्तः** प्रतीतः, एवं **दक्षिणावर्त्तो**ऽपि, दक्षिणो दक्षिणपार्श्वनियुक्तत्वादनुकूलगुणत्वाद्वेति ८, पुरुषस्तु **वामः** प्रतिकूलस्वभावतया वाम एवा**वर्त्तते** प्रवर्त्तत इति **वामावर्त्तो** विपरीतप्रवृत्तेरेकः, अन्यो **वाम** एव स्वरूपेण,

कारणवशाद् **दक्षिणावर्त्तः** अनुकूलप्रवृत्तिः, अन्यस्तु **दक्षिणो**ऽनुकूलस्वभावतया, कारणवशात् **वामावर्त्तः** अननुकूलवृत्तिरिति, एवं चतुर्थोऽपीति ९, **धूमशिखा वामा** वामपार्श्ववृत्तितया अननुकूलस्वभावतया वा वामत एवावर्त्तते या तथा वलनात् सा **वामावर्त्ता** १०, स्त्री पुरुषवद् व्याख्येया ११, कम्बुदृष्टान्ते सत्यपि धूमशिखादिदृष्टान्तानां स्त्रीदार्ष्टान्तिके शब्दसाधर्म्येणोपपन्नतरत्वाद् भेदेनोपादानमिति । एवमग्निशिखापि १२--१३। **वातमण्डलिका** मण्डलेनोद्ध्वप्रवृत्तो वायुरिति, इह च स्त्रियो मालिन्योपताप-चापल्यस्वभावा भवन्तीत्यभिप्रायेण तासु धूमशिखादिदृष्टान्तत्रयोपन्यास इति, उक्तं च–

चवला मइलणशीला सिणेहपरिपूरिया वि तावेइ ।
दीवयसिह व्व महिला लद्धप्पसरा भयं देइ ॥ [ ] इति, १४-१५।

वनखण्डस्तु शिखावत्, नवरं **वामावर्त्तो** वामवलनेन जातत्वाद् वायुना वा तथा धूयमानत्वादिति १६, पुरुषस्तु पूर्ववदिति १७ ।

[सू० २९०] चउहिं ठाणेहिं णिग्गंथे णिग्गंथिं आलवमाणे वा संलवमाणे वा णातिक्कमति, तंजहा-पंथं पुच्छमाणे वा १, पंथं देसमाणे वा २, असणं वा पाणं वा खाइमं वा साइमं वा दलयमाणे वा ३, दवावेमाणे वा ४।

[टी०] अनुकूलस्वभावोऽनुकूलप्रवृत्तिश्चानन्तरं पुरुष उक्तः, एवंभूतश्च निर्ग्रन्थः सामान्येनानुचितप्रवृत्तावपि न स्वाचारमतिक्रामतीति दर्शयन्नाह– **चउही**त्यादि स्फुटम्, किन्त्**वालपन्** ईषत् प्रथमतया वा जल्पन् **संलपन्** मिथो भाषणेन **नातिक्रामति** न लङ्घयति निर्ग्रन्थाचारम्, **एगो एगित्थिए सद्धिं नेव चिट्ठे न संलवे** [उत्तरा० १।२६] विशेषतः साध्व्या, इत्येवंरूपम्, मार्गप्रश्नादीनां पुष्टालम्बनत्वादिति । तत्र मार्गं पृच्छन्, प्रश्ननीयसाधर्म्मिकगृहस्थपुरुषादीनामभावे– हे आर्ये ! कोऽस्माकमितो गच्छतां मार्ग इत्यादिना क्रमेण, मार्गं वा तस्या **देशयन्**– धर्म्मशीले ! अयं मार्गस्ते इत्यादिना क्रमेण, अशनादि वा ददद्– धर्म्मशीले ! गृहाणेदमशनादीत्येवम्, तथा अशनादि दापयन्– आर्ये! दापयाम्येतत्तुभ्यम् आगच्छेह गृहादावित्यादिविधिनेति ।

[सू० २९१] तमुक्कायस्स णं चत्तारि नामधेज्जा पन्नत्ता, तंजहा-तमे ति

वा, तमुक्काते ति वा, अंधगारे ति वा, महंधगारे ति वा १।

तमुक्कायस्स णं चत्तारि णामधेज्जा पन्नत्ता, तंजहा-लोगंधगारे ति वा, लोगतमसे ति वा, देवंधगारे ति वा, देवतमसे ति वा २।

तमुक्कायस्स णं चत्तारि नामधेज्जा पन्नत्ता, तंजहा- वातफलिहे ति वा, वातफलिहखोभे ति वा, देवारण्णे ति वा, देववूहे ति वा ३।

तमुक्काते णं चत्तारि कप्पे आवरित्ता चिट्ठति, तंजहा-सोधम्ममीसाणं सणंकुमारं माहिंदं ४।

[टी०] तथा तमस्कायं तम इत्यादिभिः शब्दैः व्याहरन्नातिक्रामति भाषाचारं यथार्थत्वादिति तानाह- **तमुक्काये**त्यादि सूत्रत्रयं सुगमम्, नवरं **तमसः** अप्काय-परिणामरूपस्यान्धकारस्य **कायः** प्रचयस्**तमस्कायः**, यो ह्यसङ्ख्याततमस्यारुण-वराभिधानद्वीपस्य बाह्यवेदिकान्तादरुणोदाख्यं समुद्रं द्विचत्वारिंशद् योजनसहस्राण्यव-गाह्योपरितनाज्जलान्तादेकप्रदेशिकया श्रेण्या समुत्थितः सप्तदशैकविंशत्यधिकानि योजनशतानि ऊर्ध्वमुत्पत्य ततः तिर्यक् प्रविस्तृणन् सौधर्म्मादींश्चतुरो देवलोकाना-वृत्योर्ध्वमपि च ब्रह्मलोकस्य **रिष्टं** विमानप्रस्तटं सम्प्राप्तः, तस्य नामान्येव **नामधेयानि**, **तम** इति तमोरूपत्वा**दितिरु**पप्रदर्शने, **वा** विकल्पे, तमोमात्ररूपताभिधायकान्याद्यानि चत्वारि नामधेयानि, तथाऽपराणि चत्वार्येवात्यन्तिकतमोरूपताभिधायकानीति, लोके अयमेवान्धकारो नान्योऽस्तीदृश इति **लोकान्धकारः**, देवानामप्यन्धकारोऽसौ, तच्छरीरप्रभाया अपि तत्राप्रभवनादिति **देवान्धकारः**, अत एव ते बलवतो भयेन तत्र नश्यन्तीति श्रुतिरिति, तथाऽन्यानि चत्वारि कार्याश्रयाणि- **वातस्य** परिहननात् **परिघः** अर्गला, परिघ इव **परिघः**, वातस्य परिघो **वातपरिघः**, तथा वातं परिघवत् क्षोभयति हतमार्गं करोतीति **वातपरिघक्षोभः**, वात एव वा परिघस्तं क्षोभयति यः स तथा, पाठान्तरेण **वातपरिक्षोभ** इति, क्वचि**द्देवपरिघो देवपरिक्षोभ** इति चाद्यपदद्वयस्थाने पठ्यते, देवानामरण्यमिव बलवद्भयेन नशनस्थानत्वाद् यः स **देवारण्य**मिति, देवानां व्यूहः सागरादिसाङ्ग्रामिकव्यूह इव यो दुरधिगमत्वात् स **देवव्यूह** इति । तमस्कायस्वरूपप्रतिपादनायैव **तमुक्काये णं**मित्यादि सूत्रं गतार्थम्, किन्तु

सौधर्मादीनावृणोत्यसौ कुक्कुटपञ्जरसंस्थानसंस्थितस्य तस्य प्रतिपादनाद्, उक्तं च- **तमुक्काए णं भंते ! किंसंठिए पन्नत्ते ?, गोयमा ! अहे मल्लगमूलसंठिए उप्पिं कुक्कुटपंजरसंठिए पन्नत्ते** *[भगवती० ६।५।३]* त्ति ।

[सू० २९२] चत्तारि पुरिसजाया पन्नत्ता, तंजहा-संपागडपडिसेवी णाममेगे, पच्छन्नपडिसेवी णाममेगे, पडुप्पन्ननंदी नाममेगे, णिस्सरणणंदी णाममेगे १।

चत्तारि सेणाओ पन्नत्ताओ, तंजहा-जतित्ता णाममेगे णो पराजिणित्ता, पराजिणित्ता णाममेगे णो जतित्ता, एगा जतित्ता वि पराजिणित्ता वि, एगा नो जतित्ता नो पराजिणित्ता २ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जतित्ता नाममेगे नो पराजिणित्ता ह्व [= ४], ३ ।

चत्तारि सेणाओ पन्नत्ताओ, तंजहा-जतित्ता णाममेगा जयति, जतित्ता णाममेगा पराजिणति, पराजिणित्ता णाममेगा जयति, पराजिणित्ता नाममेगा पराजिणति ४ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जतित्ता नाममेगे जयति ह्व [= ४], ५ ।

[टी०] अनन्तरं तमस्कायो वचनपर्यायैरुक्तः, अधुना अर्थपर्यायैः पुरुषं निरूपयता पञ्चसूत्रीमाह, सुगमा पञ्चसूत्री, नवरं कश्चित् साधुर्गच्छवासी **सम्प्रकट**मेव अगीतार्थप्रत्यक्षमेव **प्रतिसेवते** मूलगुणानुत्तरगुणान् वा दर्प्पतः कल्पेन वेति सम्प्रकटप्रतिसेवीत्येकः, एवमन्यः प्रच्छन्नं प्रतिसेवत इति **प्रच्छन्नप्रतिसेवी**, अन्यस्तु प्रत्युत्पन्नेन लब्धेन वस्त्र-शिष्यादिना **प्रत्युत्पन्नो** वा जातः सन् शिष्याचार्यादिरूपेण नन्दति यः स **प्रत्युत्पन्ननन्दी**, अथवा नन्दनं **नन्दिः** आनन्दः, प्रत्युत्पन्नेन नन्दिर्यस्य स **प्रत्युत्पन्ननन्दिः**, तथा प्राघूर्णक-शिष्यादीनामात्मनो वा **निःसरणेन** गच्छादेर्निर्गमेन नन्दति यो नन्दिर्वा यस्य स तथा, पाठान्तरे तु **प्रत्युत्पन्नं** यथालब्धं **सेवते** भजते, नानुचितं विवेचयतीति **प्रत्युत्पन्नसेवी**ति। **जइत्त** त्ति जेत्री जयति रिपुबलमेका, **न पराजेत्री** न पराजयते रिपुबलान्न भज्यते, द्वितीया तु **पराजेत्री** परेभ्यो भङ्गभाक्, अत एव **नो जेत्री**ति, तृतीया कारणवशादुभयस्वभावेति, चतुर्थी त्वविजिगीषुत्वादनुभयरूपेति ।

पुरुषः साधुः, स जेता परीषहाणां न तेभ्यः पराजेता उद्विजते भज्यते इत्यर्थो **महावीर**वदित्येकः, द्वितीयः **कण्डरीक**वत्, तृतीयस्तु कदाचिज्जेता कदाचित् कर्मवशात् पराजेता **शैलकराजर्षि**वत्, चतुर्थस्त्वनुत्पन्नपरीषहः । जित्वा एकदा रिपुबलं पुनरपि जयतीत्येका, अन्या जित्वा **पराजयते** भज्यते, अन्या **पराजित्य** परिभज्य पुनर्जयति, चतुर्थी तु **पराजित्य** परिभज्यैकदा पुनः पराजयते, पुरुषस्तु परीषहादिष्वेवं चिन्तनीय इति ।

[सू० २९३] [१] चत्तारि केतणा पन्नत्ता, तंजहा-वंसीमूलकेतणते मेंढविसाणकेतणते गोमुत्तितकेतणते अवलेहणिताकेतणते । एवामेव चउविधा माया पन्नत्ता, तंजहा-वंसीमूलकेतणासमाणा जाव अवलेहणितासमाणा । वंसीमूलकेतणासमाणं मायं अणुपविट्ठे जीवे कालं करेति णेरइएसु उववज्जति, मेंढविसाणकेतणासमाणं मायमणुपविट्ठे जीवे कालं करेति तिरिक्खजोणितेसु उववज्जति, गोमुत्ति जाव कालं करेति मणुस्सेसु उववज्जति, अवलेहणिता जाव देवेसु उववज्जति ।

[२] चत्तारि थंभा पन्नत्ता, तंजहा-सेलथंभे अट्ठिथंभे दारुथंभे तिणिसलताथंभे। एवामेव चउव्विधे माणे पन्नत्ते, तंजहा-सेलथंभसमाणे जाव तिणिसलताथंभसमाणे । सेलथंभसमाणं माणं अणुपविट्ठे जीवे कालं करेति नेरतिएसु उववज्जति, एवं जाव तिणिसलताथंभसमाणं माणं अणुपविट्ठे जीवे कालं करेति देवेसु उववज्जति ।

[३] चत्तारि वत्था पन्नत्ता, तंजहा-किमिरागरत्ते, कद्दमरागरत्ते, खंजणरागरत्ते हलिद्दारागरत्ते । एवामेव चउव्विधे लोभे पन्नत्ते, तंजहा- किमिरागरत्तवत्थसमाणे, कद्दमरागरत्तवत्थसमाणे, खंजणरागरत्तवत्थसमाणे, हलिद्दरागरत्तवत्थसमाणे । किमिरागरत्तवत्थसमाणं लोभमणुपविट्ठे जीवे कालं करेइ नेरइएसु उववज्जति, तहेव जाव हलिद्दारागरत्तवत्थसमाणं लोभमणुपविट्ठे जीवे कालं करेति देवेसु उववज्जति ।

[टी०] जेतव्याश्चेह तत्त्वतः कषाया एवेति ततूस्वरूपं दर्शयितुकामः क्रोधस्योत्तर-

त्रोपदर्शयिष्यमाणत्वान्मायादिकषायत्रयप्रकरणमाह– **चत्तारी**त्यादि प्रकटम्, किन्तु **केतनं** सामान्येन वक्रं वस्तु पुष्पकरण्डस्य वा सम्बन्धि मुष्टिग्रहणस्थानं वंशविदलकम्, तच्च वक्रं भवति, केवलमिह सामान्येन वक्रं वस्तु केतनं गृह्यते, तत्र वंशीमूलं च तत् केतनं च **वंशीमूलकेतन**मेवं सर्वत्र, नवरं **मेण्ढविषाणं** मेषशृङ्गम्, **गोमूत्रिका** प्रतीता, **अवलेहणिय** त्ति अवलिख्यमानस्य वंशशलाकादेर्या प्रतन्वी त्वक् साऽवलेखनिकेति, वंशीमूलकेतनकादिसमता तु मायायास्तद्वतामनार्जवभेदात्, तथाहि-यथा वंशीमूलमतिगुपिलवक्रमेवं कस्यचिन्मायाऽपीत्येवमल्पा-ऽल्पतराऽल्पतमानार्जव-त्वेनान्याऽपि भावनीयेति, इयं चानन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानावरण-सञ्ज्वलनरूपा क्रमेण ज्ञेया, प्रत्येकमित्यन्ये, तेनैवानन्तानुबन्धिन्या उदयेऽपि देवत्वादि न विरुध्यते, एवं मानादयोऽपि । **वाचनान्तरे** तु पूर्वं क्रोध-मानसूत्राणि, तत्र क्रोधसूत्राणि **चत्तारि राईओ पन्नत्ताओ, तं०– पव्वयराई, पुढविराई, रेणुराई, जलराई, एवामेव चउव्विहे कोहे** इत्यादि मायासूत्राणीवाधीतानीति । फलसूत्रे **अनुप्रविष्टः** तदुदय-वर्त्तीति । शिलाविकारः **शैलः**, स चासौ **स्तम्भश्च** स्थाणुः **शैलस्तम्भः**, एवमन्येऽपि, नवरम् **अस्थि दारु** च प्रतीतम्, **तिनिशो** वृक्षविशेषस्तस्य **लता** कम्बा **तिनिशलता**, सा चात्यन्तमृद्वीति, मानस्यापि शैलस्तम्भादिसमानता तद्वतो नमनाभावविशेषात् ज्ञेयेति, मानोऽप्यनन्तानुबन्ध्यादिरूपः क्रमेण दृश्यः, तत्फलसूत्रं व्यक्तम्, कृमिरागे वृद्धसम्प्रदायोऽयम्-मनुष्यादीनां रुधिरं गृहीत्वा केनापि योगेन युक्तं भाजने स्थाप्यते, ततस्तत्र कृमय उत्पद्यन्ते ते च वाताभिलाषिणः छिद्रनिर्गता आसन्ना भ्रमन्तो निर्हारलाला मुञ्चन्ति, ताः कृमिसूत्रं भण्यते, तच्च स्वपरिणामरागरञ्जितमेव भवति, अन्ये भणन्ति-ये रुधिरे कृमय उत्पद्यन्ते तान् तत्रैव मृदित्वा कचवरमुत्तार्य तद्रसे कञ्चिद् योगं प्रक्षिप्य पट्टसूत्रं रञ्जयन्ति, स च रसः कृमिरागो भण्यते अनुत्तारीति, तत्र कृमीणां **रागो** रञ्जकरसः कृमिरागः, तेन रक्तं **कृमिरागरक्तम्**, एवं सर्वत्र, नवरं **कर्दमो** गोवाटादीनाम् **खञ्जनं** दीपादीनाम्, **हरिद्रा** प्रतीतैवेति, कृमिरागादिरक्तवस्त्रसमानता च लोभस्य अनन्तानु-बन्ध्यादितद्भेदवतां जीवानां क्रमेण दृढ-हीन-हीनतर-हीनतमानुबन्धत्वात्, तथाहि– कृमिरागरक्तं वस्त्रं दग्धमपि न रागानुबन्धं मुञ्चति, तद्भस्मनोऽपि रक्तत्वाद्, एवं यो

मृतोऽपि लोभानुबन्धं न मुञ्चति तस्याभिधीयते लोभः कृमिरागरक्तवस्त्रसमानोऽनन्तानुबन्धी चेति, एवं सर्वत्र भावना कार्येति । फलसूत्रं स्पष्टम्।

[सू० २९४] चउव्विहे संसारे पन्नत्ते, तंजहा-णेरतियसंसारे जाव देवसंसारे।
चउव्विहे आउते पन्नत्ते, तंजहा-णेरतिताउते जाव देवाउते ।
चउव्विहे भवे पन्नत्ते, तंजहा-निरतभवे जाव देवभवे ।

[टी०] अनन्तरं कषायाः प्रज्ञप्ताः, कषायैश्च संसारो भवतीति संसारस्वरूपमाह– **चउव्विहे** इत्यादि व्यक्तम्, किन्तु संसरणं **संसारः** मनुष्यादिपर्यायान्नारकादि-पर्यायगमनमिति, नैरयिकप्रायोग्येष्वायुर्नामगोत्रादिषु कर्म्मसूदयगतेषु जीवो नैरयिक इति व्यपदिश्यते, उक्तं च– **नेरइए णं भंते ! नेरइएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ ? गोयमा! नेरइए नेरइएसु उववज्जइ [प्रज्ञापना० १७।३।११९९]** इति, ततो नैरयिकस्य **संसरणम्** उत्पत्तिदेशगमनमपरापरावस्थागमनं वा **नैरयिकसंसारः**, अथवा संसरन्ति जीवा यस्मिन्नसौ **संसारो** गतिचतुष्टयम्, तत्र नैरयिकस्यानुभूयमानगतिलक्षणः परम्परया चतुर्गतिको वा संसारो नैरयिकसंसारः, एवमन्येऽपि ।

उक्तरूपश्च संसार आयुषि सति भवतीति आयुःसूत्रम्, तत्र एति च याति चेत्यायुः कर्म्मविशेष इति, तत्र येन निरयभवे प्राणी ध्रियते तन्निरयायुः, एवमन्यान्यपि । उक्तरूपं चायुर्भवे स्थितिं कारयतीति भवसूत्रं कण्ठ्यम्, केवलं भवनं **भवः** उत्पत्तिः, निरये भवो **निरयभवः**, मनुष्येषु मनुष्याणां वा भवो **मनुष्यभवः**, एवमन्यावपि ।

[सू० २९५] चउव्विहे आहारे पन्नत्ते, तंजहा-असणे, पाणे, खाइमे, साइमे १।
चउव्विहे आहारे पन्नत्ते, तंजहा- उवक्खरसंपन्ने, उवक्खडसंपन्ने, सभावसंपन्ने, परिजुसितसंपन्ने २।

[टी०] भवेषु च सर्वेष्वाहारका जीवाः इत्याहारसूत्रे, तत्राह्रियत इत्**याहारः**, अश्यत इत्**यशनम्** ओदनादि, पीयत इति **पानं** सौवीरादि, खादः प्रयोजनमस्येति **खादिमं** फलवर्गादि, स्वादः प्रयोजनमस्येति **स्वादिमं** ताम्बूलादि, उपस्क्रियतेऽनेनेत्**युपस्करो** हिङ्ग्वादिस्तेन सम्पन्नो युक्त **उपस्करसम्पन्नः**, तथा उपस्करणमु**पस्कृतं** पाक इत्यर्थस्तेन सम्पन्नः ओदन-मण्डकादिः **उपस्कृतसम्पन्नः**, पाठान्तरेण **नोउवक्खरसंपन्नो**

हिङ्ग्वादिभिरसंस्कृत ओदनादिः, **स्वभावेन** पाकं विना **सम्पन्नः** सिद्धः द्राक्षादिः **स्वभावसम्पन्नः**, **परिजुसिय** त्ति पर्युषितं रात्रिपरिवसनम्, तेन सम्पन्नः **पर्युषितसम्पन्न** इङ्गरिकादिः, यतस्ताः पर्युषितकलनीकृताः आम्लरसा भवन्ति, आरनालास्थिताम्रफलादिर्वेति ।

[सू० २९६] **चउव्विधे बंधे पन्नत्ते, तंजहा-पगतिबंधे, ठितिबंधे, अणुभावबंधे, पदेसबंधे ।**

चउव्विधे उवक्कमे पन्नत्ते, तंजहा-बंधणोवक्कमे, उदीरणोवक्कमे उवसामणोवक्कमे, विप्परिणामणोवक्कमे । बंधणोवक्कमे चउव्विहे पन्नत्ते, तंजहा-पगतिबंधणोवक्कमे, ठितिबंधणोवक्कमे, अणुभावबंधणोवक्कमे, पदेसबंधणोवक्कमे। उदीरणोवक्कमे चउव्विहे पन्नत्ते, तंजहा-पगतिउदीरणोवक्कमे ठितिउदीरणोवक्कमे अणुभावउदीरणोवक्कमे पदेसउदीरणोवक्कमे । उवसामणोवक्कमे चउव्विहे पन्नत्ते, तंजहा-पगतिउवसामणोवक्कमे, ठितिउवसामणोवक्कमे, अणुभावउवसामणोवक्कमे पतेसुवसामणोवक्कमे। विप्परिणामणोवक्कमे चउव्विहे पन्नत्ते, तंजहा- पगतिविप्परिणामणोवक्कमे, ठितिविप्परिणामणोवक्कमे, अणुभावविप्परिणामणोवक्कमे पतेसविप्परिणामणोवक्कमे ।

चउव्विहे अप्पाबहुए पन्नत्ते, तंजहा-पगतिअप्पाबहुए ठितिअप्पाबहुए अणुभावअप्पाबहुए पतेसअप्पाबहुते ।

चउव्विहे संकमे पन्नत्ते, तंजहा-पगतिसंकमे ठितिसंकमे अणुभावसंकमे पएससंकमे ।

चउव्विहे णिधत्ते पन्नत्ते, तंजहा-पगतिणिधत्ते ठितिणिधत्ते अणुभावणिधत्ते पएसणिधत्ते ।

चउव्विहे णिगातिते पन्नत्ते, तंजहा-पगतिणिगातिते, ठितिणिगातिते, अणुभावणिगातिते, पएसणिगातिते ।

[टी०] अनन्तरोदिताः संसारादयो भावाः कर्म्मवतां भवन्तीति **चउव्विहे बंधे** इत्यादि कर्म्मप्रकरणमारादेककसूत्रात्, प्रकटं चैतत्, नवरं सकषायत्वात् जीवस्य

कर्म्मणो योग्यानां पुद्गलानां बन्धनम् आदानं बन्धः, तत्र कर्म्मणः प्रकृतयः अंशा भेदा ज्ञानावरणीयादयोऽष्टौ तासां **प्रकृते**र्वा अविशेषितस्य कर्म्मणो बन्धः **प्रकृतिबन्धः**, तथा **स्थितिः** तासामेवावस्थानं जघन्यादिभेदभिन्नम्, तस्या **बन्धो** निर्वर्त्तनं **स्थितिबन्धः**, तथा **अनुभावो** विपाकः तीव्रादिभेदो रस इत्यर्थः, तस्य बन्धोऽ**नुभावबन्धः**, तथा जीवप्रदेशेषु कर्म्म**प्रदेशाना**मनन्तानन्तानां प्रतिप्रकृति **प्रति**नियतपरिमाणानां **बन्धः** सम्बन्धनं **प्रदेशबन्धः**, परिमितप्रमाणगुडादिमोदकबन्धवदिति ।

एवं च मोदकदृष्टान्तं वर्णयन्ति वृद्धाः-यथा किल मोदकः कणिक्का-गुड-घृत-कटुभाण्डादिद्रव्यबद्धः सन् कोऽपि वातहरः, कोऽपि पित्तहरः, कोऽपि कफहरः, कोऽपि मारकः, कोऽपि बुद्धिकरः, कोऽपि व्यामोहकरः, एवं कर्म्मप्रकृतिः काचिज्ज्ञानमावृणोति काचिद्दर्शनं काचित् सुखदुःखादिवेदनमुत्पादयतीति, तथा तस्यैव मोदकस्य यथा अविनाशभावेन कालनियमरूपा स्थितिर्भवति, एवं कर्म्मणोऽपि तद्भावेन नियतकालावस्थानं **स्थितिबन्धः**, तथा तस्यैव मोदकस्य यथा स्निग्ध-मधुरादिरेकगुण-द्विगुणादिभावेन रसो भवति, एवं कर्म्मणोऽपि देश-सर्वघाति-शुभा-ऽशुभ-तीव्र-मन्दादिर**नुभागबन्धः**, तथा तस्यैव मोदकस्य यथा कणिक्कादिद्रव्याणां परिमाणवत्त्वम् एवं कर्म्मणोऽपि पुद्गलानां प्रतिनियतप्रमाणता **प्रदेशबन्ध** इति ।

उपक्रम्यते क्रियतेऽनेनेत्य**ुपक्रमः** कर्मणो बद्धत्वोदीरितत्वादिना परिणमनहेतुर्जीवस्य शक्तिविशेषो योऽन्यत्र करणमिति रूढः, उपक्रमणं **वोपक्रमो** बन्धनादीनामारम्भः, **स्यादारम्भ उपक्रमः** [अमरको० ६८९] इति वचनादिति, तत्र **बन्धनं** कर्म्मपुद्गलानां जीवप्रदेशानां च परस्परं सम्बन्धनम्, इदं च सूत्रमात्रबद्धलोहशलाकासम्बन्धो-पममवगन्तव्यम्, तस्यो**पक्रम** उक्तार्थो **बन्धनोपक्रमः**, एवमन्यत्रापि, नवरमप्राप्त-कालफलानां कर्म्मणामुदये प्रवेशनमु**दीरणा**, उक्तं च–

जं करणेणोकड्ढिय उदए दिज्जइ उदीरणा एसा ।
पगइ-ठिती-अणुभाग-प्पएस-मूलुत्तरविभागा ॥ [कर्मप्र० ४।१]

तथा उदयोदीरणा-निधत्त-निकाचनाकरणानामयोग्यत्वेन कर्म्मणोऽवस्थापन-**मुपशमने**ति, उक्तं च– **उव्वट्टण-ओवट्टण-संकमणाइं च नऽन्नकरणाइं [कर्मप्र० ५।६७]** ति

उपशमनायां सन्तीति प्रक्रमः । तथा विविधैः प्रकारैः कर्म्मणां सत्तोदयक्षयक्षयोपशमोद्वर्त्तनापवर्त्तनादिभिरेतद्रूपतयेत्यर्थः, गिरिसरिदुपलन्यायेन द्रव्य-क्षेत्रादिभिर्वा करणविशेषेण वाऽवस्थान्तरापादनं **विपरिणामना**, इह च विपरिणामना बन्धनादिषु तदन्येष्वप्युदयादिष्वस्तीति सामान्यरूपत्वाद् भेदेनोक्तेति ।

बन्धनोपक्रमो बन्धनकरणं चतुर्द्धा, तत्र प्रकृतिबन्धनस्योपक्रमो जीवपरिणामो योगरूपः, तस्य प्रकृतिबन्धहेतुत्वादिति, स्थितिबन्धनस्यापि स एव, नवरं कषायरूपः, स्थितेः कषायहेतुकत्वादिति, अनुभागबन्धनोपक्रमोऽपि परिणाम एव, नवरं कषायरूपः, प्रदेशबन्धनोपक्रमस्तु स एव योगरूप इति, यत उक्तम्– **जोगा पयडिपएसं ठिइअणुभागं कसायओ कुणइ** [**बन्धशतके** ९९] इति, प्रकृत्यादिबन्धनानामारम्भा वा उपक्रमा इति, एवमन्यत्रापि। यन्मूलप्रकृतीनामुत्तरप्रकृतीनां वा दलिकं वीर्यविशेषेणाकृष्योदये दीयते सा प्रकृत्युदीरणेति, वीर्यादेव या प्राप्तोदयया स्थित्या सहाप्राप्तोदया स्थितिरनुभूयते सा स्थित्युदीरणेति। तथैव प्राप्तोदयेन रसेन सहाप्राप्तोदयो रसो यो वेद्यते साऽनुभागोदीरणेति। तथा प्राप्तोदयैर्नियतपरिमाणकर्मप्रदेशैः सहाप्राप्तोदयानां नियतपरिमाणानां कर्मप्रदेशानां यद् वेदनं सा प्रदेशोदीरणेति । इहापि कषाय-योगरूपः परिणाम आरम्भो वोपक्रमार्थः, प्रकृत्युपशमनोपक्रमादयश्चत्वारोऽपि सामान्योपशमनोपक्रमानुसारेणावगन्तव्याः, प्रकृतिविपरिणामनोपक्रमादयोऽपि सामान्यविपरिणामनोपक्रमलक्षणानुसारेणावबोद्धव्याः, उपक्रमस्तु प्रकृत्यादित्वेन पुद्गलानां परिणमनसमर्थं जीववीर्यमिति ।

अप्पाबहुए त्ति **अल्पं** च स्तोकं **बहु** च प्रभूतमल्पबहु, तद्भावोऽल्पबहुत्वम्, दीर्घत्वा-ऽसंयुक्तत्वे च प्राकृतत्वादिति, प्रकृतिविषयमल्पबहुत्वं बन्धाद्यपेक्षया, यथा सर्वस्तोकप्रकृतिबन्धक उपशान्तमोहादिः, एकविधबन्धकत्वाद्, बहुतरबन्धकः उपशमकादिसूक्ष्मसम्परायः, षड्विधबन्धकत्वात्, बहुतरबन्धकः सप्तविधबन्धकस्ततोऽष्टविधबन्धक इति, स्थितिविषयमल्पबहुत्वं यथा– **सव्वत्थोवो संजयस्स जहन्नओ ठितीबंधो, एगिंदियबायरपज्जत्तगस्स जहन्नओ ठिईबंधो असंखेज्जगुणो** [ ] इत्यादि, अनुभागं प्रत्यल्पबहुत्वं यथा– **सव्वत्थोवाइं अणंतगुणवुड्ढिट्ठाणाणि, असंखेज्जगुणवुड्ढिट्ठाणाणि असंखेज्जगुणाणि, संखेज्जगुणवुड्ढिट्ठाणाणि असंखेज्जगुणाणि जाव अणंतभागवुड्ढिट्ठाणाणि**

असंखेज्जगुणाणि [ ] । प्रदेशाल्पबहुत्वं यथा– **अट्ठविहबंधगस्स आउयभागो थोवो, नामगोयाणं तुल्लो विसेसाहिओ, नाणदंसणावरणंतरायाणं तुल्लो विसेसाहिओ, मोहस्स विसेसाहिओ, वेयणीयस्स विसेसाहिओ** [ ] इति । यां प्रकृतिं बध्नाति जीव: तदनुभावेन प्रकृत्यन्तरस्थं दलिकं वीर्यविशेषेण यत् परिणमयति स सङ्क्रम:, उक्तं च–

सो संकमो त्ति भन्नइ जब्बंधणपरिणओ पओगेणं ।

पययंतरत्थदलियं परिणमयइ तदणुभावे जं ॥ [कर्मप्र० २।१] इति ।

तत्र प्रकृतिसङ्क्रम: सामान्यलक्षणावगम्य एवेति, मूलप्रकृतीनामुत्तरप्रकृतीनां वा स्थितेर्यदुत्कर्षणम् अपकर्षणं वा प्रकृत्यन्तरस्थितौ वा नयनं स स्थितिसङ्क्रम इति,

अनुभागसंक्रमोऽप्येवमेव, यदाह–

तत्थट्ठपयं उव्वट्टिया व ओवट्टिया व अविभागा ।

अणुभागसंकमो एस अन्नपगइं णिया वावि ॥ [कर्मप्र० २।४६] त्ति ।

अट्ठपयं ति अनुभागसङ्क्रमस्वरूपनिर्द्धारणम्, **अविभाग** त्ति अनुभागाः, **निय** त्ति नीता इति । यत् कर्म्मद्रव्यमन्यप्रकृतिस्वभावेन परिणाम्यते स प्रदेशसङ्क्रमः, उक्तं च–

जं दलियमन्नपगइं णिज्जइ सो संकमो पएसस्स । [कर्मप्र० २।६०] त्ति ।

निधानं निहितं वा **निधत्तम्**, भावे कर्म्मणि वा क्तप्रत्यये निपातनात्, उद्वर्त्तनाऽपवर्त्तनावर्जितानां शेषकरणानामयोग्यत्वेन कर्म्मणोऽवस्थापनमुच्यते, नितरां काचनं बन्धनं **निकाचितं** कर्म्मणः सर्वकरणानामयोग्यत्वेनावस्थापनम्, उक्तं चोभयसंवादि–

संकमणं पि निहत्तीएँ णत्थि सेसाणि चत्ति इयरस्स । [कर्मप्र० ६।१] त्ति ।

इयरस्सत्ति निकाचनाकरणस्येति । अथवा पूर्वबद्धस्य कर्म्मणस्तप्त-संमीलित-लोहशलाकासम्बन्धसमानं निधत्तम्, तप्त-मिलित-संकुट्टितलोहशलाकासम्बन्धसमानं निकाचितमिति, प्रकृत्यादिविशेषस्तूभयत्रापि सामान्यलक्षणानुसारेण नेय इति, विशेषतो बन्धादिस्वरूपजिज्ञासुना **कर्मप्रकृतिसङ्ग्रहणिर**नुसरणीयेति ।

[सू० २९७] चत्तारि एक्का पन्नत्ता, तंजहा- दवियएक्कय, माउयएक्कए, पज्जवेक्कए, संगहेक्कए ।

चत्तारि कती पन्नत्ता, तंजहा- दवितकती, माउयकती, पज्जवकती, संगहकती।

चत्तारि सव्वा पन्नत्ता, तंजहा-नामसव्वते, ठवणसव्वए, आदेससव्वते, निरवसेससव्वते ।

[टी०] इहानन्तरमल्पबहुत्वमुक्तम्, तत्रात्यन्तमल्पमेकं शेषं त्वपेक्षया बहु इत्यल्पबहुत्वाभिधायिन एक-कति-सर्वशब्दान् चतुःस्थानकेऽवतारयन् **चत्तारी**त्यादि सूत्रत्रयमाह ।

एकसङ्ख्योपेतानि द्रव्यादीनि स्वार्थिककप्रत्ययोपादानादेककानि, तत्र द्रव्यमेवैककं **द्रव्यैककं** सचित्तादिभेदात् त्रिविधमिति, **माउएक्कए** त्ति मातृकापदैककम्, एकं मातृकापदम्, तद्यथा **उप्पन्ने इ** वेत्यादि, इह प्रवचने दृष्टिवादे समस्तनयवादबीजभूतानि मातृकापदानि भवन्ति, तद्यथा- **उप्पन्ने इ वा विगए इ वा धुवे इ** वेति, अमूनि च मातृकापदानीव अ आ इत्येवमादीनि सकलशब्दशास्त्रार्थव्यापारव्यापकत्वान्मातृकापदानीति, **पर्यायैककः** एकः पर्यायः, **पर्यायो** विशेषो धर्म्म इत्यनर्थान्तरम्, स चानादिष्टो वर्णादिरादिष्टः कृष्णादिरिति, **सङ्ग्रहैककः** शालिरिति, अयमर्थः- **सङ्ग्रहः** समुदायः, तमाश्रित्यैकवचनगर्भशब्दप्रवृत्तिः, तथा चैकोऽपि शालिः शालिरित्युच्यते, बहवोऽपि शालयः शालिरिति, लोके तथादर्शनादिति, क्वचित् पाठः **दविए एक्कए** इत्यादि, तत्र द्रव्ये विषयभूते एकक इत्यादि व्याख्येयमिति ।

कतीति प्रश्नगर्भापरिच्छेदवत्सङ्ख्यावचनो बहुवचनान्तः, तत्र द्रव्याणि च तानि कति च **द्रव्यकति**, कति द्रव्याणीत्यर्थः, द्रव्यविषयो वा कतिशब्दो **द्रव्यकतिः**, एवं मातृकापदादिष्वपि, नवरं **सङ्ग्रहाः** शालि-यव-गोधूमा इत्यादि ।

नाम च तत्सर्वं च **नामसर्वम्**, सचेतनादेर्वा वस्तुनो यस्य सर्व्वमिति नाम **तन्नामसर्वं** नाम्ना सर्व्वं 'सर्वम्' इति वा नाम यस्येति विग्रहाद्, नामशब्दस्य च पूर्वनिपातः, तथा स्थापनया सर्वमेतदिति कल्पनया अक्षादि द्रव्यं सर्वं **स्थापनासर्वम्**, स्थापनैव वा अक्षादिद्रव्यरूपा सर्व्वं **स्थापनासर्व्वम्**, आदेशन**मादेशः** उपचारो व्यवहारः, स च बहुतरे प्रधाने वा आदिश्यते देशेऽपि, यथा विवक्षितं घृतमभिसमीक्ष्य बहुतरे भुक्ते स्तोके च शेषे उपचारः क्रियते 'सर्व्वं घृतं भुक्तम्', प्रधानेऽप्युपचारः यथा ग्रामप्रधानेषु गतेषु पुरुषेषु 'सर्व्वो ग्रामो गतः' इति व्यपदिश्यते इति, अत आदेशतः

सर्व**मादेशसर्व्वम्** उपचारसर्व्वमित्यर्थः, तथा निरवशेषतया अपरिशेषव्यक्तिसमाश्रयेण सर्व्वं **निरवशेषसर्व्वम्**, यथा अनिमिषाः सर्व्वे देवाः, न हि देवव्यक्तिरनिमिषत्वं काचिद् व्यभिचरतीत्यर्थः, सर्वत्र ककारः स्वार्थिको द्रष्टव्यः ।

[सू० २९८] माणुसुत्तरस्स णं पव्वयस्स चउद्दिसिं चत्तारि कूडा पन्नत्ता, तंजहा-रयणे, रतणुच्चते, सव्वरयणे, रतणसंचये ।

[टी०] अनन्तरं सर्वं प्ररूपितम्, तत्प्रस्तावात् सर्वमनुष्यक्षेत्रपर्यन्तवर्त्तिनि पर्व्वते सर्वासु तिर्यग्दिक्षु कूटानि प्ररूपयन्नाह– **माणुसुत्तरस्से**त्यादि स्फुटम्, किन्तु **चउद्दिसिं** ति चतसृणां दिशां समाहारश्चतुर्दिक्, तस्मिंश्चतुर्दिशि, अनुस्वारः प्राकृतत्वादिति, **कूटानि** शिखराणि, इह च दिग्ग्रहणेऽपि विदिक्ष्विति द्रष्टव्यम्, तत्र दक्षिणपूर्वस्यां दिशि रत्नकूटं गरुडस्य वेणुदेवस्य निवासभूतम्, तथा दक्षिणापरस्यां दिशि **रत्नोच्चय**कूटं वेलम्बसुखदमित्यपरनामकं वेलम्बस्य वायुकुमारेन्द्रस्य सम्बन्धि, तथा पूर्वोत्तरस्यां दिशि **सर्वरत्न**कूटं वेणुदालिसुपर्णकुमारेन्द्रस्य, तथा अपरोत्तरस्यां **रत्नसञ्चय**कूटं प्रभञ्जनापरनामकं प्रभञ्जनवायुकुमारेन्द्रस्येति, एवं चैतद् व्याख्यायते **द्वीपसागरप्रज्ञप्ति-सङ्ग्रहण्य**नुसारेण, यतस्तत्रोक्तम्–

दक्खिणपुव्वेण, इत्यादि सर्वं वृत्तौ ज्ञेयम् ।

[सू० २९९] जंबूदीवे दीवे भरहेरवतेसु वासेसु तीताते उस्सप्पिणीए सुसमसुसमाते समाते चत्तारि सागरोवमकोडाकोडीओ कालो होत्था ।

जंबूदीवे दीवे भरहेरवतेसु वासेसु इमीए ओसप्पिणीए सुसमसुसमाए समाए चत्तारि सागरोवमकोडाकोडीओ कालो हुत्था । जंबूदीवे दीवे [भरहेरवएसु वासेसु] आगमेस्साते उस्सप्पिणीते सुसमसुसमाते समाए चत्तारि सागरोवमकोडाकोडीओ कालो भविस्सइ ।

जंबूदीवे दीवे देवकुरुउत्तरकुरुवज्जाओ चत्तारि अकम्मभूमीओ पन्नत्ताओ, तंजहा- हेमवते, हेरन्नवते, हरिवस्से, रम्मगवस्से । तत्थ णं चत्तारि वट्टवेयड्ढपव्वता पन्नत्ता, तंजहा-सद्दावई, वियडावई, गंधावई, मालवंतपरितातेा

तत्थ णं चत्तारि देवा महिड्ढिया जाव पलिओवमट्ठितीता परिवसंति, तंजहा-साती, पभासे, अरुणे, पउमे ।

जंबूदीवे दीवे महाविदेहे वासे चउविधे पन्नत्ते, तंजहा-पुव्वविदेहे अवरविदेहे देवकुरा, उत्तरकुरा ।

सव्वे वि णं णिसढ-णीलवंता वासहरपव्वता चत्तारि जोयणसयाइं उड्ढंउच्चत्तेणं चत्तारि गाउअसताइं उव्वेहेणं पन्नत्ता ।

जंबूदीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमेणं सीताए महानदीए उत्तरे कुले चत्तारि वक्खारपव्वता पन्नत्ता, तंजहा-चित्तकूडे, पम्हकूडे, णलिणकूडे, एगसेले।

जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमेणं सीताए महानदीए दाहिणे कूले चत्तारि वक्खारपव्वता पन्नत्ता, तंजहा- तिकूडे, वेसमणकूडे, अंजणे, मातंजणे ।

जंबूदीवे दीवे मंदरस्स पव्वयस्स पच्चत्थिमेणं सीओदाए महाणतीए दाहिणे कूले चत्तारि वक्खारपव्वता पन्नत्ता, तंजहा- अंकावती, पम्हावती, आसीविसे, सुहावहे ।

जंबूदीवे दीवे मंदरस्स पव्वयस्स पच्चत्थिमेणं सीओदाए महाणतीए उत्तरे कूले चत्तारि वक्खारपव्वता पन्नत्ता, तंजहा-चंदपव्वते, सूरपव्वते, देवपव्वते, णागपव्वते ।

जंबुद्दीवे दीवे मंदरस्स पव्वयस्स चउसु विदिसासु चत्तारि वक्खारपव्वता पन्नत्ता, तंजहा-सोमणसे, विज्जुप्पभे, गंधमायणे, मालवंते ।

जंबूदीवे दीवे महाविदेहे वासे जहन्नपते चत्तारि अरहंता चत्तारि चक्कवट्टी चत्तारि बलदेवा चत्तारि वासुदेवा उप्पज्जिंसु वा उप्पज्जंति वा उप्पज्जिस्संति वा ।

जंबूदीवे दीवे मंदरे पव्वते चत्तारि वणा पन्नत्ता, तंजहा-भद्दसालवणे नंदणवणे सोमणसवणे पंडगवणे ।

जंबुद्दीवे दीवे मंदरे पव्वते पंडगवणे चत्तारि अभिसेगसिलाओ पन्नत्ताओ,

तंजहा-पंडुकंबलसिला अइपंडुकंबलसिला रत्तकंबलसिला अतिरत्तकंबल-सिला।

मंदरचूलिया णं उवरिं चत्तारि जोयणाइं विक्खंभेणं पन्नत्ता, एवं धायइसंडदीवपुरत्थिमद्धे वि कालं आदिं करेत्ता जाव मंदरचूलिय त्ति, एवं जाव पुक्खरवरदीवड्ढपच्चत्थिमद्धे जाव मंदरचूलिय त्ति–

जंबूदीवगआवस्सगं तु कालाओ चूलिया जाव
धायइसंडे पुक्खरवरे य पुव्वावरे पासे ॥२०॥

[टी०] अनन्तरं मानुषोत्तरे कूटद्रव्याणि प्ररूपितानि, अधुना तेनावृतक्षेत्रद्रव्याणां चतुःस्थानकावतारं **जंबूदीवे** इत्यादिना **चत्तारि मंदरचूलियाओ** एतदन्तेन ग्रन्थेनाह, व्यक्तश्चायम् ग्रन्थः, नवरं चित्रकूटादीनां वक्षारपर्व्वतानां षोडशानामिदं स्वरूपम्–

पंचसए बाणउए सोलस य सहस्स दो कलाओ य।
विजया १ वक्खारं २ तरनईण ३ तह वणमुहायामो ४॥ [बृहत्क्षेत्र० ३६४] त्ति।

तथा– **जत्तो वासहरगिरी तत्तो जोयणसयं समवगाढा।**
चत्तारि जोयणसए उव्विद्धा सव्वरयणमया॥
जत्तो पुण सलिलाओ तत्तो पंचसयगाउउव्वेहो।
पंचेव जोयणसए उव्विद्धा आसखंधणिभा॥ [बृहत्क्षेत्र० ३७१-७२] इति।

विष्कम्भश्चैषामेवम्–

विजयाणं विक्खंभो बावीससयाइं तेरसहियाइं।
पंचसए वक्खारा पणुवीससयं च सलिलाओ॥ [बृहत्क्षेत्र० ३७०] त्ति।

पद्यते गम्यते इति **पदं** सङ्ख्यास्थानम्, तच्चानेकधेति **जघन्यं** सर्व्वहीनं पदं **जघन्यपदं** तत्र विचार्ये सति अवश्यंभावेन **चत्वारोऽर्हदा**दय इति। भूम्यां भद्रशालवनम्, मेखलायुगले च नन्दन-सौमनसे, शिखरे पण्डकवनमिति। अत्र गाथाः–

बावीस सहस्साइं पुव्वावरमेरुभद्दसालवणं।
अड्ढाइज्जसया उण दाहिणपासे य उत्तरओ॥
पंचेव जोयणसए उड्ढं गंतूण पंचसयपिहुलं।
नंदणवणं सुमेरुं परिक्खिवित्ता ठियं रम्मं॥

बासट्ठि सहस्साइं पंचेव सयाइं नंदणवणाओ ।
उड्ढं गंतूण वणं सोमणसं नंदणसरिच्छं ॥
सोमणसाओ तीसं छच्च सहस्से विलग्गिऊण गिरिं ।
विमलजलकुंडगहणं हवइ वणं पंडगं सिहरे ॥
चत्तारि जोयणसया चउणउया चक्कवालओ रुंदं ।
इगतीस जोयणसया बावट्ठी परिरओ तस्स ॥[बृहत्क्षेत्र० ३१७,३२७,३३८,३४६,३४७] त्ति।

तीर्थकराणामभिषेकार्थाः शिला **अभिषेकशिलाः** चूलिकायाः पूर्वदक्षिणापरोत्तरासु दिक्षु क्रमेणावगम्या इति, **उवरिं** ति अग्रे, **विक्खंभेणं** ति विस्तरेणेति । यथा **जंबूदीवे दीवे भरहेरवएसु वासेसु** इत्यादिभिः सूत्रैः कालादयश्चूलिकान्ता अभिहिताः एवं धातकीखण्डस्य पूर्वार्द्धे पश्चिमार्द्धे पुष्करार्द्धस्यापि पूर्वार्द्धे पश्चिमार्द्धे च वाच्याः, एकमेरुसम्बद्धवक्तव्यतायाः चतुर्ष्वप्यन्येषु समानत्वाद्, एतदेवाह– **एव**मित्यादि । अमुमेवातिदेशं सङ्ग्रहगाथया आह– **जंबूदीवे**त्यादि, जम्बूद्वीपस्येदं जम्बूद्वीपकं तं वा गच्छतीति जम्बूद्वीपगम्, **जम्बूद्वीपे य**दिति क्वचित् पाठः, अवश्यंभावित्वाद् वाच्यत्वाद्वाऽऽवश्यकं जम्बूद्वीपगतावश्यकं वा वस्तुजातम्, **तु**ः पूरणे, किमादि किमन्तं चेत्याह **कालात्** सुषमसुषमालक्षणादारभ्य **चूलिकां** मन्दरचूलिकां **यावत्** यत्तदिति गम्यते, **धातकीखण्डे पुष्करवरे च** द्वीपे यौ **पूर्वापरौ पार्श्वौ** प्रत्येकं पूवार्द्धमपरार्द्धं च तयोः, **पूर्वापरेषु वर्षेषु** वा क्षेत्रेष्वन्यूनाधिकं द्रष्टव्यमिति शेष इति ।

[सू० ३००] जंबूदीवस्स णं दीवस्स चत्तारि दारा पन्नत्ता, तंजहा-विजये, वेजयंते, जयंते, अपराजिते । ते णं दारा चत्तारि जोयणाइं विक्खंभेणं तावतितं चेव पवेसेणं पन्नत्ता, तत्थ णं चत्तारि देवा महिड्ढिया जाव पलिओवमट्ठितीता परिवसंति, तंजहा-विजते, वेजयंते, जयंते, अपराजिते।

[टी०] **जंबूदीव** त्ति **विजयादी**नि क्रमेण पूर्वादिदिक्षु, **विष्कम्भो** द्वारशाखयोरन्तरम्, **प्रवेश**ः कुड्यस्थूलत्वमष्ट योजनान्युच्चत्वमिति, उक्तं च–

चउजोयणवित्थिन्ना अट्ठेव य जोयणाणि उव्विद्धा ।
उभओ वि कोसकोसं कुड्डा बाहल्लओ तेसिं ॥ [बृहत्क्षेत्र० १७] ति,

क्रोशं शाखाबाहल्यमित्यर्थः ।

[सू० ३०१] जंबूदीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासहरपव्वयस्स चउसु विदिसासु लवणसमुद्दं तिन्नि तिन्नि जोयणसताइं ओगाहित्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा- एगूरूयदीवे, आभासितदीवे, वेसाणितदीवे, णंगोलियदीवे। तेसु णं दीवेसु चउव्विहा मणुस्सा परिवसंति, तंजहा-एगूरूता, आभासिता, वेसाणिता, णंगोलिया।

तेसि णं दीवाणं चउसु विदिसासु लवणसमुद्दं चत्तारि चत्तारि जोयणसयाइं ओगाहेत्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-हयकन्नदीवे, गयकन्नदीवे, गोकन्नदीवे, सक्कुलिकन्नदीवे । तेसु णं दीवेसु चउव्विधा मणुस्सा परिवसंति, तंजहा-हयकन्ना, गयकन्ना, गोकन्ना, सक्कुलिकन्ना ।

तेसि णं दीवाणं चउसु विदिसासु लवणसमुद्दं पंच पंच जोयणसयाइं ओगाहित्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-आयंसमुहदीवे, मेंढमुहदीवे, अयोमुहदीवे, गोमुहदीवे । तेसु णं दीवेसु चउव्विहा मणुस्सा भाणियव्वा ।

तेसि णं दीवाणं चउसु विदिसासु लवणसमुद्दं छ छ जोयणसयाइं, ओगाहेत्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-आसमुहदीवे, हत्थिमुहदीवे, सीहमुहदीवे, वग्घमुहदीवे। तेसु णं दीवेसु मणुस्सा भाणियव्वा।

तेसि णं दीवाणं चउसु विदिसासु लवणसमुद्दं सत्त सत्त जोयणसयाइं ओगाहेत्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-आसकन्नदीवे, हत्थिकन्नदीवे, अकन्नदीवे, कन्नपाउरणदीवे। तेसु णं दीवेसु मणुया भाणियव्वा।

तेसि णं दीवाणं चउसु विदिसासु लवणसमुद्दं अट्ठट्ठ जोयणसयाइं ओगाहेत्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-उक्कामुहदीवे, मेहमुहदीवे, विज्जुमुहदीवे, विज्जुदंतदीवे । तेसु णं दीवेसु मणुस्सा भाणियव्वा ।

तेसि णं दीवाणं चउसु विदिसासु लवणसमुद्दं णव णव जोयणसयाइं ओगाहेत्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-घणदंतदीवे, लट्ठदंतदीवे, गूढदंतदीवे, सुद्धदंतदीवे । तेसु णं दीवेसु चउविधा मणुस्सा परिवसंति, तंजहा-घणदंता, लट्ठदंता, गूढदंता, सुद्धदंता ।

जंबूदीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं सिहरिस्स वासहरपव्वयस्स चउसु विदिसासु लवणसमुद्दं तिन्नि तिन्नि जोयणसयाइं ओगाहेत्ता एत्थ णं चत्तारि अंतरदीवा पन्नत्ता, तंजहा-एगूरूयदीवे, सेसं तहेव निरवसेसं भाणियव्वं जाव सुद्धदंता ।

[टी०] **चुल्लहिमवंतस्स** त्ति महाहिमवदपेक्षया लघोर्हिमवतः, तस्य हि प्राग्भागा-ऽपरभागयोः प्रत्येकं शाखाद्वयमस्तीत्युच्यते **चउसु विदिसासु** विदिक्षु पूर्वोत्तराद्यासु **लवणसमुद्रं [त्रीणि त्रीणि योजनशतान्य]वगाह्येत्येतस्य** द्विकर्म्मत्वात्कर्म्मणि सप्तम्यर्थे द्वितीयेति त्रीणि त्रीणि योजनशतान्यवगाह्य-उल्लङ्घ्य ये शाखाविभागा वर्त्तन्ते **एत्थ** त्ति एतेषु शाखाविभागेषु **अन्तरे** मध्ये समुद्रस्य द्वीपाः, अथवा **अन्तरं** परस्परविभागः, तत्प्रधाना द्वीपा **अन्तरद्वीपाः**, तत्र पूर्वोत्तरायामेकोरुकाभिधानो योजनशतत्रयायाम-विष्कम्भो द्वीपः, एवमाभाषिक-वैषाणिक-लाङ्गूलिकद्वीपा अपि क्रमेणाग्नेयी-नैर्ऋती-वायव्यास्विति, **चतुर्विधा** इति समुदायापेक्षया न त्वेकैकस्मिन्निति, अतः क्रमेणैते योज्याः, द्वीपनामतः पुरुषाणां नामान्येव, ते तु सर्वाङ्गोपाङ्गसुन्दरा दर्शनमनोरमाः, स्वरूपतो नैकोरुकादय एवेति, तथा एतेभ्य एव चत्वारि योजनशतान्यवगाह्य प्रतिविदिक् चतुर्योजनशतायाम-विष्कम्भा द्वितीयाश्चत्वार एव, एवं येषां यावदन्तरं तेषां तावदेवायाम-विष्कम्भप्रमाणं यावत् सप्तमानां नवशतान्यन्तरं तावदेव च तत्प्रमाणमिति, सर्वे-ऽप्यष्टाविंशतिरेते, एतन्मनुष्यास्तु युग्मप्रसवाः पल्योपमासङ्ख्येयभागायुषोऽष्ट-धनुःशतोच्चाः, तथैरावतक्षेत्रविभागकारिणः शिखरिणोऽप्येवमेव पूर्वोत्तरादिविदिक्षु क्रमेणैतन्नामिकैवान्तरद्वीपानामष्टाविंशतिरिति ।

[सू० ३०२] जंबुद्दीवस्स णं दीवस्स बाहिरिल्लाओ वेदियंतातो चउद्दिसिं लवणसमुद्दं पंचाणउइं पंचाणउइं जोयणसहस्साइं ओगाहेत्ता एत्थ णं महतिमहालता महारंजरसंठाणसंठिता चत्तारि महापायाला पन्नत्ता, तंजहा-वलतामुहे, केउते, जूवए, ईसरे । एत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओवमट्ठितीता परिवसंति, तंजहा-काले, महाकाले, वेलंबे, पभंजणे ।

जंबूदीवस्स णं दीवस्स बाहिरिल्लातो वेतितंताओ चउद्दिसिं लवणसमुद्दं

बातालीसं बातालीसं जोयणसहस्साइं ओगाहेत्ता एत्थ णं चउण्हं वेलंधरनागराईणं चत्तारि आवासपव्वता पन्नत्ता, तंजहा-गोथूभे, दओभासे, संखे, दगसीमे । तत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओवमट्ठितीता परिवसंति, तंजहा-गोथूभे, सिवए, संखे, मणोसिलए ।

जंबूदीवस्स णं दीवस्स बाहिरिल्लाओ वेइतंताओ चउसु विदिसासु लवणसमुद्दं बायालीसं बायालीसं जोयणसहस्साइं ओगाहेत्ता एत्थ णं चउण्हं अणुवेलंधरणागरातीणं चत्तारि आवासपव्वता पन्नत्ता, तंजहा-कक्कोडए विज्जुजिब्भे केलासे अरुणप्पभे । तत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओवमट्ठितीता परिवसंति, तंजहा-कक्कोडए कद्दमए केलासे अरुणप्पभे।

[टी०] **जंबूदीव** त्ति **एत्थ णं** ति मध्यमेषु दशयोजनसहस्रेषु महामहान्त इति वक्तव्ये समयभाषया **महइमहालया** इत्युक्तम्, महच्च तदरञ्जरं च, अरञ्जरम् उदकुम्भ इत्यर्थः, **महारञ्जरम्**, तस्य **संस्थानेन संस्थिता** ये ते तथा, तदाकारा इत्यर्थः, **महान्त**स्तदन्य-क्षुल्लकव्यवच्छेदेन पातालमिवागाधत्वात् गम्भीरत्वात् **पाताला**ः पातालव्यवस्थितत्वाद्वा पातालाः, महान्तश्च ते पातालाश्चेति **महापातालाः, वडवामुखः केतुको यूपक ईश्वर**श्चेति, क्रमेण पूर्वादिदिक्ष्विति, एते च मुखे मूले च दश सहस्राणि योजनानाम्, मध्ये उच्चैस्त्वेन च लक्षमिति, एषामुपरितनभागे जलमेव मध्ये वायुजले मूले वायुरेवेति, एतन्निवासिनो देवाः वायुकुमाराः **काला**दय इति ।

वेलां लवणसमुद्रशिखामन्तर्विशन्तीं बहिर्वा यान्तीमग्रशिखां च धारयन्तीति संज्ञात्वाद्वेलंधरास्ते च ते नागराजाश्च नागकुमारवराः **वेलंधरनागराजा**स्तेषा**मा-वासपर्वताः** पूर्वादिदिक्षु क्रमेण **गोस्तूपा**दयः, **विदिक्षु** पूर्वोत्तरादिषु वेलंधराणां पश्चाद्वृत्तयोऽनुनायकत्वेन नागराजा **अनुवेलंधरनागराजाः** ।

[सू० ३०३] लवणे णं समुद्दे चत्तारि चंदा पभासिंसु वा पभासंति वा पभासिस्संति वा, चत्तारि सूरिता तवतिंसु वा तवतंति वा तवतिस्संति वा। चत्तारि कत्तियाओ जाव चतारि भरणीओ, चत्तारि अग्गी जाव चत्तारि जमा, चत्तारि अंगारया जाव चत्तारि भावकेऊ ।

[टी०] **पभासिंसु** त्ति चन्द्राणां सौम्यदीप्तिकत्वाद्वस्तुप्रभासनमुक्तमादित्यानां तु खररश्मित्वात् **तवइंसु** त्ति तापनमुक्तमिति । चतुःसङ्ख्यत्वाच्चन्द्राणां तत्परिवारस्यापि नक्षत्रादेश्चतुःसङ्ख्यत्वमेवेत्याह-**चतस्रः कृत्तिका** नक्षत्रापेक्षया न तु तारकापेक्षयेति, एवमष्टाविंशतिरपि, **अग्निरिति** कृत्तिकानक्षत्रस्य देवता यावद्यम इति भरण्या देवता, **अङ्गारक** आद्यो ग्रहः **भावकेतु**रित्यष्टाशीतितम इति, शेषं यथा द्विस्थानके ।

[सू० ३०४] लवणस्स णं समुद्दस्स चत्तारि दारा पन्नत्ता, तंजहा-विजए, वेजयंते, जयंते, अपराजिते । ते णं दारा चत्तारि जोयणाइं विक्खंभेणं तावतितं चेव पवेसेणं पन्नत्ता । तत्थ णं चत्तारि देवा महिड्ढिता जाव पलिओवमट्ठितीया परिवसंति, तंजहा-विजते जाव अपराजिते ।

[सू० ३०५] धायइसंडे णं दीवे चत्तारि जोयणसयसहस्साइं चक्कवालविक्खंभेणं पन्नत्ते ।

[सू० ३०६] जंबूदीवस्स णं दीवस्स बहिता चत्तारि भरहाइं चत्तारि एरवयाइं, एवं जहा सदुद्देसते तहेव निरवसेसं भाणियव्वं जाव चत्तारि मंदरा चत्तारि मंदरचूलिआओ ।

[टी०] समुद्रद्वारादि जम्बूद्वीपद्वारादिवदिति । **चक्रवालस्य** वलयस्य **विष्कम्भो** विस्तरः । **जम्बूद्वी**पाद् बहिर्धातकीखण्ड-पुष्करार्द्धयोरित्यर्थः । शब्दोपलक्षित उद्देशकः **शब्दोद्देशको** द्विस्थानकस्य तृतीय इत्यर्थः, केवलं तत्र द्विस्थानकानुरोधेन **दो भरहाइं** इत्याद्युक्तमिह तु **चत्तारी**त्यादि ।

[सू० ३०७] णंदीसरवरस्स णं दीवस्स चक्कवालविक्खंभस्स बहुमज्झदेसभागे चउद्दिसिं चत्तारि अंजणगपव्वता पन्नत्ता, तंजहा-पुरित्थिमिल्ले अंजणग-पव्वते, दाहिणिल्ले अंजणगपव्वते, पच्चत्थिमिल्ले अंजणगपव्वते, उत्तरिल्ले अंजणगपव्वते ४ ।

ते णं अंजणगपव्वता चउरासीति जोयणसहस्साइं उड्ढंउच्चत्तेणं, एगं जोयणसहस्सं उव्वेहेणं, मूले दस जोयणसहस्साइं विक्खंभेणं, तदणंतरं च णं मातीते मातीते परिहातेमाणा परिहातेमाणा उवरिमेगं जोयणसहस्सं

विक्खंभेणं पण्णत्ता, मूले एक्कतीसं जोयणसहस्साइं छच्च तेवीसे जोयणसते परिक्खेवेणं, उवरिं तिन्नि तिन्नि जोयणसहस्साइं एगं च बावट्ठं जोयणसतं परिक्खेवेणं, मूले वित्थिन्ना, मज्झे संखित्ता, उप्पिं तणुया गोपुच्छ-संठाणसंठिता, सव्वअंजणमया अच्छा जाव पडिरूवा ।

तेसि णं अंजणगपव्वताणं उवरिं बहुसमरमणिज्जा भूमिभागा पन्नत्ता, तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभागे चत्तारि सिद्धाययणा पण्णत्ता, ते णं सिद्धाययणा एगं जोयणसयं आयामेणं पण्णासं जोयणाइं विक्खंभेणं बावत्तरि जोयणाइं उड्ढंउच्चत्तेणं ।

तेसिं णं सिद्धाययणाणं चउद्दिसिं चत्तारि दारा पन्नत्ता, तंजहा-देवदारे, असुरदारे, णागदारे, सुवन्नदारे । तेसु णं दारेसु चउव्विहा देवा परिवसंति, तंजहा- देवा, असुरा, नागा, सुवण्णा ।

तेसि णं दाराणं पुरतो चत्तारि मुहमंडवा पन्नत्ता । तेसि णं मुहमंडवाणं पुरओ चत्तारि पेच्छाघरमंडवा पन्नत्ता । तेसि णं पेच्छाघरमंडवाणं बहुमज्झदेसभागे चत्तारि वइरामया अक्खाडगा पन्नत्ता । तेसि णं वइरामयाणं अक्खाडगाणं बहुमज्झदेसभागे चत्तारि मणिपेढियातो पन्नत्ताओ । तासि णं मणिपेढिताणं उवरिं चत्तारि सीहासणा पन्नत्ता । तेसि णं सीहासणाणं उवरिं चत्तारि विजयदूसा पन्नत्ता । तेसि णं विजयदूसगाणं बहुमज्झदेसभागे चत्तारि वइरामता अंकुसा पन्नत्ता । तेसु णं वतिरामतेसु अंकुसेसु चत्तारि कुंभिका मुत्तादामा पन्नत्ता । ते णं कुंभिका मुत्तादामा पत्तेयं पत्तेयं अन्नेहिं तदद्धउच्चत्तपमाणमेत्तेहिं चउहिं अद्धकुंभिकेहिं मुत्तादामेहिं सव्वतो समंता संपरिक्खित्ता ।

तेसि णं पेच्छाघरमंडवाणं पुरओ चत्तारि मणिपेढिताओ पण्णत्ताओ । तासि णं मणिपेढियाणं उवरिं चत्तारि चेतितथूभा पण्णत्ता । तेसि णं चेतितथूभाणं पत्तेयं पत्तेयं चउद्दिसिं चत्तारि मणिपेढिताओ पन्नत्ताओ । तासि णं मणिपेढिताणं उवरिं चत्तारि जिणपडिमातो सव्वरतणामईतो संपलियं-

कणिसन्नाओ थूभाभिमुहीओ चिट्ठंति, तंजहा-रिसभा, वद्धमाणा, चंदाणणा, वारिसेणा ।

तेसि णं चेतितथूभाणं पुरतो चत्तारि मणिपेढिताओ पन्नत्ताओ । तासि णं मणिपेढिताणं उवरिं चत्तारि चेतितरुक्खा पन्नत्ता । तेसि णं चेतितरुक्खाणं पुरओ चत्तारि मणिपेढिताओ पन्नत्ताओ । तासि णं मणिपेढिताणं उवरिं चत्तारि महिंदज्झया पन्नत्ता । तेसि णं महिंदज्झताणं पुरओ चत्तारि णंदातो पोक्खरणीओ पन्नत्ताओ । तासि णं पोक्खरणीणं पत्तेयं पत्तेयं चउद्दिसिं चत्तारि वणसंडा पन्नत्ता, तंजहा-पुरत्थिमेणं, दाहिणेणं, पच्चत्थिमेणं, उत्तरेणं,

पुव्वेण असोगवणं दाहिणओ होति सत्तवण्णवणं ।
अवरेण चंपगवणं चूतवणं उत्तरे पासे ॥२१॥

तत्थ णं जे से पुरत्थिमिल्ले अंजणगपव्वते तस्स णं चउद्दिसिं चत्तारि णंदाओ पोक्खरणीओ पन्नत्ताओ, तंजहा-णंदुत्तरा, णंदा, आणंदा, णंदिवद्धणा। तातो णं णंदातो पोक्खरणीओ एगं जोयणसयसहस्सं आयामेणं, पन्नासं जोयणसहस्साइं विक्खंभेणं, दस जोयणसयाइं उव्वेहेणं, तासि णं पोक्खरणीणं पत्तेयं पत्तेयं चउदिसिं चत्तारि तिसोवाणपडिरूवगा पन्नत्ता । तेसि णं तिसोवाणपडिरूवगाणं पुरतो चत्तारि तोरणा पन्नत्ता, तंजहा-पुरत्थिमेणं दाहिणेणं पच्चत्थिमेणं उत्तरेणं । तासि णं पोक्खरणीणं पत्तेयं पत्तेयं चउदिसिं चत्तारि वणसंडा पन्नत्ता, तंजहा-पुरत्थि[मेणं] दाहि[णेणं] पच्च[त्थिमेणं] उत्तरेणं, पुव्वेण असोगवणं जाव चूयवणं उत्तरे पासे ॥

तासि णं पुक्खरणीणं बहुमज्झदेसभागे चत्तारि दधिमुहगपव्वता पन्नत्ता। ते णं दधिमुहगपव्वता चउसट्ठिं जोयणसहस्साइं उड्ढंउच्चत्तेणं, एगं जोयणसहस्सं उव्वेहेणं, सव्वत्थ समा, पल्लगसंठाणसंठिता, दस जोयणसहस्साइं विक्खंभेणं, एक्कतीसं जोयणसहस्साइं छच्च तेवीसे जोयणसते परिक्खेवेणं, सव्वरयणामता अच्छा जाव पडिरूवा । तेसि णं दधिमुहगपव्वताणं उवरिं बहुसमरमणिज्जा भूमिभागा पन्नत्ता, सेसं जहेव अंजणगपव्वताणं तहेव णिरवसेसं भाणियव्वं जाव चूतवणं उत्तरे पासे ॥

तत्थ णं जे से दाहिणिल्ले अंजणगपव्वते तस्स णं चउद्दिसिं चत्तारि णंदाओ पुक्खरिणीतो पण्णत्ताओ, तंजहा-भद्दा, विसाला, कुमुदा, पोंडरिगिणी । तातो णं णंदातो पोक्खरणीतो एकं जोयणसयसहस्सं सेसं तं चेव जाव दधिमुहगपव्वता जाव वणसंडा ।

तत्थ णं जे से पच्चत्थिमिल्ले अंजणगपव्वते तस्स णं चउद्दिसिं चत्तारि णंदाओ पोक्खरणीओ पन्नत्ताओ, तंजहा-णंदिसेणा, अमोहा, गोथूभा, सुदंसणा। सेसं तं चेव तहेव दधिमुहगपव्वता तहेव सिद्धाययणा जाव वणसंडा ।

तत्थ णं जे से उत्तरिल्ले अंजणगपव्वते तस्स णं चउद्दिसिं चत्तारि णंदातो पुक्खरणीओ पन्नत्ताओ, तंजहा-विजया, वेजयंती, जयंती, अपराजिता । तातो णं पुक्खरिणीओ एगं जोयणसयसहस्सं तं चेव पमाणं तहेव दधिमुहगपव्वता तहेव सिद्धायतणा जाव वणसंडा ।

णंदीसरवरस्स णं दीवस्स चक्कवालविक्खंभस्स बहुमज्झदेसभागे चउसु विदिसासु चत्तारि रतिकरगपव्वता पन्नत्ता, तंजहा-उत्तरपुरत्थिमिल्ले रतिकरगपव्वते, दाहिणपुरत्थिमिल्ले रतिकरगपव्वते, दाहिणपच्चत्थिमिल्ले रतिकरगपव्वते, उत्तरपच्चत्थिमिल्ले रतिकरगपव्वते । ते णं रतिकरगपव्वता दस जोयणसयाइं उड्ढंउच्चत्तेणं, दस गाउतसताइं उव्वेहेणं, सव्वत्थ समा, झल्लरिसंठाणसंठिता, दस जोयणसहस्साइं विक्खंभेणं, एक्कतीसं जोयणसहस्साइं छच्च तेवीसे जोयणसते परिक्खेवेणं, सव्वरतणामता अच्छा जाव पडिरूवा। तत्थ णं जे से उत्तरपुरत्थिमिल्ले रतिकरगपव्वते तस्स णं चउदिसिमीसाणस्स देविंदस्स देवरन्नो चउण्हमग्गमहिसीणं जंबूदीवपमाणातो चत्तारि रायहाणीओ पन्नत्ताओ, तंजहा-णंदुत्तरा, णंदा, उत्तरकुरा, देवकुरा, कण्हाते कण्हरातीते रामाते रामरक्खियाते ।

तत्थ णं जे से दाहिणपुरत्थिमिल्ले रतिकरगपव्वते तस्स णं चउदिसिं सक्कस्स देविंदस्स देवरन्नो चउण्हमग्गमहिसीणं जंबूदीवपमाणातो चत्तारि रायहाणीओ पन्नत्ताओ, तंजहा-समणा, सोमणसा, अच्चिमाली, मणोरमा, पउमाते, सिवाते, सुतीते, अंजूए ।

तत्थ णं जे से दाहिणपच्चत्थिमिल्ले रतिकरगपव्वते तस्स णं चउदिसिं सक्कस्स देविंदस्स देवरन्नो चउण्हमग्गमहिसीणं जंबूदीवप्पमाणमेत्तातो चत्तारि रायहाणीओ पन्नत्ताओ, तंजहा- भूता, भूतवडेंसा, गोथूभा, सुदंसणा, अमलाते अच्छराते णवमिताते रोहिणीते ।

तत्थ णं जे से उत्तरपच्चत्थिमिल्ले रतिकरगपव्वते तस्स णं चउदिसिमीसाणस्स [देविंदस्स देवरन्नो] चउण्हमग्गमहिसीणं जंबूदीवप्पमाणमेत्तात्तो चत्तारि रायहाणीओ पन्नत्ताओ, तंजहा-रयणा, रतणुच्चता, सव्वरतणा, रतणसंचया, वसूते, वसुगुत्ताते, वसुमित्ताते, वसुंधराते ।

[टी०] उक्तं मनुष्यक्षेत्रवस्तूनां चतुःस्थानकमधुना क्षेत्रसाधर्म्यान्नन्दीश्वरद्वीपवस्तूनामा सत्यसूत्राच्चतुःस्थानकं **नंदीसरस्से**त्यादिना ग्रन्थेनाह, सूत्रसिद्धश्चायम्, केवलम्-

जम्बू १ लवणे धायइ २ कालोये पुक्खराइ ३ जुयलाइं ।

वारुणि ४ खीर ५ घतेक्खु ६-७ नंदीसर ८ अरुण ९ दीवुदही ॥ [बृहत्सं० ९२] ति गणनयाऽष्टमो **नन्दीश्वरः**, स एव **वरः**, अमनुष्यद्वीपापेक्षया बहुतरजिनभवनादिसद्भावेन तस्य वरत्वादिति, तस्य चक्रवालविष्कम्भस्य प्रमाणं १६३८४०००००, उक्तं च-

तेवट्ठं कोडिसयं चउरासीइं च सयसहस्साइं ।

नंदीसरवरदीवे विक्खंभो चक्कवालेणं ॥ [द्वीपसागर० २५] इति,

मध्यश्चासौ **देशभाग**श्च देशावयवो मध्यदेशभागः, स च नात्यन्तिक इति **बहुमध्यदेशभागो** न प्रदेशादिपरिगणनया निष्टङ्कितः, अपि तु प्राय इति, अथवा अत्यन्तं मध्यदेशभागो बहुमध्यदेशभाग इति, तत्र । इहाऽञ्जनकाः **मूले दश योजनसहस्राणि विष्कम्भेणे**त्युक्तम्, **द्वीपसागरप्रज्ञप्तिसङ्ग्रहण्यां** तूक्तम्-

चुलसीति सहस्साइं उव्विद्धा ओगया सहस्समहे ।

धरणितले वित्थिन्ना य ऊणगा ते दससहस्सा ॥

नव चेव सहस्साइं पंचेव य होंति जोयणसयाइं ।

अंजणगपव्वयाणं मूलम्मि उ होइ विक्खंभो ॥ कन्दस्येत्यर्थः,

नव चेव सहस्साइं चत्तारि य होंति जोयणसयाइं ।

अंजणगपव्वयाणं धरणियले होइ विक्खंभो ॥ [द्वीपसागर० २७, २९, ३१] इति,

तदिदं मतान्तरमित्यवसेयम्, एवमन्यत्रापि, मतान्तरबीजानि तु केवलिगम्यानीति ।

गोपुच्छसंठाण त्ति गोपुच्छो ह्यादौ स्थूलोऽन्ते सूक्ष्मस्तद्वत्तेऽपीति, **सव्वंजणमय** त्ति अञ्जनं कृष्णरत्नविशेषः, तन्मयाः, सर्व एवानन्यमयत्वेन सर्वथैवाञ्जनमयाः **सर्वाञ्जनमयाः**, परमकृष्णा इति भावः, उक्तं च–

भिंगंगरुइलकज्जलअंजणधाउसरिसा विरायंति ।

गगणतलमणुलिहंता अंजणगा पव्वया रम्मा ॥ [द्वीपसागर० ३७] इति ।

अच्छाः आकाशस्फटिकवत्, **सण्हा** सूक्ष्म [श्लक्ष्ण]परमाणुस्कन्धनिष्पन्नाः श्लक्ष्णदलनिष्पन्नपटवत्, **लण्हा** श्लक्ष्णा मसृणा इत्यर्थः, घुण्टितपटवत्, तथा घृष्टा इव **घृष्टाः**, खरशानया पाषाणप्रतिमावत्, मृष्टा इव **मृष्टाः**, सुकुमारशानया पाषाणप्रतिमेव, शोधिता वा प्रमार्जनिकयेव, अत एव **नीरजसः** रजोरहितत्वात्, **निर्मलाः** कठिनमलाभावात् धौतवस्त्रवद्वा, **निष्पङ्का** आर्द्रमलाभावात् अकलङ्कत्वाद्वा, **निक्कंकडच्छाया, निष्कङ्कटा** निष्कवचा निरावरणेत्यर्थः **छाया** शोभा येषां ते तथा, अकलङ्कशोभा वा, **सप्रभा** देवान्दकत्वादिप्रभावयुक्ताः, अथवा स्वेन आत्मना प्रभान्ति न परत इति स्वप्रभाः, यतः **समरिचीया** सह मरीचिभिः किरणैर्ये ते तथा, अत एव **सउज्जोया** सहोद्द्योतेन वस्तुप्रभासनेन वर्त्तन्ते ये ते तथा, **पासाईय** त्ति प्रासादीयाः मनसः प्रसादकराः, **दर्शनीया**स्तांश्चक्षुषा पश्यन्नपि न श्रमं गच्छतीत्यर्थः, **अभिरूपाः** कमनीयाः, **प्रतिरूपाः** द्रष्टारं द्रष्टारं प्रति रमणीया इति **यावत्**शब्दसङ्ग्रहः । **बहुसमाः** अत्यन्तसमा **रमणीया**श्च ये ते तथा, **सिद्धानि** शाश्वतानि सिद्धानां वा शाश्वतीनामर्हत्प्रतिमाना**मायतनानि** स्थानानि **सिद्धायतनानि**, उक्तं च–

अंजणगपव्वयाणं सिहरतलेसुं हवंति पत्तेयं ।

अरहंताययणाइं सीहणिसायाइं तुंगाइं ॥ [द्वीपसागर० ३९]

मुखे द्वारे आयतनस्य मण्डपा **मुखमण्डपाः** पट्टशालारूपाः, **प्रेक्षा** प्रेक्षणकम्, तदर्थं **गृह**रूपाः मण्डपाः **प्रेक्षागृहमण्डपाः** प्रसिद्धस्वरूपाः, **वैरं** वज्रं रत्नविशेषस्तन्मयाः **आखाटकाः** प्रेक्षाकारिजनासनभूताः प्रतीता एव । **विजयदूष्याणि** वितानकरूपाणि वस्त्राणि, तन्मध्यभाग एवाऽङ्कुशाः अवलम्बननिमित्तम्, कुम्भो मुक्ताफलानां परिमाणतया विद्यते येषु तानि **कुम्भिकानि मुक्तादामानि** मुक्ताफलमालाः, कुम्भप्रमाणं

च– **दो असतीओ पसती, दो पसतीओ सेतिया, चत्तारि सेतियाओ कुडवो, चत्तारि कुडवा पत्थो, चत्तारि पत्था आढयं, चत्तारि आढया दोणो, सट्ठी आढयाइं जहन्नो कुंभो, असीइ मज्झिमो, सयमुक्कोसो** [अनुयोगद्वार० सू० ३१८] इति । **तदद्ध** त्ति तेषामेव मुक्तादाम्नामर्द्धमुच्चत्वस्य प्रमाणं येषां तानि **तदर्द्धोच्चत्वप्रमाणानि**, तान्येव तन्**मात्राणि**, तैः, **अद्धकुंभिकेहिं** ति मुक्तफलार्द्धकुम्भवद्भिः, **सर्वतः** सर्वासु दिक्षु, किमुक्तं भवति? **समन्ता**दिति । **चैत्य**स्य सिद्धायतनस्य प्रत्यासन्नाः **स्तूपाः** प्रतीताश्चैत्यस्तूपाश्चित्ताल्हादकत्वाद्वा चैत्याः स्तूपाः चैत्यस्तूपाः । **संपर्यङ्कनिषण्णाः** पद्मासननिषण्णाः, एवं चैत्यवृक्षा अपि, **महेन्द्रा** इति अतिमहान्तः समयभाषया, ते च ते **ध्वजा**श्चेति, अथवा महेन्द्रस्येव शक्रादेर्ध्वजा **महेन्द्रध्वजाः** । शाश्वतपुष्करिण्यः सर्वा अपि सामान्येन **नन्दा** इत्युच्यन्ते । **सत्तिवन्नवणं** ति सप्तच्छदवनमिति । **तिसोमा(वा?)णपडिरूवग** त्ति एकद्वारं प्रति निर्गमप्रवेशार्थं त्रिदिगभिमुखास्तिस्रः सोपानपङ्क्तयः । **दधि**वत् श्वेतं **मुखं** शिखरं रजतमयत्वात् येषां ते तथा, उक्तं च–

संखदलविमलनिम्मलदहिघण-गोखीर-हारसंकासा ।
गगणतलमणुलिहंता सोहंते दहिमुहा रम्मा ॥ [द्वीपसागर० ५०] इति ।

बहुमध्यदेशभागे उक्तलक्षणे **विदिक्षु** पूर्वोत्तराद्यासु रतिकरणाद् **रतिकराः** ४, राजधान्यः क्रमेण कृष्णादीनामिन्द्राणीनामिति, तत्र दक्षिणलोकार्द्धनायकत्वाच्छक्रस्य पूर्वदक्षिणदक्षिणापरविदिग्द्वयरतिकरयोस्तस्येन्द्राणीनां राजधान्य इतरयोरीशानस्योत्तरलोकार्द्धाधिपतित्वात् तस्येति । एवं च नन्दीश्वरे द्वीपे अञ्जनक ४-दधिमुखेषु १६ विंशतिर्जिनायतनानि भवन्ति, **अत्र च देवाः ४ चातुर्मासिकप्रतिपत्सु सांवत्सरिकेषु चान्येषु च बहुषु जिनजन्मादिषु देवकार्येषु समुदिता अष्टाहिकामहिमाः कुर्वन्तः सुखंसुखेन विहरन्तीत्युक्तं जीवाभिगमे**, ततो यद्यन्यान्यप्यतथाविधानि सन्ति सिद्धायतनानि तदा न विरोधः, सम्भवन्ति च तानि उक्तनगरीषु **विजय**नगर्यामिवेति, तथा दृश्यते च **पञ्चदशस्थानोद्धारलेशः**–

सोलस दहिमुहसेला कुंदामलसंखचंदसंकासा ।
कणयनिभा बत्तीसं रइकरगिरि बाहिरा तेसिं ॥ [ ]

द्वयोर्द्वयोर्वाप्योरन्तराले बहिःकोणयोः प्रत्यासन्नौ द्वौ द्वावित्यर्थः ।

अंजणगाइगिरीणं णाणामणिपज्जलंतसिहरेसु ।

बावन्नं जिणणिलया मणिरयणसहस्सकूडवरा ॥ [ ] इति ।

तत्त्वं तु बहुश्रुता विदन्तीति ।

[सू० ३०८] चउव्विहे सच्चे पन्नत्ते, तंजहा-णामसच्चे, ठवणसच्चे, दव्वसच्चे, भावसच्चे ।

[टी०] एतच्च पूर्वोक्तं सर्वं सत्यं जिनोक्तत्वात् इति सत्यसम्बन्धेन सत्यसूत्रम् । नाम-स्थापनासत्ये सुज्ञाने, द्रव्यसत्यमनुपयुक्तस्य सत्यमपि, भावसत्यं तु यत् स्वपरानुपरोधेनोपयुक्तस्येति ।

[सू० ३०९] आजीवियाणं चउविहे तवे पन्नत्ते, तंजहा- उग्गतवे, घोरतवे, रसणिज्जूहणता, जिब्भिंदियपडिसंलीणता ।

[टी०] सत्यं चारित्रविशेष इति चारित्रविशेषानुद्देशकान्तं यावदाह– **आजीविए**त्यादि, **आजीविकानां गोशालक**शिष्याणाम् । **उग्रं** तपः अष्टमादि, क्वचन **उर**मिति पाठः तत्र **उरं** शोभनम् इहलोकाद्याशंसारहितत्वेनेति, **घोरम्** आत्मनिरपेक्षम्, **रसनिज्जूहणया** घृतादिरसपरित्यागः, **जिह्वेन्द्रियप्रतिसंलीनता** मनोज्ञा-ऽमनोज्ञेष्वाहारेषु राग-द्वेषपरिहार इति, आर्हतानां तु द्वादशधेति ।

[सू० ३१०] चउव्विहे संजमे पन्नत्ते, तंजहा-मणसंजमे, वतिसंजमे, कायसंजमे, उवकरणसंजमे ।

चउव्विधे चिताते पन्नत्ते, तंजहा-मणचियाते, वतिचियाते, कायचियाते, उवकरणचियाते ।

चउव्विहा अकिंचणता पन्नत्ता, तंजहा-मणअकिंचणता, वतिअकिंचणता, कायअकिंचणता, उवकरणअकिंचणता ।

॥ चउट्ठाणस्स बीओ उद्देसओ सम्मत्तो ॥

[टी०] मनोवाक्कायानामकुशलत्वेन निरोधाः कुशलत्वेन तूदीरणानि संयमाः, **उपकरणसंयमो** महामूल्यवस्त्रादिपरिहारः, पुस्तक-वस्त्र-तृण-चर्म्मपञ्चकपरिहारो वा,

तत्र–

गंडी कच्छवि मुट्ठी संपुडफलए तहा छिवाडी य ।
एयं पोत्थयपणगं पन्नत्तं वीयरागेहिं ॥
बाहल्लपुहत्तेहिं गंडी पोत्थो उ तुल्लओ दीहो ।
कच्छवि अंते तणुओ मज्झे पिहुलो मुणेयव्वो ॥
चउरंगुलदीहो वा वट्टागिति मुट्ठिपोत्थओ अहवा ।
चउरंगुलदीहो च्चिय चउरंसो सो उ विन्नेओ ॥
संपुडगो दुगमाइफलगा वोच्छं छिवाडि एत्ताहे ।
तणुपत्तूसियरूवा होइ छिवाडी बुहा बेंति ॥
दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो ।
तं मुणियसमयसारा छिवाडिपोत्थं भणंतीह ॥ [ ]

वस्त्रपञ्चकं द्विधा, अप्रत्युपेक्षित-दुष्प्रत्युपेक्षितभेदात्, तत्र–

अप्पडिलेहियदूसे तूलि उवहाणगं च नायव्वं ।
गंडुवहाणालिंगिणि मसूरए चेव पोत्तमए ॥
पल्हवि कोयवि पावार नवतए तह य दाढिगालीओ ।
दुप्पडिलेहियदूसे एयं बीयं भवे पणगं ॥
पल्हवि हत्थुत्थरणं तु कोयवो रूयपूरिओ पडओ ।
दढगालि धोयपोत्ती सेस पसिद्धा भवे भेया ॥
तणपणगं पुण भणियं जिणेहिं कम्मट्ठगंठिमहणेहिं ।
साली वीही कोद्दव रालग रन्ने तणाइं च ॥ चर्म्मपञ्चकमिदम्–
अय एल गावि महिसी मिगाण अजिणं तु पंचमं होइ ।
तलिया खल्लगवज्झो कोसग कत्ती य बीयं तु ॥ [ ] इति ।

चियाए त्ति त्यागो मनःप्रभृतीनां प्रतीत एव, अथवा मनःप्रभृतिभिरशनादेः साधुभ्यो दानं त्यागः, एवमुपकरणेन पात्रादिना भक्तादेस्तस्य वा त्याग **उपकरणत्यागः**, न विद्यते किञ्चन द्रव्यजातमस्येत्यकिञ्चनस्तद्भावो **अकिञ्चनता**, निष्परिग्रहतेत्यर्थः, सा च मनःप्रभृतिभिरुपकरणापेक्षया च भवतीति तथोक्तेति ॥

॥ चतुःस्थानके द्वितीयोद्देशकः समाप्तः ॥

[अथ तृतीय उद्देशकः]

[सू० ३११] [१] चत्तारि रातीओ पन्नत्ताओ, तंजहा-पव्वयराती, पुढविराती, वालुयराती, उदगराती । एवामेव चउव्विहे कोहे पन्नत्ते, तंजहा-पव्वतरातिसमाणे पुढविरातिसमाणे, वालुयरातिसमाणे, उदगरातिसमाणे । पव्वतरातिसमाणं कोहं अणुपविट्ठे जीवे कालं करेति णेरतितेसु उववज्जति, पुढविरातिसमाणं कोहमणुपविट्ठे तिरिक्खजोणितेसु उववज्जति, वालुयराति-समाणं कोहं अणुपविट्ठे समाणे मणुस्सेसु उववज्जति, उदगरातिसमाणं कोहमणुपविट्ठे समाणे देवेसु उववज्जति १।

[२] चत्तारि उदगा पन्नत्ता, तंजहा-कद्दमोदए, खंजणोदए, वालुओदए, सेलोदए। एवामेव चउव्विहे भावे पन्नत्ते, तंजहा-कद्दमोदगसमाणे, खंजणोदगसमाणे, वालुओदगसमामे, सेलोदगसमाणे । कद्दमोदगसमाणं भावमणुपविट्ठे जीवे कालं करेति णेरतितेसु उववज्जति, एवं जाव सेलोदगसमाणं भावमणुपविट्ठे जीवे कालं करेति देवेसु उववज्जति ।

[टी०] व्याख्यातो द्वितीयोद्देशकः, अथ तृतीय आरभ्यते, अस्य चायं पूर्वेण सहाभिसम्बन्धः, पूर्वत्र जीवक्षेत्रपर्याया उक्ताः, इह तु जीवपर्याया उच्यन्ते, इत्येवं-सम्बन्धस्यास्येदमादिसूत्रद्वयं **चत्तारी**त्यादि, अस्य चायमभिसम्बन्धः-पूर्वं चारित्रमुक्तं तत्प्रतिबन्धकश्च क्रोधादिभाव इति क्रोधस्वरूपप्ररूपणायेदमुच्यते, तदेवंसम्बन्धस्यास्य व्याख्या– **राजी** रेखा, शेषं क्रोधव्याख्यानं मायादिवत्, मायादिप्रकरणाच्चान्यत्र क्रोधविचारो विचित्रत्वात् सूत्रगतेरिति, द्वितीयं सुगममेव ।

अयं च क्रोधो भावविशेष एवेति भावप्ररूपणाय दृष्टान्तादिसूत्रद्वयमाह– **चत्तारी**त्यादि प्रसिद्धम्, किन्तु **कर्दमो** यत्र प्रविष्टः पादादिर्नाक्रष्टुं शक्यते कष्टेन वा शक्यते, **खञ्जनं** दीपादिखञ्जनतुल्यः पादादिलेपकारी कर्दमविशेष एव, **वालुका** प्रतीता सा तु लग्नापि जलशोषे पादादेरल्पेनैव प्रयत्नेनापैतीत्यल्पलेपकारिणी, **शैला**स्तु पाषाणाः श्लक्ष्णरूपास्ते पादादेः स्पर्शनेनैव किञ्चिद् दुःखमुत्पादयन्ति, न तु तथाविधं लेपमुपजनयन्ति, कर्दमादिप्रधानान्युदकानि **कर्दमोदकादी**न्युच्यन्ते । **भावो** जीवस्य रागादिपरिणामः

तस्य कर्द्दमोदकादिसाम्यं तत्स्वरूपानुसारेण कर्म्मलेपमङ्गीकृत्य मन्तव्यमिति ।

[सू० ३१२] चत्तारि पक्खी पन्नत्ता, तंजहा-रुतसंपन्ने नाममेगे णो रूवसंपन्ने, रूवसंपन्ने नाममेगे नो रुतसंपन्ने, एगे रुतसंपन्ने वि रूवसंपन्ने वि, एगो नो रुतसंपन्ने णो रूवसंपन्ने । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-रुतसंपन्ने नाममेगे णो रूवसंपन्ने ट्क [= ४] ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-पत्तियं करेमीतेगे पत्तियं करेइ, पत्तियं करेमीतेगे अप्पत्तितं करेति, अप्पत्तियं करेमीतेगे पत्तितं करेति, अप्पत्तियं करेमीतेगे अप्पत्तितं करेति ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अप्पणो णाममेगे पत्तितं करेति णो परस्स, परस्स नाममेगे पत्तियं करेति णो अप्पणो ह्व [= ४] ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-पत्तितं पवेसामीतेगे पत्तितं पवेसेति, पत्तियं पवेसामीतेगे अप्पत्तितं पवेसेति ट्क [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अप्पणो नाममेगे पत्तितं पवेसेति णो परस्स, परस्स ह्व [= ४] ।

[सू० ३१३] चत्तारि रुक्खा पन्नत्ता, तंजहा-पत्तोवए, पुप्फोवए, फलोवए, छायोवए । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-पत्तोवारुक्खसामाणे, पुप्फोवारुक्खसामाणे, फलोवारुक्खसामाणे, छातोवारुक्खसामाणे ।

[सू० ३१४] भारं णं वहमाणस्स चत्तारि आसासा पन्नत्ता, तंजहा-जत्थ णं अंसातो अंसं साहरति तत्थ वि य से एगे आसासे पण्णत्ते १, जत्थ वि य णं उच्चारं वा पासवणं वा परिट्ठवेति तत्थ वि य से एगे आसासे पण्णत्ते २, जत्थ वि य णं णागकुमारावासंसि वा सुवन्नकुमारावासंसि वा वासं उवेति तत्थ वि य से एगे आसासे पण्णत्ते ३, जत्थ वि य णं आवकधाते चिट्ठति तत्थ वि य से एगे आसासे पण्णत्ते ४ । एवामेव समणोवासगस्स चत्तारि आसासा पन्नत्ता, तंजहा-जत्थ णं सीलव्वत-गुणव्वत-वेरमण-पच्चक्खाण-पोसहोववासाइं पडिवज्जति तत्थ वि अ से

एगे आसासे पण्णत्ते १, जत्थ वि य णं सामातितं देसावगासितमणुपालेति तत्थ वि य से एगे आसासे पन्नत्ते २, जत्थ वि य णं चाउद्दसट्ठमुद्दिट्ठ-पुन्नमासिणीसु पडिपुन्नं पोसहं सम्मं अणुपालेति तत्थ वि य से एगे आसासे पण्णत्ते ३, जत्थ वि य णं अपच्छिममारणंतितसंलेहणाझूसणाझूसिते भत्तपाणपडितातिक्खिते पाओवगते कालमणवकंखमाणे विहरति तत्थ वि य से एगे आसासे पन्नत्ते ४ ।

[सू० ३१५] चत्तारि पुरिसजाता पन्नत्ता, तंजहा-उदितोदिते णाममेगे, उदितत्थमिते णाममेगे, अत्थमितोदिते णाममेगे, अत्थमियत्थमिते णाममेगे। भरहे राया चाउरंतचक्कवट्टी णं उदितोदिते, बंभदत्ते णं राया चाउरंतचक्कवट्टी उदितत्थमिते, हरितेसबले णमणगारे णमत्थमिओदिते, काले णं सोयरिए अत्थमितत्थमिते ।

[टी०] अनन्तरं भाव उक्तोऽधुना तद्वतः पुरुषान् सदृष्टान्तान् **चत्तारि पक्खी**त्यादिना **अत्थमियत्थमिये**त्येतदन्तेन ग्रन्थेनाह, व्यक्तश्चायम्, नवरं रुतं रूपं च सर्वेषामेव पक्षिणामस्त्यतस्ते विशिष्टे एवेह ग्राह्ये, ततो **रुतं** मनोज्ञशब्दस्तेन **सम्पन्नः** एकः पक्षी, न च **रूपेण** मनोज्ञेनैव कोकिलवत् । **रूपसम्पन्नो न रुतसम्पन्नः**, प्राकृतशुकवत्, उभयसम्पन्नो मयूरवत्, अनुभयस्वभावः काकवदिति । पुरुषोऽत्र यथायोगं मनोज्ञशब्दः प्रशस्तरूपश्च प्रियवादित्व-सद्वेषत्वाभ्यां साधुर्वा सिद्धसिद्धान्तप्रसिद्धशुद्धधर्म्म-देशनादिस्वाध्यायप्रबन्धवान् लोचविरलवालोत्तमाङ्गता-तपस्तनुतनुत्व-मलमलिनदेहता-ऽल्पोपकरणतादिलक्षणसुविहितसाधुरूपधारी वा योज्य इति ।

पत्तियं ति प्रीतिरेव **प्रीतिकं** स्वार्थे कः, तत् **करोमि, प्रत्ययं** वा **करोमीति** परिणतः **प्रीतिकमेव प्रत्ययमेव** वा **करोति**, स्थिरपरिणामत्वात् उचितप्रतिपत्तिनिपुणत्वात् सौभाग्यवत्त्वाद्वेति, अन्यस्तु प्रीतिकरणे परिणतोऽप्रीतिं करोति उक्तवैपरीत्यादिति, अपरोऽप्रीतौ परिणतः प्रीतिमेव करोति, सञ्जातपूर्वभावनिवृत्तित्वात्, परस्य वा अप्रीतिहेतुतोऽपि प्रीत्युत्पत्तिस्वभावत्वादिति, चतुर्थः सुज्ञानः ।

आत्मन एकः कश्चित् **प्रीतिकम्** आनन्दं भोजनाच्छादनादिभिः **करोति** उत्पादयति

आत्मार्थप्रधानत्वान्न **परस्य**, अन्यः परस्य परार्थप्रधानत्वान्नात्मनः, अपर उभयस्याप्युभयार्थप्रधानत्वाद्, इतरो नोभयस्याप्युभयार्थशून्यत्वादिति । आत्मनः प्रत्ययं प्रतीतिं करोति न परस्येत्याद्यपि व्याख्येयमिति ।

पत्तियं पवेसेमि त्ति प्रीतिकं प्रत्ययं वाऽयं करोतीत्येवं परस्य चित्ते विनिवेशयामीति परिणतस्तथैवैकः प्रवेशयतीत्येक इति, सूत्रशेषोऽनन्तरसूत्रं च पूर्ववत्।

पत्राणि पर्णान्युपगच्छतीति **पत्रोपगो** बहलपत्र इत्यर्थः, एवं शेषा अपि, पत्रोपगादिवृक्षसमानता तु पुरुषाणां लोकोत्तराणां लौकिकानां चार्थिषु तथाविधोपकाराकरणेन स्वस्वभावलाभ एव पर्यवसितत्वात् १, सूत्रदानादिना उपकारकत्वात् २, अर्थदानादिना महोपकारकत्वात् ३, अनुवर्त्तना-ऽपायसंरक्षणादिना सततोपसेव्यत्वाच्च ४ क्रमेण द्रष्टव्येति ।

भारं धान्यमुक्तोल्यादिकं **वहमानस्य** देशाद्देशान्तरं नयतः पुरुषस्य **आश्वासा** विश्रामाः, भेदश्च तेषामवसरभेदेनेति, **यत्रा**वसरे **अंसा**द् एकस्मात् स्कन्धा**दंस**मिति स्कन्धान्तरं **संहरति** नयति भारमिति प्रक्रमः **तत्रा**वसरे, **अपिचे**ति उत्तराश्वासापेक्षया समुच्चये, **से** तस्य वोढुरिति १, **परिष्ठापय**ति व्युत्सृजति २, **नागकुमारावासा**दिकमुपलक्षणम्, अतोऽन्यत्र वाऽऽयतने **वासमुपैती**ति रात्रौ वसति ३, **यावती** यत्परिमाणा **कथा** मनुष्योऽयं देवदत्तादिर्वाऽयमिति व्यपदेशलक्षणा **यावत्कथा**, तया, यावज्जीवमित्यर्थः, **तिष्ठति** वसति इत्ययं दृष्टान्तः ४ । **एवमेवे**त्यादि दार्ष्टान्तिकः, **श्रमणान्** साधूनुपास्ते इति **श्रमणोपासकः** श्रावकस्तस्य सावद्यव्यापारभाराक्रान्तस्य **आश्वासाः** तद्विमोचनेन विश्रामाः चित्तस्याश्वासनानि स्वास्थ्यानि 'इदं मे परलोकभीतस्य त्राणम्' इत्येवंरूपाणीति, स हि जिनागमसङ्गमावदातबुद्धितया आरम्भ-परिग्रहौ दुःखपरम्पराकारिसंसारकान्तारकारणभूततया परित्याज्यावित्याकलयन् करणभटवशतया तयोः प्रवर्त्तमानो महान्तं खेदसन्तापं भयं चोद्वहति।

यत्रावसरे **शीलानि** समाधानविशेषाः ब्रह्मचर्यविशेषा वा, **व्रतानि** स्थूलप्राणातिपातविरमणादीनि, अन्यत्र तु **शीलानि** अणुव्रतानि **व्रतानि** सप्त शिक्षाव्रतानि, तदिह न व्याख्यातम्, गुणव्रतादीनां साक्षादेवोपादानादिति, **गुणव्रते** दिग्व्रतोपभोग-

परिभोगव्रतलक्षणे, **विरमणानि** अनर्थदण्डविरतिप्रकारा रागादिविरतयो वा, **प्रत्याख्यानानि** नमस्कारसहितादीनि, **पोषधः** पर्वदिनमष्टम्यादि, तत्रो**पवसनम्** अभक्तार्थः **पोषधोपवासः**, एतेषां द्वन्द्वस्तान् **प्रतिपद्यते** अभ्युपगच्छति **तत्रापि च से** तस्यैक **आश्वासः प्रज्ञप्तः** १, **यत्रापि च सामायिकं** सावद्ययोगपरिवर्जन-निरवद्ययोगप्रतिसेवनलक्षणं यद्व्यवस्थितः श्राद्धः श्रमणभूतो भवति, तथा **देशे** दिग्व्रतगृहीतस्य दिक्परिमाणस्य विभागे **अवकाशः** अवस्थानमवतारो विषयो यस्य तद्देशावकाशम्, तदेव **देशावकाशिकं** दिग्व्रतगृहीतस्य दिक्परिमाणस्य प्रतिदिनं सङ्क्षेपकरणलक्षणं सर्वव्रतसङ्क्षेपकरणलक्षणं वा **अनुपालयति** प्रतिपत्त्य-नन्तरमखण्डमासेवत इति, **तत्रापि च तस्यैक आश्वासः प्रज्ञप्त** इति २, **उद्दिष्टेत्य-**मावास्या, **परिपूर्ण**मिति अहोरात्रं यावत् आहार-शरीरसत्कारत्याग-ब्रह्मचर्या-ऽव्यापारलक्षणभेदोपेतमिति ३, **यत्रापि च** पश्चिमैवामङ्गलपरिहारार्थमपश्चिमा सा चासौ मरणमेवान्तो मरणान्तस्तत्र भवा **मारणान्तिकी** सा चेत्यपश्चिममारणान्तिकी सा चासौ संलिख्यतेऽनया शरीर-कषायादीति **संलेखना** तपोविशेषः सा चेति **अपश्चिम-मारणान्तिकसंलेखना**, तस्याः **झूसण** त्ति जोषणा सेवनालक्षणो यो धर्म्मस्तया **झूसिय** त्ति जुष्टः सेवितः, अथवा क्षपितः क्षपितदेहो यः स तथा, तथा भक्त-पाने प्रत्याख्याते येन स तथा, पादपवत् उपगतो निश्चेष्टतया स्थितः **पादपोपगतः**, अनशनविशेषं प्रतिपन्न इत्यर्थः, **कालं** मरणकालम् **अनवकाङ्क्षन्** तत्रानुत्सुक इत्यर्थः, **विहरति** तिष्ठति ।

उदितश्चासौ उन्नतकुल-बल-समृद्धि-निरवद्यकर्म्मभिरभ्युदयवान् **उदित**श्च परमसुखसंदोहोदयेने**त्युदितोदितो** यथा **भरतः**, उदितोदितत्वं चास्य प्रसिद्धम् १, तथा **उदित**श्चासौ तथैव **अस्तमित**श्च भास्कर इव सर्वसमृद्धिभ्रष्टत्वात् दुर्गति-गतत्वाच्चे**त्युदितास्तमितो ब्रह्मदत्तचक्रवर्त्ती**व, स हि पूर्व्व**मुदित** उन्नतकुलोत्पन्न-त्वादिना स्वभुजोपार्जितसाम्राज्यत्वेन च पश्चाद**स्तमितः** अतथाविधकारण-कुपित-ब्राह्मणप्रयुक्तपशुपालधनुर्गोलिकाप्रक्षेपणोपायप्रस्फोटिताक्षिगोलकतया मरणानन्तरा-प्रतिष्ठानमहानरकमहावेदनाप्राप्ततया चेति २, तथा **अस्तमित**श्चासौ हीनकुलोत्पत्ति-

दुर्भगत्व-दुर्गतत्वादिना **उदितश्च** समृद्धि-कीर्त्ति-सुगतिलाभादिनेति **अस्तमितोदितो** यथा **हरिकेशबला**भिधानोऽनगारः, स हि जन्मान्तरोपात्त-नीचैर्गोत्रकर्म्मवशावाप्त-**हरिकेशा**भिधानचाण्डालकुलतया दुर्भगतया दरिद्रतया च पूर्वमस्तमितादित्य इवानभ्युदयवत्त्वादस्तमित इति, पश्चात्तु प्रतिपन्नप्रव्रज्यो निष्प्रकम्पचरणगुणावर्जितदेवकृतसान्निध्यतया प्राप्तप्रसिद्धितया सुगतिगततया च उदित इति ३, तथा **अस्तमित**श्चासौ सूर्य इव दुष्कुलतया दुष्कर्म्मकारितया च कीर्त्ति-समृद्धिलक्षणतेजोवर्जितत्वा**दस्तमित**श्च दुर्गतिगमनादित्य**स्तमितास्तमितः**, यथा **काला**भिधानः सौकरिकः, स हि सूकरैश्चरति मृगयां करोतीति यथार्थः सौकरिक एव दुष्कुलोत्पन्नः प्रतिदिनं महिषपञ्चशतीव्यापादक इति पूर्वमस्तमितः पश्चादपि मृत्वा सप्तमनरकपृथिवीं गत इति अस्तमित एवेति ४। **भरहे**त्यादि तु उदाहरणसूत्रं भावितार्थ-मेवेति ।

[सू० ३१६] चत्तारि जुम्मा पन्नत्ता, तंजहा-कडजुम्मे, तेयोए, दावरजुम्मे, कलिओए । नेरतिताणं चत्तारि जुम्मा पन्नत्ता, तंजहा-कडजुम्मे तेओए दावरजुम्मे, कलितोए । एवं असुरकुमाराणं जाव थणियकुमाराणं, एवं पुढविकाइयाणं आउ[काइयाणं] तेउ[काइयाणं] वाउ[काइयाणं] वणस्सति-[काइयाणं] बेंदिताणं तेंदियाणं चउरिंदियाणं पंचिंदियतिरिक्खजोणियाणं मणुस्साणं वाणमंतरजोइसियाणं वेमाणियाणं सव्वेसिं जधा नेरतिताणं ।

[टी०] य एवं विचित्रभावैश्चिन्त्यन्ते जीवाः सर्व एव चतुर्षु राशिष्ववतरन्तीति तान् दर्शयन्नाह– **चत्तारि जुम्मे**त्यादि, **जुम्म** त्ति राशिविशेषः, यो हि राशिश्चतुष्कापहारेण अपह्रियमाणश्चतुःपर्यवसितो भवति स **कृतयुग्म** इत्युच्यते, यस्तु त्रिपर्यवसितः स **त्र्योजः**, द्विपर्यवसितो **द्वापरयुग्मः**, एकपर्यवसितः **कल्योज** इति, इह गणितपरिभाषायां समराशिर्युग्ममुच्यते विषमस्तु ओज इति, इयं च समयस्थितिः, लोके तु कृतयुगादीनि एवमुच्यन्ते–

द्वात्रिंशत् सहस्राणि कलौ लक्षचतुष्टयम् ।
वर्षाणां द्वापरादौ स्यादेतद् द्वित्रिचतुर्गुणम् ॥ [ ] इति ।

उक्तराशीन्नारकादिषु निरूपयन्नाह– **नेरइए**त्यादि सुगमम्, नवरं नारकादयश्चतुर्द्धाऽपि

स्युः, जन्म-मरणाभ्यां हीनाधिकत्वसंभवादिति ।

[सू०३१७] चत्तारि सूरा पन्नत्ता, तंजहा-खंतिसूरे, तवसूरे, दाणसूरे, जुद्धसूरे। खंतिसूरा अरहंता, तवसूरा अणगारा, दाणसूरे वेसमणे, जुद्धसूरे वासुदेवे।

[टी०] पुनर्जीवानेव भावैर्निरूपयन्नाह– **चत्तारि सूरे**त्यादि सूत्रद्वयं कण्ठ्यम्, किन्तु **शूरा** वीराः, **क्षान्तिशूरा अर्हन्तो महावीर**वत्, **तपःशूरा अनगाराः दृढप्रहारि**वत्, **दानशूरो वैश्रमण** उत्तराशालोकपालस्तीर्थकरादिजन्म-पारणकादिरत्नवृष्टिपातनादिनेति, उक्तं च–

वेसमणवयणसंचोइया उ ते तिरियजंभगा देवा ।
कोडिग्गसो हिरन्नं रयणाणि य तत्थ उवणेंति ॥ [आव० नि० भा० ६८] त्ति ।

युद्धशूरो वासुदेवः कृष्णवत्, तस्य षष्ठ्यधिकेषु त्रिषु सङ्ग्रामशतेषु लब्ध-जयत्वादिति ।

[सू० ३१८] चत्तारि पुरिसजाया पन्नत्ता, तंजहा-उच्चे णाममेगे उच्चछंदे, उच्चे णाममेगे णीतछंदे, णीते णाममेगे उच्चछंदे, णीते णाममेगे णीतछंदे।

[टी०] **उच्च**ः पुरुषः शरीर-कुल-विभवादिभिः, तथा **उच्चच्छन्द**ः उन्नताभिप्रायः औदार्यादियुक्तत्वात्, **नीचच्छन्द**स्तु विपरीतः, **नीचो**ऽप्युच्चविपर्ययादिति ।

[सू० ३१९] असुरकुमाराणं चत्तारि लेस्सातो पन्नत्ताओ, तंजहा-कण्हलेसा, णीललेसा, काउलेसा, तेउलेसा। एवं जाव थणियकुमाराणं, एवं पुढविकाइयाणं आउ[काइयाणं] वणस्सइकाइयाणं वाणमंतराणं सव्वेसिं जहा असुरकुमाराणं।

चत्तारि जाणा पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्ते, जुत्ते णाममेगे अजुत्ते, अजुत्ते णाममेगे जुत्ते, अजुत्ते णाममेगे अजुत्ते । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्ते, जुत्ते णाममेगे अजुत्ते ट्क [= ४] ।

चत्तारि जाणा पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्तपरिणते, जुत्ते णाममेगे अजुत्तपरिणते ट्क [= ४] । **एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-**

जुत्ते णाममेगे जुत्तपरिणते ट्क [= ४] ।

चत्तारि जाणा पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्तरूवे, जुत्ते णाममेगे अजुत्तरूवे ट्क [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्तरूवे ट्क [= ४] ।

चत्तारि जाणा पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्तसोभे ट्क [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्तसोभे ट्क [= ४] ।

चत्तारि जुग्गा पन्नत्ता, तंजहा-जुत्ते नाममेगे जुत्ते ट्क [= ४] । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्ते ट्क [=४] । एवं जधा जाणेण चत्तारि आलावगा तधा जुग्गेण वि, पडिवक्खो तहेव पुरिसजाता जाव सोभे त्ति ।

चत्तारि सारथी पन्नत्ता, तंजहा-जोयावइत्ता णामं एगे नो विजोयावइत्ता, विजोयावइत्ता नामं एगे नो जोयावइत्ता, एगे जोयावइत्ता वि विजोयावइत्ता वि, एगे नो जोयावइत्ता नो विजोयावइत्ता ।

चत्तारि हया पन्नत्ता, तंजहा-जुत्ते णामं एगे जुत्ते, जुत्ते णाममेगे अजुत्ते ट्क [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्ते ट्क [= ४] । एवं जुत्तपरिणते, जुत्तरूवे, जुत्तसोभे । सव्वेसिं पडिवक्खो पुरिसजाता ।

चत्तारि गया पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्ते ट्क [४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जुत्ते णाममेगे जुत्ते ट्क [= ४] । एवं जहा हयाणं तहा गयाणं वि भाणियव्वं, पडिवक्खो तहेव पुरिसजाता ।

चत्तारि जुग्गारिता पन्नत्ता, तंजहा- पंथजाती णाममेगे णो उप्पधजाती, उप्पधजाती णाममेगे णो पंथजाती, एगे पंथजाती वि उप्पहजाती वि, एगे णो पंथजाती णो उप्पहजाती ।

चत्तारि पुप्फा पन्नत्ता, तंजहा-रूवसंपन्ने नाममेगे णो गंधसंपन्ने, गंधसंपन्ने

णाममेगे नो रूवसंपन्ने, एगे रूवसंपन्ने वि गंधसंपन्ने वि, एगे णो रूवसंपन्ने णो गंधसंपन्ने । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-रूवसंपन्ने णाममेगे णो सीलसंपन्ने ट्क [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने नाममेगे नो कुलसंपन्ने ट्क [४], १ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने नामं एगे णो बलसंपन्ने, बलसंपन्ने नामं एगे णो जातिसंपन्ने ट्क [= ४], २ । एवं जातीते त रूवेण त चत्तारि आलावगा ३ । एवं जातीते त सुतेण त ट्क [= ४], ४ । एवं जातीते त सीलेण त ट्क [= ४], ५ । एवं जातीते त चरित्तेण त ट्क [= ४], ६ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-कुलसंपन्ने नामं एगे नो बलसंपन्ने ट्क [= ४], ७ । एवं कुलेण त रूवेण त ट्क [= ४], ८ । कुलेण त सुतेण त ट्क [= ४], ९ । कुलेण त सीलेण त ट्क [= ४], १० । कुलेण त चरित्तेण त ट्क [= ४], ११ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-बलसंपन्ने नाममेगे नो रूवसंपन्ने ट्क [= ४], १२ । एवं बलेण त सुतेण त ट्क [= ४], १३ । एवं बलेण त सीलेण त ट्क [= ४], १४ । एवं बलेण त चरित्तेण त ट्क [= ४], १५ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-रूवसंपन्ने नाममेगे नो सुयसंपन्ने ट्क [= ४], १६ । एवं रूवेण त सीलेण त ट्क [= ४], १७ । रूवेण त चरित्तेण त ट्क [= ४], १८ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सुयसंपन्ने नाममेगे णो सीलसंपन्ने ट्क [= ४], १९ । एवं सुतेण त चरित्तेण त ट्क [= ४], २० ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सीलसंपन्ने नाममेगे नो चरित्तसंपन्ने ट्क [= ४], २१ । एते एक्कवीसं भंगा भाणितव्वा ।

चत्तारि फला पन्नत्ता, तंजहा-आमलगमहुरे, मुद्दितामहुरे, खीरमहुरे, खंडमहुरे। एवामेव चत्तारि आयरिया पन्नत्ता, तंजहा-आमलगमहुरफलसमाणे जाव खंडमहुरफलसमाणे ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आतवेतावच्चकरे नाममेगे नो परवेतावच्चकरे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-करेति नाममेगे वेयावच्चं णो पडिच्छइ, पडिच्छइ नाममेगे वेयावच्चं नो करेति ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अट्ठकरे णाममेगे णो माणकरे, माणकरे णाममेगे णो अट्ठकरे, एगे अट्ठकरे वि माणकरे वि, एगे णो अट्ठकरे णो माणकरे ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गणट्ठकरे णाममेगे णो माणकरे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गणसंगहकरे णाममेगे णो माणकरे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गणसोभकरे णामं एगे णो माणकरे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गणसोहिकरे णाममेगे नो माणकरे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-रूवं नाममेगे जहति नो धम्मं, धम्मं नाममेगे जहति नो रूवं, एगे रूवं पि जहति धम्मं पि जहति, एगे नो रूवं जहति नो धम्मं ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-धम्मं नाममेगे जहति नो गणसंथितिं ह्व [= ४] ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-पियधम्मे नाममेगे नो दढधम्मे, दढधम्मे नाममेगे नो पियधम्मे, एगे पियधम्मे वि दढधम्मे वि, एगे नो

पियधम्मे नो दढधम्मे ।

[टी०] अनन्तरमुच्चेतराभिप्राय उक्तः, स च लेश्याविशेषाद् भवतीति लेश्यासूत्राणि सुगमानि च, नवरम् असुरादीनां चतस्रो लेश्या द्रव्याश्रयेण भावतस्तु षडपि सर्वदेवानाम्, मनुष्य-पञ्चेन्द्रियतिरश्चां तु द्रव्यतो भावतश्च षडपीति, पृथिव्यब्-वनस्पतीनां हि तेजोलेश्या भवति देवोत्पत्तेरिति तेषां चतस्र इति । उक्तलेश्याविशेषेण च विचित्रपरिणामा मानवाः स्युरिति यानादिदृष्टान्तचतुर्भङ्गिकाभिरन्यथा च पुरुषचतुर्भङ्गिका यानसूत्रादिना श्रावक-सूत्रावसानेन ग्रन्थेन दर्शयन्नाह– **चत्तारी**त्यादि, कण्ठ्यश्चायम्, नवरं **यानं** शकटादि, तद् **युक्तं** बलीवर्द्दादिभिः, पुनर्**युक्तं** सङ्गतं समग्रसामग्रीकं वा पूर्वापरकालापेक्षया वा इत्येकम्, अन्यत् **युक्तं** तथैवाऽ**युक्तं** तूक्तविपरीतत्वादिति, एवमितरौ, पुरुषस्तु **युक्तो** धनादिभिः, पुनर्**युक्त** उचितानुष्ठानैः सद्भिर्वा, पूर्वकाले वा युक्तो धन-धर्म्मानुष्ठानादिभिः पश्चादपि तथैवेति चतुर्भङ्गी, अथवा युक्तो द्रव्यलिङ्गेन भावलिङ्गेन चेति प्रथमः साधुः, द्रव्यलिङ्गेन नेतरेणेति द्वितीयो निह्नवादिः, न द्रव्यलिङ्गेन भावलिङ्गेन तु युक्त इति तृतीयः प्रत्येकबुद्धादिः, उभयवियुक्तश्चतुर्थो गृहस्थादिरिति, एवं सूत्रान्तराण्यपि । नवरं **युक्तं** गोभिः, **युक्तपरिणतं** तु अयुक्तं सत् सामग्र्या युक्ततया परिणतमिति, पुरुषः पूर्ववत्। **युक्तरूपं** सङ्गतस्वभावं प्रशस्तं वा युक्तं युक्तरूपमिति । पुरुषपक्षे **युक्तो** धनादिना ज्ञानादिगुणैर्वा **युक्तरूपः** उचितवेषः सुविहितनेपथ्यो वेति । तथा **युक्तं** तथैव, युक्तं शोभते युक्तस्य वा शोभा यस्य तद्**युक्तशोभ**मिति, पुरुषस्तु **युक्तो** गुणैस्तथा **युक्ता** उचिता **शोभा** यस्य स तथेति ।

युग्यं वाहनमश्वादि, अथवा **गोल्ल**विषये जम्पानं द्विहस्तप्रमाणं चतुरस्रं सवेदिक-मुपशोभितं युग्यकमुच्यते तद् **युक्त**मारोहणसामग्र्या पर्याणादिकया पुनर्**युक्तं** वेगादिभिरित्येवं यानवद् व्याख्येयम्, एतदेवाह– **एवं जहे**त्यादि, प्रतिपक्षो दार्ष्टान्तिकस्तथैव, कोऽसावित्याह– **पुरिसजाय** त्ति पुरुषजातानि, एवं परिणत-रूप-शोभसूत्रचतुर्भङ्गिकाः सप्रतिपक्षा वाच्याः, यावच्छोभसूत्रचतुर्भङ्गी यथा 'अजुत्ते नामं एगे अजुत्तसोभे', *एतदेवाह– **जाव सोभे** त्ति।*

सारथि सूत्रं, यथा **सारथिः** शाकटिकः, **योजयिता** शकटे गवादीनाम्, **न**

वियोजयिता मोक्ता, अन्यस्तु वियोजयिता न प्रयोजयितेति, एवं शेषावपि, नवरं चतुर्थः खेटयत्येवेति, अथवा योक्त्रयन्तं प्रयुङ्क्ते यः स योक्त्रापयिता, वियोक्त्रयतः प्रयोक्ता तु वियोक्त्रापयितेति, लोकोत्तरपुरुषविवक्षायां तु सारथिरिव सारथि**र्योजयिता** संयमयोगेषु साधूनां प्रवर्त्तयिता, वियोजयिता तु तेषामेवानुचितानां निवर्त्तयितेति, यानसूत्रवत् हय-गजसूत्राणीति ।

जुग्गारिय त्ति युग्यस्य **चर्या** वहनं गमनमित्यर्थः, क्वचित्तु **जुग्गायरिय** त्ति पाठः, तत्रापि युग्याचर्येति । **पथयायि** एकं युग्यं भवति **नोत्पथयायी**त्यादिश्चतुर्भङ्गी, इह च युग्यस्य चर्याद्वारेणैव निर्देशे चतुर्विधत्वेनोक्तत्वात् तच्चर्याया एवोद्देशोक्तं चातुर्विध्यमवसेयमिति। भावयुग्यपक्षे तु युग्यमिव **युग्यं** संयमयोगभरवोढा साधुरेव पथियाय्यप्रमत्तः, उत्पथयायी लिङ्गावशेषः, उभययायी प्रमत्तः, चतुर्थः सिद्धः, क्रमेण सदसदुभयानुभयानुष्ठानरूपत्वात्। अथवा पथ्युत्पथयोः स्वपरसमयरूपत्वाद् यायित्वस्य च गत्यर्थत्वेन बोधपर्यायत्वात् स्वसमय-परसमयबोधापेक्षयेयं चतुर्भङ्गी नेयेति ।

एकं पुष्पं **रूपसम्पन्नं न गन्धसम्पन्न**माकुलीपुष्पवत्, द्वितीयं बकुलस्येव, तृतीयं जातेरिव, चतुर्थं बदर्यादेरिवेति । पुरुषो **रूपसम्पन्नो** रूपवान् सुविहितरूपयुक्तो वेति जाति ६ कुल ५ बल ४ रूप ३ श्रुत २ शील १ चारित्रलक्षणेषु सप्तसु पदेषु एकविंशतौ द्विकसंयोगेषु एकविंशतिरेव चतुर्भङ्गिकाः कार्याः सुगमाश्चेति ।

आमलकमिव मधुरं यदन्यत् आमलकमेव वा मधुर**मामलकमधुरम्**, **मुद्दिय** त्ति मृद्वीका द्राक्षा तद्वत् सैव वा मधुरं **मृद्वीकामधुरम्**, क्षीरवत् खण्डवच्च मधुरमिति विग्रहः, यथैतानि क्रमेणेषद्-बहु-बहुतर-बहुतममाधुर्यवन्ति तथा ये आचार्या ईषद्-बहु-बहुतर-बहुतमोपशमादिगुणलक्षणमाधुर्यवन्तस्ते तत्समानतया व्यपदिश्यन्त इति ।

आत्मवैयावृत्यकरोऽलसो विसम्भोगिको वा, **परवैयावृत्यकरः** स्वार्थनिरपेक्षः, स्व-परवैयावृत्यकरः स्थविरकल्पिकः कोऽपि, उभयनिवृत्तोऽनशनविशेषप्रतिपन्नकादिरिति। करोत्येवैको वैयावृत्यं निःस्पृहत्वात् १, प्रतीच्छत्येवान्य आचार्यत्वग्लानत्वादिना २, अन्यः करोति प्रतीच्छति च स्थविरविशेषः ३, उभयनिवृत्तस्तु जिनकल्पिकादिरिति ४।

अट्ठकरे त्ति **अर्थान्** हिताहितप्राप्तिपरिहारादीन् राजादीनां दिग्यात्रादौ तथोपदेशतः करोतीत्**यर्थकरः** मन्त्री नैमित्तिको वा, स **चार्थकरो नामैको न मानकरः**, कथमहमनभ्यर्थितः कथयिष्यामीत्यवलेपवर्जितः, एवमितरे त्रयः, अत्र च **व्यवहारभाष्य**गाथा–

पुट्ठापुट्ठो पढमो [व्यवहारभा० ४५६८] इत्यादि ।

गण त्ति **गणस्य** साधुसमुदायस्याऽ**र्थान्** प्रयोजनादीनि करोतीति **गणार्थकरः** आहारादिभिरुपष्टम्भकः, **न** च **मानकरो**ऽभ्यर्थनानपेक्षत्वात्, एवं त्रयोऽन्ये, उक्तं च–

आहारउवहिसयणाइएहिं गच्छस्सुवग्गहं कुणइ ।

बीओ न जाइ माणं दोन्नि वि तइओ न उ चउत्थो ॥ [व्यवहारभा० ४५७०] इति । अथवा– **नो माणकरो** त्ति गच्छार्थकरोऽहमिति न माद्यतीति ।

अनन्तरं गणस्यार्थ उक्तः, स च सङ्ग्रहोऽत आह– **गणसंगहकरे** त्ति गणस्याहारादिना ज्ञानादिना च सङ्ग्रहं करोतीति **गणसङ्ग्रहकरः**, शेषं तथैव, [गणस्यानवद्यसाधु-सामाचारीप्रवर्त्तनेन वादि-धर्मकथि-नैमित्तिक-विद्यासिद्धत्वादिना वा शोभाकरणशीलो **गणशोभाकरः**, **नो मानकरो**ऽभ्यर्थनाऽनपेक्षितया मदाभावेन वा ।]

गणस्य यथायोगं प्रायश्चित्तदानादिना **शोधिं** शुद्धिं करोतीति **गणशोधिकरः**, अथवा शङ्किते भक्तादौ सति गृहिकुले गत्वाऽनभ्यर्थितो भक्तशुद्धिं करोति यः स प्रथमः, यस्तु मानान्न गच्छति स द्वितीयः, यस्त्वभ्यर्थितो गच्छति स तृतीयः, यस्तु नाभ्यर्थनापेक्षी नापि तत्र गन्ता स चतुर्थ इति ।

रूपं साधुनेपथ्यं **जहाति** त्यजति कारणवशात् **न धर्मं** चारित्रलक्षणं बोटिक-मध्यस्थितमुनिवत्, अन्यस्तु धर्म्मं न रूपं निह्नववत्, उभयमपि उत्प्रव्रजितवत्, नोभयं सुसाधुवत् ।

धर्म्मं त्यजत्येको जिनाज्ञारूपं न **गणसंस्थितिं** स्वगच्छकृतां मर्यादाम्, इह कैश्चिदाचार्यैः तीर्थकरानुपदेशेन संस्थितिः कृता यथा-नास्माभि**र्महाकल्पा**द्यतिशय-श्रुतमन्यगणसत्काय देयमिति, एवं च योऽन्यगणसत्काय न तद्ददाति स धर्म्मं त्यजति न गणस्थितिम्, जिनाज्ञाननुपालनात्, तीर्थकरोपदेशो ह्येवम्-सर्वेभ्यो योग्येभ्यः श्रुतं दातव्यमिति प्रथमः,

यस्तु ददाति स द्वितीयः, यस्त्वयोग्येभ्यः तद्ददाति स तृतीयः, यस्तु श्रुताव्यवच्छेदार्थं तदव्यवच्छेदसमर्थस्य परशिष्यस्य स्वकीयदिग्बन्धं कृत्वा श्रुतं ददाति तेन न धर्म्मो नापि गणसंस्थितिस्त्यक्तेति स चतुर्थ इति ।

प्रियो धर्म्मो यस्य तत्र प्रीतिभावेन सुखेन च प्रतिपत्तेः स प्रियधर्म्मा, **न च दृढो धर्म्मो यस्य**, आपद्यपि तत्परिणामाविचलनात्, अक्षोभत्वादित्यर्थः, स दृढधर्म्मेति ।

अन्यस्तु दृढधर्म्मा अङ्गीकृतापरित्यागात् न तु प्रियधर्म्मा कष्टेन धर्म्मप्रतिपत्तेः, इतरौ सुज्ञानौ ।

[सू० ३२०] चत्तारि आयरिया पन्नत्ता, तंजहा-पव्वावणायरिते नाममेगे णो उवट्ठावणायरिते, उवट्ठावणायरिते णाममेगे णो पव्वावणायरिते, एगे पव्वावणातरिते वि उवट्ठावणातरिते वि, एगे नो पव्वावणातरिते नो उवट्ठावणातरिते धम्मायरिए ।

चत्तारि आयरिया पन्नत्ता, तंजहा-उद्देसणायरिए णाममेगे णो वायणायरिए ४ धम्मायरिए ।

चत्तारि अंतेवासी पन्नत्ता, तंजहा-पव्वावणंतेवासी नामं एगे णो उवट्ठावणंतेवासी ४ धम्मंतेवासी ।

चत्तारि अंतेवासी पन्नत्ता, तंजहा-उद्देसणंतेवासी नामं एगे नो वायणंतेवासी ४ धम्मंतेवासी ।

[सू० ३२१] चत्तारि निग्गंथा पन्नत्ता, तंजहा-रायणिते समणे निग्गंथे महाकम्मे महाकिरिए अणायावी असमिते धम्मस्स अणाराधते भवति १, राइणिते समणे निग्गंथे अप्पकम्मे अप्पकिरिते आतावी समिते धम्मस्स आराहते भवति २, ओमरातिणिते समणे निग्गंथे महाकम्मे महाकिरिते अणातावी असमिते धम्मस्स अणाराहते भवति ३, ओमरातिणिते समणे निग्गंथे अप्पकम्मे अप्पकिरिते आतावी समिते धम्मस्स आराहते भवति ४।

चत्तारि णिग्गंथीओ पन्नत्ताओ, तंजहा-रातिणिया समणी निग्गंथी एवं चेव ४ ।

चत्तारि समणोवासगा पन्नत्ता, तंजहा-रायणिते समणोवासए महाकम्मे तहेव ४ ।

चत्तारि समणोवासियाओ पन्नत्ताओ, तंजहा-रायणिता समणोवासिता महाकम्मा तहेव चत्तारि गमा ।

[टी०] आचार्यसूत्रचतुर्थभङ्गे यो न प्रव्राजनया न चोत्थापनयाचार्यः स क इत्याह-**धर्म्माचार्य** इति, प्रतिबोधक इत्यर्थः, आह च–

धम्मो जेणुवइट्ठो सो धम्मगुरू गिही व समणो वा ।
को वि तिहिं संपउत्तो दोहि वि एक्केक्कगेणेव ॥ [ ] इति,

त्रिभिरिति प्रव्राजनोत्थापनाधर्म्माचार्यत्वैरिति ।

उद्देशनम् अङ्गादेः पठनेऽधिकारित्वकरणम्, तत्र तेन वाऽऽचार्यो गुरुः **उद्देशनाचार्यः**, उभयशून्यः को भवतीत्याह-**धर्म्माचार्य** इति ।

अन्ते गुरोः समीपे वस्तुं शीलमस्यान्**तेवासी** शिष्यः, **प्रव्राजनया** दीक्षया अन्तेवासी **प्रव्राजनान्तेवासी**, दीक्षित इत्यर्थः, **उत्थापनान्तेवासी** महाव्रतारोपणतः शिष्य इति, चतुर्थभङ्गकस्थः क इत्याह-**धर्म्मान्तेवासी** धर्म्मप्रतिबोधनतः शिष्यः, धम्मार्थितयोपसम्पन्नो वेत्यर्थः, यो नोद्देशनान्तेवासी न वाचनान्तेवासीति चतुर्थः, स क इत्याह-**धर्म्मान्तेवासी**ति ।

निर्गता बाह्याभ्यन्तरग्रन्था**न्निर्ग्रन्थाः** साधवः, रत्नानि भावतो ज्ञानादीनि, तैर्व्यहरतीति **रात्निकः**, पर्यायज्येष्ठ इत्यर्थः, **श्रमणो निर्ग्रन्थः** । **महान्ति** गुरूणि स्थित्यादिभिस्तथाविधप्रमादाद्यभिव्यङ्ग्यानि कर्म्माणि यस्य स **महाकर्म्मा**, महती क्रिया कायिक्यादिका कर्म्मबन्धहेतुर्यस्य स **महाक्रियः**, न आतापयति आतापनां शीतादिसहनरूपां करोतीत्य**नातापी** मन्दश्रद्धत्वादिति, अत एवाऽ**समितः** समितिभिः, स चैवंभूतो **धर्म्मस्यानाराधको भवती**त्येकः, अन्यस्तु पर्यायज्येष्ठ एवा**ल्पकर्म्मा** लघुकर्म्मा **अल्पक्रिय** इति द्वितीयः, अन्यस्तु **अवमो** लघुः पर्यायेण **रात्निको अवमरात्निकः** ।

एवं निर्ग्रन्थिका-श्रमणोपासक-श्रमणोपासिकासूत्राणि श्रमणसूत्रवत् ज्ञेयानि । **चत्तारि गम** त्ति त्रिष्वपि सूत्रेषु चत्वार आलापका भवन्तीति ।

[सू० ३२२] चत्तारि समणोवासगा पन्नत्ता, तंजहा-अम्मापितिसमाणे, भातिसमाणे, मित्तसमाणे, सवत्तिसमाणे ।

चत्तारि समणोवासगा पन्नत्ता, तंजहा-अद्दागसमाणे, पडागसमाणे, खाणुसमाणे, खरकंटयसमाणे ।

समणस्स णं भगवतो महावीरस्स समणोवासगाणं सोधम्मे कप्पे अरुणाभे विमाणे चत्तारि पलिओवमाइं ठिती पन्नत्ता ।

[टी०] अम्मा[पिइसमाणे] त्ति मातापितृसमानः, उपचारं विनापि साधुषु एकान्तेनैव वत्सलत्वात् । **भ्रातृसमानः** अल्पतरप्रेमत्वात् तत्त्वविचारादौ निष्ठुरवचनादप्रीतेः तथाविधप्रयोजने त्वत्यन्तवत्सलत्वाच्चेति । **मित्रसमानः** सोपचारवचनादिना विना प्रीतिक्षतेः, तत्क्षतौ चाऽऽपद्यप्युपेक्षकत्वादिति । **समानः** साधारणः **पति**रस्याः सपत्नी, यथा सा सपत्न्या ईर्ष्यावशादपराधान् वीक्षते एवं यः साधुषु दूषणदर्शनतत्परोऽनुपकारी च स **सपत्नीसमानो**ऽभिधीयत इति ।

अद्दाग त्ति आदर्शसमानो यो हि साधुभिः प्रज्ञाप्यमानानुत्सर्गापवादादीनागमिकान् भावान् यथावत् प्रतिपद्यते सन्निहितार्थानादर्शकवत् स **आदर्शसमानः** । यस्यानवस्थितो बोधो विचित्रदेशनावायुना सर्वतोऽपह्रियमाणत्वात् पताकेव स **पताकासमान** इति । यस्तु कुतोऽपि कदाग्रहान्न गीतार्थदेशनया चाल्यते सोऽनमनस्वभावबोधत्वेनाऽप्रज्ञापनीयः **स्थाणुसमान** इति । यस्तु प्रज्ञाप्यमानो न केवलं स्वाग्रहान्न चलति अपि तु प्रज्ञापकं दुर्वचनकण्टकैर्विध्यति स **खरकण्टकसमानः, खरा** निरन्तरा निष्ठुरा वा **कण्टाः** कण्टका यस्मिंस्तत् **खरकण्टं** बब्बूलादिडालं खरणमिति लोके यदुच्यते तच्च विलग्नं चीवरं न केवलमविनाशितं न मुञ्चत्यपि तु तद्विमोचकं पुरुषादिं हस्तादिषु कण्टकैः विध्यतीति ।

श्रमणोपासकाधिकारादिदमाह– **समणस्से**त्यादि कण्ठ्यम्, नवरं श्रमणोपासकाना-**मानन्दा**दीना**मुपासकदशा**भिहितानामिति ।

[सू० ३२३] चउहिं ठाणेहिं अहुणोववन्ने देवे देवलोगेसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, णो चेव णं संचातेति हव्वमागच्छित्तते, तंजहा-अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु मुच्छिते गिद्धे गढिते अज्झोववन्ने, से णं माणुस्सए कामभोगे णो आढाति णो परियाणाति णो अट्ठं बंधइ णो णिताणं पगरेति णो ठितिपगप्पं पगरेति १ । अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु मुच्छिते ४, तस्स णं माणुस्सते पेमे वोच्छिन्ने दिव्वे संकंते भवति २ । अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोगेसु मुच्छिते ४, तस्स णं एवं भवति-इयण्हिं गच्छं मुहुत्तेणं गच्छं, तेणं कालेणमप्पाउया मणुस्सा कालधम्मुणा संजुत्ता भवंति ३ । अहुणोववन्ने देवे देवलोगेसु दिव्वेसु कामभोगेसु मुच्छिते ४, तस्स णं माणुस्सए गंधे पडिकूले पडिलोमे तावि भवति, उड्ढं पि य णं माणुस्सए गंधे जाव चत्तारि पंच जोयणसताइं हव्वमागच्छति ४ । इच्चेतेहिं चउहिं ठाणेहिं अहुणोववन्ने देवे देवलोएसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, णो चेव णं संचातेति हव्वमागच्छित्तते ।

चउहिं ठाणेहिं अहुणोववन्ने देवे देवलोएसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तते, संचाएइ हव्वमागच्छित्तए, तंजहा-अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोगेसु अमुच्छिते जाव अणज्झोववन्ने, तस्स णं एवं भवति-अत्थि खलु मम माणुस्सए भवे आयरिते ति वा उवज्झाए ति वा पवित्ती ति वा थेरे ति वा गणी ति वा गणधरे ति वा गणावच्छेतिते ति वा जेसिं पभावेणं मए इमा एतारूवा दिव्वा देविड्ढी दिव्वा देवजुती लद्धा पत्ता अभिसमन्नागता, तं गच्छामि णं ते भगवंते वंदामि जाव पज्जुवासामि १। अहुणोववन्ने देवे देवलोएसु जाव अणज्झोववन्ने, तस्स णमेवं भवति-एस णं माणुस्सए भवे णाणी ति वा तवस्सी ति वा अतिदुक्करदुक्करकारते, तं गच्छामि णं ते भगवंते वंदामि जाव पज्जुवासामि २ । अहुणोववन्ने देवे देवलोएसु जाव अणज्झोववन्ने, तस्स णमेवं भवति-अत्थि णं मम माणुस्सए भवे माता ति

वा जाव सुण्हा ति वा, तं गच्छामि णं तेसिमंतितं पाउब्भवामि, पासंतु ता मे इममेतारूवं दिव्वं देविड्ढिं दिव्वं देवजुतिं लद्धं पत्तं अभिसमन्नागतं ३ । अहुणोववन्ने देवे देवलोगेसु जाव अणज्झोववन्ने, तस्स णमेवं भवति-अत्थि णं मम माणुस्सए भवे मित्ते ति वा सही ति वा सुही ति वा सहाए ति वा संगतिए ति वा, तेसिं च णं अम्हे अन्नमन्नस्स संगारे पडिसुते भवति 'जो मे पुव्विं चयति से संबोहेतव्वे' ४ । इच्चेतेहिं जाव संचातेति हव्वमागच्छित्तए ।

[टी०] देवाधिकारादेवेदमाह– **चउही**त्यादि, त्रिस्थानके तृतीयोद्देशके प्रायो व्याख्यातमेवेदं तथापि किञ्चिदुच्यते, **चउहिं ठाणेहिं नो संचाएइ** त्ति सम्बन्धः, तथा **देवलोकेषु** देवमध्ये इत्यर्थः, **हव्वं** शीघ्रं **संचाएइ** शक्नोति, **कामभोगे**षु मनोज्ञशब्दादिषु मूर्च्छित इव **मूर्च्छितो** मूढस्तत्स्वरूपस्यानित्यत्वादेर्विबोधाक्षमत्वात्, **गृद्धः** तदाकाङ्क्षावान् अतृप्त इत्यर्थः, ग्रथित इव **ग्रथित**स्तद्विषयस्नेहरज्जुभिः सन्दर्भित इत्यर्थः, **अध्युपपन्नः** अत्यन्तं तन्मना इत्यर्थः, **नाद्रियते** न तेष्वादरवान् भवति, **न परिजानाति** एतेऽपि वस्तुभूता इत्येवं न मन्यते, तथा तेष्विति गम्यते, **नो अर्थं बध्नाति** एतैरिदं प्रयोजनमिति निश्चयं करोति, तथा **नो** तेषु **निदानं प्रकरोति** एते मे भूयासुरित्येवमिति, तथा **नो** तेषु **स्थितिप्रकल्पम्** अवस्थानविकल्पनम् 'एतेष्वहं तिष्ठामि, एते वा मम तिष्ठन्तु स्थिरा भवन्तु'इवत्येवंरूपं **स्थित्या** वा मर्यादया **प्रकृष्टः कल्पः** आचारः **स्थितिप्रकल्प**स्तं **प्रकरो**ति कर्त्तुमारभते, **प्र**शब्दस्यादिकर्मार्थत्वादिति, एवं दिव्यविषयप्रसक्तिरेकं कारणम्। तथा यतोऽसावधुनोत्पन्नो देवः कामेषु मूर्च्छितादिविशेषणोऽतस्तस्य **मानुष्यक**मित्यादि इति दिव्यप्रेमसङ्क्रान्तिः द्वितीयम् । तथाऽसौ देवो यतो भोगेषु मूर्च्छितादिविशेषणो भवति ततस्तत्प्रतिबन्धात् **तस्स ण**मित्यादि इति देवकार्यायत्ततया मनुष्यकार्यानायत्तत्वं तृतीयम् । तथा दिव्यभोगमूर्च्छितादिविशेषणात्तस्य मनुष्याणामयं मानुष्यः स एव **मानुष्यको** गन्धः **प्रतिकूलो** दिव्यगन्धविपरीतवृत्तिः **प्रतिलोमश्चापि** इन्द्रिय-मनसोरनाह्लादकत्वात्, एकार्थौ वैतौ अत्यन्तामनोज्ञताप्रतिपादनायोक्ताविति, **याव**दिति परिमाणार्थः, **चत्तारि पंचे**ति विकल्पदर्शनार्थं कदाचित् भरतादिष्वेकान्तसुषमादौ चत्वार्येवान्यदा तु पञ्चापि, मनुष्य-पञ्चेन्द्रियतिरश्चां बहुत्वेनौदारिकशरीराणां तदवयव-

तन्मलानां च बहुत्वेन दुरभिगन्धप्राचुर्यादिति, **आगच्छति** मनुष्यक्षेत्रादाजिगमिषुं देवं प्रतीति, इदं च मनुष्यक्षेत्रस्याशुभस्वरूपत्वमेवोक्तम्, न च देवोऽन्यो वा नवभ्यो योजनेभ्यः परतः आगतं गन्धं जानातीति, अथवा अत एव वचनात् यदिन्द्रिय-विषयप्रमाणमुक्तं तदौदारिकशरीरेन्द्रियापेक्षयैव सम्भाव्यते, कथमन्यथा विमानेषु योजनलक्षादिप्रमाणेषु दूरस्थिता देवा घण्टाशब्दं शृणुयुर्यदि परं प्रतिशब्दद्वारेणान्यथा वेति नरभवाशुभत्वं चतुर्थमनागमनकारणमिति, शेषं निगमनम् ।

आगमनकारणानि प्रायः प्राग्वत् तथापि किञ्चिदुच्यते, कामभोगेष्वमूर्च्छितादिविशेषणो यो देवस्**तस्य एव**मिति एवंभूतं मनो भवति यदुत **अस्ति मे**, किन्तदित्याह- **आचार्य इति वा, इतिः** उपप्रदर्शने, **वा** विकल्पे, एवमुत्तरत्रापि, क्वचि**दितिश**ब्दो न दृश्यते तत्र तु सूत्रं सुगममेवेति, इह च **आचार्यः** प्रतिबोधक-प्रव्राजकादिरनुयोगाचार्यो वा, **उपाध्यायः** सूत्रदाता, इत्यादि पूर्ववत् । **इम** त्ति इयं प्रत्यक्षासन्ना, **एत**देव **रूपं** यस्या न कालान्तरादावपि रूपान्तरभाक् सा तथा, **दिव्या** स्वर्गसम्भवा प्रधाना वा, **देवर्द्धिः** विमानरत्नादिका, **द्युतिः** शरीरादिसम्भवा **युति**र्वा युक्तिरिष्टपरिवारादिसंयोगलक्षणा, **लब्धा** उपार्जिता जन्मान्तरे, **प्राप्ता** इदानीमुपनता, **अभिसमन्वागता** भोग्यावस्थां गता, **तं** ति तस्मा**त्तान् भगवतः** पूज्यान् **वन्दे** स्तुतिभिः, **नमस्यामि** प्रणामेन, **सत्करोमि** आदरकरणेन वस्त्रादिना वा, **सन्मानया**म्युचितप्रतिपत्त्या, **कल्याणं मङ्गलं दैवतं चैत्य**मिति बुद्ध्या **पर्युपासे** सेवे इत्येकम् । तथा **ज्ञानी** श्रुतज्ञानादिनेत्यादि द्वितीयम् । तथा 'भाया इ वा भज्जा इ वा भइणी इ वा पुत्ता इ वा धूया इ वे'ति **यावच्छब्दा**क्षेपः, **स्नुषा** पुत्रभार्या, **तं** तस्मा**त्तेषामन्तिकं** समीपं **प्रादुर्भवामि** प्रकटीभवामि, **ता** तावत्, **मे** मम, **इमे** इति पाठान्तरम्, इति तृतीयम् । तथा **मित्रं** पश्चात्स्नेहवत्, **सखा** बालवयस्यः, **सुहृत्** सज्जनो हितैषी, **सहायः** सहचरस्तदेक-कार्यप्रवृत्तो वा, सङ्गतं विद्यते यस्यासौ **सङ्गतिकः** परिचितस्**तेषाम्, अम्हे** त्ति अस्माभिः **अन्नमन्नस्स** त्ति अन्योन्यं **संगारे** त्ति सङ्केतः **प्रतिश्रुतः** अभ्युपगतो भवति स्मेति, **जे मे** त्ति योऽस्माकं **पूर्वं च्यवते** देवलोकात् स **सम्बोधयितव्य** इति चतुर्थम्, इदं च मनुष्यभवे कृतसङ्केतयोरेकस्य पूर्वलक्षादिजीविषु भवनपत्यादिषूत्पद्य च्युत्वा च

नरतयोत्पन्नस्याऽन्यः पूर्वलक्षादि जीवित्वा सौधर्म्मादिषूत्पद्य सम्बोधनार्थं यदेहागच्छति तदाऽवसेयमिति । **इत्येतै**रित्यादि निगमनमिति ।

[सू० ३२४] चउहिं ठाणेहिं लोगंधगारे सिया, तंजहा-अरहंतेहिं वोच्छिज्जमाणेहिं, अरहंतपन्नत्ते धम्मे वोच्छिज्जमाणे, पुव्वगते वोच्छिज्जमाणे, जायतेजे वोच्छिज्जमाणे ।

चउहिं ठाणेहिं लोउज्जोते सिता, तंजहा-अरहंतेहिं जायमाणेहिं, अरहंतेहिं पव्वयमाणेहिं, अरहंताणं णाणुप्पयमहिमासु, अरहंताणं परिनिव्वाणमहिमासु। एवं देवंधगारे देवुज्जोते देवसंनिवाते देवुक्कुलिता देवकहकहते ।

चउहिं ठाणेहिं देविंदा माणुसं लोगं हव्वमागच्छंति, एवं जधा तिट्ठाणे, जाव लोगंतिता देवा माणुसं लोगं हव्वमाच्छेज्जा, तंजहा-अरहंतेहिं जायमाणेहिं जाव अरहंताणं परिनिव्वाणमहिमासु ।

[टी०] अनन्तरं देवागम उक्तस्तत्र तत्कृतोद्द्योतो भवतीति तद्विपक्षमन्धकारं लोके आह– **चउही**त्यादि व्यक्तम्, नवरं लोके**ऽन्धकारं** तमिस्रं द्रव्यतो भावतश्च पदत्रये स्यात्, सम्भाव्यते ह्यर्हदादिव्यवच्छेदे द्रव्यतोऽन्धकारम्, उत्पातरूपत्वात् तस्य, छत्रभङ्गादौ रजउद्घातादिवदिति, वह्निव्यवच्छेदेऽन्धकारं द्रव्यत एव तथास्वभावात् दीपादेरभावाद्वा, भावतोऽपि वा, एकान्तदुःषमादावागमादेरभावादिति ।

पूर्वं देवागम उक्तः, अतो देवाधिकारवन्तमा दुःखशय्यासूत्रात् सूत्रप्रपञ्चमाह– **चउही**त्यादि, सुगमश्चायम्, नवरं लोकोद्द्योतश्चतुर्ष्वपि स्थानेषु देवागमात्, जन्मादित्रये तु स्वरूपेणापि, **एव**मिति यथा लोकान्धकारं तथा देवान्धकारमपि चतुर्भिः स्थानैः, देवस्थानेष्वपि ह्यर्हदादिव्यवच्छेदकाले वस्तुमाहात्म्यात् क्षणमन्धकारं भवतीति, एवं **देवोद्द्योतो**ऽर्हतां जन्मादिष्विति, **देवसन्निपातो** देवसमवायः, एवमेव **देवोत्कलिका** देवलहरिः, एवमेव **देवकहकहे** त्ति देवप्रमोदकलकलः । एवमेव **देवेन्द्रा मनुष्यलोकमागच्छेयुः** अर्हतां जन्मादिष्वेवेति **यथा त्रिस्थानके** प्रथमोद्देशके [सू. १४२] तथा देवेन्द्रागमनादीनि **लोकान्तिक**सूत्रावसानानि वाच्यानि, केवलमिह परिनिर्वाणमहिमास्विति चतुर्थमिति ।

[सू० ३२५] [१] चत्तारि दुहसेज्जाओ पन्नत्ताओ, तंजहा-

तत्थ खलु इमा पढमा दुहसेज्जा, तंजहा-से णं मुंडे भवित्ता अगारातो अणगारितं पव्वतिते निग्गंथे पावयणे संकिते कंखिते वितिगिंच्छिते भेयसमावन्ने कलुससमावन्ने निग्गंथं पावयणं णो सद्दहति णो पत्तियति णो रोएइ, निग्गंथं पावयणं असद्दहमाणे अपत्तितमाणे अरोएमाणे मणं उच्चावतं नियच्छति, विणिघातमावज्जति, पढमा दुहसेज्जा १ ।

अहावरा दोच्चा दुहसेज्जा - से णं मुंडे भवित्ता अगारातो जाव पव्वतिते सएणं लाभेणं णो तुस्सति, परस्स लाभमासाएति पीहेति पत्थेति अभिलसति, परस्स लाभमासाएमाणे जाव अभिलसमाणे मणं उच्चावयं नियच्छति, विणिघातमावज्जति, दोच्चा दुहसेज्जा २ ।

अहावरा तच्चा दुहसेज्जा - से णं मुंडे भवित्ता जाव पव्वइए दिव्व-माणुस्सए कामभोगे आसाएइ जाव अभिलसति, दिव्व-माणुस्सए कामभोगे आसाएमाणे जाव अभिलसमाणे मणं उच्चावयं नियच्छति, विणिघातमावज्जति, तच्चा दुहसेज्जा ३ ।

अहावरा चउत्था दुहसेज्जा- से णं मुंडे भवेत्ता जाव पव्वतिते, तस्स णमेवं भवति-जया णं अहमगारवासमावसामि तदा णमहं संवाहण-परिमद्दण-गातब्भंग-गातुच्छोलणाइं लभामि, जप्पभितिं च णं अहं मुंडे जाव पव्वतिते तप्पभितिं च णं अहं संवाधण जाव गातुच्छोलणाइं णो लभामि, से णं संवाधण जाव गातुच्छोलणाइं आसाएति जाव अभिलसति, से णं संवाधण जाव गातुच्छोलणाइं आसाएमाणे जाव मणं उच्चावतं नियच्छति विणिघायमावज्जति, चउत्था दुहसेज्जा ४ ।

[२] चत्तारि सुहसेज्जाओ पन्नत्ताओ, तंजहा-

तत्थ खलु इमा पढमा सुहसेज्जा - से णं मुंडे भवित्ता अगारातो अणगारितं पव्वतिए निग्गंथे पावयणे निस्संकिते णिक्कंखिते निव्वितिगिंच्छिए नो भेदसमावन्ने नो कलुससमावन्ने निग्गंथं पावयणं सद्दहति पत्तियति रोतेति,

निग्गंथं पावयणं सद्दहमाणे पत्तितमाणे रोतेमाणे नो मणं उच्चावतं नियच्छति, णो विणिघातमावज्जति, पढमा सुहसेज्जा १ ।

अहावरा दोच्चा सुहसेज्जा - से णं मुंडे जाव पव्वतिते सतेणं लाभेणं तुस्सति, परस्स लाभं णो आसाएति णो पीहेति णो पत्थेति णो अभिलसति, परस्स लाभमणासाएमाणे जाव अणभिलसमाणे नो मणं उच्चावतं णियच्छति, णो विणिघातमावज्जति, दोच्चा सुहसेज्जा २ ।

अहावरा तच्चा सुहसेज्जा-से णं मुंडे जाव पव्वतिते दिव्व-माणुस्सए कामभोगे णो आसाएति जाव नो अभिलसति, दिव्व-माणुस्सए कामभोगे अणासाएमाणे जाव अणभिलसमाणे नो मणं उच्चावतं नियच्छति, णो विणिघातमावज्जति, तच्चा सुहसेज्जा ३ ।

अहावरा चउत्था सुहसेज्जा- से णं मुंडे जाव पव्वतिते, तस्स णं एवं भवति, जइ ताव अरहंता भगवंतो हट्ठा अरोगा बलिया कल्लसरीरा अन्नयराइं उरालाइं कल्लाणाइं विउलाइं पयताइं पग्गहिताइं महाणुभागाइं कम्मक्खयकरणाइं तवोकम्माइं पडिवज्जंति, किमंग पुण अहं अब्भोवगमिओवक्कमियं वेदणं नो सम्मं सहामि खमामि तितिक्खेमि अहियासेमि, ममं च णं अब्भोवगमिओवक्कमियं सम्ममसहमाणस्स अक्खममाणस्स अतितिक्खेमाणस्स अणधियासेमाणस्स किं मन्ने कज्जति ?, एगंतसो मे पावे कम्मे कज्जति, ममं च णं अब्भोवगमिओ० जाव सम्मं सहमाणस्स जाव अधियासेमाणस्स किं मन्ने कज्जति ?, एगंतसो मे निज्जरा कज्जति, चउत्था सुहसेज्जा ४ ।

[टी०] पूर्वमर्हतां जन्मादिव्यतिकरेण देवागम उक्तः, अधुना अर्हतामेव प्रवचनार्थे दुःस्थितस्य साधोः दुःखशय्या इतरस्येतरा भवन्तीति सूत्रद्वयेनाह– **चत्तारी**त्यादि, **चतस्रः** चतुःसङ्ख्या दुःखदाः शय्या **दुःखशय्याः**, ताश्च द्रव्यतोऽतथाविधखट्वादिरूपाः भावतस्तु दुःस्थचित्ततया दुःश्रमणतास्वभावाः प्रवचनाश्रद्धान १ परलाभप्रार्थन २ कामाशंसन ३ स्नानादिप्रार्थन ४ विशेषिताः प्रज्ञप्ताः । **तत्रे**ति तासु मध्ये **से** इति स

कश्चित् गुरुकर्म्मा, **अथा**र्थो वा अयम्, स च वाक्योपक्षेपे, **प्रवचने** शासने, दीर्घत्वं च प्रकटादित्वादिति, **शङ्कितः** एकभावविषयसंशययुक्तः, **काङ्क्षितो** मतान्तरमपि साध्वितिबुद्धिः, **विचिकित्सितः** फलं प्रति शङ्कावान्, **भेदसमापन्नो** बुद्धेर्द्वैधीभावापन्न एवमिदं सर्वं जिनशासनोक्तमन्यथा वेति, **कलुषसमापन्नो** नैतदेवमिति विपर्यस्त इति, **न श्रद्धत्ते** सामान्येनैवमिदमिति, **नो प्रत्येति** प्रतिपद्यते प्रीतिद्वारेण, **नो रोचयति** अभिलाषातिरेकेणासेवनाभिमुखतयेति, **मनः** चित्त**मुच्चावचम्** असमञ्जसं **निगच्छति** याति, करोतीत्यर्थः, ततो **विनिर्घातं** [धर्म]भ्रंशं संसारं वा **आपद्यते**, एवमसौ श्रामण्यशय्यायां दुःखमास्त इत्येका । तथा **स्वकेन** स्वकीयेन लभ्यते लम्भनं वेति **लाभः** अन्नादिरन्नादेर्वा, तेन, आशां करोती**त्याशयति** स नूनं मे दास्यतीत्येवमिति **आस्वादयति** वा लभते चेत् तद् भुङ्क्त एव, **स्पृहयति** वाञ्छयति, **प्रार्थयति** याचते, **अभिलषति** लब्धेऽप्यधिकतरं वाञ्छतीत्यर्थः, शेषमुक्तार्थम्, एवमप्यसौ दुःखमास्त इति द्वितीया । तृतीया कण्ठ्या । **अगारवासो** गृहवासस्त**मावसामि** तत्र वर्त्ते, **सम्बाधनं** शरीरस्यास्थिसुखत्वादिना नैपुण्येन मर्द्दनविशेषः, **परिमर्द्दनं** तु पिष्टादेर्मलनमात्रम्, **गात्राभ्यङ्गः** तैलादिनाऽङ्गप्रक्षणम्, **गात्रोत्क्षालनम्** अङ्गधावनमेतानि लभे, न कश्चित् निषेधयतीति, शेषं कण्ठ्यमिति चतुर्थी।

दुःखशय्याविपरीताः सुखशय्याः प्रागिवावगम्याः, नवरं **हट्ठ** त्ति शोकाभावेन हृष्टा इव हृष्टाः, **अरोगा** ज्वरादिवर्जिताः, **बलिकाः** प्राणवन्तः, **कल्यशरीराः** पटुशरीराः, **अन्यतराणि** अनशनादीनां मध्ये एकतराणि **उदाराणि** आशंसादोषपरिहार-तयोदारचित्तयुक्तानि **कल्याणानि** मङ्गलस्वरूपत्वात् **विपुलानि** बहुदिनत्वात् **प्रयतानि** प्रकृष्टसंयमयुक्तत्वात् **प्रगृहीतानि** आदरप्रतिपन्नत्वात् **महानुभागानि** अचिन्त्यशक्ति-युक्तत्वात् ऋद्धिविशेषकारणत्वात्, **कर्मक्षयकरणानि** मोक्षसाधकत्वात्, **तपःकर्माणि** तपःक्रियाः **प्रतिपद्यन्ते** आश्रयन्ते, **किमंग पुण** त्ति **किं** प्रश्ने, **अङ्गे**त्यात्मामन्त्रणेऽलङ्कारे वा, **पुन**रिति पूर्वोक्तार्थवैलक्षण्यदर्शने, शिरोलोचब्रह्मचर्यादीनामभ्युपगमे भवा **आभ्युपगमिकी**, उपक्रम्यतेऽनेनायुरित्**युपक्रमो** ज्वराऽतीसारादिस्तत्र भवा या सौपक्रमिकी, सा चासौ सा चेति **आभ्युपगमिकौपक्रमिकी**, तां **वेदनां** दुःखं **सहामि**

तदुत्पत्तावविमुखतया, [अस्ति च सहिरवैमुख्यार्थे यथाऽसौ भटस्तं भटं सहते,] तस्मान्न भज्यत इति भावः, **क्षमे** आत्मनि परे वाऽविकोपतया, **तितिक्षामि** अदैन्यतया, **अध्यासयामि** सौष्ठवातिरेकेण तत्रैव वेदनायामवस्थानं करोमीत्यर्थः, एकार्था वैते शब्दाः, **किं मन्ने** त्ति मन्ये निपातो वितर्कार्थः, **क्रियते** भवतीत्यर्थः, **एगंतसो** त्ति एकान्तेन सर्वथेत्यर्थ इति ।

[सू० ३२६] चत्तारि अवातणिज्जा पन्नत्ता, तंजहा-अविणीते, वीईपडिबद्धे, अविओसवितपाहुडे, मायी १ ।

चत्तारि वातणिज्जा पन्नत्ता, तंजहा-विणीते, अवितीपडिबद्धे, वितोसवितपाहुडे, अमाती २ ।

[टी०] एते च दुःख-सुखशय्यावन्तो निर्गुणाः सगुणाश्च, अतस्तद्विशेषाणामेव वाचनीयावाचनीयत्वदर्शनाय सूत्रद्वयं कण्ठ्यम्, नवरं **वीइ** त्ति विकृतिः क्षीरादिका । **अव्यवशमितप्राभृत** इति **प्राभृतम्** अधिकरणकारी कोप इति ।

[सू० ३२७] चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आतंभरे नाममेगे नो परंभरे, परंभरे नाममेगे नो आतंभरे, एगे आतंभरे वि परंभरे वि, एगे नो आतंभरे नो परंभरे ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दुग्गए नाममेगे दुग्गए, दुग्गते नाममेगे सुग्गते, सुग्गते नाममेगे दुग्गते, सुग्गते नाममेगे सुग्गते ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दुग्गते नाममेगे दुव्वए, दुग्गते नाममेगे सुव्वते, सुग्गते नाममेगे दुव्वते, सुग्गते नाममेगे सुव्वते ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दुग्गते नाममेगे दुप्पडिताणंदे, दुग्गते नाममेगे सुप्पडिताणंदे ह्व [=४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दुग्गते नाममेगे दुग्गतिगामी, दुग्गते नाममेगे सुग्गतिगामी ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-दुग्गते नाममेगे दुग्गतिं गते, दुग्गते नाममेगे सुग्गतिं गते ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-तमे नाममेगे तमे, तमे नाममेगे जोती, जोती णाममेगे तमे, जोती णाममेगे जोती ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-तमे नाममेगे तमबले, तमे नाममेगे जोतीबले, जोती नाममेगे तमबले, जोती नाममेगे जोतीबले ।

चत्तारि पुरिसजाता, पन्नत्ता, तंजहा-तमे नाममेगे तमबलपलज्जणे, तमे नाममेगे जोतीबलपलज्जणे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-परिन्नातकम्मे णाममेगे नो परिन्नातसन्ने, परिन्नातसन्ने णाममेगे णो परिन्नातकम्मे, एगे परिन्नातकम्मे वि ह्व [= ४]।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-परिन्नातकम्मे णाममेगे नो परिन्नात-गिहावासे, परिन्नायगिहावासे णामं एगे णो परिन्नातकम्मे ह्व [= ४]।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-परिन्नातसन्ने णाममेगे नो परिन्नात-गिहावासे, परिन्नातगिहावासे णामं एगे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-इहत्थे णाममेगे नो परत्थे, परत्थे नाममेगे नो इहत्थे ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-एगेणं णाममेगे वड्ढति एगेणं हायति, एगेणं णाममेगे वड्ढइ दोहिं हायति, दोहिं णाममेगे वड्ढति एगेणं हातति, दोहिं नाममेगे वड्ढति दोहिं हायति ।

[टी०] अनन्तरं वाचनीयावाचनीया: पुरुषा उक्ता इति पुरुषाधिकारात् तद्विशेष-प्रतिपादनपरं चतुर्भङ्गिकाप्रतिबद्धं सूत्रप्रबन्धमाह- **चत्तारी**त्यादि । आत्मानं बिभर्त्ति पुष्णातीत्यात्मम्भरि:, प्राकृतत्वा**दायंभरे**, तथा परं बिभर्त्तीति परम्भरि:, प्राकृतत्वात् **परंभरे** इति, तत्र प्रथमभङ्गे स्वार्थकारक एव, स च जिनकल्पिकः । द्वितीय: परार्थकारक एव, स च भगवानर्हन्, तस्य विवक्षया सकलस्वार्थसमाप्ते: परप्रधानप्रयोजन-प्रापण-प्रवणप्राणितत्वात् । तृतीये स्व-परार्थकारी, स च स्थविरकल्पिक: विहितानुष्ठानत: स्वार्थकरत्वाद्विधिवत् सिद्धान्तदेशनातश्च परार्थसम्पादकत्वात् । चतुर्थे तूभयानुपकारी, स च मुग्धमति: कश्चिद् यथाच्छन्दो वेति । एवं लौकिकपुरुषोऽपि योजनीय: ।

उभयानुपकारी च दुर्गत एव स्यादिति दुर्गतसूत्रम्, **दुर्गतो** दरिद्रः, पूर्वं धनविहीनत्वात् ज्ञानादिरत्नविहीनत्वाद्वा पश्चादपि तथैव **दुर्गत** एवेति, अथवा दुर्गतो द्रव्यतः पुनर्दुर्गतो भावत इति प्रथमः, एवमन्ये त्रयः, नवरं सुगतो द्रव्यतो धनी भावतो ज्ञानादिगुणवानिति।

दुर्गतः कोऽपि व्रती स्यादिति दुर्व्रतसूत्रम्, **दुर्गतो** दरिद्रः, **दुर्व्रतः** असम्यग्व्रतोऽथवा **दुर्व्ययः** आयानपेक्षव्ययः कुस्थानव्ययो वेत्येकः, अन्यो दुर्गतः सन् **सुव्रतो** निरतिचारनियमः, **सुव्ययो** वौचित्यप्रवृत्तेरिति, इतरौ प्रतीतौ। **दुर्गत**स्तथैव, **दुष्प्रत्यानन्दः** उपकृतेन कृतमुपकारं यो नाभिमन्यते, यस्तु मन्यते तं स **सुप्रत्यानन्द** इति ।

दुर्गतो दरिद्रः सन् दुर्गतिं गमिष्यतीति **दुर्गतिगामी**त्येवमन्येऽपि, नवरं सुगतिं गमिष्यतीति **सुगतिगामी** । **सुगतः** ईश्वर इति । **दुर्गत**स्तथैव, **दुर्गतिं गतः** यात्राजनकुपिततन्मारणप्रवृत्त**द्रमक**वत्, एवमन्ये त्रयः ।

तम इव **तमः** पूर्वमज्ञानरूपत्वादप्रकाशत्वाद्वा पश्चादपि **तम** एवेत्येकः, अन्यस्तु **तमः** पूर्वम्, पश्चाज्ज्योतिरिव **ज्योति**रुपार्जितज्ञानत्वात् प्रसिद्धिप्राप्तत्वाद्वा, शेषौ सुज्ञानौ। **तमः** कुकर्मकारितया मलिनस्वभावः, **तमः** अज्ञानं **बलं** सामर्थ्यं यस्य, **तमः** अन्धकारं वा तदेव तत्र वा **बलं** यस्य स तथा, असदाचारवानज्ञानी रात्रिचरो वा चौरादिरित्येकः। तथा **तम**स्तथैव, **ज्योतिः** ज्ञानं **बलं** यस्य, आदित्यादिप्रकाशो वा **ज्योति**स्तदेव तत्र वा बलं यस्य स तथा, अयं चासदाचारो ज्ञानवान् दिनचारी वा चौरादिरिति द्वितीयः। **ज्योतिः** सत्कर्मकारितयोज्ज्वलस्वभावः, **तमोबल**स्तथैव, अयं च सदाचारवान् अज्ञानी कारणान्तराद्वा रात्रिचर इति तृतीयः । चतुर्थः सुज्ञानः, अयं च सदाचारवान् ज्ञानी दिनचरो वेति ।

तथा **तम**स्तथैव, **तमबलपलज्जणे** त्ति **तमो** मिथ्याज्ञानम् अन्धकारं वा तदेव बलं तत्र, अथवा **तमसि** उक्तरूपे **बले** च सामर्थ्ये **प्ररज्यते** रतिं करोतीति **तमोबलप्ररञ्जनः**, एवं **ज्योतिर्बलप्ररञ्जनो**ऽपि, नवरं **ज्योतिः** सम्यग्ज्ञानमादित्यादिप्रकाशो वेति, एवमितरावपि, इहापि त एव पूर्वसूत्रोक्ताः पुरुषविशेषाः प्ररञ्जनविशेषिताः द्रष्टव्याः । **परिण्णाय** त्ति **परिज्ञातानि** ज्ञपरिज्ञया स्वरूपतोऽवगतानि प्रत्याख्यानपरिज्ञया च परिहृतानि **कर्माणि** कृष्यादीनि येन **सोऽपरिज्ञातकर्मा, नो** न

च **परिज्ञाताः संज्ञा** आहारसंज्ञाद्या येन सोऽ**परिज्ञातसंज्ञः**, अभावितावस्थः प्रव्रजितः श्रावको वेत्येकः। **परिज्ञातसंज्ञः** सद्भावनाभावितत्वात्, **न परिज्ञातकर्म्मा** कृष्याद्यनिवृत्तेः श्रावक इति द्वितीयः। तृतीयः साधुश्चतुर्थोऽसंयत इति। **परिज्ञातकर्मा** सावद्यकरण-कारणा-ऽनुमतिनिवृत्तः कृष्यादिनिवृत्तो वा, **न परिज्ञातगृहावासो**ऽप्रव्रजित इत्येकः। अन्यस्तु **परिज्ञातगृहावासो** न त्यक्तारम्भो दुष्प्रव्रजित इति द्वितीयः। तृतीयः साधुश्चतुर्थोऽसंयतः।

त्यक्तसंज्ञो विशिष्टगुणस्थानकत्वादत्यक्तगृहावासो गृहस्थत्वादेकः १, अन्यस्तु परिहृतगृहावासो यतित्वादभावितत्वान्न परिहृतसंज्ञः २, अन्य उभयथा ३, अन्यो नोभयथेति।

इहैव जन्मन्**यर्थः** प्रयोजनं भोगसुखादि **आस्था** वा इदमेव साध्विति बुद्धिर्यस्य स इहार्थ इहास्थो वा भोगपुरुष इहलोकप्रतिबद्धो वा १, परत्रैव जन्मान्तरे अर्थ आस्था वा यस्य स परार्थः परास्थो वा साधुर्बालतपस्वी वा २, इह च परत्र च यस्यार्थ आस्था वा स सुश्रावक उभयप्रतिबद्धो वा ३, उभयप्रतिषेधवान् सौकरिकादिर्मूढो वेति ४। अथवा इहैव विवक्षिते ग्रामादौ तिष्ठतीति **इहस्थ**स्तत्प्रतिबन्धान्न परस्थः १, अन्यस्तु परत्र प्रतिबन्धात् परस्थः २, अन्यस्तूभयस्थः ३, अन्यः सर्वाप्रतिबद्धत्वाद-नुभयस्थः साधुरिति ४।

एकेनेति श्रुतेन **एकः** कश्चिद्वर्द्धते, **एकेने**ति सम्यग्दर्शनेन हीयते, यथोक्तम्–

जह जह बहुस्सुओ संमओ य सीसगणसंपरिवुडो य।
अविणिच्छिओ य समए तह तह सिद्धंतपडिणीओ॥ [सम्मति० ३।६६] इत्येकः।

तथा **एकेन** श्रुतेनैवान्यो **वर्द्धते, द्वाभ्यां** सम्यग्दर्शन-विनयाभ्यां **हीयते** इति द्वितीयः। **द्वाभ्यां** श्रुता-ऽनुष्ठानाभ्यामन्यो **वर्द्धते, एकेन** सम्यग्दर्शनेन **हीयते** इति तृतीयः। **द्वाभ्यां** श्रुता-ऽनुष्ठानाभ्यामन्यो **वर्द्धते, द्वाभ्यां** सम्यग्दर्शन-विनयाभ्यां **हीयत** इति चतुर्थः। अथवा ज्ञानेन वर्द्धते रागेण हीयते इत्येकः, अन्यो ज्ञानेन वर्द्धते राग-द्वेषाभ्यां हीयते इति द्वितीयः, अन्यो ज्ञान-संयमाभ्यां वर्द्धते रागेण हीयते इति तृतीयः, अन्यो ज्ञान-संयमाभ्यां वर्द्धते राग-द्वेषाभ्यां हीयत इति चतुर्थः।

[सू० ३२८] चत्तारि पकंथका पन्नत्ता, तंजहा-आइन्ने नाममेगे आइन्ने, आइन्ने नाममेगे खुलुंके, खुलुंके नाममेगे आइन्ने, खुलुंके नाममेगे खुलुंके। एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आइन्ने नाममेगे आइन्ने, चउभंगो।

चत्तारि पकंथगा पन्नत्ता, तंजहा-आतिन्ने नाममेगे आतिन्नत्ताते वहति, आतिन्ने नाममेगे खुलुंकत्ताते विहरति ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-आइन्ने नाममेगे आइन्नत्ताए वहति, चउभंगो ।

चत्तारि पकंथगा पन्नत्ता, तंजहा-जातिसंपन्ने नाममेगे णो कुलसंपन्ने ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने नाममेगे चउभंगो ।

चत्तारि कंथगा पन्नत्ता, तंजहा-जातिसंपन्ने नाममेगे णो बलसंपन्ने ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने नाममेगे णो बलसंपन्ने ह्व [= ४] ।

चत्तारि कंथगा पन्नत्ता, तंजहा-जातिसंपन्ने णाममेगे णो रूवसंपन्ने ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने नाममेगे णो रूवसंपन्ने ह्व [= ४] ।

चत्तारि कंथगा पन्नत्ता, तंजहा-जातिसंपन्ने णाममेगे णो जयसंपन्ने ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-जातिसंपन्ने ह्व [= ४] । एवं कुलसंपन्नेण त बलसंपन्नेण त ४, कुलसंपन्नेण त रूवसंपन्नेण त ह्व [= ४], कुलसंपन्नेण त जयसंपन्नेण त ह्व [= ४], एवं बलसंपन्नेण त रूवसंपन्नेण त ह्व [= ४], बलसंपन्नेण त जयसंपन्नेण त ह्व [= ४] । सव्वत्थ पुरिसजाता पडिवक्खो ।

चत्तारि कंथगा पन्नत्ता, तंजहा-रूवसंपन्ने णाममेगे णो जयसंपन्ने ४, एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-रूवसंपन्ने नाममेगे णो जयसंपन्ने ४ ।

[टी०] **प्रकन्थकाः**, पाठान्तरतः **कन्थका** वा अश्वविशेषाः । **आकीर्णो** व्याप्तो

जवादिगुणैः पूर्वं पश्चादपि तथैव, अन्यस्त्वाकीर्णः पूर्वं पश्चात् **खलुङ्को** गलिरविनीत इति, अन्यः पूर्वं **खलुङ्कः** पश्चादा**कीर्णो** गुणवानिति, चतुर्थः पूर्वं पश्चादपि **खलुङ्क** एवेति। **आकीर्णो** गुणवान् **आकीर्णतया** गुणवत्तया विनय-वेगादिभिरित्यर्थः, **वहति** प्रवर्त्तते, **विहरती**ति पाठान्तरम्, **आकीर्णो**ऽन्यः, आरोहदोषेण **खलुङ्कतया** गलितया **वहति**, अन्यस्तु **खलुङ्कः** आरोहकगुणात् **आकीर्णतया वहति**, चतुर्थः प्रतीतः, सूत्रद्वयेऽपि पुरुषा दार्ष्टान्तिका योज्याः, सूत्रे तु क्वचिन्नोक्ताः, विचित्रत्वात् सूत्रगतेरिति, जाति ४ कुल ३ बल २ रूप १ जयपदेषु दशभिर्द्विकसंयोगैर्दशैव प्रकन्थक-दृष्टान्त-चतुर्भङ्गीसूत्राणि, प्रत्येकं तान्येवानुसरन्ति दश दार्ष्टान्तिकपुरुषसूत्राणि भवन्तीति, नवरं **जयः** पराभिभव इति ।

[सू० ३२९] चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सीहत्ताते णाममेगे निक्खंते सीहत्ताते विहरइ, सीहत्ताते नाममेगे निक्खंते सियालत्ताए विहरइ, सियालत्ताए नाममेगे निक्खंते सीहत्ताए विहरइ, सियालत्ताए नाममेगे निक्खंते सियालत्ताए विहरइ ।

[टी०] **सिंहतया** ऊर्जवृत्त्या **निष्क्रान्तो** गृहवासात् तथैव च **विहरति** उद्यतविहारेणेति। **शृगालतया** दीनवृत्त्येति ।

[सू० ३३०] चत्तारि लोगे समा पन्नत्ता, तंजहा-अप्पतिट्ठाणे नरए, जंबूदीवे दीवे, पालते जाणविमाणे, सव्वट्ठसिद्धे महाविमाणे १ ।

चत्तारि लोगे समा सपक्खिं सपडिदिसिं पन्नत्ता, तंजहा-सीमंतए नरए, समयक्खेत्ते, उडुविमाणे, ईसीपब्भारा पुढवी २ ।

[टी०] पूर्वं पुरुषाणामश्वादिभिर्जात्यादिगुणेन समतोक्ता, अधुना अप्रतिष्ठानादीनां तामेव प्रमाणत आह– **चत्तारी**त्यादि सूत्रद्वयं सुगमम्, किन्तु **अप्रतिष्ठानो** नरकावासः सप्तम्यां नरकपृथिव्यां स च योजनलक्षम्। **पालकं** पालकदेवनिर्मितं सौधर्मेन्द्रसम्बन्धि यानञ्च तद्विमानञ्च **यानाय** वा गमनाय विमानं **यानविमानम्**, न तु शाश्वतमिति । **सर्वार्थसिद्धं** विमानं [पञ्चानामनुत्तरविमानानां मध्यममिति] ।

चत्वारो लोके समा भवन्ति, कथमित्याह– **सपक्खिं सपडिदिसिं** ति समानाः

पक्षाः पार्श्वा दिशो यस्मिन् तत् सपक्षम्, इहेकारः प्राकृतत्वेन, तथा समानाः **प्रतिदिशो** विदिशो यस्मिंस्तत् सप्रतिदिक्, तद् यथा भवत्येवं समा भवन्तीति, सदृशाः पक्षैरिति सपक्षमित्यव्ययीभावो वेति, पृथु-सङ्कीर्णयोर्हि द्रव्ययोरधउपरिविभागेन स्थितयोस्तुल्य-मानयोर्वा विषमताव्यवस्थितयोर्न समा दिशो विदिशश्च भवन्तीत्यत्यन्तसमताख्यापनार्थमिदं विशेषणद्वयमिति। **सीमन्तकः** प्रथमपृथिव्यां प्रथमप्रस्तटे पञ्चचत्वारिंशद्योजनलक्षप्रमाण इति। **समयः** कालस्तदुपलक्षितं क्षेत्रं **समयक्षेत्रं** मनुष्यक्षेत्रमित्यर्थः। **उडुविमानं** सौधर्मे प्रथमप्रस्तट एवेति। **ईषद्** अल्पो रत्नप्रभाद्यपेक्षया **प्राग्भारः** उच्छ्रयादिलक्षणो यस्यां सेषत्प्राग्भारा ।

[सू० ३३१] उड्ढलोगे णं चत्तारि बिसरीरा पन्नत्ता, तंजहा-पुढविकाइया, आउ [काइया], वणस्सति [काइया], उराला तसा पाणा । अहेलोगे णं चत्तारि बिसरीरा पन्नत्ता, तंजहा-एवं चेव । एवं तिरियलोए वि ४ । चत्तारि पुरिसजाता पन्नत्ता, तंजहा-हिरिसत्ते, हिरिमणसत्ते, चलसत्ते, थिरसत्ते।

चत्तारि सेज्जपडिमाओ पन्नत्ताओ १। चत्तारि वत्थपडिमाओ पन्नत्ताओ २। चत्तारि पातपडिमाओ पन्नत्ताओ ३। चत्तारि ठाणपडिमाओ पन्नत्ताओ ४।

[टी०] ईषत्प्राग्भारा ऊर्ध्वलोके भवतीति ऊर्ध्वलोकप्रस्तावादिदमाह- **उड्ढे**त्यादि, द्वे शरीरे येषां ते **द्विशरीराः**, एकं पृथिवीकायिकादिशरीरमेव द्वितीयं जन्मान्तरभावि मनुष्यशरीरं ततस्तृतीयं केषाञ्चिन्न भवत्यनन्तरमेव सिद्धिगमनात्। **ओराला तस** त्ति **उदाराः** स्थूला द्वीन्द्रियादयो न तु सूक्ष्मास्तेजोवायुलक्षणाः, तेषामनन्तरभवे मानुषत्वाप्राप्त्या सिद्धिर्न भवतीति शरीरान्तरसम्भवात्। तथोदारत्रसग्रहणेन द्वीन्द्रियादिप्रतिपादनेऽपीह द्विशरीरतया पञ्चेन्द्रिया एव ग्राह्याः, विकलेन्द्रियाणामनन्तरभवे सिद्धेरभावाद्, उक्तं च- **विगला लभेज्ज विरइं ण हु किंचि लभेज्ज सुहुमतसा** [बृहत्सं० २९७] इति। लोकसम्बन्धायाते अधोलोक-तिर्यग्लोकयोरतिदेशसूत्रे गतार्थे इति ।

तिर्यग्लोकाधिकारात् तत्संभवं संयतादिपुरुषं भेदैराह– **चत्तारी**त्यादि, **ह्रिया** लज्जया **सत्त्वं** परीषहादिसहने रणाङ्गणे वा अवष्टम्भो यस्य स **ह्रीसत्त्वः**। तथा **ह्रिया** हसिष्यन्ति

मामुत्तमकुलजातं जना इति लज्जया मनस्येव, न काये रोमहर्ष-कम्पादिभयलिङ्गोपदर्शनात्, **सत्त्वं** यस्य स **ह्रीमनःसत्त्वः** । **चलम्** अस्थिरं परीषहादिसम्पाते ध्वंसात् सत्त्वं यस्य स **चलसत्त्वः** । एतद्विपर्ययात् **स्थिरसत्त्व** इति।

स्थिरसत्त्वोऽनन्तरमुक्तः, स चाभिग्रहान् प्रतिपद्य पालयतीति तद्दर्शनाय सूत्र-चतुष्टयमिदम्- **चत्तारि सेज्ज** त्ति सुगमम्, नवरं शय्यते यस्यां सा **शय्या** संस्तारकः, तस्याः **प्रतिमा** अभिग्रहाः **शय्याप्रतिमाः**, तत्रोद्दिष्टं फलकादीनामन्यतमत् ग्रहीष्यामि नेतरदित्येका, यदेव प्रागुद्दिष्टं तदेव यदि द्रक्ष्यामि तदा तदेव ग्रहीष्यामि नान्यदिति द्वितीया, तदपि यदि तस्यैव शय्यातरस्य गृहे भवति ततो ग्रहीष्यामि नान्यत आनीय तत्र शयिष्य इति तृतीया, तदपि फलकादिकं यदि यथासंस्तृतमेवास्ते ततो ग्रहीष्यामि नान्यथेति चतुर्थी, आसु च प्रतिमास्वाद्ययोः प्रतिमयोर्गच्छनिर्गतानामग्रहः, उत्तरयोरन्य-तरस्यामभिग्रहः, गच्छान्तर्गतानां तु चतसृणोऽपि कल्पन्त इति ।

वस्त्रप्रतिमा वस्त्रग्रहणविषये प्रतिज्ञाः, कार्प्पासिकादीत्येवमुद्दिष्टं वस्त्रं याचिष्ये इति प्रथमा, तथा प्रेक्षितं वस्त्रं याचिष्ये नापरमिति द्वितीया, तथाऽऽन्तरपरिभोगेनोत्तरीयपरिभोगेन वा शय्यातरेण परिभुक्तप्रायं वस्त्रं ग्रहीष्यामीति तृतीया, तथा तदेवोत्सृष्टधर्म्मकं ग्रहीष्यामीति चतुर्थी ।

पात्रप्रतिमा उद्दिष्टं दारुपात्रादि याचिष्ये १, तथा प्रेक्षितम् २, तथा दातुः स्वाङ्गिकं परिभुक्तप्रायं द्वि-त्रेषु वा पात्रेषु पर्यायेण परिभुज्यमानं पात्रं याचिष्य इति तृतीया, उज्झितधर्म्मकमिति चतुर्थी।

स्थानं कायोत्सर्गाद्यर्थ आश्रयः, तत्र प्रतिमाः **स्थानप्रतिमाः**, तत्र कस्यचिद् भिक्षोरेवंभूतोऽभिग्रहो भवति यथा-अहमचित्तं स्थानमुपाश्रयिष्यामि तत्र चाऽऽकुञ्चन-प्रसारणादिकां क्रियां करिष्ये, तथा किञ्चिदचित्तं कुड्यादिकमवलम्बयिष्ये, तथा तत्रैव स्तोकपादविहरणं समाश्रयिष्यामीति प्रथमा प्रतिमा, द्वितीया त्वाकुञ्चन-प्रसारणादि-क्रियामवलम्बनं च करिष्ये न पादविहरणमिति, तृतीया त्वाकुञ्चन-प्रसारणमेव नावलम्बन-पादविहरणे इति, चतुर्थी पुनर्यत्र त्रयमपि न विधत्ते ।

[सू० ३३२] चत्तारि सरीरगा जीवफुडा पन्नत्ता, तंजहा-वेउव्विए, आहारए,

तेयए, कम्मए १। चत्तारि सरीरगा कम्मुम्मीसगा पन्नत्ता, तंजहा-ओरालिए, वेउव्विए, आहारए, तेयए २।

[टी०] अनन्तरं शरीरचेष्टानिरोध उक्त इति शरीरप्रस्तावादिदं सूत्रद्वयं **चत्तारी**त्यादि व्यक्तम्, किन्तु जीवेन **स्पृष्टानि** व्याप्तानि **जीवस्पृष्टानि**, जीवेन हि स्पृष्टान्येव वैक्रियादीनि भवन्ति, न तु यथा औदारिकं जीवमुक्तमपि भवति मृतावस्थायां तथैतानीति, **कम्मुम्मीसग** त्ति कार्मणेन शरीरेणोन्मिश्रकाणि न केवलानि, यथौदारिकादीनि त्रीणि वैक्रियादिभिरमिश्राण्यपि भवन्ति नैवं कार्मणेनेति भावः ।

[सू० ३३३] चउहिं अत्थिकाएहिं लोगे फुडे पन्नत्ते, तंजहा-धम्मत्थिकाएणं, अधम्मत्थिकाएणं, जीवत्थिकाएणं, पोग्गलत्थिकाएणं । चउहिं बादरकातेहिं उववज्जमाणेहिं लोगे फुडे पन्नत्ते, तंजहा-पुढविकाइएहिं आउ[काइएहिं] वाउ[काइएहिं], वणस्सइकाइएहिं ।

[टी०] शरीराणि कार्मणेनोन्मिश्राणीत्युक्तमुन्मिश्राणि च स्पृष्टान्येवेति स्पृष्टप्रस्तावात् सूत्रद्वयं **चउही**त्यादि गतार्थम्, केवलं **फुडे** त्ति **स्पृष्टः** प्रतिप्रदेशं व्याप्तः, सूक्ष्माणां पञ्चानामपि सर्वलोकात् सर्वलोके उत्पादात् बादरतैजसानां तु सर्वलोकादुद्वृत्य मनुष्यक्षेत्रे ऋजुगत्या वक्रगत्या वोत्पद्यमानानां द्वयोरूर्ध्वकपाटयोरेव बादरतेजस्त्वव्यपदेशस्येष्टत्वाच्च **चउहिं बादरकाएहिं** इत्युक्तम्, बादरा हि पृथिव्यम्बु-वायु-वनस्पतयः सर्वतो लोकादुद्वृत्य पृथिव्यादि-घनोदध्यादि-घनवातवलयादि-घनोदध्यादिषु यथास्वमुत्पादस्थानेष्वन्यतरगत्योत्पद्यमाना अपर्याप्तकावस्थायामतिबहुत्वात् सर्वलोकं प्रत्येकं स्पृशन्ति, पर्याप्तास्त्वेते बादरतेजस्कायिकास्त्रसाश्च लोकासङ्ख्येयभागमेव स्पृशन्तीति, उक्तं च **प्रज्ञापनासूत्रे**– **एत्थ णं बादरपुढविकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता**, इत्यादि ।

[सू० ३३४] चत्तारि पएसग्गेणं तुल्ला पन्नत्ता, तंजहा-धम्मत्थिकाए अधम्मत्थिकाए, लोगागासे, एगजीवे ।

चउण्हमेगं सरीरं नो सुपस्सं भवइ, तंजहा-पुढविकाइयाणं, आउ[काइयाणं] तेऊ[काइयाणं], वणस्सइकाइयाणं ।

चत्तारि इंदियत्था पुट्ठा वेदेंति, तंजहा-सोतिंदियत्थे, घाणिंदियत्थे,

जिब्भिंदियत्थे, फासिंदियत्थे ।

चउहिं ठाणेहिं जीवा य पोग्गला य णो संचातेंति बहिया लोगंता गमणताते, तंजहा-गतिअभावेणं, णिरुवग्गहताते, लुक्खताते, लोगाणुभावेणं।

[टी०] चतुर्भिर्लोकः स्पृष्ट इत्युक्तमिति लोकप्रस्तावात्तस्य धर्मास्तिकायादीनां चान्योन्यं प्रदेशतः समतामाह- **चत्तारी**त्यादि कण्ठ्यम्, नवरं **प्रदेशाग्रेण** प्रदेशपरिमाणेनेति **तुल्याः** समाः सर्वेषामेषामसङ्ख्यातप्रदेशत्वात् । **लोयागासे** त्ति आकाशस्यानन्त-प्रदेशत्वेन धर्मास्तिकायादिभिः सहाऽतुल्यताप्रसक्ते**र्लोक**ग्रहणम् । **एगजीवे** त्ति सर्वजीवानामनन्तप्रदेशत्वाद्विवक्षिततुल्यताऽभावप्रसङ्गा**देक**ग्रहणमिति ।

पूर्वं पृथिव्यादिभिः स्पृष्टो लोक इत्युक्तमिति पृथिव्यादिप्रस्तावादिदमाह – **चउण्ह**मित्यादि कण्ठ्यम्, किन्तु **नो पस्सं** ति चक्षुषा नो दृश्यमतिसूक्ष्मत्वात्, क्वचित् **सुपस्सं** ति पाठः, तत्र **न सुखदृश्यं** न चक्षुःप्रत्यक्षदृश्यमनुमानादिभिस्तु दृश्यमेवेत्यर्थः, बादरवायूनां तथा सूक्ष्माणां पञ्चानामपि तदेकमनेकं वा अदृश्यमिति **चतुर्णा**मित्युक्तम्, वनस्पतय इह साधारणा एव ग्राह्याः, प्रत्येकशरीरस्यैकस्यापि दृश्यत्वादिति ।

पृथिव्यादीनां शरीरस्य चक्षुरिन्द्रियाविषयत्वमुक्तमितीन्द्रियविषयप्रस्तावादिदमाह- **चत्तारि इंदिये**त्यादि स्पष्टम्, किन्तु इन्द्रियैरर्यन्ते अधिगम्यन्त इती**न्द्रियार्थाः** शब्दादयः, **पुट्ठ** त्ति **स्पृष्टाः** इन्द्रियसम्बद्धा **वेएंति** त्ति **वेद्यन्ते** आत्मना ज्ञायन्ते, नयन-मनोवर्जानां श्रोत्रादीनां प्राप्तार्थपरिच्छेदस्वभावत्वादिति, उक्तं च– **पुट्ठं सुणेइ सद्दे** त्ति वचनात् ।

अनन्तरं जीव-पुद्गलयोरिन्द्रियद्वारेण ग्राहक-ग्राह्यभाव उक्तोऽधुना तयोर्गतिधर्म्मं चिन्तयन्नाह- **चउही**त्यादि व्यक्तम्, परमन्येषां गतिरेव नास्तीति **जीवा य पुग्गला ये**त्युक्तम्, **नो संचाएंति** न शक्नुवन्ति, नालम्, **बहिय** त्ति बहिस्ता**ल्लोकान्तात्** अलोके इत्यर्थः, **गमनतायै** गमनाय, गन्तुमित्यर्थः । **गत्यभावेन** लोकान्तात् परतस्तेषां गतिलक्षणस्वभावाभावादधो दीपशिखावत्, तथा **निरुपग्रहतया** धर्म्मास्तिकायाभावेन तज्जनितगत्युपष्टम्भाभावात् गन्त्र्यादिरहितपङ्गुवत्, तथा **रूक्षतया** सिकतामुष्टिवत्, लोकान्तेषु हि पुद्गला रूक्षतया तथा परिणमन्ति यथा परतो गमनाय नालम्, कर्मपुद्गलानां

तथाभावे जीवा अपि, सिद्धास्तु निरुपग्रहतयैवेति, **लोकानुभावेन** लोकमर्यादया विषयक्षेत्रादन्यत्र मार्त्तण्डमण्डलवदिति ।

[सू० ३३५] चउव्विहे णाते पन्नत्ते, तंजहा-आहरणे, आहरणतद्देसे, आहरणतद्दोसे, उवन्नासोवणते १ ।

आहरणे चउव्विहे पन्नत्ते, तंजहा-अवाते, उवाते, ठवणाकम्मे, पडुप्पन्नविणासी, २ ।

आहरणतद्देसे चउव्विहे पन्नत्ते, तंजहा-अणुसिट्ठी, उवालंभे, पुच्छा, निस्सावयणे ३ ।

आहरणतद्दोसे चउव्विहे पन्नत्ते, तंजहा-अधम्मजुत्ते, पडिलोमे, अत्तोवणीते, दुरोवणीते ४ ।

उवन्नासोवणए चउव्विहे पन्नत्ते, तंजहा-तव्वत्थुते, तदन्नवत्थुते, पडिणिभे, हेतू ५ ।

[टी०] अनन्तरोक्ता अर्था उक्तवन्निदर्शनतः प्रायः प्राणिनां प्रतीतिपथपातिनो भवन्तीति निदर्शनभेदप्रतिपादनाय पञ्चसूत्री । तत्र ज्ञायते अस्मिन् सति दार्ष्टान्तिकोऽर्थ इति अधिकरणे क्तप्रत्ययोपादानात् **ज्ञातं** दृष्टान्तः, साधनसद्भावे साध्यस्यावश्यंभावः साध्याभावे वा साधनस्यावश्यमभाव इत्युपदर्शनलक्षणः, [यदाह-

साध्येनानुगमो हेतोः साध्याभावे च नास्तिता ।
ख्याप्यते] यत्र दृष्टान्तः स साधर्म्येतरो द्विधा ।। [प्रमाणसमु० ४।२] इति ।

अथवा आख्यानकरूपं ज्ञातम्, तच्च चरित-कल्पितभेदात् द्विधा, तत्र चरितं यथा निदानं दुःखाय **ब्रह्मदत्त**स्येव, कल्पितं यथा प्रमादवतामनित्यं यौवनादीति देशनीयम्, यथा पाण्डुपत्रेण किशलयानां देशितम्, तथाहि-

जह तुब्भे तह अम्हे तुब्भे वि य होहिहा जहा अम्हे ।
अप्पाहेइ पडंतं पंडुयपत्तं किसलयाणं ।। [उत्तरा० नि० ३०७] इति ।

ज्ञातमुपाधिभेदात् चतुर्विधं दर्शयति, तत्र **आ** अभिविधिना **ह्रियते** प्रतीतौ नीयते अप्रतीतोऽर्थोऽनेने**त्याहरणम्**, यत्र समुदित एव दार्ष्टान्तिकोऽर्थः उपनीयते यथा पापं

दुःखाय **ब्रह्मदत्तस्येवेति** ।

तथा **तस्य** आहरणार्थस्य देश**स्तद्देशः** स चासावुपचारादाहरणं चेति प्राकृतत्वादाहरणशब्दस्य पूर्वनिपाते **आहरणतद्देश** इति, भावार्थश्चात्र– यत्र दृष्टान्तार्थदेशेनैव दार्ष्टान्तिकार्थस्योपनयनं क्रियते तत्तद्देशोदाहरणमिति, यथा चन्द्र इव मुखमस्या इति, इह हि चन्द्रे सौम्यत्वलक्षणेनैव देशेन मुखस्योपनयनं नानिष्टेन नयन-नासावर्जितत्व-कलङ्कादिनेति ।

तथा **तस्यैव** आहरणस्य सम्बन्धी साक्षात् प्रसङ्गसम्पन्नो वा दोष**स्तद्दोषः**, स चासौ धर्म्मे धर्म्मिणः उपचारादाहरणं चेति प्राकृतत्वेन पूर्वनिपाता**दाहरणतद्दोष** इति ।

तथा वादिना अभिमतार्थसाधनाय कृते वस्तूपन्यासे तद्विघटनाय यः प्रतिवादिना विरुद्धार्थोपनयः क्रियते पर्यनुयोगोपन्यासे वा य उत्तरोपनयः स **उपन्यासोपनयः**, उत्तररूपमुपपत्तिमात्रमपि ज्ञातभेदो ज्ञानहेतुत्वादिति, यथा अकर्त्ताऽऽत्मा अमूर्त्तत्वादाकाशवदित्युक्ते अन्य आह- आकाशवदेवाऽभोक्तेत्यपि प्राप्तमित्यादि वृत्तौ।

अवाये त्ति अपायः अनर्थः, स यत्र द्रव्यादिष्वभिधीयते यथैतेषु द्रव्यादिविशेषेष्वस्त्यपायो विवक्षितद्रव्यादिविशेषेष्विव, हेयता वाऽस्य यत्राभिधीयते तदाहरणमपाय इति ।

तथा **उवाए** त्ति **उपायः**, उपेयं प्रति पुरुषव्यापारादिका साधनसामग्री, स यत्र द्रव्यादावुपेये अस्तीत्यभिधीयते यथैतेषु द्रव्यादिविशेषेषु साधनीयेष्वस्त्युपायो विवक्षितद्रव्यादिविशेषवत्, उपादेयता वाऽस्य यत्राभिधीयते तदाहरणमुपाय इति, सोऽपि द्रव्यादिभिश्चतुर्द्धैव ।

तत्र द्रव्यस्य सुवर्णादेः प्रासुकोदकादेर्वा द्रव्यमेव वा उपायो द्रव्योपायः, एतत्साधनमेतदुपादेयतासाधनं वाऽऽहरणमपि तथोच्यते, तत्प्रयोगश्चैवम्-अस्ति सुवर्णादिषूपायः, उपायेनैव वा सुवर्णादौ प्रवर्त्तितव्यम्, तथाविधधातुवादसिद्धादिवदिति।

एवं क्षेत्रोपायः क्षेत्रपरिकर्म्मणोपायः, यथा अस्त्यस्य क्षेत्रस्य क्षेत्रीकरणोपायो लाङ्गलादिस्तथाविधसाधुव्यापारो वा ।

एवं कालोपायः कालज्ञानोपायः, यथा अस्ति कालस्य ज्ञाने उपायः धान्यादेरिव,

जानीहि वा कालं घटिकाच्छायादिनोपायेन तथाभूतगणितज्ञवदिति ।

एवं भावोपायः, यथा भावज्ञाने उपायोऽस्ति भावं वोपायतो जानीहि, **बृहत्कुमारिका**कथाकथनेन विज्ञातचौरादिभावा**भयकुमार**वदिति । तथाहि-किल **राजगृह**नगरस्वामिनः **श्रेणिक**राजस्य पुत्रोऽ**भयकुमारा**भिधानो देवताप्रसादलब्ध-सर्वर्त्तुकफलादिसमृद्धारामस्याम्रफलानाम् अकालाम्रफलदोहदवद्भार्यादोहदपूरणार्थं चण्डालचौरेणापहरणे कृते चौरपरिज्ञानार्थं नाट्यदर्शननिमित्तमिलितबहुजनमध्ये **बृहत्कुमारिका**कथामचकथत्, *तथाहि-काचिद् बृहत्कुमारिका वाञ्छितवरलाभाय* कामदेवपूजार्थमारामे पुष्पाणि चोरयन्ती आरामपतिना गृहीता सद्भावकथने विवाहितया पत्या अपरिभुक्तया मत्पार्श्वे समागन्तव्यमित्यभ्युपगमं कारयित्वा मुक्ता, ततः कदाचित् विवाहिता सती पतिमापृच्छ्य रात्रावारामपतिपार्श्वे गच्छन्ती चौर-राक्षसाभ्यां गृहीता सद्भावकथने प्रतिनिवृत्तया भवत्पार्श्वे आगन्तव्यमितिकृताभ्युपगमा मुक्ता आरामे गता आरामिकेण सत्यप्रतिज्ञेत्यखण्डितशीला विसर्जिता इताभ्यामपि तथैव विसर्जिता पतिसमीपमागतेति, ततो भो लोकाः ! पत्यादीनां मध्ये को दुष्करकारक इति चासौ पप्रच्छ, तत ईष्यालुप्रभृतयः पत्यादीन् दुष्करकारित्वेनाभिदधुः, चौरचाण्डालस्तु चौरानिति, ततोऽसावनेनोपायेन भावमुपलक्ष्य चौर इति कृत्वा तं बन्धयामासेति, अत्रापि गाथे–

एमेव चउविगप्पो होइ उवाओ वि तत्थ दव्वम्मि ।
धाउव्वाओ पढमो णंगलकुलिएहिं खेत्तं तु ॥
कालो वि नालियाईहिं होइ भावम्मि पंडिओ अभओ ।
चोरस्स कए णट्टिय वड्डकुमारिं परिकहिंसु ॥ [दशवै० नि० ६१-६२] इति ।

ठवणाकम्मे त्ति स्थापनं प्रतिष्ठापनं **स्थापना**, तस्याः **कर्म्म** करणं स्थापनाकर्म्म, येन ज्ञातेन परमतं दूषयित्वा स्वमतस्थापना क्रियते तत् **स्थापनाकर्म्मे**ति भावः, तच्च द्वितीयाङ्गे द्वितीयश्रुतस्कन्धे प्रथमाध्ययनं **पुण्डरीका**ख्यम्, तत्र ह्युक्तम्– अस्ति काचित् पुष्करिणी कर्द्दमप्रचुरजला, तन्मध्यदेशे महत्पुण्डरीकम्, तदुद्धरणार्थं चतसृभ्यो दिग्भ्यश्चत्वारः पुरुषाः सकर्द्दममार्गैः प्रवेष्टुमारब्धाः, ते चाकृततदुद्धरणा एव पङ्के निमग्नाः, अन्यस्तु तटस्थोऽसंस्पृष्टकर्द्दम एवामोघवचनतया तदुद्धृतवानिति ज्ञातम्,

उपनयश्चायमत्र-कर्द्दमस्थानीया विषयाः, पुण्डरीकं राजादिर्भव्यपुरुषः, चत्वारः पुरुषाः परतीर्थिकाः, पञ्चमः पुरुषः साधुः, अमोघवचनं धर्म्मदेशना, पुष्करिणी संसारः, तदुद्धारो निर्वाणमिति।

पडुप्पन्नविणासि त्ति **प्रत्युत्पन्नस्य** तत्कालोत्पन्नवस्तुनो **विनाशो**ऽभिधेयतया यत्रास्ति तत् **प्रत्युत्पन्नविनाशी**ति, यथा केनापि वणिजा दुहित्रादिस्त्रीपरिवारशील-विनाशरक्षार्थं तदासक्तिनिमित्तस्वगृहासन्नराजगान्धर्विकगुणनिकायाः स्वगृहे कुलदेवता-निवेशनाद् गुणनिकाकाले तस्या देवताया अग्रतः आतोद्यनादव्याजेन राजापराधपरिहारेण विनाशः कृतः, एवं गुरुणा शिष्यान् क्वचिद् वस्तुन्यध्युपपद्यमानानुपलभ्य तस्य तदासक्ति-निमित्तत्वमुपहन्तव्यमित्येवं प्रत्युत्पन्नविनाशनीयताज्ञापकत्वात् प्रत्युत्पन्नविनाशिज्ञातता गान्धर्विकाख्यानकस्यावगन्तव्येति।

अथाहरणतद्देशो व्याख्यायते, स च चतुर्द्धा, तत्र अनुशासन**मनुशास्ति**ः सद्गुणोत्कीर्तनेनोपबृंहणम्, सा विधेयेति यत्रोपदिश्यते साऽनुशास्तिः, यथा गुणवन्तो-ऽनुशासनीया भवन्ति, यथा साधुलोचनपतितरजःकणापनयनेन लोकसम्भावित-शीलकलङ्का तत्क्षालनायाऽऽराधितदेवताकृतप्रातिहार्या चालनीव्यवस्थापितोदकाच्छो-टनोद्घाटित**चंपा**गोपुरत्रया **सुभद्रा** अहो शीलवतीति महाजनेनानुशासितेति, उक्तं च–

आहरणं तद्देसे चउहा अणुसट्ठि तह उवालंभो ।
पुच्छा निस्सावयणं होइ सुभद्दाऽणुसट्ठीए ॥
साहुक्कारपुरोगं जह सा अणुसासिया पुरजणेणं ।
वेयावच्चाईसु वि एव जयंतेववूहेज्जा ॥ [दशवै० नि० ७३-७४] त्ति।

इह च तथाविधवैयावृत्यकरणादिनाप्युपनयः सम्भवति तत्त्यागेन च महाजनानु-शास्तिमात्रेणोपनयः कृत इत्याहरणतद्देशतेति।

तथा उपालम्भनम् **उपालम्भो** भङ्ग्यन्तरेणानुशासनमेव स यत्राभिधीयते स उपालम्भो यथा क्वचिदपराधवृत्तयो विनेया उपालम्भनीयाः, यथा **महावीर**समवसरणे सविमाना-गतचन्द्रा-ऽऽदित्योद्द्योतेन कालविभागमजानती **मृगावति**साध्वी स्थिता, तद्गमनेऽति-[कालोऽयमिति] सम्भ्रान्तार्य**चन्दना**समीपे गता, तया चोपालब्धा अयुक्तमिदं भवादृशीनामुत्तमकुलजातानामित्यादि ।

तथा **पृच्छा** प्रश्नः किं कथं केन कृतमित्यादि, सा यत्र विधेयतयोपदिश्यते सा पृच्छा, यथा प्रच्छनीया ज्ञानिनो निर्णयार्थिभिर्यथा भगवान् **कोणिकेन** पृष्टः, तथाहि- किल **कोणिकः श्रेणिक**राजपुत्रः श्रमणं भगवन्तं **महावीरं** पप्रच्छ, तद्यथा-भदन्त ! चक्रवर्त्तिनोऽपरित्यक्तकामा मृताः क्वोत्पद्यन्ते ?, भगवताऽभिहितम्– सप्तमनरकपृथिव्याम्, ततोऽसौ बभाण- अहं क्वोत्पत्स्ये ?, स्वामिनोक्तम्– षष्ठ्याम्, स उवाच– अहं किं न सप्तम्याम् ? स्वामिना जगदे– सप्तम्यां चक्रवर्त्तिनो यान्ति, ततोऽसावभिदधौ– किमहं न चक्रवर्त्ती ?, यतो ममापि हस्त्यादिकं तत्समानमस्ति, स्वामिना प्रत्यूचे– तव रत्न-निधयो न सन्ति, ततोऽसौ कृत्रिमाणि रत्नानि कृत्वा भरतक्षेत्रसाधनप्रवृत्तः **किरिमालक**यक्षेण गुहाद्वारे व्यापादितः षष्ठीं गत इति ।

तथा **निस्सावयणे** त्ति निश्रया वचनं निश्रावचनम्, अयमर्थः-कमपि सुशिष्यमालम्ब्य यदन्यप्रबोधार्थं वचनं त**न्निश्रावचनम्**, तद्यत्र विधेयतयोच्यते तदाहरणं निश्रावचनम्, यथा असहनान् विनेयान् मार्द्दवसम्पन्नमन्यमालम्ब्य किञ्चिद् ब्रूयात्, **गौतम**माश्रित्य भगवानिवेति, तथाहि– किल **गौतमं** तापसादिप्रव्रजितानां केवलोत्पत्तावनुत्पन्न-केवलत्वेनाधृतिमन्तं 'चिरसंश्लिष्टोऽसि गौतम ! चिरपरिचितोऽसि गौतम ! मा त्वमधृतिं कार्षीः'इत्यादिना वचनसन्दोहेनानुशासयता अन्येऽप्यनुशासिताः, तदनुशासनार्थं **द्रुमपत्रका**ध्ययनं च प्रणिन्ये इति, उक्तं च–

पुच्छाए कोणिए खलु निस्सावयणम्मि गोयमस्सामि । [दशवै० नि० ७८] त्ति ॥

व्याख्यातं तद्देशोदाहरणम्, तद्दोषोदाहरणमथ व्याख्यायते, तच्च चतुर्द्धा, तत्र **अहम्मजुत्ते** त्ति यदुदाहरणं कस्यचिदर्थस्य साधनायोपादीयते केवलं पापाभिधानस्वरूपं येन चोक्तेन प्रतिपाद्यस्याधर्म्मबुद्धिरुपजन्यते त**दधर्म्मयुक्तम्**, तद्यथा-उपायेन कार्याणि कुर्यात् कोलिक**नलदाम**वत्, तथाहि-पुत्रखादकमत्कोटकमार्गेणोपलब्धबिलवासाना-मशेषमत्कोटकानां तप्तजलस्य बिले प्रक्षेपणतो मारणदर्शनेन रञ्जितचित्त-**चाणक्या**-वस्थापितेन चौरग्राह**नलदामा**भिधानकुविन्देन चौर्यसहकारितालक्षणोपायेन विश्वासिता मिलिताश्चौरा विषमिश्रभोजनदानतः सर्वे व्यापादिता इति, आहरणतद्दोषता चास्या-

धर्म्मयुक्तत्वात् तथाविधश्रोतुरधर्म्मबुद्धिजनकत्वाच्चेति, अत एव नैवंविधमुदाहर्त्तव्यं यतिनेति ।

पडिलोमे त्ति प्रतिकूलम्, यत्र प्रातिकूल्यमुपदिश्यते यथा शठं प्रति शठत्वं कुर्यात्, यथा **चण्डप्रद्योते** तदपहरणार्थं तदपहृता**भयकुमार**श्चकारेति, तद्दोषता चास्य श्रोतुः परापकारकरणनिपुणबुद्धिजनकत्वात्, अथवा घुष्टप्रतिवादिना द्वावेव राशी जीवश्चाऽजीवश्चेत्युक्ते तत्प्रतिघातार्थं कश्चिदाह– तृतीयोऽप्यस्ति नोजीवाख्यो गृहकोकिलादिच्छिन्नपुच्छवदिति, अस्यापि तद्दोषताऽपसिद्धान्ताभिधानादिति ।

अत्तोवणीए त्ति आत्मैवोपनीतः तथा निवेदितो नियोजितो यस्मिंस्तत्तथा, येन ज्ञातेन परमतदूषणायोपात्तेनात्ममतमेव दुष्टतयोपनीयते यथा **पिङ्गलेना**त्मा तदात्मोपनीतम्, तथाहि– कथमिदं तडागमभेदं भविष्यतीति राज्ञा पृष्टः **पिङ्गला**भिधानः स्थपतिरवोचत्-भेदस्थाने कपिलादिगुणे पुरुषे निखाते सतीति, अमात्येन तु स एव तत्र तद्गुणत्वान्निखात इति तेनात्मैव नियुक्तः, स्ववचनदोषात्, तदेवंविधमात्मोपनीतमिति, अत्रोदाहरणम्-यथा सर्व्वे सत्त्वा न हन्तव्या इत्यस्य पक्षस्य दूषणाय कश्चिदाह- अन्यधर्म्मस्थिता हन्तव्या विष्णुनेव दानवा [इत्येवंवादिना आत्मा हन्तव्यतयोपनीतो धर्म्मान्तरस्थित-पुरुषाणामिति,] तद्दोषता तु प्रतीतैवास्येति ।

दुरुवणीए त्ति दुष्टमु**पनीतं** निगमितं योजितमस्मिन्निति दुरुपनीतं परिव्राजकवाक्यवद्, यथा हि किल कश्चित् परिव्राजको जालव्यग्रकरो मत्स्यबन्धाय चलितः, केनचिद् धूर्त्तेन किञ्चिदुक्तस्तेन च तस्योत्तरमसङ्गतं दत्तम्, अत्र च वृत्तम्-

कन्थाऽऽचार्याऽघना ते ननु शफरिवधे जालमश्नासि मत्स्यान् ?,
ते मे मद्योपदंशाः पिबसि ननु ? युतो वेश्यया, यासि वेश्याम् ? ।
दत्त्वाऽरीणां गलेऽहिं क्व नु तव रिपवो ? येषु सन्धिं छिनद्मि,
चौरस्त्वम् ? द्यूतहेतोः कितव इति कथम् ? येन दासीसुतोऽस्मि ॥ [ ]

इत्येवं प्रकृतसाध्यानुपयोगि स्वमतदूषणावहं वा यत्तद्दार्ष्टान्तिकेन सह साधर्म्याभावाद् दुरुपनीतमित्यादि, अत्र गाथाः–

पढमं अहम्मजुत्तं पडिलोमं अत्तणो उवन्नासो ।
दुरुवणियं च चउत्थं अहम्मजुत्तम्मि नलदामो ॥

पडिलोमे जह अभओ पज्जोयं हरइ अवहिओ संतो ॥ त्ति ।
अत्तउवन्नासम्मि य तलायभेयम्मि पिंगलो थवई ।
अणिमिसगेण्हणभिक्खुग दुरुवणीए उदाहरणं ॥ [दशवै० नि० ८१-८३] इति ।

उक्त आहरणतद्दोषः, अधुनो**पन्यासोपनय** उच्यते, स च चतुर्द्धा, तत्र **तव्वत्थुए** त्ति तदेव परोपन्यस्तसाधनं वस्त्विति उत्तरभूतं वस्तु यस्मिन्नुपन्यासोपनये स **तद्वस्तुकः**, अथवा तदेव परोपन्यस्तं वस्तु तद्वस्तु, तदेव तद्वस्तुकम्, तद्युक्त उपन्यासोपनयोऽपि **तद्वस्तुक** इत्युच्यते एवमुत्तरत्रापि, यथा कश्चिदाह– समुद्रतटे महान् वृक्षोऽस्ति, तच्छाखा जल-स्थलयोरुपरि स्थिताः, तत्पत्राणि च यानि जले निपतन्ति तानि जलचरा जीवा भवन्ति यानि च स्थले निपतन्ति तानि स्थलचरा इति, अन्यस्तदुपन्यस्तमेव तरुपत्रपतनवस्तु गृहीत्वा तदुक्तं विघटयति, यदुत– यानि पुनर्मध्ये तेषां का वार्त्तेति ? एतदुपपत्तिमात्रमुत्तरभूतं **तद्वस्तुक** उपन्यासोपनयः, ज्ञातत्वं चास्य ज्ञाननिमित्तत्वात्, [इत्यादि] विस्तरो वृत्तौ ।

तथा **तयन्नवत्थुए** त्ति तस्मात् परोपन्यस्ताद् वस्तुनोऽन्यदुत्तरभूतं वस्तु यस्मिन्नुपन्यासोपनये स **तदन्यवस्तुको** यथा जले पतितानि जलचरा इत्युक्ते एतद्विघटनाय पतनादन्यदुत्तरमाह यानि पुनः पातयित्वा खादति नयति वा तानि किं भवन्ति ?, न किञ्चिदित्यर्थोऽयमपि ज्ञापकतया ज्ञातमुक्तः, अथवा यथारूढमेव ज्ञातमेषः, तथाहि– न जल-स्थलपतितानि पत्राणि जलचरादिसत्त्वाः सम्भवन्ति, मनुष्याद्याश्रितानीव, अयमभिप्रायो यथा जलाद्याश्रितत्वात् जलचरादितया तानि सम्पद्यन्ते तथा मनुष्याद्याश्रिततया मनुष्यादिभवयूकादितयाऽपि सम्पद्यन्ताम्, आश्रितत्वस्याविशेषात्, न च तानि तथाऽभ्युपगम्यन्त इति जलादिगतानामपि जलचरत्वाद्यसम्भव इति ।

तथा **पडिनिभे** त्ति यत्रोपन्यासोपनये वादिनोपन्यस्तवस्तुनः सदृशं वस्तूत्तर-दानायोपनीयते स **प्रतिनिभः**, यथा कोऽपि प्रतिजानीने यदुत यो मामपूर्वं श्रावयति तस्मै लक्षमूल्यमिदं करोटकं ददामीति, स च श्रावितोऽपि तन्नापूर्वमिति प्रतिपद्यते, तत एकेन सिद्धपुत्रेणोक्तम्–

तुज्झ पिया मज्झ पिउणो धारेइ अणूणयं सयसहस्सं ।

जइ सुयपुव्वं दिज्जउ अह न सुयं खोरयं देहि ॥ [दशवै० नि० ८६] इति ।

प्रतिनिभता चास्य सर्वस्मिन्नप्युक्ते 'श्रुतपूर्वमेवेदं मम' इत्येवमसत्यं वचो ब्रुवाणस्य परस्य निग्रहाय 'तव पिता मम पितुर्द्धारयति लक्षम्' इत्येवंविधस्य द्विपाशरज्जु-कल्पस्यासत्यस्यैव वचस उपन्यस्तत्वादिति, अस्य चोपपत्तिमात्ररूपस्याप्यर्थज्ञापकतया ज्ञातत्वमुक्तमिति ।

तथा **हेउ** त्ति यत्रोपन्यासोपनये पर्यनुयोगस्य हेतुरुत्तरतयाऽभिधीयते स हेतुरिति, यथा केनापि कश्चित् पर्यनुयुक्तः– अहो किं यवाः क्रीयन्ते त्वया ?, स त्वाह– येन मुधैव न लभ्यन्ते इति, तथा कस्मात् ब्रह्मचर्यादिकष्टमनुष्ठीयते ?, यस्मादकृततपसां नरकादौ गुरुतरा वेदना भवतीति, इदमपि उपपत्तिमात्रमेव ज्ञातत्वेनोक्तमर्थज्ञापकत्वादिति । इह च किञ्चिद्विशेषेणैवंविधा ज्ञातभेदाः सम्भवन्त्यन्येऽपि किन्तु ते न विवक्षिताः, अन्तर्भावो वा कथञ्चित् गुरुभिर्विवक्षितो न च तं वयं सम्यग् जानीम इति ।

[सू० ३३६] हेऊ चउव्विहे पन्नत्ते, तंजहा-जावते, थावते, वंसते, लूसते १।

अहवा हेऊ चउव्विहे पन्नत्ते, तंजहा-पच्चक्खे, अणुमाणे, ओवम्मे, आगमे २।

अहवा हेऊ चउव्विहे पन्नत्ते, तंजहा-अत्थि तं अत्थि सो हेऊ, अत्थि तं णत्थि सो हेऊ, णत्थि तं अत्थि सो हेऊ, णत्थि तं णत्थि सो हेऊ ३।

[टी०] अथ ज्ञातानन्तरं ज्ञातवद्धेतोः साध्यसिद्ध्यङ्गत्वात् तद्भेदान् **हेऊ** इत्यादिना सूत्रत्रयेणाह, व्यक्तं चैतत्, नवरं हिनोति गमयति ज्ञेयमिति **हेतुः** अन्यथाऽनुपपत्तिलक्षणः, उक्तं च–

अन्यथाऽनुपपन्नत्वं हेतोर्लक्षणमीरितम् ।

तदप्रसिद्धि-सन्देह-विपर्यासैस्तदाभता ॥ [न्याया० २२] इति ।

प्रागुक्तश्च हेतुः पर्यनुयुक्तस्योत्तररूपमुपपत्तिमात्रम्, अयं तु साध्यं प्रत्यन्वय-व्यतिरेकवान् तथाविधदृष्टान्तस्मृततद्भाव इति, स चैकलक्षणोऽपि किञ्चिद्विशेषाच्चतुर्द्धा, तत्र **जावए**

त्ति यापयति वादिनः कालयापनां करोति, यथा काचिदसती एकैकरूपकेण एकैकमुष्ट्रलिण्डं दातव्यमिति दत्तशिक्षस्य पत्युस्तद्विक्रयार्थ**मुज्जयनी**प्रेषणोपायेन विटसेवायां कालयापनां कृतवतीति **यापकः**,

इह वृद्धैर्व्याख्यातम्– प्रतिवादिनं ज्ञात्वा तथा तथा विशेषणबहुलो हेतुः कर्त्तव्यो यथा कालयापना भवति, ततोऽसौ नावगच्छति प्रकृतमिति विस्तरो वृत्तौ।

तथा **थावए** त्ति स्थापयति पक्षमक्षेपेण प्रसिद्धव्याप्तिकत्वात् समर्थयति, यथा परिव्राजकधूर्त्ते लोकमध्यभागे दत्तं बहुफलं भवति तं चाहमेव जानामीति मायया प्रतिग्राममन्यान्यं लोकमध्यं प्ररूपयति सति तन्निग्रहाय कश्चित् श्रावको लोकमध्यस्यैकत्वात् कथं बहुषु ग्रामादिषु तत्सम्भव इत्येवंविधोपपत्त्या त्वद्दर्शितो भो लोकमध्यभागो न भवतीति पक्षं स्थापितवानिति **स्थापको** हेतुः,

तथा **वंसए** त्ति व्यंसयति परं व्यामोहयति शकटतित्तिरीग्राहकधूर्त्तवद् यः स **व्यंसक** इति, तथाहि– कश्चिदन्तराललब्धमृततित्तिरीयुक्तेन शकटेन नगरं प्रविष्टः उक्तो धूर्त्तेन यथा–शकटतित्तिरी कथं लभ्यते ?, स च किलायं शकटस्य सत्कां तित्तिरीं याचत इत्यभिप्रायादवोचत् तर्प्पणालोडिकयेति सक्त्वालोडनेन, जलाद्यालोडितसक्तुभिरित्यर्थः, ततो धूर्त्तः साक्षिण आहृत्य सतित्तिरीकं शकटं जग्राह, उक्तवांश्च मदीयमेतद्, अनेनैव शकटतित्तिरीति दत्तत्वात्, मया तु शकटसहिता तित्तिरी शकटतित्तिरीति गृहीतत्वादिति, ततो विषण्णः शाकटिक इति।

तथा **लूसए** त्ति लूषयति मुष्णाति व्यंसकापादितमनिष्टमिति **लूषको** हेतुः, स एव शाकटिकः, यथा धूर्त्तान्तरशिक्षितेन हि शाकटिकेन तेन याचितोऽसौ धूर्त्तः- तर्हि देहि मे तर्प्पणालोडिकामिति, ततो धूर्त्तेनोक्ता स्वभार्या देह्यस्मै सक्तूनालोड्येति, तां च तथा कुर्वन्तीं तद्भार्यां गृहीत्वाऽसौ प्रस्थितोऽवादीच्च धूर्तमभि मदीयेयम्, तर्प्पणमिति सक्तूनालोडयतीति तर्प्पणालोडिकेति भवतैव दत्तत्वादिति ।

अथवेति हेतोः प्रकारान्तरताद्योतको विकल्पार्थो हिनोति गमयति प्रमेयमर्थं स वा हीयते अधिगम्यते अनेनेति **हेतुः**, प्रमेयस्य प्रमितौ कारणम्, प्रमाणमित्यर्थः, **चतुर्विधः** स्वरूपादिभेदात्, तत्र **पच्चक्खे** त्ति अश्नाति अश्नुते व्याप्नोत्यर्थानित्यक्षः आत्मा, तं

प्रति यद्वर्त्तते ज्ञानं तत् प्रत्यक्षं निश्चयतोऽवधि-मनःपर्याय-केवलानि, अक्षाणि वेन्द्रियाणि प्रति यत्तत् प्रत्यक्षं व्यवहारतस्तच्चक्षुरादिप्रभवमिति, लक्षणमिदमस्य–

अपरोक्षतयाऽर्थस्य, ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्षमितरज् ज्ञेयं परोक्षं ग्रहणेक्षया ॥ [न्याया० ४] ग्रहणापेक्षयेति भावः ।

अणुमाणे त्ति **अन्वि**ति लिङ्गदर्शन-सम्बन्धानुस्मरणयोः पश्चान्**मानं** ज्ञानमनुमानम्, एतल्लक्षणमिदम्–

साध्याविनाभुवो लिङ्गात्, साध्यनिश्चायकं स्मृतम् ।
अनुमानं तदभ्रान्तं प्रमाणत्वात् समक्षवद् ॥ [न्याया० ५] इति,

तथा उपमानमुपमा, सैवौ**पम्यम्**, अनेन गवयेन सदृशोऽसौ गौरिति सादृश्यप्रतिपत्तिरूपम्, उक्तं च–

गां दृष्ट्वाऽयमरण्येऽन्यं गवयं वीक्षते यदा ।
भूयोऽवयवसामान्यभाजं वर्त्तुलकण्ठकम् ॥
तस्यामेव त्ववस्थायां यद्विज्ञानं प्रवर्त्तते ।
पशुनैतेन तुल्योऽसौ गोपिण्ड इति सोपमा ॥ [ ] इति,

आगमे त्ति आगम्यन्ते परिच्छिद्यन्ते अर्था अनेने**त्यागमः** आप्तवचनसम्पाद्यो विप्रकृष्टार्थप्रत्ययः, उक्तं च–

दृष्टेष्टाव्याहताद् वाक्यात् परमार्थाभिधायिनः ।
तत्त्वग्राहितयोत्पन्नं मानं शाब्दं प्रकीर्त्तितम् ॥
आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् ।
तत्त्वोपदेशकृत् सार्वं शास्त्रं कापथघट्टनम् ॥ [न्याया० ८-९] इति ।

अथवे त्ति इहाऽन्यथानुपपन्नत्वलक्षणहेतुजन्यत्वादनुमानमेव कार्ये कारणोपचाराद्धेतुः, स च चतुर्विधः, चतुर्भङ्गीरूपत्वात्, तत्र **अस्ति** विद्यते **त**दिति लिङ्गभूतं धूमादिवस्तु इति कृत्वा, **अस्ति सः** अग्न्यादिकः साध्योऽर्थ इत्येवं **हेतु**रिति अनुमानम् । तथा **अस्ति तद**ग्न्यादिकं वस्त्वतो **नास्त्यसौ** तद्विरुद्धः शीतादिरर्थ इत्येवमपि **हेतु**रनुमानमिति । तथा **नास्ति तद**ग्न्यादिकमतः शीतकालेऽ**स्ति स** शीतादिरर्थ इत्येवमपि **हेतु**रनुमानमिति । तथा **नास्ति तद्** वृक्षत्वादिकमिति **नास्ति** शिंशपात्वादिकोऽर्थ इत्यपि **हेतु**रनुमानमिति,

इह च शब्दे कृतकत्वस्यास्तित्वादस्त्यनित्यत्वं घटवत्तथा धूमस्यास्तित्वादिहास्त्यग्निर्महानस इवेत्यादिकं, शेषं वृत्तौ ।

[सू० ३३७] चउव्विहे संखाणे पन्नत्ते, तंजहा-पडिकम्मं, ववहारे, रज्जू, रासी ।

[टी०] अनन्तरं हेतुशब्देन ज्ञानविशेष उक्तस्तदधिकाराद् ज्ञानविशेषनिरूपणायाह– **चउव्विहेत्यादि**, सङ्ख्यायते गण्यते अनेनेति **सङ्ख्यानं** गणितमित्यर्थः, तत्र **परिकर्म** सङ्कलनादिकं पाटीप्रसिद्धम्, एवं **व्यवहारो**ऽपि मिश्रकव्यवहारादिरनेकधा, **रज्जु**रिति रज्जुगणितं क्षेत्रगणितमित्यर्थः, **राशि**रिति त्रैराशिक-पञ्चराशिकादीति ।

[सू० ३३८] अहेलोगे णं चत्तारि अंधगारं करेंति, तंजहा-णरगा, णेरइया, पावाइं कम्माइं, असुभा पोग्गला १।

तिरियलोगे णं चत्तारि उज्जोतं करेंति, तंजहा-चंदा, सूरा, मणी, जोती २।

उड्ढलोगे णं चत्तारि उज्जोतं करेंति, तंजहा-देवा, देवीओ, विमाणा, आभरणा ३।

॥ चउट्ठाणस्स ततिओ उद्देसओ समत्तो ॥

[टी०] रज्जुरिति क्षेत्रगणितमुक्तमिति क्षेत्रसम्बन्धाल्लोकलक्षणक्षेत्रस्य त्रिधा विभक्तस्यान्धकारोद्द्योतावाश्रित्य सूत्रत्रयेण प्ररूपणामाह– **अहे** इत्यादि सुगमानि, किन्तु **अधोलोके** उक्तलक्षणे **चत्वारि** वस्तूनीति गम्यते, **नरका** नारकावासाः, **नैरयिका** नारकाः, एते कृष्णस्वरूपत्वात् **अन्धकारं कुर्वन्ति, पापानि कर्माणि** ज्ञानावरणादीनि मिथ्यात्वाज्ञानलक्षणभावान्धकारकारित्वादन्धकारं कुर्वन्तीत्युच्यते, अथवा अन्धकारस्वरूपे अधोलोके प्राणिनामुत्पादकत्वेन पापानां कर्म्मणामन्धकारकर्तृत्वमिति, तथा **अशुभाः पुद्गलाः** तमिश्रभावेन परिणता इति । **मणि** त्ति मणयः चन्द्रकान्ताद्याः, **जोइ** त्ति ज्योतिरग्निरिति ।

॥ चतुःस्थानके तृतीयोद्देशकः समाप्तः ॥

[अथ चतुर्थ उद्देशकः]

[सू० ३३९] चत्तारि पसप्पगा पन्नत्ता, तंजहा-अणुप्पन्नाणं भोगाणं उप्पाएत्ता एगे पसप्पते, पुव्वुप्पन्नाणं भोगाणं अविप्पतोगेणं एगे पसप्पते, अणुप्पन्नाणं सोक्खाणं उप्पाएत्ता एगे पसप्पए, पुव्वुप्पन्नाणं सोक्खाणं अविप्पयोगेणं एगे पसप्पए ।

[टी०] व्याख्यातस्तृतीयोद्देशकः, तदनन्तरं चतुर्थ आरभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरोद्देशके विविधा भावाश्चतुःस्थानकतयोक्ता इहापि त एव तथोच्यन्त इत्येवंसम्बन्धस्यास्योद्देशकस्येदमादिसूत्रं **चत्तारि पसप्पगेत्यादि** । अस्य चानन्तरसूत्रेण सहाऽयं सम्बन्धः– अनन्तरसूत्रे देवा देव्यश्च निर्दिष्टाः, ते च भोगवन्तः सुखिताश्च भवन्तीति भोगान् सुखानि चाश्रित्य प्रसर्प्पकभेदाभिधानायेदमुच्यते, इत्येवंसम्बन्धस्यास्य व्याख्या– प्रकर्षेण सर्प्पन्ति गच्छन्ति भोगाद्यर्थं देशानुदेशं सञ्चरन्ति आरम्भ-परिग्रहतो वा विस्तारं यान्तीति **प्रसर्प्पकाः**, **अणुप्पन्नाणं** ति द्वितीयार्थे षष्ठीति **अनुत्पन्नान्** असम्पन्नान् **भोगान्** शब्दादीन् तत्कारणद्रविणा-ऽङ्गनादीन् वा **उप्पाएत्त** त्ति उत्पादयितुं सम्पादनाय अथवाऽनुत्पन्नानां भोगानामुत्पादयिता उत्पादकः सन् एकः कोऽपि **प्रसर्प्पति** प्रगच्छति, **प्रसर्पको** वा प्रगन्ता 'भवती'ति गम्यते, प्रसर्प्पन्ति च भोगाद्यर्थिनो देहिनः, उक्तं च–

धावेइ रोहणं तरइ सागरं भमइ गिरिनिगुंजेसु ।
मारेइ बंधवं पि हु पुरिसो जो होज्ज धणलुद्धो ॥
अडइ बहुं वहइ भरं सहइ छुहं पावमायरइ धट्ठो ।
कुल-सील-जातिपच्चयट्ठिइं च लोभहुओ चयइ ॥ [ ] त्ति ।

तथा **पूर्वोत्पन्नानां** पाठान्तरेण प्रत्युत्पन्नानां वा **अविप्पयोगेणं** ति अविप्रयोगाय रक्षणार्थमिति । **सौख्यानामिति** भोगसम्पाद्यानन्दविशेषाणाम्, शेषं सुगमम् ।

[सू० ३४०] णेरतिताणं चउव्विहे आहारे पन्नत्ते, तंजहा-इंगालोवमे, मुम्मुरोवमे, सीतले, हिमसीतले ।

तिरिक्खजोणियाणं चउव्विहे आहारे पन्नत्ते, तंजहा-कंकोवमे, बिलोवमे,

पाणमंसोवमे, पुत्तमंसोवमे १।

मणुस्साणं चउव्विहे आहारे पन्नत्ते, तंजहा-असणे जाव सातिमे २।

देवाणं चउव्विहे आहारे पन्नत्ते, तंजहा-वन्नमंते, गंधमंते, रसमंते, फासमंते ३।

[टी०] भोगसौख्यार्थं च प्रसर्प्पन्तः कर्म बद्ध्वा नारकत्वेनोत्पद्यन्त इति नारकानाहारतो निरूपयन्नाह– **नेरइयाण**मित्यादि व्यक्तम्, केवलम् **अङ्गारोपमः** अल्पकालदाहत्वात्, **मुर्मुरोपमः** स्थिरतरदाहत्वात्, **शीतलः** शीतवेदनोत्पादकत्वात्, **हिमशीतलो**-ऽत्यन्तशीतवेदनाजनकत्वात्, अधोऽध इति क्रम इति ।

आहाराधिकारात् तिर्यग्-मनुष्य-देवानामाहारनिरूपणाय सूत्रत्रयं **तिरिक्खजोणियाणं** त्ति सुगमम्, नवरं **कङ्कः** पक्षिविशेषः, तस्याहारेणोपमा यत्र स मध्यपदलोपात् **कङ्कोपमः**, अयमर्थः– यथा हि कङ्कस्य दुर्जरोऽपि स्वरूपेणाहारः सुखभक्ष्यः सुखपरिणामश्च भवति एवं यस्तिरश्चां सुभक्षः सुखपरिणामश्च स कङ्कोपम इति । तथा बिले प्रविशद् द्रव्यं बिलमेव, तेनोपमा यत्र स तथा, बिले हि अलब्धरसास्वादं झगिति यथा किल किञ्चित् प्रविशति एवं यस्तेषां गलबिले प्रविशति स तथोच्यते। **पाणो** मातङ्गः, तन्मांसमस्पृश्यत्वेन जुगुप्सया दुःखाद्यं स्यादेवं यस्तेषां दुःखाद्यः स **पाणमांसोपमः** । पुत्रमांसं तु स्नेहपरतया दुःखाद्यतरं स्यादेवं यो दुःखाद्यतरः स **पुत्रमांसोपमः**। क्रमेण चैते शुभ-समा-ऽशुभा-ऽशुभतरा वेदितव्याः । **देवाणं** त्ति **वर्णवा**नित्यादौ प्रशंसायामतिशायने वा मतुबिति ।

[सू० ३४१] चत्तारि जातिआसीविसा पन्नत्ता, तंजहा-विच्छुतजाइआसीविसे मंडुक्कजाइआसीविसे उरगजातिआसीविसे मणुस्सजातिआसीविसे । विच्छुयजातिआसीविसस्स णं भंते ! केवतिए विसए पन्नत्ते ?, पभू णं विच्छुयजातिआसीविसे अड्ढभरहप्पमाणमेत्तं बोंदिं विसेणं विसपरिणतं विसट्टमाणिं करेत्तए ? विसए से विसट्ठताए, नो चेव णं संपत्तीए करेंसु वा करेंति वा करेस्संति वा । मंडुक्कजातिआसीविसस्स पुच्छा, पभू णं मंडुक्कजातिआसीविसे भरहप्पमाणमेत्तं बोंदिं विसेणं विसपरिणयं विसट्टमाणिं, सेसं तं चेव जाव करेस्संति वा । उरगजातिपुच्छा, पभू णं उरगजातिआसीविसे

जंबूदीवप्पमाणमेत्तं बोंदिं विसेणं, सेसं तं चेव जाव करेस्संति वा । मणुस्सजातिपुच्छा, पभू णं मणुस्सजातिआसीविसे समयखेत्तप्पमाणमेत्तं बोंदि विसेणं विसपरिणतं विसट्टमाणिं करेत्तए ? विसते से विसट्ठताते, नो चेव णं जाव करेस्संति वा ।

[टी०] आहारो हि भक्षणीय इति भक्षणाधिकारादासीविषसूत्रम्, सुगमं चेदम्, नवरम् **आसीविस** त्ति **आस्यो** दंष्ट्रास्तासु विषं येषां ते आसीविषाः, ते च कर्मतो जातितश्च, तत्र कर्मतस्तिर्यङ्-मनुष्याः कुतोऽपि गुणादासीविषाः स्युः, देवाश्चा सहस्राराच्छापादिना परव्यापादनादिति, उक्तं च–

आसी दाढा तग्गयमहाविसाऽऽसीविसा दुविहभेया ।
ते कम्म-जाइभेएण णेगहा चउव्विहविगप्पा ॥ [विशेषाव० ७९१] इति ।

जातित आसीविषा **जात्यासीविषाः** वृश्चिकादयः । **केवइय** त्ति कियान् **विषयो** गोचरो विषस्येति गम्यते, **प्रभुः** समर्थः, **अर्द्धभरतस्य** यत् **प्रमाणं** सातिरेकत्रिषष्ट्यधिक-योजनशतद्वयलक्षणं तदेव **मात्रा** प्रमाणं यस्याः साऽर्द्धभरतप्रमाणमात्रा, तां **बोंदिं** शरीरं **विषेण** स्वकीयासीप्रभवेण करणभूतेन **विषपरिणतां** विषरूपापन्नां **विषपरि-गता**मिति क्वचित् पाठः, तद्व्याप्तामित्यर्थः, **विसट्टमाणिं** विकसन्तीं विदलन्तीं **कर्त्तुं** विधातुम् । **विषयः सः** गोचरोऽसौ, अथवा **से** तस्य वृश्चिकस्य, विषमेवार्थो **विषार्थ**स्तद्भावस्तत्ता तस्या **विषार्थतायाः** विषत्वस्य तस्यां वा, **नो चेव** त्ति नैवेत्यर्थः, **सम्पत्त्या** एवंविधबोन्दिसम्प्राप्तिद्वारेण, **करिंसु** त्ति अकार्षुर्वृश्चिका इति गम्यते, इह चैकवचनप्रक्रमेऽपि बहुवचननिर्देशो वृश्चिकासीविषाणां बहुत्वज्ञापनार्थम्, एवं **कुर्वन्ति करिष्यन्ति**, त्रिकालनिर्देशश्चामीषां त्रैकालिकत्वज्ञापनार्थः, **समयक्षेत्रं** मनुष्यक्षेत्रम् ।

[सू० ३४२] चउव्विहे वाही पन्नत्ते, तंजहा-वातिते, पित्तिते, सिंभिते, संनिवातिते ।

चउव्विहा तिगिच्छा पन्नत्ता, तंजहा-वेज्जो, ओसधाइं, आउरे, परिचारते।
चत्तारि तिगिच्छगा पन्नत्ता, तंजहा-आततिगिच्छते नाममेगे णो परतिगिच्छते

१, परतिगिच्छए नाममेगे ह्व [= ४] ।

[टी०] विषपरिणामो हि व्याधिरिति तदधिकाराद् व्याधिभेदानाह– **चउव्विहे**त्यादि सुगमम्, केवलं वातो निदानमस्येति **वातिकः**, एवं सर्वत्र, नवरं **सन्निपातः** संयोगो द्वयोस्त्रयाणां वेति, वातादिस्वरूपं चैतत्–

तत्र रूक्षो १ लघुः २ शीतः ३ खरः ४ सूक्ष्म ५ श्चलो ६ऽनिलः ।
पित्तं सस्नेह १ तीक्ष्णो २ ष्णं ३ लघु ४ विश्रं ५ सरं ६ द्रवम् ७ ॥
कफो गुरु १ हिंमः २ स्निग्धः ३ प्रक्लेदी ४ स्थिर ५ पिच्छिलः ६ ।
सन्निपातस्तु सङ्कीर्णलक्षणो द्व्यादिमीलकः ॥ [ ]

वातादीनां कार्याणि पुनरिमानि–

पारुष्यसङ्कोचनतोदशूलश्यामत्वमङ्गव्यथचेष्टभङ्गाः ।
सुप्तत्वशीतत्वखरत्वशोषाः कर्म्माणि वायोः प्रवदन्ति तज्ज्ञा : ॥
परिस्रवस्वेदविदाहरागा वैगन्ध्यसङ्क्लेदविपाककोपाः ।
प्रलापमूर्च्छाभ्रमिपीतभावाः पित्तस्य कर्म्माणि वदन्ति तज्ज्ञाः ॥
श्वेतत्वशीतत्वगुरुत्वकण्डूस्नेहोपदेहस्तिमितत्वलेपाः ।
उत्सेधसम्पातचिरक्रियाश्च कफस्य कर्म्माणि वदन्ति तज्ज्ञाः ॥ [ ] इति ।

अनन्तरं व्याधिरुक्तः, अधुना तस्यैव चिकित्सां चिकित्सकांश्च सूत्रद्वयेनाह– **चउव्विहे**त्यादि कण्ठ्यम्, नवरं **चिकित्सा** रोगप्रतीकारः, तस्याश्चातुर्विध्यं कारणभेदादिति, एतत्सूत्रसंवादकमुक्तमपरैरपि–

भिषग् १ द्रव्याण्यु २ पस्थाता ३ रोगी ४ पादचतुष्टयम् ।
चिकित्सितस्य निर्दिष्टम्, प्रत्येकं तच्चतुर्गुणम् ॥
दक्षो १ विज्ञातशास्त्रार्थो २ दृष्टकर्म्मा ३ शुचि ४ र्भिषक् ।
बहुकल्पं १ बहुगुणम् २ सम्पन्नं ३ योग्यमौषधम् ४ ॥
अनुरक्तः १ शुचि २ र्दक्षो ३ बुद्धिमान् ४ परिचारकः ।
आढ्यो १ रोगी भिषग्वश्यो २ ज्ञापकः ३ सत्त्ववानपि ४ ॥ [ ] इति ।

इयं द्रव्यरोगचिकित्सा, मोहभावरोगचिकित्सा त्वेवम्,–

निव्विगइ निब्बलोमे तवउद्धट्ठाणमेव उब्भामे ।
वेयावच्चाहिंडण मंडलि कप्पट्टियाहरणं ॥ [निशीथ० ५७४] ति,

निर्ब्बलं वल्लादि, **अवमम्** ऊनम्, **उद्भ्रामो** भिक्षाभ्रमणम्, **आहिंडणं** देशेषु, **मण्डली** सूत्रार्थयोः, **कप्पट्ठिया** श्रेष्ठिवधूरिति । चिकित्सका द्रव्यतो ज्वरादिरोगान् प्रति भावतो रागादीन् प्रतीति, तत्रात्मनो ज्वरादेः कामादेर्वा चिकित्सकः प्रतिकर्त्तेत्**यात्मचिकित्सक** इति ।

[सू० ३४३] चत्तारि पुरिसजाया पन्नत्ता, तंजहा-वणकरे णाममेगे नो वणपरिमासी, वणपरिमासी नाममेगे णो वणकरे, एगे वणकरे वि वणपरिमासी वि, एगे णो वणकरे णो वणपरिमासी ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-वणकरे नाममेगे णो वणसारक्खी ह्व [= ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-वणकरे नामं एगे णो वणसंरोही ह्व [= ४] ।

[टी०] अथात्मचिकित्सकान् भेदतः सूत्रत्रयेणाह– **चत्तारी**त्यादि कण्ठ्यम्, नवरं **व्रणं** देहे क्षतं स्वयं करोति रुधिरादिनिर्गालनार्थमिति व्रणकरः, **नो** नैव व्रणं परिमृशतीत्येवंशीलो **व्रणपरिमर्शी**त्येकः, अन्यस्त्वन्यकृतं व्रणं परिमृशति, न च तत् करोतीति, एवं **भावव्रणम्** अतिचारलक्षणं करोति कायेन, **न** च तदेव **परिमृशति** पुनः पुनः संस्मरणेन स्पृशति । अन्यस्तु तत् परिमृशत्यभिलाषान्न च करोति कायतः संसारभयादिभिरिति ।

व्रणं करोति न च तत् पट्टबन्धादिना संरक्षति, अन्यस्तु कृतं संरक्षति न च करोति, भावव्रणं त्वाश्रित्यातिचारं करोति न च तं सानुबन्धं भवन्तं कुशीलादिसंसर्ग-तन्निदानपरिहारतो रक्षत्येकः, अन्यस्तु पूर्वकृतातिचारं निदानपरिहारतो रक्षति नवं च न करोति ।

नो नैव व्रणं संरोहयत्यौषधदानादिनेति **व्रणसंरोही**, भावव्रणापेक्षया तु नो व्रणसंरोही प्रायश्चित्ताप्रतिपत्तेः, **व्रणसंरोही** पूर्वकृतातिचारप्रायश्चित्तप्रतिपत्त्या, **नो व्रणकरो**ऽपूर्वातिचाराकारित्वादिति ।

[सू० ३४४] चत्तारि वणा पन्नत्ता, तंजहा-अंतोसल्ले नाममेगे णो बाहिंसल्ले

४, १ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अंतोसल्ले णाममेगे णो बाहिंसल्ले ह्व [= ४], २ ।

चत्तारि वणा पन्नत्ता, तंजहा-अंतो दुट्ठे नामं एगे णो बाहिं दुट्ठे, बाहिं दुट्ठे नामं एगे नो अंतो दुट्ठे ह्व [= ४], ३ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अंतो दुट्ठे नाममेगे नो बाहिं दुट्ठे ह्व [= ४], ४ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सेजंसे णाममेगे सेजंसे, सेजंसे नाममेगे पावंसे, पावंसे णामं एगे सेजंसे, पावंसे णाममेगे पावंसे १ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-सेजंसे णाममेगे सेजंसे त्ति सालिसए, सेजंसे णाममेगे पावंसे त्ति सालिसते ह्व [= ४], २ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सेयंसे त्ति णाममेगे सेयंसे त्ति मन्नति, सेयंसे त्ति णाममेगे पावंसे त्ति मन्नति ह्व [= ४], ३ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सेयंसे णाममेगे सेयंसे त्ति सालिसते मन्नति, सेयंसे णाममेगे पावंसे त्ति सालिसते मन्नति ह्व [= ४], ४।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-आघवतित्ता णाममेगे णो परिभावतित्ता, परिभावतित्ता णाममेगे णो आघवतित्ता ह्व [= ४], ५ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-आघवतित्ता णाममेगे नो उंछजीविसंपन्ने, उंछजीविसंपन्ने णाममेगे णो आघवतित्ता ह्व [= ४], ६ ।

चउव्विहा रुक्खविगुव्वणा पन्नत्ता, तंजहा-पवालत्ताए, पत्तत्ताए, पुप्फत्ताए, फलत्ताए ।

[टी०] उक्ता आत्मचिकित्सकाः, अथ चिकित्स्यं व्रणं दृष्टान्तीकृत्य पुरुषभेदानाह– **चत्तारी**त्यादि चतुःसूत्री सुगमा, नवरम् **अन्तः** मध्ये **शल्यं** यस्य, अदृश्यमानमित्यर्थः तत्तथा १, **बाहिंसल्ले** त्ति यच्छल्यं व्रणस्यान्तरल्पं बहिस्तु बहु तद्बहिरिव बहिरित्युच्यते, अतो **बहिः शल्यं** यस्य तत्तथा, यदि पुनः सर्वथैव तत्ततो बहिः स्यात् तदा शल्यतैव न स्याद्, उद्धृतत्वे वा भूतभावितया स्यादपीति २, यत्र पुनरन्तर्बहु बहिरप्युपलभ्यते तदुभयशल्यम् ३, चतुर्थः शून्य इति ४ । गुरुसमक्षमनालोचितत्वेनाऽन्तः **शल्यम्**

अतिचाररूपं यस्य स तथा, बहिः शल्यम् आलोचिततया यस्य स तथा, अन्तर्बहिश्च शल्यमालोचितानालोचितत्वेन यस्य स तथा, चतुर्थः शून्यः ।

अन्तर्दुष्टं व्रणं लूतादिदोषतः, **न बही** रागाद्यभावेन सौम्यत्वात् ४, पुरुषस्तु **अन्तर्दुष्टः** शठतया संवृताकारत्वान्न **बहि**रित्येकः, अन्यस्तु कारणेनोपदर्शितवाक्-पारुष्यादित्वाद् बहिरेवेति ४।

पुरुषाधिकारात् तद्भेदप्रतिपादनाय षट्सूत्री कण्ठ्या च, किन्तु अतिशयेन प्रशस्यः **श्रेयानेकः** प्रशस्यभावः सद्बोधत्वात्, पुनः **श्रेयान्** प्रशस्तानुष्ठानत्वात् साधुवदित्येकः १, अन्यस्तु **श्रेयांस्तथैव**, अतिशयेन पापः **पापीयान्**, स चाविरतत्वेन दुरनुष्ठायित्वादिति २, अन्यस्तु **पापीयान्** भावतो मिथ्यात्वादिभिरुपहतत्वात् कारणवशात् सदनुष्ठायित्वाच्च **श्रेयान् उदायिनृपमारक**वत् ३, चतुर्थः स एव कृतपाप इति ४ । अथवा **श्रेयान्** गृहस्थत्वे निष्क्रमणकाले वा, पुनः **श्रेयान्** प्रव्रज्यायां विहारकाले वेत्येवमन्येऽपि ।

श्रेयानेको भावतो द्रव्यतस्तु **श्रेयान्** प्रशस्यतर **इत्ये**वंबुद्धिजनकत्वेन **सदृशकः** अन्येन श्रेयसा तुल्यो न तु सर्वथा श्रेयानेवेत्येकः १, अन्यस्तु भावतः **श्रेयान**पि द्रव्यतः **पापीयानित्ये**वंबुद्धिजनकत्वेन **सदृशकः** अन्येन पापीयसा समानो न तु पापीयानेवेति द्वितीयः २, भावतः **पापीयान**प्यन्यः संवृताकारतया **श्रेयानित्येवं**बुद्धि [जकनत्वेन] **सदृशको**ऽन्येन श्रेयसेति तृतीयः ३, चतुर्थः सुज्ञानः ४।

श्रेयानेकः सद्वृत्तत्वात् **श्रेया**नित्येवमात्मानं मन्यते यथावद् बोधात् लोकेन वा मन्यते विशदशुभानुष्ठानाद्, इह च **मन्निज्जइ** त्ति वक्तव्ये प्राकृतत्वेन **मन्नइ** इत्युक्तम् १, श्रेयानप्यन्य आत्मन्यरुचिपरायणत्वात् पापीयानित्यात्मानं मन्यते, स एव वा पूर्वोपलब्धतद्दोषेण जनेन मन्यते **दृढप्रहारि**वत् २, पापीयानप्यपरो मिथ्यात्वाद्युपहततया श्रेयानित्यात्मानं मन्यते, कुतीर्थिकवत्, तद्भक्तेन वेति ३, **पापीया**नन्योऽविरतिकत्वात् **पापीया**नित्यात्मानं **मन्यते**, सद्बोधत्वात्, असंयतो वा मन्यते संयतलोकेनेति ४ ।

श्रेयानेको भावतो द्रव्यतस्तु किञ्चित्सदनुष्ठायित्वात् **श्रेयानित्ये**वंविकल्पजनकत्वेन **सदृशको**ऽन्येन श्रेयसा **मन्यते** ज्ञायते जनेनेति, विभक्तिपरिणामाद्वा सदृशकमात्मानं मन्यत इति, एवं शेषाः ।

आघवइत्तेति **आख्यायकः** प्रज्ञापकः प्रवचनस्य एकः कश्चिन्न च **प्रविभावयिता** प्रभावकः शासनस्य उदारक्रिया-प्रतिभादिरहितत्वात्, प्रविभाजयिता वा प्रवचनार्थस्य नयोत्सर्गादिभिर्विवेचयितेति । **आख्यायक** एकः सूत्रार्थस्य **न चोञ्छजीविकासम्पन्नो** नैषणादिनिरत इत्यर्थः, स चापद्गतः संविग्नः संविग्नपाक्षिको वा, इत्येकः, द्वितीयो यथाच्छन्दः, तृतीयः साधुः, चतुर्थो गृहस्थादिरिति ।

पूर्वसूत्रे साधुलक्षणपुरुषस्याख्यायकत्वोञ्छजीविकासम्पन्नत्वलक्षणा गुणविभूषोक्ता अधुना तत्साम्याद् वृक्षविभूषामाह– **चउव्विहे**त्यादि, अथवा पूर्वमुञ्छजीविकासंपन्नः साधुपुरुष उक्तः, तस्य च वैक्रियलब्धिमतस्तथाविधप्रयोजने वृक्षं विकुर्वतो यद्विधा तद्विक्रिया स्यात्तामाह– **चउव्विहे**त्यादि पातनयैवोक्तार्थम्, नवरं **प्रवालतये**ति नवाङ्कुरतयेत्यर्थः ।

[सू० ३४५] चत्तारि वादिसमोसरणा पन्नत्ता, तंजहा-किरियावादी, अकिरियावादी, अण्णाणियवादी, वेणइयवादी ।

णेरइयाणं चत्तारि वादिसमोसरणा पन्नत्ता, तंजहा-किरियावादी जाव वेणतियवादी, एवमसुरकुमाराण वि जाव थणितकुमाराणं, एवं विगलिंदियवज्जं जाव वेमाणियाणं ।

[टी०] एते हि पूर्वोक्ता आख्यायकादयः पुरुषास्तीर्थिका इति तेषां स्वरूपाभिधानायाह– **चत्तारी**त्यादि । **वादिनः** तीर्थिकाः, समवसरन्ति अवतरन्त्येष्विति **समवसरणानि** विविधमतमीलकाः, तेषां समवसरणानि **वादिसमवसरणानि**, क्रियां 'जीवाजीवादिरर्थोऽस्ती'त्येवंरूपां वदन्तीति **क्रियावादिन** आस्तिका इत्यर्थः, तेषां यत् समवसरणं तत्त एवोच्यन्ते अभेदादिति, तन्निषेधा**दक्रियावादिनो** नास्तिका इत्यर्थः, अज्ञानमभ्युपगमद्वारेण येषामस्ति ते **अज्ञानिकाः**, त एव वादिनोऽ**ज्ञानिकवादिनः**, अज्ञानमेव श्रेय इत्येवंप्रतिज्ञा इत्यर्थः, विनय एव वैनयिकम्, तदेव निःश्रेयसायेत्येवंवादिनो **वैनयिकवादिन** इति, एतद्भेदसङ्ख्या चेयम्–

असियसयं किरियाणं अकिरियवाईण होइ चुलसीई ।
अन्नाणिय सत्तट्ठी वेणइयाणं च बत्तीसा ॥ [सूत्र० नि० ११९] इति विस्तरो वृत्तौ ।

एतान्येव समवसरणानि चतुर्विंशतिदण्डके निरूपयन्नाह– **नेरइयाणमित्यादि** सुगमम्, नवरं नारकादिपञ्चेन्द्रियाणां समनस्कत्वाच्चत्वार्यप्येतानि सम्भवन्ति, **विगलेंदियवज्जं** ति एक-द्वि-त्रि-चतुरिन्द्रियाणाममनस्कत्वान्न सम्भवन्ति तानीति ।

[सू० ३४६] चत्तारि मेहा पन्नत्ता, तंजहा-गज्जित्ता णाममेगे णो वासित्ता, वासित्ता णाममेगे णो गज्जित्ता, एगे गज्जित्ता वि वासित्ता वि, एगे णो गज्जित्ता णो वासित्ता १ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गज्जित्ता णाममेगे णो वासित्ता ह्व [= ४], २ ।

चत्तारि मेहा पन्नत्ता, तंजहा-गज्जित्ता णाममेगे णो विज्जुयाइत्ता, विज्जुयाइत्ता णाममेगे ह्व [= ४], ३ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-गज्जित्ता णाममेगे णो विज्जुयाइत्ता ह्व [= ४], ४ ।

चत्तारि मेहा पन्नत्ता, तंजहा-वासित्ता णाममेगे णो विज्जुयाइत्ता ह्व [= ४], ५ । एवामेव चत्तारि पुरिसजाता [पन्नत्ता, तंजहा-]वासित्ता णाममेगे णो विज्जुयाइत्ता ह्व [= ४], ६ ।

चत्तारि मेहा पन्नत्ता, तंजहा-कालवासी णाममेगे णो अकालवासी ह्व [= ४], ७ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-कालवासी णाममेगे नो अकालवासी ह्व [= ४], ८ ।

चत्तारि मेहा पन्नत्ता, तंजहा-खेत्तवासी णाममेगे णो अखेत्तवासी ह्व [= ४], ९ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-खेत्तवासी णाममेगे णो अखेत्तवासी ह्व [= ४], १० ।

चत्तारि मेहा पन्नत्ता, तंजहा-जणतित्ता णाममेगे णो णिम्मवतित्ता, णिम्मवतित्ता णाममेगे णो जणतित्ता ह्व [= ४], ११ । एवामेव चत्तारि अम्मापियरो पन्नत्ता, तंजहा-जणतित्ता णाममेगे णो णिम्मवतित्ता ह्व [= ४], १२ ।

चत्तारि मेहा पन्नत्ता, तंजहा-देसवासी णाममेगे णो सव्ववासी ह्व [= ४], १३ । एवामेव चत्तारि रायाणो पन्नत्ता, *तंजहा-देसाधिवती णाममेगे*

णो सव्वाधिवती ह्व [= ४], १४ ।

[सू० ३४७] चत्तारि मेहा पन्नत्ता, तंजहा-पुक्खलसंवट्टते, पज्जुन्ने, जीमूते, झिम्मे । पुक्खलसंवट्टते णं महामेहे एगेणं वासेणं दस वाससहस्साइं भावेति, पज्जुन्ने णं महामेहे एगेणं वासेणं दस वाससताइं भावेति, जीमूते णं महामेहे एगेणं वासेणं दस वासाइं भावेति, झिम्मे णं महामेहे बहूहिं वासेहिं एगं वासं भावेति वा ण वा भावेति १५ ।

[सू० ३४८] चत्तारि करंडगा पन्नत्ता, तंजहा-सोवागकरंडते, वेसिताकरंडते, गाहावतिकरंडते, रायकरंडते १६ । एवामेव चत्तारि आयरिया पन्नत्ता, तंजहा-सोवागकरंडगसमाणे, वेसिताकरंडगसमाणे, गाहावतिकरंडगसमाणे, रायकरंडगसमाणे १७ ।

[सू० ३४९] चत्तारि रुक्खा पन्नत्ता, तंजहा-साले नाममेगे सालपरियाते, साले नाममेगे एरंडपरियाए, एरंडे नामं एगे सालपरियाए, एरंडे नामं एगे एरंडपरियाए, १८ । एवामेव चत्तारि आयरिया पन्नत्ता, तंजहा-साले णाममेगे सालपरिताते, साले णाममेगे एरंडपरिताते, एरंडे णाममेगे० ह्व [= ४], १९।

चत्तारि रुक्खा पन्नत्ता, तंजहा-साले णाममेगे सालपरियाले, साले णामं एगे एरंडपरियाले, एरंडे नामं एगे ह्व [= ४], २० । एवामेव चत्तारि आयरिया पन्नत्ता, तंजहा-साले नाममेगे सालपरियाले, साले णामं एगे एरंडपरियाले ह्व [= ४], २१।

सालदुममज्झयारे जह साले णाम होति दुमराया ।
इय सुंदर आयरिए सुंदरसीसे मुणेतव्वे ॥२२॥
एरंडमज्झयारे जह साले णाम होति दुमराया ।
इय सुंदर आयरिए मंगुलसीसे मुणेयव्वे ॥२३॥
सालदुममज्झयारे एरंडे णाम होति दुमराया ।
इय मंगुल आयरिए सुंदरसीसे मुणेयव्वे ॥२४॥
एरंडमज्झयारे एरंडे णाम होइ दुमराया ।

इय मंगुल आयरिए मंगुलसीसे मुणेयव्वे ॥२५॥

[सू० ३५०] चत्तारि मच्छा पन्नत्ता, तंजहा-अणुसोतचारी, पडिसोतचारी, अंतचारी, मज्झचारी २२ । एवामेव चत्तारि भिक्खागा पन्नत्ता, तंजहा-अणुसोयचारी, पडिसोयचारी, अंतचारी, मज्झचारी २३ ।

चत्तारि गोला पन्नत्ता, तंजहा-मधुसित्थगोले, जउगोले, दारुगोले, मट्टियागोले २४ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मधुसित्थगोलसमाणे ह्व [= ४], २५ ।

चत्तारि गोला पन्नत्ता, तंजहा-अयगोले, तउगोले, तंबगोले, सीसगोले २६ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-अयगोलसमाणे जाव सीसगोलसमाणे २७ ।

चत्तारि गोला पन्नत्ता, तंजहा-हिरण्णगोले, सुवन्नगोले, रयणगोले, वइरगोले २८ । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-हिरण्णगोलसमाणे जाव वइरगोलसमाणे २९ ।

चत्तारि पत्ता पन्नत्ता, तंजहा-असिपत्ते, करपत्ते, खुरपत्ते, कलंबचीरितापत्ते ३० । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-असिपत्तसमाणे जाव कलंबचीरितापत्तसमाणे ३१ ।

चत्तारि कडा पन्नत्ता, तंजहा-सुंठकडे, विदलकडे, चम्मकडे, कंबलकडे ३२। एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-सुंठकडसमाणे जाव कंबलकडसमाणे ३३ ।

[सू० ३५१] चउव्विहा चउप्पया पन्नत्ता, तंजहा-एगखुरा, दुखुरा, गंडीपदा, सणप्फदा ३४ ।

चउव्विहा पक्खी पन्नत्ता, तंजहा-चम्मपक्खी, लोमपक्खी, समुग्गपक्खी, वितपक्खी ३५ ।

चउव्विहा खुद्दपाणा पन्नत्ता, तंजहा-बेइंदिया, तेइंदिया, चउरिंदिया, संमुच्छिमपंचिंदियतिरिक्खजोणिया ३६ ।

[सू० ३५२] चत्तारि पक्खी पन्नत्ता, तंजहा-णिवतित्ता णाममेगे नो परिवतित्ता, परिवतित्ता नामं एगे नो निवतित्ता, एगे निवतित्ता वि परिवतित्ता वि, एगे नो निवतित्ता नो परिवतित्ता ३७ । एवामेव चत्तारि भिक्खागा पन्नत्ता, तंजहा-णिवतित्ता णाममेगे नो परिवतित्ता ह्व [= ४], ३८ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-णिक्कट्ठे णाममेगे णिक्कट्ठे, निक्कट्ठे नाममेगे अणिक्कट्ठे ह्व [= ४], ३९ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-णिक्कट्ठे णाममेगे णिक्कट्ठप्पा, णिक्कट्ठे नाममेगे अणिक्कट्ठप्पा ह्व [= ४], ४० ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-बुहे नाममेगे बुहे, बुहे नाममेगे अबुहे ह्व [= ४], ४१ ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-बुधे नाममेगे बुधहियए ह्व [= ४], ४२ ।

चत्तारि पुरिसजाया पन्नत्ता, तंजहा-आताणुकंपते णाममेगे नो पराणुकंपते ह्व [= ४], ४३ ।

[**टी०**] पुरुषाधिकारात् पुरुषविशेषप्रतिपादनाय प्रायः सदृष्टान्तसूत्राणि पुरुषसूत्राणि त्रिचत्वारिंशतं **चत्तारि मेहेत्यादीन्याह**, सुगमानि, नवरं **मेघाः** पयोदाः । **गर्जिता** गर्जिकृत् **नो वर्षिता** न प्रवर्षणकारीति १ । एवं कश्चित् पुरुषो गर्जितेव **गर्जिता** दान-ज्ञान-व्याख्याना-ऽनुष्ठान-शत्रुनिग्रहादिविषये उच्चैः प्रतिज्ञावान् **नो** नैव वर्षितेव **वर्षिता** वर्षकोऽभ्युपगतसम्पादक इत्यर्थः, अन्यस्तु कार्यकर्त्ता न चोच्चैः प्रतिज्ञावानिति, एवमितरावपि नेयाविति २ ।

विज्जुयाइत्त त्ति विद्युत्कर्त्ता ३ । एवं पुरुषोऽपि कश्चिदुच्चैः प्रतिज्ञाता न च विद्युत्कारतुल्यस्य दानादिप्रतिज्ञातार्थारम्भाडम्बरस्य कर्त्ता, अन्यस्तु आरम्भाडम्बरस्य कर्त्ता न प्रतिज्ञातेति, एवमन्यावपीति ४ । वर्षिता कश्चिद् दानादिभिर्न तु तदारम्भाडम्बरकर्त्ता, अन्यस्तु विपरीतोऽन्य उभयथाऽन्यो न किञ्चिदिति ५-६ ।

कालवर्षी अवसरवर्षीति, एवमन्येऽपि ७ । पुरुषस्तु कालवर्षीव कालवर्षी अवसरे

दान-व्याख्यानादिपरोपकारार्थप्रवृत्तिक एकः, अन्यस्त्वन्यथेति, एवं शेषौ ८ । **क्षेत्रं** धान्याद्युत्पत्तिस्थानम् ९ । पुरुषस्तु क्षेत्रवर्षीव **क्षेत्रवर्षी** पात्रे दान-श्रुतादीनां निक्षेपकः, अन्यो विपरीतः, अन्यस्तथाविधविवेकविकलतया महौदार्यात् प्रवचनप्रभावनादिकारणतो वा उभयस्वरूपः, अन्यस्तु दानादावप्रवृत्तिक इति १० । **जनयिता** मेघो यो वृष्ट्या धान्यमुद्गमयति, **निर्म्मापयिता** तु यो वृष्ट्यैव सफलतां नयतीति ११ । एवं मातापितरावपीति प्रसिद्धम्, एवमाचार्योऽपि शिष्यं प्रत्युपनेतव्य इति १२ ।

विवक्षितभरतादिक्षेत्रस्य प्रावृडादिकालस्य वा देशे आत्मनो वा देशेन वर्षतीति **देशवर्षी** १ । यस्तु तयोः सर्वयोः सर्वात्मना वा वर्षति स **सर्ववर्षी** २ । यस्तु क्षेत्रतो देशे कालतः सर्वत्रात्मनो वा सर्वः २, अथवा कालतो देशे क्षेत्रतः सर्वत्र ३ आत्मनो वा सर्वः ४, अथवा आत्मनो देशेन क्षेत्रतः ५, कालतो वा सर्वत्र ६, अथवा क्षेत्र-कालतो देशेन आत्मनः सर्वः ७, अथवा क्षेत्रतो देशे, आत्मनो देशेन कालतः सर्वत्र ८, अथवा कालतो देशे आत्मनो देशेन क्षेत्रतः सर्वत्रे ९ त्येवं नवभिर्विकल्पैर्वर्षति स देशवर्षी सर्ववर्षी चेति ३ । चतुर्थः सुज्ञान इति १३ । राजा तु यो विवक्षितक्षेत्रस्य मेघवद्देश एव योग-क्षेमकारितया प्रभवति स देशाधिपतिर्न सर्वाधिपतिः स च पल्लीपत्यादिः, यस्तु न पल्ल्यादौ देशेऽन्यत्र तु सर्वत्र प्रभवति स सर्वाधिपतिर्न देशाधिपतिः, यस्तूभयत्र स उभयाधिपतिः, अथवा देशाधिपतिर्भूत्वा सर्वाधिपतिर्यो भवति **वासुदेवा**दिवत् स देशाधिपतिश्च सर्वाधिपतिश्चेति, चतुर्थो राज्यभ्रष्ट इति १४ ।

पुक्खलेत्यादि, **एगेणं वासेणं** ति एकया वृष्ट्या **भावयती**ति उदकस्नेहवतीं करोति, धान्यादिनिष्पादनसमर्थामिति यावत्, भुवमिति गम्यते । **जिह्म**स्तु बहुभिर्वर्षणैरेकमेव **वर्षम्** अब्दं यावत् भुवं **भावयति नैव वा भावयति** रूक्षत्वात्तज्जलस्येति १५। अत्रान्तरे मेघानुसारेण पुरुषाः पुष्कलावर्त्तसमानादयः पुरुषाधिकारत्वात् अभ्यूह्या इति, तत्र सकृदुपदेशेन दानेन वा प्रभूतकालं यावच्छुभस्वभावमीश्वरं वा देहिनं यः करोत्यसावाद्यमेघसमानः, एवं स्तोकतर-स्तोकतमकालापेक्षया द्वितीय-तृतीयमेघसमानौ, असकृदुपदेशादिना देहिनमल्पकालं यावदुपकुर्वन्ननुपकुर्वन् वा चतुर्थमेघसमान इति ।

करण्डको वस्त्राभरणादिस्थानं जनप्रतीतः, **श्वपाककरण्डकः** चाण्डालकरण्डकः, स च प्रायश्चर्म्मपरिकर्म्मोपकरणवर्ध्रादिचर्मांशस्थानतया अत्यन्तमसारो भवति, **वेश्याकरण्डक**स्तु जतुपूरितस्वर्णाभरणादिस्थानत्वात् किञ्चित्ततः सारोऽपि वक्ष्यमाणकरण्डकापेक्षया त्वसार एवेति, **गृहपतिकरण्डकः** श्रीमत्कौटुम्बिककरण्डकः, स च विशिष्टमणि-सुवर्णाभरणादियुक्तत्वात् सारतरः, **राजकरण्डक**स्तु अमूल्यरत्नादि-भाजनत्वात् सारतम इति १६, एवमाचार्यो यः **षट्प्रज्ञक-गाथादि**रूपसूत्रार्थधारी विशिष्टक्रियाविकलश्च स प्रथमः अत्यन्तासारत्वात्, यस्तु दुरधीतश्रुतलवोऽपि वागाडम्बरेण मुग्धजनमावर्जयति स द्वितीयः परीक्षाऽक्षमतया असारत्वादेव, यस्तु स्वसमय-परसमयज्ञः क्रियादिगुणयुक्तश्च स तृतीयः सारतरत्वात्, यस्तु समस्ताचार्यगुणयुक्ततया तीर्थकरकल्पः स चतुर्थः सारतमत्वात् **सुधर्मा**दिवदिति १७ ।

सालो नामैकः सालाभिधानवृक्षजातियुक्तत्वात्, सालस्यैव **पर्याया** धर्म्मा बहलच्छायत्वा-ऽऽसेव्यत्वादयो यस्य सः **सालपर्याय** इत्येकः, **सालो नामैक** इति तथैव एरण्डस्येव पर्याया धर्मा अबहलच्छायत्वा-ऽसेव्यत्वादयो यस्य स **एरण्डपर्याय** इति द्वितीयः, **एरण्डो नामैक** एरण्डाभिधानवृक्षजातीयत्वात् **सालपर्यायो** बहलच्छायत्वादिधर्म्मयुक्तत्वादिति तृतीयः, **एरण्डो नामैक**स्तथैव **एरण्डपर्यायः** अबहलच्छायत्वाद्येरण्डधर्म्मयुक्तत्वादिति चतुर्थः १८, आचार्यस्तु साल इव सालः, यथा हि **सालः** जातिमानेवमाचार्योऽपि यः सत्कुलः सद्गुरुकुलश्च स साल एवोच्यते, तथा **सालपर्यायः** सालधर्म्मा, यथा हि सालः सच्छायत्वादिधर्म्मयुक्त एवं यो ज्ञान-क्रियाप्रभवयशःप्रभृतिगुणयुक्तो भवति स तथोच्यते इत्येकः, तथा **सालो नामैक** इति तथैव, **एरण्डपर्याय**स्तूक्तविपर्ययादिति द्वितीयः, एवमितरावपीति १९, तथा **साल**स्तथैव, **साल** एव **परिवारः** परिकरो यस्य स **सालपरिवारः**, एवं शेषत्रयमिति २०, आचार्यस्तु साल इव **सालो** गुरुकुल-श्रुतादिभिरुत्तमत्वात्, **सालपरिवारः** सालकल्प-महानुभावसाधुपरिकरत्वात्, तथा **एरण्डपरिवारः** एरण्डकल्पनिर्गुणसाधुपरिकरत्वात्, एवमेरण्डोऽपि श्रुतादिभिर्हीनत्वादिति, चतुर्थः सुज्ञानः। उक्तचतुर्भङ्ग्या एव भावनार्थं **सालदुमे**त्यादि गाथाचतुष्कं व्यक्तम्, नवरं **मङ्गुलम्** असुन्दरम् २१ ।

अणुसोय त्ति अनुश्रोतसा चरतीत्य**नुश्रोतश्चारी** नद्यादिप्रवाहगामी, एवमन्ये त्रयः २२, एवं **भिक्षाकः** साधुः, यो ह्यभिग्रहविशेषादुपाश्रयसमीपात् क्रमेण कुलेषु भिक्षते सोऽनुश्रोतश्चारिमत्स्यवदनुश्रोतश्चारी प्रथमः, यस्तूत्क्रमेण गृहेषु भिक्षमाण उपाश्रयमायाति स द्वितीयः, यस्तु क्षेत्रान्तेषु भिक्षते स तृतीयः, क्षेत्रमध्ये चतुर्थः २३ ।

मधुसिक्थं मदनम्, तस्य **गोलो** वृत्तपिण्डो **मधुसिक्थगोलः**, एवमन्येऽपि, नवरं **जतु** लाक्षा, **दारु-मृत्तिके** प्रसिद्धे इति २४, यथैते गोला मृदु-कठिन-कठिनतर-कठिनतमाः क्रमेण भवन्त्येवं ये पुरुषाः परीषहादिषु मृदु-दृढ-दृढतर-दृढतमसत्त्वा भवन्ति ते मधुसिक्थगोलसमाना इत्यादिभिर्व्यपदेशैर्व्यपदिश्यन्त इति २५ ।

अयोगोलादयः प्रतीताः २६, एतैश्चायोगोलकादिभिः क्रमेण गुरु-गुरुतर-गुरुतमा-ऽत्यन्तगुरुभिः आरम्भादिविचित्रप्रवृत्त्युपार्जितकर्म्मभारा ये पुरुषा भवन्ति तेऽयोगोलसमाना इत्यादिव्यपदेशवन्तो भवन्ति पितृ-मातृ-पुत्र-कलत्रगतस्नेहभारतो वेति २७ । हिरण्यादिगोलेषु क्रमेणाल्पगुण-गुणाधिक-गुणाधिकतर-गुणाधिकतमेषु पुरुषाः समृद्धितो ज्ञानादिगुणतो वा समानतया योज्याः २९ ।

पत्राणि पर्णानि, तद्वत् प्रतनुतया यानि अस्यादीनि तानि पत्राणीति, **असिः** खड्गः, स एव पत्र**मसिपत्रम्**, **करपत्रं** क्रकचं येन दारु छिद्यते, **क्षुरः** छुरः, स एव पत्रं **क्षुरपत्रम्**, **कदम्बचीरिके**ति शस्त्रविशेष इति ३०, तत्र द्राक् छेदकत्वादसेर्यः पुरुषो द्रागेव स्नेहपाशं छिनत्ति सोऽसिपत्रसमानः, अवधारितदेववचन**सनत्कुमार**चक्रवर्त्तिवत्, यस्तु पुनः पुनरुच्यमानो भावनाभ्यासात् स्नेहतरुं छिनत्ति स करपत्रसमानः, तथाविधश्रावकवत्, करपत्रस्य हि गमनागमनाभ्यां कालक्षेपेण छेदकत्वादिति, यस्तु श्रुतधर्म्ममार्गोऽपि सर्वथा स्नेहच्छेदासमर्थो देशविरतिमात्रमेव प्रतिपद्यते स क्षुरपत्रसमानः, क्षुरो हि केशादिकमल्पमेव छिनत्तीति, यस्तु स्नेहच्छेदं मनोरथमात्रेणैव करोति स चतुर्थः अविरतसम्यग्दृष्टिरिति, अथवा यो गुर्वादिषु शीघ्र-मन्द-मन्दतर-मन्दतमतया स्नेहं छिनत्ति स एवमपदिश्यते ३१ ।

कम्बादिभिरातान-वितानभावेन निष्पाद्यते यः स कटः, कट इव कट इत्युपचारात् तन्त्वादिमयोऽपि कट एवेति, तत्र **सुंबकडे** त्ति तृणविशेषनिष्पन्नः, **विदलकडे** त्ति

वंशशकलकृतः, **चम्मकडे** त्ति वद्ध्रव्यूतमञ्चकादिः, **कंबलकडे** त्ति कम्बलमेवेति ३२। एतेषु चाल्प-बहु-बहुतर-बहुतमावयवप्रतिबन्धेषु पुरुषा योजनीयाः, तथाहि-यस्य गुर्वादिष्वल्पः प्रतिबन्धः स्वल्पव्यलीकादिनापि विगमात् स सुंबकटसमान इत्येवं सर्वत्र भावनीयमिति ३३ ।

चतुष्पदाः स्थलचरपञ्चेन्द्रियतिर्यञ्चः, एकः खुरः पादे पादे येषां ते **एकखुराः** अश्वादयः, एवं **द्वौ खुरौ** येषां ते तथा, ते च गवादयः, **गण्डी** सुवर्णकारादीनामधिकरणी गण्डिका, तद्वत् **पदानि** येषां ते तथा, ते च हस्त्यादयः, **सणप्फय** त्ति सनखपदाः **नाखराः** सिंहादयः, इहोत्तरसूत्रद्वये च जीवानां पुरुषशब्दवाच्यत्वात् पुरुषाधिकार एवेति ३४। चर्ममयपक्षाः पक्षिणश्चर्म्मपक्षिणो वल्गुलीप्रभृतयः, एवं **लोमपक्षिणो** हंसादयः, समुद्गकवत् पक्षौ येषां ते **समुद्गकपक्षिणः**, समासान्त इन्, ते च बहिर्द्वीप-समुद्रेषु, एवं विततपक्षिणोऽपीति ३५ ।

क्षुद्रा अधमा अनन्तरभवे सिद्ध्यभावात् **प्राणा** उच्छ्वासादिमन्तः **क्षुद्रप्राणाः**, संमूर्च्छेन निर्वृत्ताः **सम्मूर्च्छिमाः**, तिरश्चां सत्का योनिर्येषां ते तथा, ततः पदत्रयस्य कर्मधारये सति **सम्मूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिका** इति भवति ३६ ।

निपतिता नीडादवतरीता अवतरीतुं शक्तो नामैकः पक्षी धृष्टत्वादज्ञत्वाद्वा **न तु परिव्रजिता** न परिव्रजितुं शक्तो बालत्वादित्येकः, एवमन्यः परिव्रजितुं शक्तः पुष्टत्वान्न तु **निपतितुं** भीरुत्वात्, अन्यस्तूभयथा, चतुर्थस्तूभयप्रतिषेधवानतिबालत्वादिति ३७। **निपतिता** भिक्षाचर्यायामवतरीता भोजनाद्यर्थित्वान्न **तु परिव्रजिता** परिभ्रमको ग्लानत्वादलसत्वाल्लज्जालुत्वाद्वेत्येकः, अन्यः **परिव्रजिता** परिभ्रमणशील आश्रयान्निर्गतः सन् **न तु निपतिता** भिक्षार्थमवतरीतुमशक्तः सूत्रार्थासक्तत्वादिना, शेषौ स्पष्टौ ३८।

निष्कृष्टः निष्कर्षितः तपसा कृशदेह इत्यर्थः, पुन**र्निष्कृष्टो** भावतः कृशीकृत-कषायत्वादेवमन्ये त्रय इति ३९। एतद्भावनार्थमेवानन्तरं सूत्रम्-**निष्कृष्टः** कृशशरीरतया, तथा **निष्कृष्टः आत्मा** कषायादिनिर्म्मथनेन यस्य स तथेत्येवमन्ये त्रय इति। अथवा निष्कृष्टस्तपसा कृशीकृतः पूर्वं पश्चादपि तथैवेत्येवमाद्यसूत्रं व्याख्येयम्, द्वितीयं तु यथोक्तमेवेति ४० । **बुधो** बुधत्वकार्यभूतसत्क्रियायोगात्, उक्तं च–

पठकः पाठकश्चैव ये चान्ये तत्त्वचिन्तकाः ।
सर्वे ते व्यसनिनो राजन् ! यः क्रियावान् स पण्डितः ॥ [ ] इति ।

पुनर्बुधः सविवेकमनस्त्वादित्येकः । अन्यो बुधस्तथैव, अबुधस्त्वविविक्तमनस्त्वात् । अपरस्त्वबुधोऽसत्क्रियत्वात्, बुधो विवेकविविक्तचित्तत्वात् । चतुर्थ उभयनिषेधादिति ४१ । अनन्तरसूत्रेणैतदेव व्यक्तीक्रियते- **बुधः** सत्क्रियत्वात् बुधं **हृदयं** मनो यस्य स **बुधहृदयो** विवेचकमनस्त्वात्, अथवा बुधः शास्त्रज्ञत्वात् बुधहृदयस्तु कार्येष्वमूढ-लक्षत्वादित्येकः, एवमन्ये त्रय ऊह्याः ४२ ।

आत्मानुकम्पकः आत्महितप्रवृत्तः प्रत्येकबुद्धो जिनकल्पिको वा परानपेक्षो वा निर्घृणः, **परानुकम्पको** निष्ठितार्थतया तीर्थकरः आत्मानपेक्षो वा दयैकरसो **मेतार्य**वत्, उभयानुकम्पकः स्थविरकल्पिकः, उभयाननुकम्पकः पापात्मा **कालशौकरिका**दिरिति ४३ ।

[सू० ३५३] चउव्विहे संवासे पन्नत्ते, तंजहा-दिव्वे, आसुरे, रक्खसे, माणुसे १ ।

चउव्विधे संवासे पन्नत्ते, तंजहा-देवे णाममेगे देवीए सद्धिं संवासं गच्छति, देवे नाममेगे असुरीए सद्धिं संवासं गच्छति, असुरे णाममेगे देवीए सद्धिं संवासं गच्छति, असुरे नाममेगे असुरीए सद्धिं संवासं गच्छति १ ।

चउव्विधे संवासे पन्नत्ते, तंजहा-देवे नाममेगे देवीए सद्धिं संवासं गच्छति, देवे नाममेगे रक्खसीए सद्धिं संवासं गच्छति, रक्खसे णाममेगे ह्व [= ४], २ ।

चउव्विधे संवासे पन्नत्ते, तंजहा-देवे नाममेगे देवीए सद्धिं संवासं गच्छति, देवे नाममेगे मणुस्सीए सद्धिं संवासं गच्छति ह्व [= ४], ३ ।

चउव्विधे संवासे पन्नत्ते, तंजहा-असुरे णाममेगे असुरीए सद्धिं संवासं गच्छति, असुरे णाममेगे रक्खसीए सद्धिं संवासं गच्छति ह्व [= ४], ४ ।

चउव्विधे संवासे पन्नत्ते, तंजहा-असुरे णाममेगे असुरीए सद्धिं संवासं गच्छति, असुरे णाममेगे मणुस्सीए सद्धिं संवासं गच्छति ह्व [= ४], ५ ।

चउव्विधे संवासे पन्नत्ते, तंजहा-रक्खसे नाममेगे रक्खसीए सद्धिं संवासं गच्छति, रक्खसे नाममेगे मणुस्सीए सद्धिं संवासं गच्छति ह्व [= ४], ६।

[टी०] अनन्तरं पुरुषभेदा उक्ताः, अधुना तद्व्यापारविशेषं तद्भेदसम्पाद्यमभिधित्सुः सूत्रसप्तकमाह- **चउव्विहे संवासे**त्ति सुगमम्, नवरं स्त्रिया सह **संवसनं** शयनं संवासः, द्यौः स्वर्गः, तद्वासी देवोऽप्युपचाराद् द्यौस्तत्र भवो **दिव्यो** वैमानिकसम्बन्धीत्यर्थः, **असुरस्य** भवनपतिविशेषस्यायमासुर एवमितरौ, नवरं **राक्षसो** व्यन्तरविशेषः । चतुर्भङ्गिकासूत्राणि देवासुरेत्येवमादिसंयोगतः षड् भवन्ति ।

देव ३	असुर २	राक्षस १	मनुष्य
देवी	असुरी	राक्षसी	नारी

[सू० ३५४] चउव्विहे अवद्धंसे पन्नत्ते, तंजहा-आसुरे, आभिओगे, संमोहे, देवकिब्बिसे ।

चउहिं ठाणेहिं जीवा आसुरत्ताते कम्मं पगरेंति, तंजहा-कोधसीलताते, पाहुडसीलताते, संसत्ततवोकम्मेणं, निमित्ताजीवताते ।

चउहिं ठाणेहिं जीवा आभिओग्गत्ताते कम्मं पगरेंति, तंजहा-अत्तुक्कोसेणं, परपरिवातेणं, भूतिकम्मेणं, कोउयकरणेणं ।

चउहिं ठाणेहिं जीवा सम्मोहत्ताते कम्मं पगरेंति, तंजहा-उम्मग्गदेसणाए मग्गंतराएणं, कामासंसपओगेणं, भिज्झानियाणकरणेणं ।

चउहिं ठाणेहिं जीवा देवकिब्बिसियत्ताते कम्मं पगरेंति, तंजहा-अरहंताणं अवन्नं वदमाणे, अरहंतपन्नत्तस्स धम्मस्स अवन्नं वदमाणे, आयरिय-उवज्झायाणमवन्नं वदमाणे, चाउवन्नस्स संघस्स अवन्नं वदमाणे ।

[टी०] पुरुषक्रियाधिकारादेवापध्वंससूत्रम्, तत्रापध्वंसन**मपध्वंसः** चारित्रस्य तत्फलस्य वा असुरादिभावनाजनितो विनाशः, तत्रासुरभावनाजनित आसुरः, येषु वाऽनुष्ठानेषु वर्त्तमानोऽसुरत्वमर्जयति तैरात्मनो वासनमासुरभावना, एवं भावनान्तरमपि, अभियोगभावनाजनित आभियोगः, सम्मोहभावनाजनितः साम्मोहः, देवकिल्बिष-भावनाजनितो दैवकिल्बिष इति, इह च कन्दर्प्पभावनाजनितः कान्दर्प्पोऽपध्वंसः

पञ्चमोऽस्ति, स च सन्नपि नोक्तः, चतुःस्थानकानुरोधात्, भावना हि पञ्चाऽऽगमेऽभिहिताः, सन्तीति ज्ञेयं, आह च–

कंदप्प १ देवकिब्बिस २ अभिओगा ३ आसुरा य ४ संमोहा ५ ।
एसा उ संकिलिट्ठा पंचविहा भावणा भणिया ॥ [बृहत्कल्प० १२९३]

आसां च मध्ये यो यस्यां भावनायां वर्त्तते स तद्विधेषु देवेषु गच्छति चारित्रलेशप्रभावात्, उक्तं च–

जो संजओ वि एयासु अप्पसत्थासु वट्टइ कहिं(हं?)चि ।
सो तव्विहेसु गच्छइ सुरेसु भइओ चरणहीणो ॥ [बृहत्कल्प० १२९४] इति ।

आसुरादिरपध्वंस उक्तः, स चासुरत्वादिनिबन्धन इत्यसुरादिभावना-स्वरूप-भूतान्यसुरादित्वसाधनकर्म्मणां कारणानि सूत्रचतुष्टयेनाह- **चउहिं ठाणेही**त्यादि सूत्रचतुष्टयं सुगमम्, नवरम् असुरेषु भव आसुरः असुरविशेषः, तद्भावः आसुरत्वम्, तस्मै **आसुरत्वाय** तदर्थमित्यर्थः, **तद्यथा-क्रोधनशीलतया** कोपस्वभावत्वेन, **प्राभृत-शीलतया** कलहनस्वरूपतया, **संसक्ततपःकर्म्मणा** आहारोपधिशय्यादिप्रति-बद्धभावतपश्चरणेन, **निमित्ताजीवनतया** त्रैकालिकलाभालाभादिविषयनिमित्तोपा-त्ताहाराद्युपजीवनेनेति, तथा अभियोगं व्यापारणमर्हन्तीत्य**भियोग्याः** किङ्करदेवविशेषाः, तद्भावस्तत्ता, तस्यै तया वेति, **आत्मोत्कर्षेण** आत्मगुणाभिमानेन, **परपरिवादेन** परदोषपरिकीर्त्तनेन, **भूतिकर्म्मणा** ज्वरितादीनां भूत्यादिभी रक्षादिकरणेन, **कौतुककरणेन** सौभाग्यादिनिमित्तं परस्नपनकादिकरणेनेति, इयमप्येवमन्यत्र–

कोउय भूईकम्मे पसिणा इयरे निमित्तमाजीवी ।
इड्ढिरससायगुरुओ अभिओगं भावणं कुणइ ॥ [बृहत्कल्प० १३०८] इति ।

प्रश्नोऽङ्गुष्ठप्रश्नादिः, **इतरः** स्वप्नविद्यादिरिति ।

तथा सम्मुह्यतीति **सम्मोहः** मूढात्मा देवविशेष एव, तद्भावस्तत्ता, तस्यै सम्मोहतायै सम्मोहत्वाय सम्मोहतया वेति, **उन्मार्गदेशनया** सम्यग्दर्शनादिरूपभावमार्गातिक्रान्त-धर्म्मप्रथनेन, **मार्गान्तरायेण** मोक्षाध्वप्रवृत्ततद्विघ्नकरणेन, **कामाशंसाप्रयोगेण** शब्दादावभिलाषकरणेन, **भिज्ज** त्ति लोभो गृद्धिस्तेन **निदानकरणेन** 'एतस्मात्

तपःप्रभृतेश्चक्रवर्त्त्यादित्वं मे भूयात्' इति निकाचनाकरणम्, तेनेति, इयमप्येवमन्यत्र– **उम्मग्गदेसओ मग्गनासओ** इत्यादि ।

देवानां मध्ये किल्बिषः पापोऽत एवास्पृश्यादिधर्म्मको देवश्चासौ किल्बिषश्चेति वा **देवकिल्बिषः**, शेषं तथैव, **अवर्णः** अश्लाघा असद्दोषोद्घट्टनमित्यर्थः ।

इह कन्दर्पभावना नोक्ता चतुःस्थानकत्वादित्यवसेयम् ।

[सू० ३५५] चउव्विधा पव्वज्जा पन्नत्ता, तंजहा-इहलोगपडिबद्धा, परलोगपडिबद्धा, दुहतोलोगपडिबद्धा, अपडिबद्धा १ ।

चउव्विहा पव्वजा पन्नत्ता, तंजहा-पुरओ पडिबद्धा, मग्गओ पडिबद्धा, दुहतो पडिबद्धा, अपडिबद्धा २ ।

चउव्विहा पव्वज्जा पन्नत्ता, तंजहा-ओवातपव्वज्जा, अक्खातपव्वज्जा, संगारपव्वज्जा, विहगपव्वज्जा ३ ।

चउव्विहा पव्वज्जा पन्नत्ता, तंजहा-तुयावइत्ता, पुयावइत्ता, मोयावइत्ता, परिपूयावइत्ता ४ ।

चउव्विहा पव्वज्जा पन्नत्ता, तंजहा-नडखइया, भडखइया, सीहखइया, सियालखइया ५ ।

चउव्विहा किसी पन्नत्ता, तंजहा-वाविता, परिवाविया, णिंदिता, परिणिंदिता ६ । एवामेव चउव्विहा पव्वज्जा पन्नत्ता, तंजहा-वाविता, परिवाविता, णिंदिता, परिणिंदिता ७ ।

चउव्विहा पव्वज्जा पन्नत्ता, तंजहा-धन्नपुंजितसमाणा, धन्नविरल्लितसमाणा, धन्नविक्खित्तसमाणा, धन्नसंकड्ढितसमाणा ८ ।

[टी०] अयं चापध्वंसः प्रव्रज्यान्वितस्येति प्रव्रज्यानिरूपणाय **चउव्विहा पव्वज्जे**-त्यादि सूत्राष्टकं कण्ठ्यम्, किन्तु **इहलोकप्रतिबद्धा** निर्वाहादिमात्रार्थिनाम्, **परलोकप्रतिबद्धा** जन्मान्तरकामाद्यर्थिनाम्, **द्विधालोकप्रतिबद्धो**भयार्थिनाम्, **अप्रतिबद्धा** विशिष्टसामायिकवतामिति ।

पुरतः अग्रतः प्रव्रज्यापर्यायभाविषु शिष्या-ऽऽहारादिषु या **प्रतिबद्धा** सा तथोच्यते, एवं **मार्गतः** पृष्ठतः स्वजनादिषु, द्विधाऽपि काचित्, **अप्रतिबद्धा** पूर्ववत् ।

ओवाय त्ति **अवपातः** सद्गुरूणां सेवा, ततो या प्रव्रज्या साऽ**वपातप्रव्रज्या**, **आख्यातस्य** 'प्रव्रज' इत्याद्युक्तस्य या स्यात् साऽऽ**ख्यातप्रव्रज्या आर्यरक्षित**भ्रातुः **फल्गुरक्षित**स्येवेति, **संगार** त्ति सङ्केतः, तस्माद्या सा तथा **मेतार्या**दीनामिव, यदिवा 'यदि त्वं प्रव्रजसि तदाऽहमपि' इत्येवं सङ्केततो या सा तथेति, **विहगगइ** त्ति **विहगगत्या** पक्षिन्यायेन परिवारादिवियोगेनैकाकिनो देशान्तरगमनेन च या सा विहगगतिप्रव्रज्या ।

तुयावइत्त त्ति तोदं कृत्वा **तोदयित्वा** व्यथामुत्पाद्य या प्रव्रज्या दीयते **मुनिचन्द्र**पुत्रस्य **सागरचन्द्रेण**व सा तथोच्यते, **ओयावइत्त** त्ति क्वचित् पाठस्तत्र **ओजो** बलं शारीरं विद्यादिसत्कं वा तत् कृत्वा प्रदर्श्य या दीयते सा **ओजयित्वे**त्यभिधीयते, **पुयावइत्त** त्ति **प्लुङ् गतौ [पा० धा० ९५८]** इति वचनात् **प्लावयित्वा** अन्यत्र नीत्वाऽऽ**र्यरक्षित**वत्, पूतं वा दूषणव्यपोहेन कृत्वा या सा **पूतयित्वे**ति, **बुयावइत्त** त्ति सम्भाष्य **गौतमेन** कर्षकवत्, वचनं वा पूर्वपक्षरूपं कारयित्वा निगृह्य च प्रतिज्ञावचनं वा कारयित्वा या सा तथोक्ता, क्वचित् **मोयावइत्त** त्ति पाठस्तत्र **मोचयित्वा** साधुना तैलार्थदासत्व-प्राप्तभगिनीवदिति, **परिवुयावइत्त** त्ति घृतादिभिः परिप्लुतभोजनः परिप्लुत एव तं कृत्वा परिप्लुतयित्वा **सुहस्तिना** रङ्कवत् या सा तथोच्यत इति ।

नटस्येव संवेगविकलधर्म्मकथाकरणोपार्जितभोजनादीनां **खइय** त्ति खादितं भक्षणं यस्यां सा **नटखादिता**, नटस्येव वा **खइव** त्ति संवेगशून्यधर्म्मकथनलक्षणो हेवाकः स्वभावो यस्यां सा तथा, एवं भटादिष्वपि, नवरं भटः तथाविधबलोपदर्शनलब्धभोजनादेः खादिता आरभटवृत्तिलक्षणहेवाको वा, सिंहः पुनः शौर्यातिरेकादवज्ञयोपात्तस्य यथारब्धभक्षणेन वा खादिता तथाविधप्रकृतिर्वा, शृगालस्तु न्यग्वृत्त्योपात्तस्यान्यान्य-स्थानभक्षणेन वा खादिता तत्स्वभावो वेति ।

कृषिः धान्यार्थं क्षेत्रकर्षणम्, **वाविय** त्ति सकृद्धान्यवपनवती, **परिवाविय** त्ति द्विस्त्रिर्वा उत्पाट्य स्थानान्तरारोपणतः परिवपनवती शालिकृषिवत्, **निंदिय** त्ति एकदा

विजातीयतृणाद्यपनयनेन शोधिता निदाता, **परिनिंदिय** त्ति द्विस्त्रिर्वा तृणादिशोधनेनेति, प्रव्रज्या तु **वाविया** सामायिकारोपणेन, **परिवाविया** महाव्रतारोपणेन निरतिचारस्य सातिचारस्य वा मूलप्रायश्चित्तदानतः, **निंदिया** सकृदतिचारालोचनेन, **परिणिंदिया** पुनः पुनरिति ।

धन्नपुंजियसमाण त्ति खले लून-पून-विशुद्ध-पुञ्जीकृतधान्यसमाना सकलातिचार-कचवरविरहेण लब्धस्वस्वभावत्वात् एका, अन्या तु खलक एव **यद्विरेल्लितं** विसारितं वायुना पूनमपुञ्जीकृतं धान्यं तत्समाना या हि लघुनापि यत्नेन स्वस्वभावं लप्स्यत इति, अन्या तु **यद्विकीर्णं** गोखुरक्षुण्णतया **विक्षिप्तं** धान्यं तत्समाना या हि सहजसमुत्पन्नातिचारकचवरयुक्तत्वात् सामग्र्यन्तरापेक्षितया कालक्षेपलभ्यस्वस्वभावा सा **धान्यविकीर्णसमानो**च्यते, अन्या तु यत् **सङ्कर्षितं** क्षेत्रादाकर्षितं खलमानीतं **धान्यं** तत्समाना, या हि बहुतरातिचारोपेतत्वाद् बहुतरकालप्राप्तव्यस्वस्वभावा सा **धान्यसङ्कर्षितसमाने**ति, इह च पुञ्जितादेर्धान्यविशेषणस्य परनिपातः प्राकृतत्वादिति॥

[सू० ३५६] चत्तारि सन्नाओ पन्नत्ताओ, तंजहा-आहारसन्ना, भयसन्ना, मेहुणसन्ना, परिग्गहसन्ना १ ।

चउहिं ठाणेहिं आहारसन्ना समुप्पज्जति, तंजहा-ओमकोट्ठताते, छुहावेयणिज्जस्स कम्मस्स उदएणं, मतीते, तदट्ठोवओगेणं २ ।

चउहिं ठाणेहिं भयसन्ना समुप्पज्जति, तंजहा-हीणसत्तताते, भयवेयणिज्जस्स कम्मस्स उदएणं, मतीते, तदट्ठोवओगेणं ३ ।

चउहिं ठाणेहिं मेहुणसन्ना समुप्पज्जति, तंजहा-चितमंससोणिययाए, मोहणिज्जस्स कम्मस्स उदएणं, मतीते, तदट्ठोवओगेणं ४ ।

चउहिं ठाणेहिं परिग्गहसन्ना समुप्पज्जति, तंजहा-अविमुत्तयाए, लोभवेयणिज्जस्स कम्मस्स उदएणं, मतीते, तदट्ठोवओगेणं ५ ।

[टी०] इयं च प्रव्रज्या एवं विचित्रा संज्ञावशाद्भवतीति संज्ञानिरूपणाय सूत्रपञ्चकं **चत्तारी**त्यादि सुगमम्, केवलं संज्ञानं **संज्ञा** चैतन्यम्, तच्चासातवेदनीयमोहनीय-कर्म्मोदयजन्यविकारयुक्तमाहारसंज्ञादित्वेन व्यपदिश्यत इति, तत्राहा**रसंज्ञा** आहारा-

भिलाषः, **भयसंज्ञा** भयमोहनीयसम्पाद्यो जीवपरिणामः, **मैथुनसंज्ञा** वेदोदयजनितो मैथुनाभिलाषः, **परिग्रहसंज्ञा** चारित्रमोहोदयजनितः परिग्रहाभिलाष इति।

अवमकोष्ठतया रिक्तोदरतया, **मत्या** आहारकथाश्रवणादिजनितया, **तदर्थोपयोगेन** सततमाहारचिन्तयेति ।

हीनसत्त्वतया सत्त्वाभावेन, **मतिः** भयवार्त्ताश्रवण-भीषणदर्शनादिजनिता बुद्धिः, तया, **तदर्थोपयोगेन** इहलोकादिभयलक्षणार्थपर्यालोचनेनेति ।

चिते उपचिते **मांस-शोणिते** यस्य स तथा, तद्भावस्तत्ता, तया **चित-मांसशोणिततया, मत्या** सुरतकथाश्रवणादिजनितबुद्ध्या, **तदर्थोपयोगेन** मैथुन-लक्षणार्थानुचिन्तनेनेति ।

अविमुक्ततया सपरिग्रहतया, **मत्या** सचेतनादिपरिग्रहदर्शनादिजनितबुद्ध्या, **तदर्थोपयोगेन** परिग्रहानुचिन्तनेनेति ।

[सू० ३५७] चउव्विहा कामा पन्नत्ता, तंजहा-सिंगारा, कलुणा, बीभच्छा, रोद्दा । सिंगारा कामा देवाणं, कलुणा कामा मणुयाणं, बीभच्छा कामा तिरिक्खजोणियाणं, रोद्दा कामा णेरइयाणं ।

[टी०] संज्ञा हि कामगोचरा भवन्तीति कामनिरूपणसूत्रं व्यक्तं च, किन्तु **कामाः** शब्दादयः, **शृङ्गारा** देवानाम् ऐकान्तिकात्यन्तिकमनोज्ञत्वेन प्रकृष्टरतिरसास्पदत्वादिति, रतिरूपो हि शृङ्गारः। मनुष्याणां **करुणा** मनोज्ञत्वस्यातथाविधत्वात्तुच्छत्वेन क्षणदृष्टनष्टत्वेन शुक्र-शोणितादिप्रभवदेहाश्रितत्वेन च शोचनात्मकत्वात्, करुणो हि रसः शोकस्वभावः, **करुणः शोकप्रकृतिः** [काव्यालं० १५।३] इति वचनादिति । तिरश्चां **बीभत्सा** जुगुप्सास्पदत्वात्, बीभत्सरसो हि जुगुप्सात्मकः। **नैरयिकाणां रौद्रा** दारुणा अत्यन्तमनिष्टत्वेन क्रोधोत्पादकत्वात्, रौद्ररसो हि क्रोधरूपः ।

[सू० ३५८] चत्तारि उदगा पन्नता, तंजहा-उत्ताणे णाममेगे उत्ताणोदए, उत्ताणे णाममेगे गंभीरोदए, गंभीरे णाममेगे उत्ताणोदए, गंभीरे णाममेगे गंभीरोदए १ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-उत्ताणे नाममेगे

उत्ताणहिदए, उत्ताणे णाममेगे गंभीरहिदए ह्व [= ४], २ ।

चत्तारि उदगा पन्नत्ता, तंजहा-उत्ताणे णाममेगे उत्ताणोभासी, उत्ताणे णाममेगे गंभीरोभासी ह्व [= ४], ३ । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-उत्ताणे णाममेगे उत्ताणोभासी, उत्ताणे णाममेगे गंभीरोभासी ह्व [= ४], ४ ।

चत्तारि उदही पन्नत्ता, तंजहा-उत्ताणे णाममेगे उत्ताणोदही, उत्ताणे णाममेगे गंभीरोदही ह्व [= ४], ५ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-उत्ताणे णाममेगे उत्ताणहियए ह्व [= ४], ६ ।

चत्तारि उदही पन्नत्ता, तंजहा-उत्ताणे णाममेगे उत्ताणोभासी, उत्ताणे णाममेगे गंभीरोभासी ह्व [= ४], ७ । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-उत्ताणे णाममेगे उत्ताणोभासी ह्व [= ४], ८ ।

[टी०] एते च कामाः तुच्छ-गम्भीरयोर्बाधकेतरा इति तावभिधित्सुः सदृष्टान्तान्यष्टौ सूत्राण्याह **चत्तारी**त्यादीनि व्यक्तानि, किन्तु **उदकानि** जलानि **प्रज्ञप्तानि**, तत्रोत्तानं **नामैकं** तुच्छत्वात् प्रतलमित्यर्थः, पुन**रुत्तानं** स्वच्छतयोपलभ्यमध्यस्वरूपत्वा**दुदकं** जलम्, **उत्ताणोदये** त्ति व्यस्तोऽयं निर्देशः प्राकृतशैलीवशात् समस्त इवावभासते, न च मूलोपात्तेनोदकशब्देनायं गतार्थो भविष्यतीति वाच्यम्, तस्य बहुवचनान्तत्वेनेहासम्बध्यमानत्वात्, साक्षादुदकशब्दे च सति किं तस्य वचनपरिणामादनुकर्षणेनेत्येवमुदधिसूत्रेऽपि भावनीयमिति १। तथो**त्तानं** तथैव, **गम्भीरमुदकं** गडुलत्वादनुपलभ्यमानस्वरूपम् २, तथा **गम्भीरम्** अगाधं प्रचुरत्वा**दुत्तानमुदकं** स्वच्छतयोपलभ्यमध्यस्वरूपत्वात् ३, तथा **गम्भीर**मगाधत्वात् पुन**र्गम्भीरमुदकं** गडुलत्वादिति ४ । पुरुषस्तु **उत्तानः** अगम्भीरो बहिर्दर्शितमददैन्यादिजन्यविकृतकायवाक्चेष्टत्वा-**दुत्तानहृदय**स्तु दैन्यादियुक्तगुह्यधरणासमर्थचित्तत्वादित्येकः । अन्य **उत्तानः** कारणवशाद्दर्शितविकृतचेष्टत्वात् **गम्भीरहृदय**स्तु स्वभावेनोत्तानहृदयविपरीतत्वात् । तृतीयस्तु **गम्भीरो** दैन्यादिवत्त्वेऽपि कारणवशात् संवृताकारतया, **उत्तानहृदय**स्तथैव । चतुर्थः प्रथमविपर्ययादिति । तथा **उत्तानं** प्रतलत्वादुत्तानमवभासते स्थानविशेषात् १।

तथोत्तानं तथैव, **गम्भीरम्** अगाधमवभासते सङ्कीर्णाश्रयत्वादिना २। तथा **गम्भीरम्** अगाध**मुत्तानावभासि** तु विस्तीर्णस्थानाश्रयत्वादिना ३। तथा **गम्भीरम्** अगाधं **गम्भीरावभासि** तथाविधस्थानाश्रितत्वादिनैवेति ४, पुरुषस्**तूत्तानः** तुच्छः, उत्तान एवावभासते प्रदर्शिततुच्छत्वविकारत्वाद्, द्वितीयः संवृतत्वात्, तृतीयः कारणतो दर्शितविकारत्वात्, चतुर्थः सुज्ञानः । तथा उदकसूत्रवदुदधिसूत्रद्वयमपि सदार्ष्टान्तिकमवसेयमिति, अथवा **उत्तानः** सगाधत्वादेक **उदधिः** उदधिदेशः पूर्वम्, पश्चादपि **उत्तान** एव वेलाया बहिःसमुद्रेष्वभावात्, द्वितीयस्तूत्तानः पूर्वं पश्चाद् गम्भीरो वेलाऽऽगमेनागाधत्वात्, तृतीयस्तु गम्भीरः वेलापूर्वं पश्चात् वेलाविगमेनोत्तान उदधिः, चतुर्थः सुज्ञानः ।

[सू० ३५९] चत्तारि तरगा पन्नत्ता, तंजहा-समुद्दं तरामीतेगे समुद्दं तरति, समुद्दं तरामीतेगे गोप्पतं तरति, गोप्पतं तरामीतेगे ह्व [= ४], १ ।

चत्तारि तरगा पन्नत्ता, तंजहा-समुद्दं तरित्ता नाममेगे समुद्दे विसीतति, समुद्दं तरेत्ता णाममेगे गोप्पते विसीतति, गोप्पतं ह्व [= ४], २ ।

[सू० ३६०] चत्तारि कुंभा पन्नत्ता, तंजहा-पुण्णे नाममेगे पुन्ने, पुन्ने नाममेगे तुच्छे, तुच्छे णाममेगे पुण्णे, तुच्छे णाममेगे तुच्छे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-पुण्णे नाममेगे पुन्ने ह्व [= ४] ।

चत्तारि कुंभा पन्नत्ता, तंजहा-पुन्ने नाममेगे पुण्णोभासी, पुण्णे नाममेगे तुच्छोभासी ह्व [= ४], एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-पुन्ने णाममेगे पुन्नोभासी ह्व [= ४] ।

चत्तारि कुंभा पन्नत्ता, तंजहा-पुण्णे नाममेगे पुन्नरूवे, पुन्ने नाममेगे तुच्छरूवे ह्व [= ४] । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-पुण्णे नाममेगे पुन्नरूवे ह्व [= ४] ।

चत्तारि कुंभा पन्नत्ता, तंजहा-पुन्ने वि एगे पियट्ठे, पुन्ने वि एगे अवदले, तुच्छे वि एगे पियट्ठे, तुच्छे वि एगे अवदले । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-पुण्णे वि एगे पियट्ठे तहेव ।

चत्तारि कुंभा पन्नत्ता, तंजहा-पुन्ने वि एगे विस्संदति, पुन्ने वि एगे णो विस्संदति, तुच्छे वि एगे विस्संदइ । एवामेव चत्तारि पुरिसजाया पन्नत्ता, तंजहा-पुन्ने वि एगे विस्संदति तहेव ।

चत्तारि कुंभा पन्नत्ता, तंजहा-भिन्ने, जज्जरिए, परिस्साई, अपरिस्साई । एवामेव चउव्विहे चरित्ते पन्नत्ते, तंजहा-भिन्ने जाव अपरिस्साई ।

चत्तारि कुंभा पन्नत्ता, तंजहा-महुकुंभे नामं एगे महुप्पिहाणे, महुकुंभे णामं एगे विसप्पिहाणे, विसकुंभे नामं एगे महुप्पिहाणे, विसकुंभे णाममेगे विसप्पिहाणे । एवामेव चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मधुकुंभे नामं एगे मधुप्पिहाणे ह्व [= ४] ।

हिययमपावमकलुसं जीहा वि य मधुरभासिणी निच्चं ।
जम्मि पुरिसम्मि विज्जति से मधुकुंभे मधुपिहाणे ॥२६॥
हिययमपावमकलुसं जीहा वि य कडुयभासिणी निच्चं ।
जम्मि पुरिसम्मि विज्जति से मधुकुंभे विसपिधाणे ॥२७॥
जं हिययं कलुसमयं जीहा वि य मधुरभासिणी निच्चं ।
जम्मि पुरिसम्मि विज्जति से विसकुंभे मधुपिधाणे ॥२८॥
जं हिययं कलुसमयं जीहा वि य कडुयभासिणी निच्चं ।
जम्मि पुरिसम्मि विज्जति से विसकुंभे विसपिधाणे ॥२९॥

[टी०] समुद्रप्रस्तावात्तत्तरकान् सूत्रद्वयेनाह- **चत्तारि तरगे**त्यादि व्यक्तम्, नवरं तरन्तीति तराः, त एव तरकाः, **समुद्रं** समुद्रवद् दुस्तरं सर्वविरत्यादिकं कार्यं **तरामि** करोमीत्येवमभ्युपगम्य तत्र समर्थत्वा**देकः समुद्रं तरति** तदेव समर्थयतीत्येकः, अन्यस्तु तदभ्युपगम्यासमर्थत्वात् **गोष्पदं** तत्कल्पं देशविरत्यादिकमल्पतमं **तरति** निर्वाहयतीति, अन्यस्तु **गोष्पद**प्रायमभ्युपगम्य वीर्यातिरेकात् समुद्रप्रायमपि साधयतीति, चतुर्थः प्रतीतः १। समुद्रप्रायं कार्यं **तरीत्वा** निर्वाह्य **समुद्रप्राये** प्रयोजनान्तरे **विषीदति** न तन्निर्वाहयतीति विचित्रत्वात् क्षयोपशमस्येति, एवमन्ये त्रय इति २।

पुरुषानेव कुम्भदृष्टान्तेन प्रतिपिपादयिषुः सूत्रप्रपञ्चमाह, सुगमश्चायम्, नवरं **पूर्णः**

सकलावयवयुक्तः प्रमाणोपेतो वा पुनः **पूर्णो** मध्वादिभृतः, द्वितीये भङ्गे **तुच्छो** रिक्तः, तृतीये **तुच्छः** अपूर्णावयवो लघुर्वा, चतुर्थः सुज्ञानः, पुरुषस्तु **पूर्णो** जात्यादिभिर्गुणैः, पुनः **पूर्णो** ज्ञानादिगुणैरिति, अथवा **पूर्णो** धनेन गुणैर्वा पूर्वं पश्चादपि तैः **पूर्ण** ए[वेत्ये]वं शेषा अपि २ ।

पूर्णोऽवयवैर्दध्यादिना वा पूर्ण एवावभासते द्रष्टृणामिति **पूर्णावभासी**त्येकः, अन्यस्तु पूर्णोऽपि कुतश्चिद्धेतोर्विवक्षितप्रयोजनासाधकत्वादेस्तुच्छोऽवभासते, एवं शेषौ ३ । पुरुषस्तु पूर्णो धन-श्रुतादिभिस्तद्विनियोगाच्च पूर्ण एवावभासते, अन्यस्तु तदविनियोगात्तुच्छ एवावभासते, अन्यस्तु तुच्छोऽपि कथमपि प्रस्तावोचितप्रवृत्तेः पूर्णवदवभासते, अपरस्तु तुच्छो धन-श्रुतादिरहितोऽत एव तदविनियोजकत्वात् तुच्छावभासीति ४।

तथा पूर्णो नीरादिना पुनः पूर्णं पुण्यं वा पवित्रं रूपं यस्य स तथेति प्रथमः, द्वितीये **तुच्छं** हीनं **रूपम्** आकारो यस्य स **तुच्छरूपः**, एवं शेषौ ५। पुरुषस्तु **पूर्णो** ज्ञानादिभिः **पूर्णरूपः पुण्यरूपो** वा विशिष्टरजोहरणादिद्रव्यलिङ्गसद्भावात् सुसाधुरिति, द्वितीयभङ्गे तुच्छरूपः कारणात् त्यक्तलिङ्गः सुसाधुरेवेति, तृतीये तुच्छो ज्ञानादिविहीनो निह्नवादिः, चतुर्थो ज्ञानादिद्रव्यलिङ्गहीनो गृहस्थादिरिति ६।

तथा **पूर्ण**स्तथैव, **अपि**स्तुच्छापेक्षया समुच्चयार्थः, **एकः** कश्चित्, प्रियाय प्रीतये अयमिति **प्रियार्थः** कनकादिमयत्वात् सार इत्यर्थः, तथा **अपदलम्** अपशब्दं द्रव्यं कारणभूतं मृत्तिकादि यस्यासावपदलः अवदलति वा दीर्यत इत्य**वदलः** आमपक्वतयाऽसार इत्यर्थः, तुच्छोऽप्येवमिति ७ । पुरुषो धन-श्रुतादिभिः **पूर्णः**, **प्रियार्थः** कश्चित् प्रियवचनदानादिभिः प्रियकारी सार इति, अन्यस्तु न तथेत्यपदलः परोपकारं प्रत्ययोग्य इति, तुच्छोऽप्येवमेवेति ८ ।

चत्तारीत्यादि सुगमानि पूर्णोऽपि जलादे**र्विष्यन्दते** श्रवति, इह **तुच्छः** तुच्छजलादिः स एव विष्यन्दते, **अपिः** सर्वत्र समुच्चये प्रतियोग्यपेक्षयेति ९ । पुरुषस्तु पूर्णोऽप्येको **विष्यन्दते** धनं ददाति श्रुतं वा, अन्यो नेति, **तुच्छोऽपि** अल्पवित्तादिरपि धन-श्रुतादि विष्यन्दतेऽन्यो नैवेति १० ।

तथा **भिन्नः** स्फुटितः, **जर्जरितो** राजीयुक्तः, **परिश्रावी** दुष्पक्वत्वात् क्षरकः,

अपरिश्रावी कठिनत्वादिति ११ । चारित्रं तु **भिन्नं** मूलप्रायश्चित्तापत्त्या, **जर्जरितं** छेदादिप्राप्त्या, **परिश्रावि** सूक्ष्मातिचारतया, **अपरिश्रावि** निरतिचारतयेति, इह च पुरुषाधिकारेऽपि यच्चारित्रलक्षणपुरुषधर्मभणनं तद्धर्म्म-धर्मिणोः कथञ्चिदभेदादनवद्यमवगन्तव्यमिति १२ ।

तथा **मधुनः** क्षौद्रस्य **कुम्भो** मधुकुम्भः, मधुभृतं मध्वेव वा **पिधानं** स्थगनं यस्य स **मधुपिधानः**, एवमन्ये त्रयः १३ ।

पुरुषसूत्रं स्वयमेव **हियय**मित्यादिगाथाचतुष्टयेन भावितमिति, तत्र **हृदयं** मनः **अपापम्** अहिंस्रम**कलुषम्** अप्रीतिवर्जितमिति, **जिह्वाऽपि च मधुरभाषिणी नित्यं यस्मिन् पुरुषे विद्यते स पुरुषो** मधुकुम्भ इव **मधुकुम्भो** मधुपिधान इव **मधुपिधान** इति प्रथमभङ्गयोजना, तृतीयगाथायां **यद् हृदयं कलुषमयम्** अप्रीत्यात्मकमुपलक्षणत्वात् पापं च **जिह्वा** या **मधुरभाषिणी नित्यं** तत् सा चेति गम्यते **यस्मिन् पुरुषे विद्यते स** पुरुषो **विषकुम्भो मधुपिधान**स्तत्साधर्म्यादिति १४ ।

[सू० ३६१] चउव्विहा उवसग्गा पन्नत्ता, तंजहा-दिव्वा, माणुसा, तिरिक्खजोणिया, आतसंचेयणिज्जा १ ।

दिव्वा उवसग्गा चउव्विहा पन्नत्ता, तंजहा-हासा, पओसा, वीमंसा, पुढोवेमाता २ ।

माणुसा उवसग्गा चउव्विधा पन्नत्ता, तंजहा-हासा, पओसा, वीमंसा, कुसीलपडिसेवणया ३ ।

तिरिक्खजोणिया उवसग्गा चउव्विहा पन्नत्ता, तंजहा-भता, पदोसा, आहारहेउं, अवच्चलेणसारक्खणया ४ ।

आतसंचेयणिज्जा उवसग्गा चउव्विहा पन्नत्ता, तंजहा-घट्टणता, पवडणता, थंभणता, लेसणता ५ ।

[टी०] अत्र च चतुर्थः पुरुष उपसर्गकारी स्यादित्युपसर्गप्ररूपणाय **चउव्विहा उवसग्गे**त्यादि सूत्रपञ्चकमाह, कण्ठ्यं चेदम्, नवरमुपसर्जनान्युपसृज्यते वा धर्म्मात् प्रच्याव्यते जन्तुरेभि**रुपसग्गा** बाधाविशेषाः, ते च कर्तृभेदाच्चतुर्विधाः ।

आत्मना **संचेत्यन्ते** क्रियन्त इत्यात्**मसंचेतनीया:**, तत्र दिव्या: **हास** त्ति हासाद् भवन्ति, हाससम्भूतत्वाद्वा **हासा** उपसर्ग्गा एवेत्येवमन्यत्रापि, यथा भिक्षार्थं ग्रामान्तरप्रस्थितक्षुल्लकैर्व्यन्तर्या उपयाचितं प्रतिपन्नं 'यदीप्सितं लप्स्यामहे तदा तवोण्डेरकादि दास्याम:' इति, लब्धे च तत्र तवेदमिति भणित्वा तदुण्डेरकादि तै: स्वयमेव भक्षितम्, देवतया च हासेन तद्रूपमावृत्य क्रीडितम्, अनागच्छत्सु च क्षुल्लकेषु व्याकुले गच्छे निवेदितमाचार्याणां देवतया क्षुल्लकवृत्तम्, ततो वृषभैरुण्डेरकादि याचित्वा तस्यै दत्तम्, तया तु ते दर्शिता इति। प्रद्वेषाद्यथा **सङ्गमको महावीर**स्योपसर्गानकरोत्। विमर्षात् यथा क्वचिद्देवकुलिकायां वर्षासूषित्वा साधुषु गतेषु तदीय एवान्य: पश्चादागतस्तत्रोषित:, तं च देवता किंस्वरूपोऽयमिति विमर्षादुपसर्गितवतीति। **पृथग्** भिन्ना विविधा **मात्रा** [हासादिवस्तुरूपा येषु ते **पृथग्विमात्रा**], तया इत्येतल्लुप्त-तृतीयैकवचनं पदं दृश्यम्, तथाहि-हासेन कृत्वा प्रद्वेषेण करोतीत्येवं संयोगा:, यथा **सङ्गमक** एव विमर्षेण कृत्वा प्रद्वेषेण कृतवानिति।

तथा मानुष्या हासात्, यथा गणिकादुहिता क्षुल्लकमुपसर्गितवती सा च तेन दण्डेन ताडिता, विवादे च राज्ञ: श्रीगृहदृष्टान्तो निवेदितस्तेनेति। प्रद्वेषाद्यथा **गजसुकुमार: सोमिल**ब्राह्मणेन व्यपरोपित:। विमर्षाद्यथा **चाणक्यो**क्त**चन्द्रगुप्ते**न धर्म्मपरीक्षार्थं लिङ्गिनोऽन्त:पुरे धर्म्ममाख्यापिता: क्षोभिताश्च, साधवस्तु क्षोभितुं न शकिता इति। **कुशीलम्** अब्रह्म, तस्य प्रतिषेवणं कुशीलप्रतिषेवणम्, तद्भाव: **कुशीलप्रतिषेवणता** उपसर्ग्ग:, कुशीलस्य वा प्रतिषेवणं येषु ते कुशीलप्रतिषेवणका:, अथवा कुशीलप्रतिषेवणयेति व्याख्येयम्, यथा सन्ध्यायां वसत्यर्थं प्रोषितस्येर्ष्यालोर्गृहे प्रविष्ट: साधुश्चतसृभिरीर्ष्यालुजायाभिर्दत्तावास: प्रत्येकं चतुरोऽपि यामानुपसर्ग्गितो न च क्षुभित:।

तथा तैरश्चा **भयात्** श्वादयो दशेयु:, **प्रद्वेषाच्चण्डकौशिको** भगवन्तं दष्टवान्, **आहारहेतो:** सिंहादय:, **अपत्य-लयनसंरक्षणाय** काक्यादय उपसर्गयेयुरिति।

तथा **आत्मसंचेतनीया:** घट्टनता घट्टनया वा यथाऽक्षणि रज: पतितं ततस्तदक्षि हस्तेन मलितं दु:खितुमारब्धमथवा स्वयमेवाक्षणि गले वा मांसाङ्कुरादि जातं घट्टयतीति १, प्रपतनता प्रपतनया वा यथा अप्रयत्नेन सञ्चरत: प्रपतनात् दु:खमुत्पद्यते, स्तम्भनता

स्तम्भनया वा यथा तावदुपविष्टः स्थितो यावत् सुप्तः पादादिः स्तब्धो जातः, श्लेषणता श्लेषणया वा यथा पादमाकुञ्च्य स्थितो वातेन तथैव पादो लगित इति ।

[सू० ३६२] चउव्विहे कम्मे पन्नत्ते, तंजहा-सुभे नाममेगे सुभे, सुभे नाममेगे असुभे, असुभे नाम० ह्व [= ४] ।

चउव्विहे कम्मे पन्नत्ते, तंजहा-सुभे णाममेगे सुभविवागे, सुभे णाममेगे असुभविवागे, असुभे नाममेगे सुभविवागे, असुभे नाममेगे असुभविवागे।

चउव्विहे कम्मे पन्नत्ते, तंजहा-पगडीकम्मे, ठितीकम्मे, अणुभावकम्मे, पदेसकम्मे ।

[टी०] उपसर्गसहनात् कर्म्मक्षयो भवतीति कर्म्मस्वरूपप्रतिपादनायाह– **चउव्विहे**त्यादि सूत्रत्रयं व्यक्तम्, नवरं क्रियत इति **कर्म्म** ज्ञानावरणीयादि, तत् **शुभं** पुण्यप्रकृतिरूपं पुनः **शुभं** शुभानुबन्धित्वात् **भरता**दीनामिव । **शुभं** तथैव, **अशुभ**मशुभानुबन्धित्वात् **ब्रह्मदत्ता**दीनामिव । **अशुभं** पापप्रकृतिरूपं **शुभं** शुभानुबन्धित्वात् दुःखितानामकामनिर्जरावतां गवादीनामिव । **अशुभं** तथैव, पुनर**शुभ**मशुभानुबन्धित्वात् मत्स्यबन्धादीनामिवेति । तथा **शुभं** सातादि सातादित्वेनैव बद्धं तथैवोदेति यत्तत् शुभविपाकम्, यत्तु बद्धं शुभत्वेन सङ्क्रमकरणवशात्तूदेत्यशुभत्वेन तद् द्वितीयम्, भवति च कर्मणि कर्मान्तरानुप्रवेशः, सङ्क्रमाभिधानकरणवशाद्, उक्तं च–

मूलप्रकृत्यभिन्नाः सङ्क्रमयति गुणत उत्तराः प्रकृतीः ।
नन्वात्माऽमूर्त्तत्वादध्यवसानप्रयोगेण ॥ [ ] इति । तथा मतान्तरम्–
मोत्तूण आउयं खलु दंसणमोहं चरित्तमोहं च ।
सेसाणं पयडीणं उत्तरविहिसंकमो भणिओ ॥ [ ] त्ति

यद्बद्धमशुभतयोदेति च शुभतया तत्तृतीयम्, चतुर्थं प्रतीतमिति । तृतीयं कर्म्मसूत्रमत्रत्यद्वितीयोद्देशकबन्धसूत्रवज्ज्ञेयमिति ।

[सू० ३६३] चउव्विहे संघे पन्नत्ते, तंजहा-समणा, समणीओ, सावगा, साविगाओ ।

[सू० ३६४] चउव्विहा बुद्धी पन्नत्ता, तंजहा-उप्पत्तिया, वेणइया, कम्मया, पारिणामिया ।

चउव्विधा मती पन्नत्ता, तंजहा-उग्गहमती, ईहामती, अवायमती, धारणामती।

अहवा चउव्विहा मती पन्नत्ता, तंजहा-अरंजरोदगसमाणा, वियरोदग-समाणा, सरोदगसमाणा, सागरोदगसमाणा ।

[टी०] चतुर्विधकर्म्मस्वरूपं सङ्घ एव वेत्तीति सङ्घसूत्रं व्यक्तम्, स च सर्वविद्वचनसंस्कृतबुद्धिमानिति बुद्धिसूत्रम्, बुद्धिश्च मतिविशेष इति मतिसूत्रे, सुगमानि चैतानि, नवरं **सङ्घो** गुणरत्नपात्रभूतसत्त्वसमूहः, तत्र श्राम्यन्ति तपस्यन्तीति श्रमणाः, अथवा सह मनसा शोभनेन निदानपरिणामलक्षणपापरहितेन च चेतसा वर्त्तन्त इति समनसः, तथा समानं स्वजन-परजनादिषु तुल्यं मनो येषां ते समनसः, प्राकृततया सर्वत्र समण त्ति, एवं समणीओ, तथा शृण्वन्ति जिनवचनमिति श्रावकाः, अथवा श्रान्ति पचन्ति तत्त्वार्थश्रद्धानं निष्ठां नयन्तीति श्राः, तथा वपन्ति गुणवत्सत्त्वक्षेत्रेषु धनबीजानि निक्षिपन्तीति वाः, तथा किरन्ति क्लिष्टकर्म्मरजो विक्षिपन्तीति काः, ततः कर्म्मधारये श्रावका इति भवति, यदाह–

श्रद्धालुतां श्राति पदार्थचिन्तनाद्धनानि पात्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवनादथापि तं श्रावकमाहुरुत्तमाः ॥ [ ] इति,

एवं श्राविका अपीति ।

तथा उत्पत्तिरेव प्रयोजनं यस्याः सा **औत्पत्तिकी** । ननु क्षयोपशमः कारणमस्याः, सत्यम्, किन्तु स खल्वन्तरङ्गत्वात् सर्वबुद्धिसाधारण इति न विवक्ष्यते, न चान्यच्छास्त्र-कर्माभ्यासादिकमपेक्षत इति, अपि च- बुद्ध्युत्पादात् पूर्वं स्वयमदृष्टोऽन्यतश्चाश्रुतो मनसाऽप्यनालोचितस्तस्मिन्नेव क्षणे यथावस्थितोऽर्थो गृह्यते यया सा लोकद्वयाविरुद्धै-कान्तिकफलवती बुद्धिरौत्पत्तिकीति, नटपुत्र**रोहका**दीनामिवेति ।

तथा **विनयो** गुरुशुश्रूषा, स कारणमस्यास्तत्प्रधाना वा **वैनयिकी**, अपि च- कार्यभरनिस्तरणसमर्था धर्मार्थकामशास्त्राणां गृहीतसूत्रार्थसारा लोकद्वयफलवती चेयमिति, नैमित्तिकसिद्धपुत्रशिष्यादीनामिवेति ।

अनाचार्यकं कर्म्म, साचार्यकं शिल्पम्, कादाचित्कं वा कर्म्म, नित्यव्यापारस्तु शिल्पमिति, कर्म्मणो जाता **कर्म्मजा**, अपिच- कर्माभिनिवेशोपलब्धकर्म्मपरमार्था कर्म्माभ्यास-विचाराभ्यां विस्तीर्णा प्रशंसाफलवती चेति, हैरण्यक-कर्षकादीनामिवेति।

परिणामः सुदीर्घकालपूर्वापरार्थावलोकनादिजन्य आत्मधर्म्मः, स प्रयोजनमस्यास्त-त्प्रधाना वेति **पारिणामिकी**, अपिच- अनुमानकारणमात्रदृष्टान्तैः साध्यसाधिका वयोविपाके च पुष्टीभूता अभ्युदयमोक्षफला चेति, **अभयकुमारा**दीनामिवेति ।

तथा मननं मतिः तत्र सामान्यार्थस्याशेषविशेषनिरपेक्षस्यानिर्देश्यस्य रूपादेः **अव** इति प्रथमतो **ग्रहणं** परिच्छेदन**मवग्रहः**, स एव मतिरवग्रहमतिरेवं सर्वत्र, नवरं तदर्थविशेषालोचनमीहा, प्रक्रान्तार्थविशेषनिश्चयोऽ**वायः**, अवगतार्थविशेषधरणं **धारणे**ति ।

तथा **अरञ्जरम्** उदकुम्भो अलञ्जरमिति यत् प्रसिद्धं तत्रोदकं यत्तत्समाना प्रभूतार्थग्रहणोत्प्रेक्षणधरणसामर्थ्याभावेनाल्पत्वादस्थिरत्वाच्च, अरञ्जरोदकं हि सङ्क्षिप्तं शीघ्रनिष्ठं चेति, **विदरो** नदीपुलिनादौ जलार्थो गर्त्तः, तत्र यदुदकं तत्समाना अल्पत्वादपरापरार्थोहनमात्रसमर्थत्वात् झगिति अनिष्ठितत्वाच्च, तदुदकं ह्यल्पं तथाऽपरापरमल्पमल्पं स्यन्दते, अत एव च क्षिप्रमनिष्ठितं चेति, सरउदकसमाना तु विपुलत्वाद् बहुजनोपकारित्वादनिष्ठितत्वाच्च, प्रायः सरोजलस्याप्येवंभूतत्वादिति, सागरोदकसमाना पुनः सकलपदार्थविषयत्वेनात्यन्तविपुलत्वादक्षयत्वादलब्ध-मध्यत्वाच्च, सागरजलस्यापि ह्येवंभूतत्वादिति ।

[सू० ३६५] चउव्विहा संसारसमावन्नगा जीवा पन्नत्ता, तंजहा-णेरइता, तिरिक्खजोणिया, मणुस्सा, देवा ।

चउव्विहा सव्वजीवा पन्नत्ता, तंजहा-मणजोगी, वइजोगी, कायजोगी, अजोगी।

अहवा चउव्विहा सव्वजीवा पन्नत्ता, तंजहा-इत्थिवेदगा, पुरिसवेदगा, णपुंसकवेदगा, अवेदगा ।

अहवा चउव्विहा सव्वजीवा पन्नत्ता, तंजहा-चक्खुदंसणी अचक्खुदंसणी ओहिदंसणी, केवलदंसणी ।

अहवा चउव्विहा सव्वजीवा पन्नत्ता, तंजहा-संजता, असंजता, संजतासंजता, णोसंजता णोअसंजता णोसंजतासंजता ।

[टी०] यथोक्तमतिमन्तो जीवा एव भवन्तीति जीवसूत्राणि पञ्च व्यक्तानि चैतानि, नवरं **मनोयोगिनः** समनस्का योगत्रयसद्भावेऽपि तस्य प्राधान्यादेवं **वाग्योगिनो** द्वीन्द्रियादयः **काययोगिन** एकेन्द्रिया **अयोगिनो** निरुद्धयोगाः सिद्धाश्चेति। **अवेदकाः** सिद्धादयः। चक्षुषः सामान्यार्थग्रहणमवग्रहेहारूपं दर्शनं चक्षुर्दर्शनम्, तद्वन्तश्चतुरिन्द्रियादयः, अचक्षुः स्पर्शनादि, तद्दर्शनवन्त एकेन्द्रियादय इति। **संयताः** सर्वविरताः, **असंयता** अविरताः, **संयतासंयता** देशविरताः, त्रयप्रतिषेधवन्तः सिद्धा इति ।

[सू० ३६६] **चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मित्ते नाममेगे मित्ते, मित्ते नाममेगे अमित्ते, अमित्ते नाममेगे मित्ते, अमित्ते णाममेगे अमित्ते ।**

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मित्ते णाममेगे मित्तरूवे, चउभंगो ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मुत्ते णाममेगे मुत्ते, मुत्ते णाममेगे अमुत्ते [ह्व = ४] ।

चत्तारि पुरिसजाता पन्नत्ता, तंजहा-मुत्ते णाममेगे मुत्तरूवे ह्व [= ४] ।

[टी०] जीवाधिकाराज्जीवविशेषान् पुरुषभेदान् चतुःसूत्र्याऽऽह– **चत्तारी**त्यादिः, स्पष्टा चेयम्, नवरं **मित्र**मिहलोकोपकारित्वात् पुन**र्मित्रं** परलोकोपकारित्वात् सद्गुरुवत्, अन्यस्तु **मित्रं** स्नेहवत्त्वा**दमित्रः** परलोकसाधनविध्वंसात् कलत्रादिवत्, अन्यस्त्व**मित्रः** प्रतिकूलत्वा**न्मित्रं** निर्वेदोत्पादनेन परलोकसाधनोपकारकत्वादविनीतकलत्रादिवत्,

चतुर्थोऽ**मित्रः** प्रतिकूलत्वात् पुन**रमित्रः** सङ्क्लेशहेतुत्वेन दुर्गतिनिमित्तत्वात्, पूर्वापरकालापेक्षया वेदं भावनीयमिति । तथा **मित्र**मन्तःस्नेहवृत्त्या मित्रस्येव **रूपम्** आकारो बाह्योपचारकरणात् यस्य स **मित्ररूप** इति एकः, द्वितीयोऽ**मित्ररूपो** बाह्योपचाराभावात्, तृतीयः **अमित्रः** स्नेहवर्जितत्वादिति, चतुर्थः प्रतीतः ।

तथा **मुक्तः** त्यक्तसङ्गो द्रव्यतः, पुन**र्मुक्तो** भावतोऽभिष्वङ्गाभावात् सुसाधुवत् । द्वितीयोऽमुक्तः साभिष्वङ्गत्वात् रङ्कवत् । तृतीयोऽ**मुक्तो** द्रव्यतः, भावतस्तु **मुक्तो** राज्यावस्थोत्पन्नकेवलज्ञान**भरत**चक्रवर्त्तिवत् । चतुर्थो गृहस्थः । कालापेक्षया वेदं दृश्यमिति ।

मुक्तो निरभिष्वङ्गतया **मुक्तरूपो** वैराग्यपिशुनाकारतया यतिरिवेत्येकः, द्वितीयोऽमुक्तरूप उक्तविपरीतत्वाद् गृहस्थावस्थायां **महावीर** इव, तृतीयोऽ**मुक्तः** साभिष्वङ्गत्वाच्छठयतिवत्, चतुर्थो गृहस्थ इति ।

[सू० ३६७] पंचेंदियतिरिक्खजोणिया चउगइया चउआगइया पन्नत्ता, तंजहा-पंचेंदियतिरिक्खजोणिए पंचेंदियतिरिक्खजोणिएसु उववज्जमाणे णेरइएहिंतो वा तिरिक्खजोणिएहिंतो वा मणुस्सेहिंतो वा देवेहिंतो वा उववज्जेज्जा, से चेव णं से पंचेंदियतिरिक्खजोणिए पंचेंदियतिरिक्खजोणियत्तं विप्पजहमाणे णेरतितत्ताते वा जाव देवत्ताते वा गच्छेज्जा १।

मणुस्सा चउगइया चउआगइया, एवं चेव मणुस्सा वि २।

[सू० ३६८] बेइंदिया णं जीवा असमारभमाणस्स चउविहे संजमे कज्जति, तंजहा-जिब्भामयातो सोक्खातो अववरोवेत्ता भवति, जिब्भामएणं दुक्खेणं असंजोगेत्ता भवति, फासामयातो सोक्खातो अववरोवेत्ता भवति एवं चेव १।

बेइंदिया णं जीवा समारभमाणस्स चउविधे असंजमे कज्जति, तंजहा-जिब्भामयातो सोक्खाओ ववरोवेत्ता भवति, जिब्भामएणं दुक्खेणं संजोगेत्ता भवति, फासामयातो सोक्खाओ ववरोवेत्ता भवति एवं चेव २।

[सू० ३६९] सम्मद्दिट्ठिताणं णेरइयाणं चत्तारि किरियाओ पन्नत्ताओ, तंजहा-आरंभिता, परिग्गहिता, मातावत्तिया, अपच्चक्खाणकिरिया ।

सम्मद्दिट्ठिताणमसुरकुमाराणं चत्तारि किरियाओ पन्नत्ताओ, तंजहा-एवं चेव । एवं विगलिंदियवज्जं जाव वेमाणियाणं ।

[**टी०**] जीवाधिकारिकं पञ्चेन्द्रियतिर्यग्मनुष्यसूत्रद्वयं सुगमम्, एवं द्वीन्द्रियसूत्रद्वयमपि, नवरं द्वीन्द्रियान् जीवान् **असमारभमाणस्य** अव्यापादयतः, जिह्वाया विकारो जिह्वामयम्, तस्मात् **सौख्याद्** रसोपलम्भानन्दरूपा**दव्यपरोपयिता** अभ्रंशयिता, तथा **जिह्वामयं** जिह्वेन्द्रियहानिरूपं यद् दुःखं तेनाऽसंयोजयितेति ।

जीवाधिकारादेव सम्यग्दृष्टिजीवक्रियासूत्राणि सुगमानि, नवरं सम्यग्दृष्टीनां चतस्रः क्रिया मिथ्यात्वक्रियाया अभावात् । **एवं विगलिंदियवज्जं** ति, एक-द्वि-त्रि-चतुरिन्द्रियाणां पञ्चापि, तेषां मिथ्यादृष्टित्वात्, द्वीन्द्रियादीनां च सासादनसम्यक्त्व-स्याल्पत्वेनाविवक्षितत्वादिति, एवं चेह विकलेन्द्रियवर्जनेन षोडश क्रियासूत्राणि वैमानिकान्तानि भवन्तीति ।

[सू० ३७०] चउहिं ठाणेहिं संते गुणे नासेज्जा, तंजहा-कोधेणं, पडिनिवेसेणं, अकयण्णुताए, मिच्छत्ताभिनिवेसेणं ।

चउहिं ठाणेहिं असंते गुणे दीवेज्जा, तंजहा-अब्भासवत्तितं, परच्छंदाणु-वत्तितं, कज्जहेउं, कतपडिकतितेति वा ।

[**टी०**] अनन्तरं क्रिया उक्तास्तद्वांश्च सद्भूतान् परगुणान् नाशयति प्रकाशयति चेत्येवमर्थं सूत्रद्वयम्, कण्ठयम्, नवरं **सतो** विद्यमानान् **गुणान्** नाशयेदिव **नाशयेत्** अपलपति, न मन्यते, **क्रोधेन** रोषेण, तथा **प्रतिनिवेशेन** 'एष पूज्यते अहं तु न' इत्येवं परपूजाया असहनलक्षणेन, कृतमुपकारं परसम्बन्धिनं न जानातीत्य**कृतज्ञः**, तद्भावस्तत्ता, तया, **मिथ्यात्वाभिनिवेशेन** बोधविपर्यासेन ।

[**असतः** अविद्यमानान्, क्वचित् **संते** त्ति पाठस्तत्र च] **सतो** विद्यमानान् **गुणान् दीपयेत्** वदेदित्यर्थः, **अभ्यासो** हेवाको वर्णनीयासन्नता वा **प्रत्ययो** निमित्तं यत्र दीपने **तदभ्यासप्रत्ययम्**, दृश्यते ह्यभ्यासान्निर्विषयापि निष्फलापि च प्रवृत्तिः, सन्निहितस्य च प्रायेण गुणानामेव ग्रहणमिति, तथा **परच्छन्दस्य** पराभिप्रायस्या**नुवृत्तिः** अनुवर्त्तना

यत्र तत् **परच्छन्दानुवृत्तिकं** दीपनमेव, तथा **कार्यहेतोः** प्रयोजननिमित्तं चिकीर्षितकार्यं प्रत्यानुकूल्यकरणायेत्यर्थः, तथा **कृते** उपकृते **प्रतिकृतं** प्रत्युपकारः तद्यस्यास्ति स **कृतप्रतिकृतिकः, इति वा** कृतप्रत्युपकर्त्तेति हेतोरित्यर्थः, अथवा **कृतप्रतिकृतये इति वा** एकेनैकस्योपकृतं गुणा वोत्कीर्त्तिताः स तस्यासतोऽपि गुणान् प्रत्युपकारार्थ-मुत्कीर्त्तयतीत्यर्थः, **इति**रुपप्रदर्शने, **वा** विकल्पे ।

[सू० ३७१] णेरइयाणं चउहिं ठाणेहिं सरीरुप्पत्ती सिता, तंजहा-कोधेणं, माणेणं, मायाए, लोभेणं । एवं जाव वेमाणियाणं १।

णेरइयाणं चउट्ठाणनिव्वत्तिते सरीरए पन्नत्ते, तंजहा-कोहनिव्वत्तिए जाव लोभनिव्वत्तिए । एवं जाव वेमाणियाणं २।

[टी०] इदं च गुणनाशनादि शरीरेण क्रियत इति शरीरस्योत्पत्ति-निर्वृत्तिसूत्राणां दण्डकद्वयम्, कण्ठ्यं चैतत्, नवरं क्रोधादयः कर्म्मबन्धहेतवः, कर्म्म च शरीरोत्पत्ति-कारणमिति कारणकारणे कारणोपचारात् क्रोधादयः शरीरोत्पत्तिनिमित्ततया व्यपदिश्यन्त इति **चउहिं ठाणेहिं सरीरे**त्याद्युक्तम्, क्रोधादिजन्यकर्म्मनिर्वर्त्तितत्वात् क्रोधादिनिर्वर्त्तितं शरीरमित्यपदिष्टम्, इह चो**त्पत्ति**रारम्भमात्रं **निर्वृत्ति**स्तु निष्पत्तिरिति।

[सू० ३७२] चत्तारि धम्मदारा पन्नत्ता, तंजहा-खंती, मुत्ती, अज्जवे, मद्दवे।

[टी०] क्रोधादयः शरीरनिर्वृत्तेः कारणानीत्युक्तम्, तन्निग्रहास्तु धर्म्मस्येत्याह– **चत्तारि धम्मे**त्यादि, **धर्म्मस्य** चारित्रलक्षणस्य द्वाराणीव **द्वाराणि** उपायाः ।

[सू० ३७३] चउहिं ठाणेहिं जीवा णेरतियत्ताए कम्मं पकरेंति, तंजहा-महारंभताते, महापरिग्गहताते, पंचेंदियवहेणं, कुणिमाहारेणं १।

चउहिं ठाणेहिं जीवा तिरिक्खजोणियत्ताए कम्मं पगरेंति, तंजहा-माइल्लताते, णियडिल्लताते, अलियवयणेणं, कूडतुलकूडमाणेणं २।

चउहिं ठाणेहिं जीवा मणुस्सत्ताते कम्मं पकरेंति, तंजहा-पगतिभद्दताते, पगतिविणीयताए, साणुक्कोसताते, अमच्छरिततातें ३।

चउहिं ठाणेहिं जीवा देवाउयत्ताए कम्मं पकरेंति, तंजहा-सरागसंजमेणं, संजमासंजमेणं, बालतवोकम्मेणं, अकामणिज्जराए ४।

[टी०] क्षान्त्यादीनि धर्म्मद्वाराणीत्युक्तम्, अथारम्भादीनि नारकत्वादिसाधनकर्म्मणो द्वाराणीति विभागतः **चउहिं ठाणेही**त्यादिना सूत्रचतुष्टयेनाह, कण्ठ्यं चैतत्, नवरं **नेरइयत्ताए** त्ति नैरयिकत्वाय नैरयिकतायै नैरयिकतया वा **कर्म्म** आयुष्कादि, **महान्** इच्छापरिमाणेनाकृतमर्यादतया बृहन् **आरम्भः** पृथिव्याद्युपमर्दलक्षणो यस्य स **महारम्भः** चक्रवर्त्त्यादिः, तद्भावस्तत्ता, तया **महारम्भतया**, एवं **महापरिग्रहतया**ऽपि, नवरं परिगृह्यत इति **परिग्रहो** हिरण्य-सुवर्ण-द्विपद-चतुष्पदादिरिति, **कुणिम**मिति मांसम्, तदे**वाहारो** भोजनम्, तेन । **माइल्लयाए** त्ति मायितया, माया च मनःकुटिलता, **नियडिल्लयाए** त्ति निकृतिमत्तया, निकृतिश्च वञ्चनार्थं कायचेष्टाद्यन्यथाकरणलक्षणा अत्युपचारलक्षणा वा, तद्वत्तया, कूटतुलाकूटमानेन यो व्यवहारः स **कूटतुलाकूटमान** एवोच्यते, अतस्तेनेति । **प्रकृत्या** स्वभावेन **भद्रकता** परानुपतापिता या सा **प्रकृतिभद्रकता**, तया, **सानुक्रोशतया** सदयतया, **मत्सरिकता** परगुणासहिष्णुता, तत्प्रतिषेधोऽ**मत्सरिकता**, तयेति । **सरागसंयमेन** सकषायचारित्रेण, वीतराग-संयमिनामायुषो बन्धाभावात्, **संयमासंयमो** द्विस्वभावत्वाद्देशसंयमः, बाला इव **बाला** मिथ्यादृशस्तेषां **तपःकर्म्म** तपःक्रिया **बालतपःकर्म्म**, तेन, **अकामेन** निर्जरां प्रत्यनभिलाषेण **निर्जरा** कर्मनिर्जरणहेतुर्बुभुक्षादिसहनं यत् सा **अकामनिर्जरा**, तया।

[सू० ३७४] **चउव्विहे वज्जे पन्नत्ते, तंजहा-तते, वितते, घणे, झुसिरे १।**

चउव्विहे नट्टे पन्नत्ते, तंजहा-अंचिते, रिभिते, आरभडे, भसोले २।

चउव्विहे गेए पन्नत्ते, तंजहा-उक्खित्तए, पत्तए, मंदए, रोविंदए ३।

चउव्विहे मल्ले पन्नत्ते, तंजहा-गंथिमे, वेढिमे, पूरिमे, संघातिमे ४।

चउव्विहे अलंकारे पन्नत्ते, तंजहा-केसालंकारे, वत्थालंकारे, मल्लालंकारे, आभरणालंकारे ५।

चउव्विहे अभिणते पन्नत्ते, तंजहा-दिट्ठंतिते, पाडंसुते, सामंतोवातणिते, लोगमज्झावसिते ६।

[टी०] अनन्तरं देवोत्पत्तिकारणान्युक्तानि, देवाश्च वाद्य-नाट्यादिरतयो भवन्तीति वाद्यादिभेदाभिधानाय षट्सूत्री, तत्र **वज्जे** त्ति वाद्यम्, तत्र

ततं वीणादिकं ज्ञेयं विततं पटहादिकम् ।

घनं तु कांस्यतालादि वंशादि शुषिरं मतम् ॥ [ ] इति ।

नाट्य-गेया-ऽभिनयसूत्राणि सम्प्रदायाभावान्न विवृतानि ।

मालायां साधु **माल्यं** पुष्पम्, तद्रचनापि माल्यम्, **ग्रन्थः** सन्दर्भः सूत्रेण ग्रन्थनम्, तेन निर्वृत्तं **ग्रन्थिमं** मालादि, वेष्टनं वेष्टः, तेन निर्वृत्तं **वेष्टिमं** मुकुटादि, **पूरेण** पूरणेन निर्वृत्तं **पूरिमं** मृन्मयमनेकच्छिद्रं वंशशलाकादिपञ्जरं वा यत् पुष्पैः पूर्यत इति, सङ्घातेन निर्वृत्तं **सङ्घातिमं** यत् परस्परतः पुष्पनालादिसङ्घातनेनोपजन्यत इति । अलङ्क्रियते भूष्यतेऽनेनेत्**यलङ्कारः**, केशा एवालङ्कारः **केशालङ्कारः**, एवं सर्वत्र ।

[सू० ३७५] सणंकुमार-माहिंदेसु णं कप्पेसु विमाणा चउवण्णा पन्नत्ता, तंजहा-णीला, लोहिता, हालिद्दा, सुक्किला १।

महासुक्क-सहस्सारेसु णं कप्पेसु देवाणं भवधारणिज्जा सरीरगा उक्कोसेणं चत्तारि रतणीओ उड्ढंउच्चत्तेणं पन्नत्ता २।

[टी०] देवाधिकारवत्येव **सणंकुमारे**त्यादिका द्विसूत्री, सुगमा चेयम्, नवरं सनत्कुमार-माहेन्द्रयोश्चतुर्वर्णानि, कल्पान्तरेषु त्वन्यथा, तदुक्तम्–

सोहम्मे पंचवण्णा एक्कगहाणी उ जा सहस्सारो ।

दो दो तुल्ला कप्पा तेण परं पुंडरीयाओ ॥ [बृहत्सं० १३२]

द्वयोर्द्वयोः कल्पयोर्वर्णस्य हानिः कार्येत्यर्थः । तत्र भवे धार्यते तदिति तं वा भवं धारयतीति **भवधारणीयं** यज्जन्मतो मरणावधि । **कृतमुष्टिकस्तु रत्निः स एव विततााङ्गुलिररत्निः [ ]** इति वचने सत्यपि **रत्नि**शब्देनेह सामान्येन हस्तोऽभिधीयत इति, शुक्र-सहस्रारयोश्चतुर्हस्ता देवा अन्यत्र त्वन्यथा, यत आह–

भवण १० वण ८ इत्यादि [बृहत्सं० १४३-४४] ।

भवधारणीयान्येवम्, उत्तरवैक्रियाणि तु लक्षमपि सम्भवन्ति, उत्कृष्टेनैतत्, जघन्यतस्त्वङ्गुलासङ्ख्येयभागप्रमाणान्युत्पत्तिकाले भवधारणीयानि भवन्त्युत्तरवैक्रियाणि त्वङ्गुलसङ्ख्येयभागप्रमाणानीति ।

[सू० ३७६] चत्तारि दगगब्भा पन्नत्ता, तंजहा-उस्सा, महिया, सीता, उसिणा।

चत्तारि उदगगब्भा पन्नत्ता, तंजहा-हेमगा, अब्भसंथडा, सीतोसिणा, पंचरूविता-

माहे तु हेमगा गब्भा, फग्गुणे अब्भसंथडा ।
सीतोसिणा उ चेत्ते, वतिसाहे पंचरूविता ॥३०॥

[टी०] अनन्तरं देववक्तव्यतोक्ता, देवाश्चाप्कायतयाऽप्युत्पद्यन्ते इत्युदकगर्भप्रतिपादनाय **चत्तारी**त्यादि सूत्रद्वयमाह । **दगगब्भ** त्ति **दकस्य** उदकस्य गर्भा इव गर्भा **दकगर्भाः** कालान्तरे जलवर्षणस्य हेतवः, तत्संसूचका इति तत्त्वमिति, **अवश्यायः** क्षपाजलम्, **महिका** धूमिका, शीतान्यात्यन्तिकानि, एव**मुष्णा** घर्माः, एते हि यत्र दिन उत्पन्नास्तस्मादुत्कर्षेणाव्याहताः सन्तः षड्भिर्मासैरुदकं प्रसुवते, अन्यैः पुनरेवमुक्तम्–

पवनाभ्रवृष्टिविद्युद्गर्जितशीतोष्णरश्मिपरिवेषाः ।
जलमत्स्येन सहोक्ताः दशधा धातुप्रजनहेतुः ॥ [ ]

तथा– **शीता वाताश्च बिन्दुश्च गर्जितं परिवेषणम् ।**
सर्व्वगर्भेषु शंसन्ति निर्ग्रन्थाः साधुदर्शनाः ॥ [भद्रबाहु० १२।८]

तथा– **सप्तमे सप्तमे मासे सप्तमे सप्तमे ऽहनि ।**
गर्भाः पाकं नियच्छन्ति यादृशास्तादृशं फलम् ॥ [भद्रबाहु० १२।४]

हिमं तुहिनम्, तदेव हिमकम्, तस्यैते **हैमका** हिमपातरूपा इत्यर्थः, **अब्भसंथड** त्ति अभ्रसंस्थितानि, मेघैराकाशाच्छादनानीत्यर्थः, आत्यन्तिके **शीतोष्णे**, पञ्चानां **रूपाणां** गर्जित-विद्यु-ज्जल-वाता-ऽभ्रलक्षणानां समाहारः पञ्चरूपम्, तदस्ति येषां ते

पञ्जरूपिका उदकगर्भाः, इह मतान्तरमेवम्-

पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः ।
नात्यर्थं मार्गशीर्षे शीतं पौषेऽतिहिमपातः ॥
माघे प्रबलो वायुस्तुषारकलुषद्युती रविशशाङ्कौ ।
अतिशीतं सघनस्य च भानोरस्तोदयौ धन्यौ ॥
फाल्गुनमासे रूक्षश्चण्डः पवनोऽभ्रसम्प्लवाः स्निग्धाः ।
परिवेषाश्चासकलाः कपिलस्ताम्रो रविश्च शुभः ॥
पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः ।
घनपवनसलिलविद्युत्स्तनितैश्च हिताय वैशाखे ॥ [बृहत्संहिता २१।१९-२२] इति ।

तानेव मासभेदेन दर्शयति– **माहे**त्यादि श्लोकः।

[सू० ३७७] चत्तारि मणुस्सीगब्भा पन्नत्ता, तंजहा-इत्थित्ताते, पुरिसत्ताते, णपुंसगत्ताते, बिंबत्ताते-

अप्पं सुक्कं बहुं ओयं, इत्थी तत्थ पजातति ।
अप्पं ओयं बहुं सुक्कं, पुरिसो तत्थ जाततति ॥३१॥
दोण्हं पि रत्तसुक्काणं, तुल्लभावे णपुंसगो ।
इत्थीओयसमाओगे, बिंबं तत्थ पजायति ॥३२॥

[टी०] गर्भाधिकारान्नारीगर्भसूत्रं व्यक्तम्, केवलम् **इत्थित्ताए** त्ति स्त्रीतया, **बिम्ब**मिति गर्भप्रतिबिम्बं गर्भाकृतिरार्त्तवपरिणामो न तु गर्भ एवेति, उक्तं च–

अवस्थितं लोहितमङ्गनाया वातेन गर्भं ब्रुवतेऽनभिज्ञाः ।
गर्भाकृतित्वात् कटुकोष्णतीक्ष्णैः श्रुते पुनः केवल एव रक्ते ॥
गर्भं जडा भूतहतं वदन्ती [ ] त्यादि ।

वैचित्र्यं गर्भस्य कारणभेदादिति श्लोकाभ्यां तदाह- **अप्प**मित्यादि, **शुक्रं** रेतः पुरुषसम्बन्धि, **ओज** आर्त्तवं रक्तं स्त्रीसम्बन्धि यत्र गर्भाशय इति गम्यते इति, तथा स्त्रिया ओजसा समायोगो वातवशेन तत्स्थिरीभवनलक्षणः **स्त्र्योजःसमायोग**स्तस्मिन्

सति बिम्बं **तत्र** गर्भाशये प्रजायते, अन्यैरप्यत्रोक्तम्–

अत एव च शुक्रस्य, बाहुल्याज्जायते पुमान् ।
रक्तस्य स्त्री तयोः साम्ये, क्लीबः शुक्रार्त्तवे पुनः ॥
वायुना बहुशो भिन्ने, यथास्वं बह्वपत्यता ।
वियोनिविकृताकारा, जायन्ते विकृतैर्मलैः ॥ [ ] इति ॥

[सू० ३७८] उप्पायपुव्वस्स णं चत्तारि चूलवत्थू पन्नत्ता ।

[टी०] गर्भः प्राणिनां जन्मविशेषः, स चोत्पादोऽभिधीयते, उत्पादश्चोत्पादाभिधानपूर्वे प्रपञ्च्यते इति तत्स्वरूपविशेषप्रतिपादनायाह– **उप्पाये**त्यादि कण्ठ्यम्, नवरम् **उत्पादपूर्वं** प्रथमं पूर्वाणाम्, तस्य **चूला आचारस्याग्राणी**व, तद्रूपाणि **वस्तूनि** परिच्छेदविशेषा अध्ययनव**च्चूलावस्तूनि** ।

[सू० ३७९] चउव्विहे कव्वे पन्नत्ते, तंजहा-गज्जे, पज्जे, कत्थे, गेये ।

[टी०] उत्पादपूर्वं हि काव्यमिति काव्यसूत्रम्, कण्ठ्यं चैतत्, नवरं **काव्यं** ग्रन्थः, **गद्यम्** अच्छन्दोनिबद्धं **शस्त्रपरिज्ञाध्ययन**वत्, **पद्यं** छन्दोनिबद्धं **विमुक्त्यध्ययन**वत्, कथायां साधु **कथ्यं ज्ञाताध्ययन**वत्, **गेयं** गानयोग्यम्, इह गद्य-पद्यान्तर्भावेऽपीतरयोः कथा-गानधर्म्मविशिष्टतया विशेषो विवक्षित इति ।

[सू० ३८०] णेरतिताणं चत्तारि समुग्घाता पन्नत्ता, तंजहा-वेयणासमुग्घाते, कसायसमुग्घाते, मारणंतियसमुग्घाते, वेउव्वियसमुग्घाते । एवं वाउकाइयाण वि।

[टी०] अनन्तरं गेयमुक्तम्, तच्च भाषास्वभावत्वात् दण्ड-मन्थादिक्रमेण लोकैकदेशादि पूरयति, समुद्घातोऽप्येवमेवेति साधर्म्यात् समुद्घातसूत्रे सुगमे च, नवरं समुद्धननं **समुद्घातः** शरीराद् बहिर्जीवप्रदेशप्रक्षेपः, वेदनया समुद्घातः, कषायैः समुद्घातः, मरणमेवान्तो मरणान्तः तत्र भवो **मारणान्तिकः**, स एव समुद्घातः, वैक्रियाय समुद्घातः इति विग्रहा इति ।

[सू० ३८१] अरहतो णं अरिट्ठनेमिस्स चत्तारि सता चोद्दसपुव्वीणमजिणाणं

जिणसंकासाणं सव्वक्खरसन्निवातीणं जिणो इव अवितथं वागरमाणाणं उक्कोसिता चोद्दसपुव्विसंपया होत्था ।

[सू० ३८२] समणस्स णं भगवओ महावीरस्स चत्तारि सत्ता वादीणं सदेवमणुयासुराते परिसाते अपराजिताणं उक्कोसिता वादिसंपया होत्था ।

[सू० ३८३] हेट्ठिल्ला चत्तारि कप्पा अद्धचंदसंठाणसंठिता पन्नत्ता, तंजहा-सोहम्मे, ईसाणे, सणंकुमारे, माहिंदे ।

मज्झिल्ला चत्तारि कप्पा पडिपुन्नचंदसंठाणसंठिता पन्नत्ता, तंजहा-बंभलोगे, लंतते, महासुक्के, सहस्सारे ।

उवरिल्ला चत्तारि कप्पा अद्धचंदसंठाणसंठिता पन्नत्ता, तंजहा-आणते, पाणते, आरणे, अच्चुते ।

[टी०] वैक्रियसमुद्घातो हि लब्धिरूप उक्त इति लब्धिप्रस्तावात् विशिष्टश्रुतलब्धिमतामभिधानाय **अरहओ** इत्यादि सूत्रद्वयी सुगमा, नवर**मजिनाना**मसर्वज्ञत्वात्, **जिनसंकाशाना**मविसंवादिवचनत्वाद् यथापृष्टनिर्व्वक्तृत्वाच्च, **सर्वे अक्षराणाम्** अकारादीनां **सन्निपाता** द्व्यादिसंयोगा अभिधेयानन्तत्वादनन्ता अपि विद्यन्ते येषां ते **सर्वाक्षरसन्निपातिनः**, एतेषां जिनसंकाशत्वे कारणमाह- **जिणो विवे**त्यादि। **उक्कोसिय** त्ति नातोऽधिकाश्चतुर्दशपूर्विणो बभूवुः कदाचिदपीति ।

ते च प्रायः कल्पेषु गता इति कल्पसूत्राणि सुगमानि च, नवरम् **अद्धचंदसंठाणसंठिए** त्ति पूर्वापरतो मध्यभागे सीमासद्भावादिति ।

[सू० ३८४] चत्तारि समुद्दा पत्तेयरसा पन्नत्ता, तंजहा-लवणोदे, वरुणोदे, खीरोदे, घतोदे ।

[टी०] देवलोका हि क्षेत्रमिति क्षेत्रप्रस्तावात् समुद्रसूत्रं सुगमम्, नवरम् एकमेकं प्रति भिन्नो रसो येषां ते **प्रत्येकरसाः**, अतुल्यरसा इत्यर्थः, लवणरसोदकत्वाल्**लवणः**, **पा**ठान्तरे तु लवणमिवोदकं यत्र स **लवणोदो** निपातनादिति प्रथमः, **वारुणी** सुरा, तया समानं वारुणम्, वारुणमुदकं यस्मिन् स **वारुणोदः** चतुर्थः, क्षीरवत्तथा घृतवदुदकं

यत्र स **क्षीरोदः** पञ्चमः, **घृतोदः** षष्ठः, कालोद-पुष्करोद-स्वयम्भुरमणा उदकरसाः, शेषास्तु इक्षुरसा इति ।

[सू० ३८५] चत्तारि आवत्ता पन्नत्ता, तंजहा-खरावत्ते, उन्नतावत्ते, गूढावत्ते, आमिसावत्ते । एवामेव चत्तारि कसाया पन्नत्ता, तंजहा-खरावत्तसमाणे कोधे, उन्नत्तावत्तसमाणे माणे, गूढावत्तसमाणा माया, आमिसावत्तसमाणे लोभे १।

खरावत्तसमाणं कोहं अणुपविट्ठे जीवे कालं करेति णेरइएसु उववज्जति, उन्नतावत्तसमाणं माणं एवं चेव, गूढावत्तसमाणं मातमेवं चेव, आमिसावत्तसमाणं लोभमणुपविट्ठे जीवे कालं करेति नेरइएसु उववज्जति २।

[टी०] अनन्तरं समुद्रा उक्तास्तेषु चावर्त्ता भवन्तीत्यावर्त्तान् दृष्टान्तान् कषायांश्च तद्दार्ष्टान्तिकानभिधित्सुः सूत्रद्वयमाह, सुगमं चैतत्, नवरं **खरो** निष्ठुरोऽतिवेगितया पातकश्छेदको वा आवर्त्तनमावर्त्तः स च समुद्रादेश्चक्रविशेषाणां वेति **खरावर्त्तः**, **उन्नतः** उच्छ्रितः, स चासावावर्त्तश्चेति **उन्नतावर्त्तः**, स च पर्वतशिखरारोहणमार्गस्य वातोत्कलिकाया वा, गूढश्चासावावर्त्तश्चेति **गूढावर्त्तः**, स च गेन्दुकदवरकस्य दारुग्रन्थ्यादेर्वा, **आमिषं** मांसादि, तदर्थमावर्त्तः शकुनिकादीना**मामिषावर्त्त** इति, एतत्समानता च क्रोधादीनां क्रमेण परापकारकरणदारुणत्वात्, पत्र-तृणादिवस्तुन इव मनस उन्नतत्वारोपणात्, अत्यन्तदुर्ल्लक्षस्वरूपत्वात्, अनर्थशतसम्पातसङ्कुलेऽप्यव-पतनकारणत्वाच्चेति। इयं चोपमा प्रकर्षवतां कोपादीनामिति तत्फलमाह– **खरावत्ते**त्यादि, अशुभपरिणामस्याशुभकर्मबन्धनिमित्ततया दुर्गतिनिमित्तत्वादुच्यते– **णेरइएसु उववज्जइ** त्ति ।

[सू० ३८६] अणुराधानक्खत्ते चउतारे पन्नत्ते । पुव्वा आसाढा एवं चेव। उत्तरा आसाढा एवं चेव ।

[टी०] नारका अनन्तरमुक्ताः, तैश्च वैक्रियादिना समानधर्माणो देवा इति

तद्विशेषभूतनक्षत्रदेवानां चतुःस्थानकं विवक्षुः **अणुराहे**त्यादि सूत्रत्रयमाह, कण्ठ्यं चैतदिति ।

[सू० ३८७] जीवा णं चउट्ठाणनिव्वत्तिते पोग्गले पावकम्मत्ताते चिणिंसु वा चिणंति वा चिणिस्संति वा– नेरतियनिव्वत्तिते, तिरिक्खजोणितनिव्वत्तिते, मणुस्सनिव्वत्तिए, देवनिव्वत्तिते । एवं उवचिणिंसु वा उवचिणंति वा उवचिणिस्संति वा । एवं-

चिण उवचिण बंध उदीर वेत तह निज्जरा चेव ॥३३॥

[**टी०**] देवत्वादिभेदश्च जीवानां कर्मपुद्गलचयादिकृत इति तत्प्रतिपादनायाह- **जीवा णं**मित्यादि सूत्रषट्कं व्याख्यातं प्राक्, तथापि किञ्चिल्लिख्यते, **जीवा णं** ति **णं**शब्दो वाक्यालङ्कारार्थः, चतुर्भिः **स्थानकैः** नारकत्वादिभिः पर्यायै**र्निर्वर्त्तिताः** कर्म्मपरिणामं नीतास्तथाविधाशुभपरिणामवशाद् बद्धास्ते **चतुःस्थाननिर्वर्त्तिता**ः, तान् पुद्गलान्, कथं निर्वर्त्तितानित्याह-**पापकर्म्मतया** अशुभस्वरूपज्ञानावरणादिरूपत्वेन, **चिणिंसु** त्ति तथाविधापरकर्म्मपुद्गलैश्चितवन्तः, पापप्रकृतीरल्पप्रदेशा बहुप्रदेशीकृतवन्तः, **नेरइयनिव्वत्तिए** त्ति नैरयिकेण सता निर्वर्त्तिता इति विग्रहः, एवं सर्वत्र, तथा **एवं उवचिणिंसु** त्ति चयसूत्राभिलापेनोपचयसूत्रं वाच्यम्, **उवचिणिंसु** त्ति उपचितवन्तः पौनःपुन्येन, **एव**मिति चयादिन्यायेन बन्धादिसूत्राणि वाच्यानीत्यर्थः, इह च **एवं बन्धउदीरे**त्यादिवक्तव्ये यच्चयोपचयग्रहणं तत् स्थानान्तरप्रसिद्धगाथोत्तरार्द्धानुवृत्तिवशादिति, तत्र **बंध** त्ति बंधिंसु ३ श्लथबन्धनबद्धान् गाढबन्धनबद्धान् कृतवन्तः ३, **उदीर** त्ति उदीरिंसु ३, उदयप्राप्ते दलिके अनुदितांस्तान् आकृष्य करणेन वेदितवन्तः ३, **वेय** त्ति वेदिंसु ३, प्रतिसमयं स्वेन रसविपाकेनानुभूतवन्तः ३, **तह निज्जरा चेव** त्ति निर्जरिंसु ३ कात्स्न्र्येनानुसमयमशेषतद्विपाकहान्या परिशातितवन्तः ३ इति ।

[सू० ३८८] चउपदेसिया खंधा अणंता पन्नत्ता । चउपदेसोगाढा पोग्गला अणंता [पन्नत्ता], चउसमयट्ठितीया पोग्गला अणंता [पन्नत्ता], चउगुणकालगा

पोग्गला अणंता [पन्नत्ता], जाव चउगुणलुक्खा पोग्गला अणंता पन्नत्ता ।

॥ चउट्ठाणं समत्तं ॥

[टी०] पुद्गलाधिकारात् पुद्गलानेव द्रव्यादिभिर्निरूपयन्नाह- **चउप्पएत्यादि** सुगममिति ॥ इति चतुःस्थानकस्य चर्तुथ उद्देशकः ॥

इति श्रीमत्तपागच्छाधिराजभट्टारकपुरन्दरसूरीश्वर**श्रीविजयसेनसूरि**राज्ये
श्रीमत्तपागच्छशृंगारहारसूरीश्वर**श्रीविजयदेवसूरि**यौवराज्ये
पण्डित**श्रीकुशलवर्धनगणि**शिष्यनगर्षिगणिना स्ववाचनपरोपकारकृते
कृतोद्धाररूपयां श्रीसकलवाचकशिरोमणिमहोपाध्यायश्रीविमलहर्षगणिभिः
संशोधितायां सुखावबोधायां श्रीस्थानाङ्गदीपिकायां
चतुःस्थानकाख्यं चतुर्थमध्ययनं
समाप्तम्।